

आचार्य दण्डी

काव्यादर्श

(अनेक टीकाओं सहित)

सा
२०६६

- रत्नश्री
- हृदयङ्गमा
- प्रभा
- विवृति

प्रो० योगेश्वरदत्तशर्मा (पाराशरः)

NAG PUBLISHERS

नाग पब्लिशर्स

आचार्य दण्डी

काव्यादर्श

(अनेक टीकाओं सहित)

- रत्नश्री
- हृदयङ्गमा
- प्रभा
- विवृति

प्रो० योगेश्वरदत्तशर्मा (पाराशरः)

नाग प्रकाशक

आचार्य दण्डी-काव्यादर्श

(अनेक टीकाओं सहित)

चतुर्थ खण्ड

१ रत्नश्री २. हृदयङ्गमा

३. प्रभा ४. विवृति

सम्पादक:

प्रो० योगेश्वरदत्तशर्मा (पाराशरः)

हिन्दू कालेज, दिल्ली विश्वविद्यालय

दिल्ली-११०००७

NAG
PUBLISHERS

नाग पब्लिशर्स

११ ए/यू० ए०, जवाहर नगर, दिल्ली-११०००७

(भारत)

This Publication has been brought out with the financial assistance from Rashtriya Sanskrit Sansthan, New Delhi.

© लेखक

नाग पब्लिशर्स
(१) ११ए/यू. ए. जवाहर नगर, दिल्ली-११०००७
(२) जलालपुर माफी (चुनार-मिर्जापुर) उ० प्र०
दूरभाष-2915883, 3967975, 3957440

ISBN :81-7081-500-2 (Set)
ISBN : 81-7081-505-3 (Vol IV)

Acc. 39969
31161

प्रथम संस्करण : १९९९

मूल्य : 400/-

NEPAL SANSKRIT UNIVERSITY
पुस्तकालय

श्री सुरेन्द्र प्रताप द्वारा नाग पब्लिशर्स ११ ए०/यू० ए०, जवाहर नगर, दिल्ली ११०००७ द्वारा प्रकाशित तथा जी. आफसैट प्रिंटर्स ३०८/२ शहजादा बाग, दयाबस्ती दिल्ली ११००३५ द्वारा मुद्रित। अक्षरयोजक ए० आर० प्रिंटर्स, डी-१०२ न्यू सीलमपुर, दिल्ली-११००५३

सा · 3066

पुस्तकालय

विषयानुक्रमणिका

चतुर्थ खण्ड

विषयः **पत्राङ्कः**

तृतीये परिच्छेदे

यमकलक्षणं तद्विकल्पाश्च १४०७-१६३६
अव्यपेतयमकम् १४०७-१४५३
  प्रथमपादादि १४१९
  द्वितीयपादादि १४२२
  तृतीयपादादि १४२४
  चतुर्थपादादि १४२६
  प्रथमद्वितीयपादादि १४२८
  प्रथमतृतीयपादादि १४३१
  प्रथमचतुर्थपादादि १४३३
  द्वितीयतृतीयपादादि १४३५
  द्वितीयचतुर्थपादादि १४३८
  तृतीयचतुर्थपादादि १४४१
  प्रथमद्वितीयतृतीयपादादि १४४३
  प्रथमद्वितीयचतुर्थपादादि १४४५
  प्रथमतृतीयचतुर्थपादादि १४४८

विषयः **पत्राङ्कः**

द्वितीयतृतीयचतुर्थपादादि १४५०
पादचतुष्टयादि १४५३
व्यपेतयमकम् १४५७-१४८८
प्रथमद्वितीयपादादि १४५७
प्रथमतृतीयपादादि १४५९
प्रथमचतुर्थपादादि १४६१
द्वितीयतृतीयपादादि १४६३
द्वितीयचतुर्थपादादि १४६५
तृतीयचतुर्थपादादि १४६७
प्रथमद्वितीयतृतीयपादादि १४६९
प्रथमतृतीयचतुर्थपादादि १४७१
द्वितीयतृतीयचतुर्थपादादि १४७३
पादचतुष्टयादि १४७५
प्रथमतृतीययोर्द्वितीयतुरीययोश्चादि १४७७
द्वितीयतृतीययोः प्रथमतुरीययोश्चादि १४८१
अव्यपेतव्यपेतयमकम् १४८३-१४८९
प्रथमद्वितीययोस्तृतीयतुरीययोश्चादि १४८३
प्रथमतुरीययोर्द्वितीयतृतीययोरादि १४८९
पादचतुष्टयादि १४९२
पादादियमकोपसंहारः १४९६
दुष्करयमकप्रपञ्चः १४९९
चतुष्पादमध्यमेकरूपमव्यपेतम् १५०१
चतुष्पादमध्यमेकरूपं व्यपेतम् १५०४
चतुष्पादान्तमेकरूपं व्यपेतम् १५०७
चतुष्पादान्तमेकरूपमव्यपेतम् १५११

विषयः **पत्राङ्कः**

    - चतुष्पादमध्यान्तमेकरूपं व्यपेतम् १५१४
    - चतुष्पादमध्यान्तमेकरूपमव्यपेतव्यपेतम् १५१६
    - चतुष्पादादिमध्यमेकरूपंव्यपेतम् १५२१
    - द्विचतुर्थयोरादिमध्याव्यपेतव्यपेतमेकरूपम् १५२४
    - चतुष्पादाद्यन्तमेकरूपं व्यपेतम् १५३०
    - चतुष्पादाद्यन्तमेकरूपमव्यपेतव्यपेतम् १५३३
    - चतुष्पादादिमध्यान्तव्यपेतमेकरूपम् १५३९
    - चतुर्षु आदिमध्यान्ताव्यपेतव्यपेतम् १५४३
- सन्दष्टलक्षणम् १५५२
    - तदुदाहरणम् १५५४
- समुद्गलक्षणम् १५५७
    - व्यवहितसमुद्गम् १५६०
    - अव्यवहितसमुद्गम् १५६३
    - व्यवहिताव्यवहितसमुद्गम् १५६६
- पादाभ्यासः १५६९-१६०६
- श्लोकाभ्यासः १६०८
- महायमकम् १६१५
- संभिन्नयमकम् १६१९
- प्रतिलोमयमकम् १६२३
    - पादप्रतिलोमोदाहरणम् १६२५
    - अर्धप्रतिलोमोदाहरणम् १६३०
    - श्लोकप्रतिलोमोदाहरणम् १६३४
- गोमूत्रिकालक्षणम् १६४५
    - तदुदाहरणम् १६४९
    - अर्धभ्रमलक्षणम् १६५५

विषयः **पत्राङ्कः**

  - तदुदाहरणम् १६५९
- सर्वतोभद्रलक्षणम् १६६२
  - तदुदाहरणम् १६६७
- स्वरनियमः १६७५
- स्थाननियमः १६८२
- वर्णनियमः १६९७
- प्रहेलिकोद्देशः १७१४
  - तदुपयोगस्थानानि १७१६
  - समागतालक्षणम् १७१९
  - तदुदाहरणम् १७२१
  - वञ्चितालक्षणम् १७२३
  - तदुदाहरणम् १७४१
- काव्यदोषोद्देशः १७८९
  - प्रतिज्ञाहेतुदृष्टान्तहानिचर्चा १७९६
  - अपार्थम् १८०२
  - तदुदाहरणं सापवादम् १८०४
  - व्यर्थम् १८०८
  - तदुदाहरणं सापवादम् १८१२
  - एकार्थम् १८१७
  - तदुदाहरणं सापवादम् १८२०
  - ससंशयम् १८२९
  - तदुदाहरणं सापवादम् १८३१
  - अपक्रमम् १८४३
  - तदुदाहरणं सापवादम् १८४५
  - शब्दहीनम् १८५०

विषयः **पत्राङ्कः**
- तदुदाहरणं सापवादम् १८५४
- यतिभ्रष्टम् १८६२
- तदुदाहरणं सापवादम् १८६४
- यतिविषये विशेषः १८६८
- भिन्नवृत्तम् १८७५
- तदुदाहरणानि १८७७
- विसन्धि १८८१
- तदुदाहरणं सापवादम् १८८५
- देशकालकलालोकन्यायागमलक्षणानि १८८९
- देशविरोधोदाहरणानि १८९९
- कालविरोधोदाहरणानि १९०१
- कलाविरोधोदाहरणं सातिदेशम् १९१०
- लोकविरोधोदाहरणम् १९१३
- न्यायविरोधोदाहरणे १९१६
- आगमविरोधोदाहरणे १९२२
- विरोधापवादाः १९२७
- देशविरोधापवादोदाहरणम् १९२९
- कालविरोधापवादोदाहरणम् १९३२
- कलाविरोधापवादोदाहरणम् १९३५
- लोकविरोधापवादोदाहरणम् १९३७
- न्यायविरोधापवादोदाहरणम् १९३९
- आगमविरोधापवादोदाहरणम् १९४१

काव्यलक्षणनिगमनम् १९४४
ग्रन्थोपसंहारः १९४६
काव्यलक्षणश्लोकसूची १९५८-१९७४

तृतीयः परिच्छेदः।

तदेवमर्थालङ्कारं परिच्छिद्यानुप्रास[प्रस]ङ्गोक्तलक्षणानुवादेन यमकप्रपञ्चपुरःसरं दुष्करपरिच्छेदमारिप्सुराह–

अव्यपेतव्यपेतात्मा व्यावृत्तिर्वर्णसंहतेः।
यमकं तच्च पादानामादिमध्यान्तगोचरम्॥१॥

रत्नश्री

वर्णानां स्वरव्यञ्जनानां संहतेः समुदायस्य व्यावृत्तिरावृत्तिः पुनरुच्चारणम्। नैकस्य वर्णस्य, तस्या अनुप्रासत्वात्। यथोक्तम्–वर्णावृत्तिरनुप्रासः [१.५५] इति। तत्प्रसङ्गेन आवृत्तिमेव सङ्घातगोचरां यमकं विदुः [१.६१] इति कृतलक्षणं यमकम्। तदेवमनूद्य यमकं विधीयते। सा च व्यावृत्तिः [कीदृशी?] वर्णान्तरेणाव्यपेतोऽव्यवहितः व्यपेतो व्यवहितश्चात्मा स्वरूपं यस्या इत्यव्यपेतव्यपेतात्मा। तथा वर्णान्तराव्यवहिता वर्णसंहतेरावृत्तिरव्यपेतयमकम्। या तु व्यवहिता तद् व्यपेतयमकमिति द्विधा यमकं तावद् विकल्प्यते। तच्चैतद् द्विविधं यमकं विषयनिरूपणायामादिश्च मध्यश्चान्तश्च गोचरो विषयोऽस्येत्यादि- मध्यान्तगोचरं विज्ञेयम्। कस्य? पादानां प्रत्येकं चतुर्णां श्लोकावयवानाम्। सापेक्षार्थे गमकत्वात् समासः॥

पादचतुष्टयस्यादिमध्यान्तभाविनो यावन्तः प्रकाराः सम्भवन्ति तान् दर्शयति-

हृदयङ्गमा

द्वितीयपरिच्छेदे "काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते" इत्यनेन शब्दार्थालङ्कारसामान्यलक्षणमभिधाय शब्दस्य प्रथमबुद्धिविषयत्वेन प्रथमं लक्षयितुमुचितानपि शब्दालङ्कारान् अतिवैचित्र्याधायकत्वाभावात् अनिरूप्य वैचित्र्यातिशयाधायकाः अर्थालङ्कारा एव दर्शिताः। सम्प्रति प्रथमपरिच्छेदे सामान्यतो निरूपितेष्वपि शब्दालङ्कारेषु तृतीयपरिच्छेदे प्राप्तावसरतया अनुप्रासभिन्नान् तद्विशेषान् निरूपयिष्यन् दोषलक्षणञ्चाभिधास्यन् उक्तलक्षणमपि यमकमनूद्य तद्भेदमनुवदति, अव्यपेतेति। –अव्यपेतः अव्यवहितः, व्यपेतः व्यवहितश्च, आत्मा स्वरूपं यस्यास्तथाभूता, वर्णसंहतेः स्वरव्यञ्जनसङ्घातस्य, व्यावृत्तिः विशेषेण पुनरावृत्तिः, यमकम्। (अस्य विशेशलक्षणं पूर्वमेवोक्तमिति नात्रोक्तम्। यमकघटकपदानामव्यवहित-व्यवहितत्वेन भेदप्रदर्शनाय उक्तमव्यपेतेत्यादि, पूर्वोच्चारितवर्णसङ्घस्य क्वचिदव्यवधानेन क्वचित् व्यवधानेन च पुनरावृत्तिरिति प्रथमं भेदद्वयम् अभिहितम्। उक्तञ्च सरस्वतीकण्ठाभरणे, –"विभिन्नार्थैकरूपाया याऽऽवृत्तिर्वर्णसंहतेः। अव्यपेतव्यपेतात्मा यमकं तन्निगद्यते।।" इति)। यमकस्य तस्य स्थाननिरूपणार्थमाह, तच्चेति। –तच्च पादानाम् एक-द्वि-त्रिचतुरात्मकानां श्लोकचरणानाम्, आदिश्च मध्यश्च अन्तश्च गोचरः विषयः यस्य तत्। [ततश्च प्रथमपादस्यादिभागगतं मध्यभागगतम् अन्तभागगतञ्चैति विभागप्रकारः, एवं

द्वितीयादिपादानामपि आदिगतं मध्यगतम् अन्तगतञ्च। ततश्च पादानां खण्डत्रयगतत्वमेव यमकस्येति स्थाननियमस्तु नाशङ्क्यः, मध्यपदेन सम्भवत्खण्डमात्रस्य प्राप्तेः चतुरादिखण्डेष्वपि अस्य नियमः ज्ञातव्यः, यदुक्तं प्रकाशकारेण, –"त्रिखण्डे त्रिंशत् चतुःखण्डे चत्वारिंशत्" इति। एतदुपलक्षणं, तेन पादगतमपि बोध्यम् उक्तञ्च वामनेन, –"पादः पादस्यैकस्यानेकस्य चादिमध्यान्तभागाः स्थानानि" (का० सू० वृ० ४अधि० १अ० २सू०) इति। अत्रापि पाद इत्युपलक्षणं, तेन पादः पादखण्डाः पद्यार्द्धं समस्तपद्यञ्च यमकस्य स्थानानीति बोध्यम्। कण्ठाभरणेऽपि, –"तदव्यपेतयमकं व्यपेतयमकन्तथा। स्थानास्थानविभागाभ्यां पादभेदाच्च भिद्यते। तत्र पादादिमध्यान्ताः स्थानं तेषूपकल्पाते।।" इति]।।१।।

प्रभा

द्वितीयपरिच्छेदारम्भे काव्यशोभाकरान् धर्मानलंकारान् प्रचक्षते (२.१) इति शब्दार्थोभयसाधारणमलंकारलक्षणं विधाय तत्र चभत्कृतिप्राधान्यात् प्रथमं अर्थालंकाराः प्रतिपादिताः। इदानीमाचार्यः प्रथमपरिच्छेदे माधुर्यगुणप्रस्तावे सामान्यतः शब्दालंकारनिरूपणे–

आवृत्तिमेव संघातगोचरां यमकं विदुः।
तत् तु नैकान्तमधुरमतः पश्चाद्विधास्यते।। (१.६१)

इति प्रतिज्ञातं यमकालंकारनिरूपणं सप्रपञ्चमारभते– **अव्यपेतेति।** अव्यपेतः अव्यवहितः व्यपेतः व्यवहितः आत्मा स्वरूपं यस्यास्तादृशी। वर्णसंहतेः स्वरव्यञ्जनसंघातस्य व्यावृत्तिः

विशेषेण आवृत्तिः पुनः पुनरुच्चारणम्। सा यमकम्। एवं च पूर्वोच्चारितवर्णसंघातस्य क्वचिदव्यवधानेन क्वचिद् व्यवधानेनेति द्विविधं पुनरुच्चारणरूपं यमकस्य भेदद्वयं भवति। तच्च यमकं पादानां श्लोकचरणानां आदिमध्यान्तगोचरं भवति। पादस्य आदिगतं मध्यगतं अन्तगतं च भवति। एतदुपलक्षणम्। तेन पादखण्ड-पाद-पद्यार्ध-संपूर्णपद्यानां संग्रहः॥१॥

विवृति

अथ शब्दालङ्कारः।

[विवृत(बुध): श्रीधरं नत्वा सत्यवाक्यं जगत्पतिम्।

दण्डिनोऽलंकृतेष्टीकां कुरुते वादिजङ्घलः॥]

वैदर्भगौड(डीय)मार्गविभावनापरिच्छेदे माधुर्यमाचिख्यासुना-चार्येण 'तद्रुपा हि पदासत्तिः सानुप्रासा रसावहे' त्यनुप्रासप्रसङ्गेन [तल्लक्षणमुक्तम्]-

'वर्णावृत्तिरनुप्रासः पादेषु च पदेषु च।'

इति। अनुप्रासविशेषण एव यमकम्। (यदुक्तम्)-

'आवृत्तिमेव सङ्घातगोचरां(रं) यमकं विदुः।'

इति। अनुप्रासलक्षणाधिकारे प्रसङ्गतो यमकमप्युद्दिष्टम्-

तत्तु नैकान्तमधुरमतः पश्चाद्विधास्यते।

इति न प्रपञ्चितम्। त[दि]दानीं आसाधारणं श्लेषादि साधारणं च स्वभावाख्यानाद्यलङ्कारजातमुपवर्ण्य अवसरप्राप्तमव्यपेतेत्यादिना यम्कलक्षणं निर्दिशति-

वर्णानामक्षराणां संहतेः सङ्घातस्य विशेषेण पदपादार्धानुलोमप्रतिलोमादिना या आवृत्तिः आवर्तनं पुनः पुनरुक्तिः किंभूता अव्यपेतव्यपेतात्मा। अव्यपेतः पदपादादिना अव्यवहितः व्यपेतो व्यवहितः आत्मा स्वभावो यस्याः सा अव्यपेतव्यपेतात्मा व्यावृत्तिर्वर्णसंहतेः यमकमित्यनेन यमकलक्षणमुक्तम्। इदानीं तच्चेत्यादिना तस्य विषयं निरूपयति। **पादानामिति।** वृत्तस्य जातेर्वा आदिश्च मध्यं चान्तश्च गोचरो विषयः प्रदेशः स्थानं यस्य तत् पादानामादिमध्यान्तगोचरम्।।

प्रथमपरिच्छेदे वर्णावृत्तिरूपानुप्रासकथने– 'आवृत्तिं वर्णसङ्घातगोचरां यमकं विदुः। तत्तु नैकान्तमधुरमतः पश्चाद्विधास्यते'–इत्युक्तम्। द्वितीयपरिच्छेदे एतद्व्यतिरिक्ताः सर्वे अलङ्कारा दर्शिताः। अवसरप्राप्तोऽयमलङ्कारः प्रपञ्च्यते। यमकं लक्षयति–**अव्यपेतेति।** अत्र विभिन्नार्थायाः वर्णसंहतेः आवृत्तिः भवति यमकम्। विभिन्नेति विशेषणाभावे लाटानुप्रासे अतिव्याप्तिः स्यात्। विशेषणयोगेऽपि एकवर्णावृत्तिपरम्परायां अव्याप्तिः स्यात्; यथा–

विविधधववना नागगर्धर्घनाना–
विविततगगना नाममज्जज्जनाना।
रुरुशशललना नाववन्धुन्धुनाना
मम हि हिततनानाननस्वस्वनाना।।

इत्येकवर्णावृत्तिरूपस्य यमकस्य विद्यमानत्वात्। वर्णसंहतेः आवृत्तिरिति प्रयोगबाहुल्यात् उक्तमिति न अव्याप्तिः। वर्णान्तरैः अव्यवहिता अव्यपेता। वर्णान्तरैः व्यवहिता व्यपेता।।१।।

एकद्वित्रिचतुष्पादयमकानां विकल्पनाः।
आदिमध्यान्तमध्यान्तमध्याद्याद्यन्तसर्वतः॥२॥

रत्नश्री

एकपादयमकस्य द्विपादयमकस्य त्रिपादयमकस्य चतुष्पादयमकस्य [च] विकल्पना विकल्पाः प्रभेदाः कथ्यन्ते भवन्तीति वा शेषः। पादस्यैकस्य पादद्वयस्य पादत्रयस्य पादचतुष्टयस्य वा आदितो वा मध्यतो वान्ततो वा। आदौ मध्येऽन्ते वेति त्रयो विकल्पास्तावत्। मध्यतोऽन्ततश्चादिमं वर्जयित्वेति चतुर्थो विकल्पः। मध्यत आदितश्चान्त्यं विहायेति पञ्चमः। आदितोऽन्ततश्च मध्यं त्यक्त्वेति षष्ठः। सर्वत आदौ मध्येऽन्ते चेति सप्तमो विकल्पः। सर्वत इत्यस्यान्ते श्रुतस्य तसः प्रत्येकं सम्बन्धात्। सप्तम्यर्थश्चायम्। तथा च प्रथमं विवृतमादौ मध्येऽन्ते वेति। अन्यत्राप्येवं योज्यम्। यदा च सर्वतो यमकं तदा पादाभ्यासादयो विकल्पा जायन्ते॥

एते सप्त विकल्पा मौलाः परस्परसङ्करभाजोऽनेकधा प्रसरन्तीति दर्शयन्माह–

प्रभा

तत्र तावदादिमध्यान्तगोचरत्वेन सामान्यतो निर्दिष्टस्य यमकस्य पादस्थितिविकल्पनाभिः संभवतः प्रभेदान् दर्शयति–**एकेति।** एकद्वित्रिचतुष्पादयमकानां एकद्वित्रिचतुष्पादस्थितानां यमकानाम्। विकल्पनाः विविधप्रभेदा भवन्तीत्यर्थः। ते च यथा–प्रथमपादे

द्वितीयपादे तृतीयपादे चतुर्थपादे इति एकपादयमकभेदाश्चत्वारः। प्रथमद्वितीययोः प्रथमतृतीययोः प्रथमचतुर्थयोर्द्वितीयतृतीययोर्द्वितीयचतुर्थयोस्तृतीयचतुर्थयोरिति द्विपादयमकभेदाः षट्। प्रथमद्वितीयतृतीयेषु प्रथमद्वितीयचतुर्थेषु प्रथमतृतीयचतुर्थेषु द्वितीयतृतीयचतुर्थेषु इति त्रिपादयमकभेदाश्चत्वारः। चतुष्पादयमकं तु एकमेव। एवं पादयमकस्य पञ्चदश भेदाः संभवन्ति। एवं पादविकल्पनाभिः संभवतः प्रभेदान् प्रदर्श्य पादेपि आदिमध्यान्तादिभिः संभवतो भेदान् निर्दिशति–**आदीति।** उपरिनिर्दिष्टाः पञ्चदश प्रकारा आदयमकत्वेन मध्ययमकत्वेन अन्तयमकत्वेन आदिमध्ययमकत्वेन आद्यन्तयमकत्वेन मध्यान्तयमकत्वेन आदिमध्यान्तयमकत्वेन च सप्तधा संभवन्ति। अतः सर्वेषां मेलने पञ्चाधिकशतं भवति। तच्च पुनः अव्यपेतव्यपेतव्यपेताव्येपेतेति भेदत्रयेण पञ्चदशाधिकत्रिशतीपरिमितं भवति इति दिक्। प्रथमश्लोके आदिमध्यान्तगोचरम् इति सामान्यतो भेददर्शनार्थं निर्दिष्टम्। अत्र तद्विशेषो दर्शित इति न पौनरुक्त्यम्।।२।।

विवृति

इदानीं तत्प्रभेदानाह–

एकः[श्च] द्वौ च त्रयश्च चत्वारश्च। ते च पादाश्च। तेषु यानि यमकानि, तेषां या विकल्पनाः। कति भवन्तीत्याह– 'आदिमध्यान्तमध्यान्तमध्याद्याद्यन्तसर्वतः' भवन्ति। आदिश्च मध्यश्चान्तश्च मध्यातौ च मध्यादि चाद्यन्तौ च सर्वतश्च सर्वेषु सर्वत्र त्रिष्वपि स्थानेष्विति। तथा हि। पादादियमकमेकम्,

अन्यत्पादमध्यम्, (ध्ये) अपरं पादान्ते, पादस्य मध्यान्तयोरन्यत्, मध्याद्योरन्यत्, आद्यन्तयोश्चापरं, पादस्यादौ मध्ये चान्ते चान्यदिति।।

स्थानविकल्पनानि आह–**एकेति**। प्रथमपादे द्वितीयपादे तृतीयपादे चतुर्थपादे इति एकपादादियमकाः चत्वारः। प्रथमद्वितीययोः प्रथमतृतीययोः प्रथमचतुर्थयोः द्वितीयतृतीययोः द्वितीयचतुर्थयोः तृतीयचतुर्थयोः इति द्विपादादियमकभेदाः षट्। प्रथमद्वितीयतृतीयेषु प्रथमद्वितीयचतुर्थेषु प्रथमतृतीयचतुर्थेषु द्वितीयतृतीयचतुर्थेषु इति त्रिपादादियमकभेदाः चत्वारः। चतुष्पादादियमकं एकम्। इति पादादिभेदस्य पञ्चदश भेदाः। एवं मध्ययमकस्य अन्तयमकस्य आदिमध्ययमकस्य आद्यन्तयमकस्य मध्यान्तयमकस्य आदिमध्यान्तयमकस्य च। इति सप्तानां प्रत्येकं पञ्चदशेति पञ्चाधिकशतम् अव्यपेतस्य। तथा व्यपेतस्य।।२।।

अत्यन्तबहवस्तेषां भेदाः सम्भेदयोनयः।
सुकरा दुष्कराश्चैव दृश्यन्ते तत्र केचन॥३॥

रत्नश्री

तेषां सप्तानां [93a] विकल्पानां सम्भेदः सङ्करो मिश्रत्वमुच्चावचप्रकारः योनिः प्रभवो येषां ते सम्भेदयोनयः। भेदाः प्रकाराः अत्यन्तबहवो भूयांसो भवन्ति। एकत्र श्लोके क्वचिदादियमकं क्वचिन्मध्ययमकं क्वचिदन्तयमकं क्वचिन्मध्यान्तयमकं क्वचिन्मध्यादियमकं क्वचिदाद्यन्तयमकं क्वचित् सर्वत्र इत्येवमेतेऽनेकधा प्रसरन्ति। ते चैते सुखेन क्रियन्ते प्रयुज्यन्त इति सुकराः, तद्विपरीताश्च दुष्करा इति द्विधा पुनः संगृह्यन्ते। तत्र ते सुकरेषु दुष्करेषु च केचन केचिद् भेदा न सर्वेऽतिप्रसङ्गाद् दृश्यन्ते उदाह्रियन्ते॥

हृदयङ्गमा

स्थानभेदेन यमकभेदमभिधाय पादगतं भेदं दर्शयन् क्रमेण तत्तद्भेदान् निर्दिशति, एकेत्यादि। –एकद्वित्रिचतुष्पाद यमकानाम् अविमिश्राणामिति भावः, विकल्पनाः "पादानामादिमध्यान्तगोचरम्" इत्यनेन अनन्तरमेव सामान्यत उक्ताः प्रभेदाः, ज्ञातव्या इति शेषः, पदचतुष्टयात्मकस्य पद्यस्य प्रतिपादम् आदिमध्यान्तगतत्वेन त्रिधा भिन्नस्य तस्य पुनः द्वादशविधत्वं ज्ञातव्यम् इत्यर्थः। (ते च अमिश्रयमके एव वेदितव्याः। तथा हि, अमिश्रितं प्रथमपादादिगतं द्वितीयपादादिगतं तृतीयपादादिगतं चतुर्थपादादिगतञ्चेति चतुर्विधमादिभागयमकम्, एवं प्रथमादिपादमध्यान्तभागगंतयमकमपि, ततश्च मिलित्वा द्वादशविधत्व-

मविमिश्रितयमकस्य इति सङ्क्षेपः। अयञ्च भेदः अव्यपेतव्यपेतसाधारणः। केचित्तु एकद्वीत्यादि श्लोकार्द्धमेवं व्याख्यानयन्ति, तद्यथा, –''पद्यस्य चतुष्पादात्मकत्वात् प्रतिखण्डं चत्वारश्चत्वारो भेदा ज्ञातव्या इत्यर्थः, यथा अविमिश्रितमादिभागयमकं प्रथमपाद एव द्वितीयपाद एव तृतीयपाद एव चतुर्थपाद एवेति चतुर्विधं, तथा मध्यादिभागयमकमपि प्रत्येकं चतुर्विधमिति'' इति)। अभिश्रभेदं दर्शयित्वा मिश्रयमकभेदं दर्शयति, आदीति।–सम्भेदः सजातीययमकानामन्योन्यसम्मिश्रणं योनिर्येषां तादृशाः विमिश्रा इत्यर्थः, तेषां यमकानां, भेदाः आदिमध्यान्तमध्यान्तमध्याद्याद्यन्त-सर्वतः स्थितत्वेन अत्यन्तबहवः अतिविस्तराः, ज्ञेया इति शेषः। (पदच्छेदस्तु आदिमध्यान्त मध्यान्त मध्याद्य आद्यन्त सर्वतः इत्येवंरूपेणेति। सर्वत्र मध्यशब्दः द्वितीयतृतीयपादबोधकः, शेषमादिपदञ्च प्रथमद्वितीयतृतीयपादबोधकं, त्रयाणामपि प्रथमादिपादानां चतुर्थपादस्य पूर्वस्थितत्वेनादित्वात्; ततश्च आदिमध्यान्तेत्यत्र मध्यपदस्य द्वितीयतृतीयपादद्वयात्मकत्वात् आदिमध्यगतत्वेन द्वौ आद्यन्तगतत्वेनैकः इति मिलित्वा त्रयो भेदाः ज्ञेयाः ; ते च त्रयः प्रथमद्वितीय (आदिमध्य) पादगतत्वेन, प्रथमतृतीय (आदिमध्य) पादगतत्वेन, प्रथमचतुर्थ (आद्यन्त) पादगतत्वेन चेति बोद्धव्यम्। मध्यान्तेत्यत्रापि मध्यपदस्य द्वितीयतृतीयपादद्वयबोधकत्वात् भेदत्रयमेव बोध्यम्; तद्यथा, द्वितीयतृतीयपादयोः (मध्यमध्ययोः) एकः, द्वितीयचतुर्थपादयोः तृतीयचतुर्थपादयोश्च मध्यान्तत्वेन द्वौ इति मिलित्वा त्रयः प्रकाराः। मध्याद्येत्यत्र द्वितीयतृतीयपादयोर्मध्यत्वात् प्रथमद्वितीयतृतीय-पादगतत्वेनैक एव भेदः। अत्र आद्यश्च मध्यौ चेति विग्रहे

धर्मार्थादिपाठात् आद्यशब्दस्य परनिपातः। आद्यन्तेत्यत्र आदिपदस्य प्रथमद्वितीयतृतीयपादपरत्वात् त्रय एव भेदाः सम्भवन्ति, यथा, प्रथमद्वितीयचतुर्थपादगतः प्रथमतृतीयचतुर्थपादगतः, द्वितीयतृतीय-चतुर्थपादगतश्चेति तत् प्रकाराः। सर्वत इत्यत्र च प्रथमद्वितीयतृतीयचतुर्थपादगतत्वेनैक एव भेदः। एवं मिलित्वा व्यामिश्रयमकस्य एकादशभेदाः बोद्धव्याः, अन्ये च अस्थानस्थूलसूक्ष्मादियमकभेदाः भोजादौ द्रष्टव्याः। सर्वत इति सप्तमीबहुवचनान्तपदं, सर्वेषु पादेषु इत्यर्थः)। ते च सुकराः सुसाध्याः सुबोधाश्च, दुष्कराश्चैव दुःसाध्याः दुर्बोधाश्चैव, कवीनां बोद्धृणाञ्चेति शेषः, अतः अत्र केचन दर्श्यन्ते उदाह्रियन्ते इत्यर्थः, न तु सर्वे इति भावः। (''तेऽत्र'' इत्यत्र ''तत्र'' इति भोजोक्तपाठः)।।२।।३।।

प्रभा

इदानीं सजातीयविजातीययमकसंमिश्रणेन सामान्यतः प्रभेदबाहुल्यं निवेद्योपसंहरति–**अत्यन्त इति**। तासां विकल्पनानां प्रभेदानामित्यर्थः। संभेदयोनयः संभेदाः सजातीयविजातीययमकानां मिश्रणानि योनयः कारणानि येषां ते सजातीयविजातीययमक-मिश्रणेन संभूता भेदा इत्यर्थः। अत्यन्तबहव इयत्तया परिच्छेत्तुं दुर्घटाः सन्तीति भावः। तत्र केचन सुकराः केचन दुष्कराश्च वर्तन्ते। तेषु केचन प्रकारा वर्ण्यन्ते अस्माभिः शिष्यशिक्षार्थं प्रदर्श्यन्ते इत्यर्थः।।३।।

विवृति

एवमेकद्वित्रिचतुष्पादानां आदिमध्यान्तभेदेन मध्यान्त-

मध्याद्याद्यन्तसर्वतश्च पादपदा(व्यवहित)व्यवहितोभय-सङ्कीर्णभेदतोऽत्यन्तबहवः। तेषां यमकानां भेदा विकल्पाः सम्भेदः साङ्कर्यं योनिरुत्पत्तिस्थानं येषां ते संभेदयोनयः। तेषु च यमकेषु केचित् सुखेन क्रियन्ते सुकराः दुःखेन क्रियन्त इति दुष्कराः तेषुः उभयेषु प्रदर्श्यन्ते केचन। तथा हि–दिङ्मात्रप्रदर्शनार्थं सुकरा अव्यवहिताः मानेनेत्यादयः, सुकरा व्यवहिताः मधुरेणेत्यादयः व्यवहिताव्यवहिताः नयानयेत्यादयः, सङ्कीर्णा धराधरेत्यादयः, दुष्कराः अव्यवहितव्यवहितोभयसङ्कीर्णरूपाश्च स्थिरायत इत्यादयः।।

अतीति। तासां सम्भेदयोनयः परस्परमिश्रणेन जाताः भेदाः वक्तुं शक्यन्ते। तत्र अव्यपेतव्यपेतयोः, अव्यपेते व्यपेते च, सुकराः दुष्कराश्च केचन वर्ण्यन्ते।

यत्स्यादपुनरुक्ताय पुनरुक्तमनन्तरम्।
पदानामक्षराणां वा स्यात्तद्यमकलक्षणम्।।
तदादिमध्यान्तसमानपादव्युत्क्रान्तसामुद्गसमाह्वयानि।
आद्यन्तमन्तादि च काव्ययोगेष्वष्टौ समासाद्यमकान्युशन्ति।।३।।

मानेन मानेन सखि प्रणयोऽभूत् प्रिये जने।
खण्डिता कण्ठमाश्लिष्य तमेव कुरु सत्रपम्।।४।।

रत्नश्री

सखि! प्रिये जने विषयेऽनेन सङ्गमसुखविरोधिना मानेन प्रातिकूल्येन सह प्रणयपरिचयो मा भूत्। तव मानो न कार्य इति यावत्। यदि न मानः कर्तव्यः किमिदानीं क्रियताम्? येन खण्डिता वञ्चितासि तस्य कण्ठमाश्लिष्य तमेव प्रियं कृतव्यलीकं सत्रपं सलज्जं कुरु विनयवर्त्मना तमेव विलक्षं विधेहि। किं मानेनेति? शब्दार्थप्रधानमेतद् यमकव्याख्यानं क्रियते, भावार्थचर्चाया-मतिविस्तरप्रसङ्गात्। इदं प्रथमपादादियमकम्।।

हृदयङ्गमा

तत्र प्रथमपादस्थमव्यवहितममिश्रम् आदिभागयमकं निर्दिशति, मानेनेति।—हे सखि! प्रिये जने प्रणयिनि, अनेन ईदृशेन, अतिप्रबलत्वादस्माकमपि पीड़ाजनकेनेति भावः, मानेन ईर्ष्याकोपेन सह, (“मानः कोपः स तु द्वेधा प्रणयेर्ष्यासमुद्भवः” इति लक्षणात्) प्रणयः परिचयः, तवेति शेषः, मा भूत्, प्रियजनं प्रति एतादृशं मानं मा कुरु इत्यर्थः, खण्डिता, —“पार्श्वमेति प्रियो यस्या अन्यसम्भोगचिह्नितः। सा खण्डितेति कथिता धीरैरीर्ष्याकषायिता।।” इत्युक्तलक्षणा, अपि त्वमिति शेषः, कण्ठमाश्लिष्य आलिङ्ग्य, तं प्रियमेव, सत्रपं सलज्जं, कुरु, अपकारिणि प्रणयप्रदर्शनमेव तस्य लज्जाकरत्वात् गुरु शासनमिति भावः। (अतिमानिनीं खण्डितां प्रति तत्सख्या उक्तिरियम् अत्र “मानेन मानेन” इति अव्यवहितमादिपादगतमादिभागयमकं, तच्च

पादान्तरासङ्कीर्णत्वादमिश्रम्। यत्र तु पादान्तरमिश्रितत्वं तत्र मिश्रत्वमन्यत्र शुद्धत्वमिति भेदोऽपि व्यपेताव्यपेतवत् स्वयमूहनीयः इति)।।४।।

प्रभा

तत्रादौ प्रथमपादस्थमव्यवहितममिश्रमादियमकमुदाहरति– **मानेनेति।** हे सखि प्रिये जने अनेन मानेन सह तव प्रणयः स्नेहः मा भूत् मा भवतु। कोपकलुषिता प्रियपराङ्मुखी मा भवेत्यर्थः। खण्डिता–

पार्श्वमेति प्रियो यस्या अन्यसंभोगचिह्नितः।
सा खण्डितेति कथिता धीरैरीर्ष्याकषायिता।।

इत्युक्तलक्षणा। तादृशी त्वं कण्ठमाश्लिष्य तमेव सत्रपं संजातलज्जम् कुरु। अपकारिणि प्रणयदर्शनमेव तस्य सविशेषलज्जोत्पादकत्वाच्छासनमिति भावः। अन्ये तु हे सखि अनेन मानेन मानिनीवृत्तिस्वीकारेण प्रिये जने नायके स्नेहो मा भूत् स्नेहोत्पत्तिर्नासीत्। मानेङ्गीकृते सस्नेहो मामनुनेष्यति इति तवेच्छा सफला नाभूदित्यर्थः। अतः खण्डिता वञ्चिता त्वं कण्ठमाश्लिष्येति पूर्ववदेतत्पद्यं विवृण्वन्ति। अत्र मानेन मानेन इत्यव्यवहितमादिपादगतमादियमकम्।।४।।

विवृति

तत्राव्यपेतं प्रथमपादादियमकमाह–

इति। गर्वेणानेन एवंविधः[धंन] प्रणयः सम्बन्धः,सखि मा भूत्। मानमेवंविधं प्रियतमविषये मा कार्षीः इति काचित् कान्तं

प्रति कुपिता मानिनी सख्यैवमनुनीयते, हे सखि, त्वं खण्डिता, त्वं विप्रलब्धा तस्य कण्ठमाश्लिष्य आलिङ्ग्य तमेव प्रियं सत्रपं सलज्जं कुरु। इयं साध्वी मया वञ्चिताऽपि स्वभावादनुरक्ता। अननुनीताऽपि स्वयमागता। अहं पुर्निधृणः कृतापराधोऽपि न तामनुनयामीति मत्वा त्वयि गतायां स दयितः सलज्जः स्वयं भविष्यतीति। [खण्डिता(त)मिति पाठः। तदा खण्डितं नखेन व्रणितं कण्ठमुपगुह्येत्यर्थः।]

एकपादादियमकानि चतुर्भिरुदाहरणैर्दर्शयति–**मानेनेति**। सखि प्रियजने सापराधे अनेन मानेन सह प्रणयो मा भूत। तस्मिन् अन्यासक्ते ज्ञातेऽपि, तत् अनादृत्य स्वयमेव कण्ठमाश्लिष्य तमेव सत्रपं कुरु, इति प्रसादिता सख्या नायिका।।४।।

मेघनादेन हंसानां मदनो मदनोदिना।
नुन्नमानं मनः स्त्रीणां सह रत्या विगाहते॥५॥

रत्नश्री

मदनः कामः रत्या कलत्रेण सह स्त्रीणां मनो विगाहते प्रविशति। किंविशिष्टम्? हंसानां मदं नुदतां मेघानां नादेन नुन्नो निरस्तो मानोऽस्येति नुन्नमानं मानसं वा अवेहि। तस्मिन्नवकाशमसौ लभते। इदं द्वितीयपादादियमकम्॥

हृदयङ्गमा

द्वितीयपादगतं तदेव निर्दिशति, मेघनादेनेति। –मदनः कामः, रत्या स्वपत्न्या अनुरागेण च, सह हंसानां मदनोदिना गर्वमपनयता, मेघनादेन मेघगर्जितेन, वर्षासु हंसानां निर्मदत्वप्रसिद्धेरिति भावः, नुन्नः अपनीतः, मानो यस्मात् तथोक्तं, स्त्रीणां मनः चित्तं, विगाहते आलोड़यति, व्याकुलयतीत्यर्थः, मेघगर्जनस्य उद्दीपकत्वात् वर्षासु प्रमदानां मनः सानुरागं सकामञ्च भवतीति भावः। (अत्र "मदनो मदनो" इति द्वितीयपादगतमविमिश्रमव्यवहितमादिभागयमकम्)॥५॥

प्रभा

तदेव द्वितीयपादगतमुदाहरति–**मेघेति**। मदनः हंसानां मदनोदिना मदापहारिणा। वर्षासु हंसानां निर्मदत्वादिति भावः मेघनादेन घनगर्जितेन। नुन्नो दूरीकृतो मानो यस्मात् तत्। उत्कण्ठातिशयाधानादिति भावः। एतादृशं स्त्रीणां मनः कर्म रत्या अनुरक्त्या स्वप्रेयस्या च सह विगाहते आलोडयति।

घनगर्जितमाकर्ण्य सर्वासामबलानां चेतो विगतमानमनुरक्तं चाभूदित्यर्थः॥५॥

विवृति

द्वितीयपादाद्यव्यपेतं यमकमुदाहरति—

घनगर्जितेन, किंभूतेन, हंसानां मदनोदिना मदं नुदति निरस्यत्येवंशीलं यत्तेन नुन्नमानं मनः स्त्रीणां नुन्नः निरस्तः मानो गर्वः कापो वा [यस्य] तन्मदनः स्मरः रत्या स्वभार्यया सह विगाहते सकुटुम्बः अध्यास्त॥

मेघेति। हंसानां मदनोदिना हर्षहारिणा मेघनादेन प्रेरितमानं स्त्रीणां मनः सह रत्या मदनो विगाहते। प्रावृषि मानिन्यः त्यक्तमानाः स्वयमेव रत्यै प्रवृत्ताः इत्यर्थः॥५॥

राजन्वत्यः प्रजा जात्ता भवन्तं प्राप्य साम्प्रतम्।
चतुरं चतुरम्भोधिरसनोर्वीकरग्रहे॥६॥

रत्नश्री

चत्वारः पूर्वादयोऽम्भोधयः परिखे[वोप]योगादिसाधर्म्येण रसना मेखला यस्याः तस्या उर्व्या भुवः करो हस्तो बलिश्चेति श्लिष्टम्। तस्य ग्रहे उपादाने चतुरं भ[वन्तं] प्राप्य प्रजा जना राजन्वत्यः सौराज्ययोगात् जाता अभूवन साम्प्रतमद्येति तृतीयपादादियमकम्॥

हृदयङ्गमा

तृतीयपादगतं तदेवोदाहरति, राजन्वत्य इति। –चतुरम्भोधिरसनायाः चत्वारः अम्भोधयः सागरा एव, रसनाः काञ्चीदामानि, कटीभूषणविशेषा इत्यर्थः, यस्याः तस्याः, चतुःसागरपरिच्छिन्नाया इति यावत्, उर्व्याः पृथिव्याः, करग्रहे षष्ठांशरूपराजग्राह्यभागग्रहणे पाणिग्रहे च, चतुरम् निपुणम्, आसमुद्रकरग्राहिणमित्यर्थः, भवन्तं सत्पतिं सुरक्षकं सुभर्त्तारञ्च, प्राप्य प्रजाः राजन्वत्यः सुनृपतियुक्ताः, ("सुराज्ञि देशे राजन्वान् स्यात्ततोऽन्यत्र राजवान्" इत्यमरः) जाताः। (अत्र "चतुरं चतुरम्" इति तृतीयपादगतमव्यवहितमादिभागयमकं शुद्धम्)॥६॥

प्रभा

तृतीयपादगतं तदेव यमकमुदाहरति–**राजन्वत्य** इति। कश्चिन्न्यायानुवर्तिनं नृपं स्तौति। हे राजंश्चत्वारो ये अम्भोधयः समुद्रास्ते एव रशना मेखला यस्यास्तादृश्या उर्व्याः पृथ्व्याः करग्रहे

राजग्राह्यभागग्रहणे पाणिग्रहणे च चतुरं कुशलम् भवन्तं प्राप्य संप्रति प्रजा राजन्वत्यो जाताः। सुराज्ञि देशे राजन्वान् स्यात ततोन्यत्र राजवान् (२.१३) इत्यमरः। राजन्वान् सौराज्ये इति निपातनात् साधुः।।६।।

विवृति

तृतीयपादाद्यव्यपेतं यमकमाह–

शोभनो राजा यस्यां सा [यासां ता]राजन्वत्यः। का इत्याह प्रजाः लोकाः। संप्रति इदानीं भवन्तं त्वां प्राप्य। किंभूतं चतुरं कुशलं, कस्मिन्, चतुरम्भोधिरशनोर्विकरग्रहे। चत्वारः अम्भोधय एव रशना मेखला यस्याः सा तथाभूता। सा च (सा)उर्वी च पृथ्वी तस्याः करः धान्यषड्भागादिः पाणिश्च। तस्य ग्रहे ग्रहणे इति।।

राजन्वत्य इति। अत्र राजन् इति पदमध्याहार्यम्।।६।।

अरण्यं कैश्चिदाक्रान्तमन्यैः सद्म दिवौकसाम्।
पदातिरथनागाश्वरहितैरहितैस्तव॥७॥

रत्नश्री

तवाहितैः शत्रभिः कैश्चित्पलायमानैररण्यमाक्रान्तम्। उत्सृष्टगृहै[र्वनं] प्रविष्ट[मित्यर्थः]। [93b] अन्यैस्त्वत्कृपाणभ्रमोज्झितप्राणैदिवौकसां सद्म स्वर्गमाक्रान्तमारूढम्। किंभूतैः? पदातिभिः रथैर्नागैरश्वैश्च रहितैस्त्यक्तैः। [अत्रारण्यगमनं स्वर्गगमनं वा भुवि निःस]हायत्वात्। तेन वा [भवत्त]स्तेषामाच्छादनात्। इदं चतुर्थपादादियमकम्॥

हृदयङ्गमा

चतुर्थपादगतं तदेव निर्द्दिशति, अरण्यमिति। –तव कैश्चित् अहितैः शत्रुभिः, पलायित्वा जीवद्भिरिति भावः, पदातिरथनागाश्वरहितैः चतुरङ्गबलविहीनैः सद्भिरित्यर्थः, ("हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयम्" इत्यमरः) अरण्यं, पलायित्वा जीवतां लोकालये अवस्थानासम्भवादिति भावः, तथा कैश्चिच्च अहितैः, सम्मुखसङ्ग्रामेण मृतैरिति भावः, (अत्रापि पदात्यादिरहितैरिति योजनीयम्) दिवौकसां सद्म सुरलोकः, आक्रान्तम् आश्रितमित्यर्थः, युद्धे मरणस्य स्वर्गप्रापकत्वादिति भावः, ("हती वा प्राप्सासि स्वर्गं जित्वा वा भोक्ष्यसे महीम्" इति गीतायां भगवदुक्तेः। अत्र "रहितैरहितै" इति चतुर्थपादगतमव्यवहितमर्मिश्रमादिभागयमकम)॥७॥

प्रभा

तदेव चतुर्थपादगतमुदाहरति-**आरण्यमिति**। पदातिः पत्तिः रथा नागा गजा अश्वाश्च तै रहितैः वियुक्तैः। तव कैश्चिद् अहितैः शत्रुभिः समरात् पलाय्य अरण्यम् आक्रान्तम् व्याप्तम्। तत्र निगूहिताः सन्तः स्थिता इति भावः। तथा अन्यैः समरे संमुखीभूय मृतैरित्यर्थः। दिवौकसां देवानाम् सद्म स्थानं स्वर्ग इत्यर्थः। आक्रान्तम्।।७।।

विवृति

चतुर्थपादाद्यव्यपेतं यमकमाह–

विपिनं कैश्चिदेकैराक्रान्तः(म्) गतम्। अन्यैरपरैः दिवौकसाममराणां सद्म वेश्माक्रान्तम्। एतदुक्तं भवति कैश्चिद्विपिनं यातं, कैश्चिन्मृतमिति। पदातिरथनागाश्वमिति सेनाङ्गत्वात् द्वन्द्वैकत्वन्। तेन रहितैः विकलैः अहितैस्तवारिभिरिति।।

अरण्यमिति। सुगमम्।।७।।

मधुरं मधुरम्भोजवदने वद नेत्रयोः।
विभ्रमं भ्रमरभ्रान्त्या विडम्बयति किं न्विदम्॥८॥

रत्नश्री

अम्भोजमिव वदनमस्या इत्यम्भोजवदना [तस्याः सम्बुद्धिः]। तव नेत्रयोर्विभ्रमं चञ्चलत्वं मधुरं रम्यं भ्रमरा[णां भ्रान्त्या चा]पलेन विडम्बयति अनुकरोति मधुर्वसन्तः किं न्विदं वद ब्रूहि इति कश्चिच्चाटुकारः प्रियामुपलालयति। प्रथमद्वितीय-पादादियमकम्॥

हृदयङ्गमा

अथ सम्भेदयोनीनव्यपेतयमकभेदान् विवरीतमादिमध्यान्तेत्यादिनोक्तं प्रथमद्वितीय–प्रथमतृतीय–प्रथमचतुर्थपादगतभेदत्रयेषु आदौ प्रथमद्वितीय (आदिमध्य) पादगतमादिमागयमकमुदाहरति, मधुरमिति।–हे अम्भोजवदने! पद्ममुखि! मधुः वसन्तः, ते तव, नेत्रयोः भ्रमरभ्रान्त्या भ्रमराविमौ इति भ्रमेण, मुखाम्भोजोपरि नेत्रयोर्वर्त्तमानत्वात् अम्भोजे भ्रमरयुगलावस्थानस्य सम्भवाच्च भ्रमो युज्यते इति भावः, मधुरं विभ्रमं शोभां, विड़म्बयति, विशेषेण प्रेरयति, समर्पयतीत्यर्थः, ("डन्व प्रेरणे" इत्यस्य चौरादिकस्य रूपम्) नु इति वितर्के, किम्? वद कथय; नेत्रयोस्ते ईदृशो विभ्रमः भ्रमरभ्रान्तिमता वसन्तेनैव किं समुत्पादितः? इति भावः। (वसन्तोदये ममुत्पन्ने अम्भोजे भ्रमरविलाससम्भवात् नु इति वितर्कबोधकं पदमत्र युज्यत एव। केचित्तु अम्भोजवदने इति

सप्तम्यन्तमुक्तवा तत्र वर्त्तमानयोर्नेत्रयोरिति योजयन्ति। "नु" इत्यत्र "न" इति पाठे–न बिड़म्बयति किम्? अपि तु विड़म्बयत्येवेत्यर्थः। अत्र "मधुरं मधुरम्" इति "वदने वदने" इति च यमकघटकपदानां प्रथमद्वितीय (आदिमध्य) पादयोरादिभागस्थिततया आदिभागलक्षणं, पादद्वयमिश्रणाच्च मिश्रसंज्ञकं, तथा पदानामव्यवधानतया अव्यपेतं, ततश्चेदं प्रथमद्वितीय (आदिमध्य) पादगतमिश्राव्यपेतादिभागयमकम्)॥८॥

प्रभा

अथेदानीं द्विपादगतान् अव्यपेतयमकप्रभदान् यथाक्रमं दर्शयति–**मधुरमिति।** वसन्ते प्रफुल्लकमले विलोलं भ्रमरं दृष्ट्वा कश्चिच्चाटुकारः प्रेयसीं पृच्छति। हे अम्भोजवदने मधुः वसन्तः। ते तव। नेत्रयोः मधुरं मनोहरं विभ्रमं भ्रमरभ्रान्त्या एतौ सलीलौ भ्रमरौ इति बुद्ध्या विडम्बयति किम् विशेषयति किम्। नु इति वितर्के। वद त्वमेव तत्त्वं कथयेति भावः। अत्र मधुरम् मधुरम् इति प्रथमपादे तथा वदने वदने इति द्वितीयपादे च अव्यवहितमादिभागयमकम्॥८॥

विवृति

एवं पादादिविकल्पाश्चत्वारः। प्रथमद्वितीयपादयोरादियमकमाह–

मधुरं रम्यं, मधुर्वसन्तः। हे अम्भोजवदने पद्ममुखि! वद ब्रूहि।

ते तव नेत्रयोः चक्षुषोः, विभ्रमं विकासं, भ्रमरभ्रान्त्या भ्रमराणां भ्रान्तिः तया भ्रमरभ्रान्त्या, विडम्बयति अनुकरोति। किं नु इति वितर्के।

द्विपादादियमकानि षड्भिरुदाहरणैर्दर्शयति–**मधुरमिति।** हे अम्भोजवदने तव नेत्रयोः मधुरं विभ्रमं भ्रमरभ्रान्त्या मधुमासो विडम्बयति किन्नु? वद। किमिति आक्षेपे; अनुकर्तुं न शन्कोतीति प्रियचाटुः॥८॥

वारणो वा रणोद्दामो हयो वा स्मरः दुर्धरः।
न यतो न यतोऽन्तं नस्तदहो विक्रमस्तव॥९॥

रत्नश्री

[हे स्मर!] यतो यस्मा[त् नः अस्मान्] अन्तं नाशं नयतः प्रापयतस्तव रणे उद्दामः क्षमो वारणो वा हस्ती वा, हयोऽश्वो वा दुर्धरः सांग्रामिको नास्ति। तत्तस्मादहो विचित्रीयते विक्रमस्तव यद् विना रणोपकरणे[नास्मद्विधाः] आसादिताः त्वयेति प्रथमतृतीयपादादियमकम्॥

हृदयङ्गमा

तदेव प्रथमतृतीय (आदिमध्य) पादगतमुदाहरति, वारण इति। –हे स्मर! यतः यस्मात्, तव रणोद्दामो युद्धदुर्मदः, वारणः हस्ती वा, दुर्द्धरः दुर्द्धर्षः, हयः अश्वो वा, न, अस्तीति शेषः, तत् तस्मात् युद्धोपकरणाभावादपीत्यर्थः, नः अस्मान्, विरहिणः इत्यर्थः, अन्तं नाशं, नयतः प्रापयतः, तव विक्रमः अहो आश्चर्य्यभूत इत्यर्थः। (अत्र "वारणो वारणो" "नयतो नयतो" इति यमकघटकपदानां प्रथमतृतीय (आदिमध्य) पादयोरादिगतत्वात् प्रथमतृतीय (आदिमध्य) पादगतं मिश्रमव्यवहितमादिभागयमकमिति बोध्यम्)॥९॥

प्रभा

प्रथमतृतीयपादगतं तदेवोदाहरति–**वारण इति** कश्चिद्विरही मदनमुपालभते। हे स्मर यतस्तव रणोद्दामः युद्धदुर्मदो वारणः हस्ती नास्ति। तथा दुर्धरः रणदुर्धर्षो हयो वा नास्ति। तत् तस्माद्

युद्धसाधनशून्यत्वेपि नः अन्तं नाशं नयतस्तव विक्रमः अहो आश्चर्यास्पदम्। दुर्धर इति विक्रमस्य विशेषणमिति केचित्।।९।।

विवृति

प्रथमतृतीयपादयोरादियमकमाह–

हस्ती वारणे (णः) संग्रामे उद्गतं दाम बन्धनं यस्याः सा(स्यासौ) उद्दामः उच्छृंखलः। अथ च वारणोद्दामो वारणोद्धत इति। वाशब्दः पक्षान्तरे समुच्चये वा। हयः तुरङ्गमो वा, दुर्धरः अप्रधृष्यः। किं कुर्वतः नयत किमन्तं नाशं नः अस्मान् यतः यस्मात्, अहो विस्मये। विक्रमस्तवेति। दुःखेन ध्रियते यो वारणः तुरङ्गमो वा स ते स्मर न विद्यते। तथाऽपि त्वमस्मान् जयसि इत्येकाकिनो विजयित्वमाश्चर्यहेतुरित्यर्थः।।

वारण इति। हे स्मर अस्मान् अन्तं नयतः प्रापयतः तव रणोद्दामो वारणो वा, दुर्धरो हयो वा, नास्ति। वाशब्दश्चार्थे। यतः यस्मात्, तत् तस्मात्, तव विक्रमः अहो विस्मयनीयः।।९।।

राजितैराजितैक्ष्ण्येन जीयते त्वादृशैर्नृपैः।
नीयते च पुनस्तृप्तिं वसुधा वसुधारया॥१०॥

रत्नश्री

त्वादृशैः शक्तिसम्पन्नैर्नृपैराजौ रणे तैक्ष्ण्येन शौर्येण राजितैर्दीप्तैर्वसुधा पृथिवी जीयते। पुनस्तदनु वसुनो धनस्य धारया सन्तानेन दीयमानया करणेन हेतुना वा तृप्तिमभिलाशपर्यन्तं नीयते च। न केवलं जीयत एव वसुधेत्यत्राप्युक्तम्। प्रथमचतुर्थपादादियमकमिदम्॥

हृदयङ्गमा

तदेव प्रथमचतुर्थ (आद्यन्त) पादगतमुदाहरति, राजितैरिति। —आजिः युद्धं, तत्र तैक्ष्णेयन तीक्ष्णतया, युद्धदुर्मदत्वेन इत्यर्थः, राजितैः शोभितैः, त्वादृशैः भवादृशैः, नृपैः वसुधा पृथिवी, तत्रत्यो जन इति भावः, जीयते जयेन आदौ वशीक्रियते, युद्धव्यापारेण पीड्यते इति भावः, पुनः जयानन्तरमित्यर्थः, वसुधारया वसूनां धनानां, धारया धारावर्षणेन, अविरतदानेनेत्यर्थः, तृप्तिं सन्तोषं, नीयते च। (अत्र "राजितै राजितै" "वसुधा वसुधा" इति च यमकघटकपदानां प्रथमचतुर्थ (आद्यन्त) पादयोरादिगतत्वात् पादद्वयमिश्रणात् अव्यवधाननिवेशाच्च प्रथमचतुर्थ (आद्यन्त) पादगतं मिश्रमव्यवहितमादिभागयमकमिति संज्ञा ज्ञातव्या। मधुरमित्यादिना क्रमेण आदिमध्यान्तेत्यनेन निरूपितास्त्रयो भेदा उदाहृताः)॥१०॥

प्रभा

तदेव प्रथमचतुर्थपादगतमुदाहरति–**राजितैरिति।** आजिः संग्रामस्तत्र तैक्ष्ण्यं प्रचण्डत्वं तेन युद्धप्रखरेणेत्यर्थः राजितैः शेभितैस्त्वादृशैर्नृपैर्वसुधा लक्षणया तत्स्थोरिजनो जीयते जयेन संतप्त इव क्रियते। पुनश्च सैव पृथ्वी वसुधारया दानद्रविणवृष्ट्या तृप्तिं नीयते।।१०।।

विवृति

प्रथमचतुर्थपादादियमकमाह–

राजितैः शोभितैः आज़ौ संग्रामे तैक्ष्ण्येन तीव्रत्वेन जीयते रिपुहस्त दाच्छिद्यते त्वादृशैर्नृपैः। केवलं न जीयते नीयते च पुनः पुनरपि तृप्तिं वसुधा पृथ्वी वसु वित्तं तस्य धारा दानप्रवाहः। तया। अत्र वसुधास्थाः प्राणिनः वसुधाशब्देनोच्यन्ते। तात्स्थ्यात् ताच्छब्द्यम्। मञ्चाः क्रोशन्तीति यथा।।

राजितैरिति। आजितैक्ष्ण्येन समरपाटवेन राजितैः शोभितैः त्वादृशैर्नृपैः वसुधा जीयतेः पुनः वसुधारया तृप्तिं नीयते च। इति कस्य चित् समरवीरस्य दानवीर्यकथनम्।।१०।।

करोति सहकारस्य कलिकोत्कलिकोत्तरम्।
मन्मनो मन्मनोऽप्येष मत्तकोकिलनिस्वनः॥११॥

रत्नश्री

सहकारस्य कलिका मञ्जरी उत्कलिका उत्कण्ठा उत्तरा प्रबला यस्य [तथा उत्कलि]कोत्तरं [तद्]बहुलं मम मन करोति। पर्युत्सुकयतीति यावत्। मत्तस्य कोकिलस्य निस्वनः शब्दोऽप्येषो[ऽत्यन्त]मधुरः मन्मनः उत्कलिकोत्तरं करोतीति प्रकृतम्। अत्र द्वितीयतृतीयपादादियमकम्॥

हृदयङ्गमा

इत्थमादिमध्यान्तभेदं दर्शयित मध्यान्तेत्यनेन प्रतिपादितं मध्यमध्यं मध्यान्तं मध्यान्तञ्चेति तस्य प्रकारत्रयं क्रमेण दर्शयन् प्रथमं द्वितीयतृतीय (मध्यमध्य) पादगतमव्यपेतादिभागयमकमुदाहरति, करोतीति। –सहकारस्य आम्रस्य, कलिका मुकुलं, तथा मन्मनः, –"सुरते कर्णमूले तु निजदेशीयभाषया। दम्पत्योः कथनं यत्तु मन्मनं तं प्रचक्षते॥" इत्युक्तलक्षणः कर्णमूले रहस्यालापः, इवेति अध्याहार्य्यम्; एष मत्तानां वसन्तागमनेन उन्मदानां, कोकिलानां निस्वनोऽपि, मन्मनः मम मानसम्, उत्कलिकोत्तरम् उत्कण्ठाकुलमित्यर्थः, करोति, आम्रकलिकायाः कोकिलालापस्य च अतीवोद्दीपकत्वादिति भावः। (विरहिण उक्तिरियम्। अत्र "कलिको कलिको" "मन्मनो मन्मनो" इति यमकघटकपदानां द्वितीयतृतीयपादादिगतत्वेन द्वितीयतृतीयपादयोश्च मध्यत्वेनाभि-

धानात् द्वितीयतृतीय (मध्यमध्य) पादगतमव्यपेतादिभागयमकं, पादद्वयमिश्रणाच्च मिश्रमित्यवधेयम्। किञ्च "कलिकोत्कलिका" इत्यत्र तकारस्य मध्यपातित्वेऽपि स्वरशून्यत्वात् श्लोकीयाक्षर-सङ्ख्याऽपूरकतया व्यवधानमध्ये अगणनात् यमकस्य न अव्यपेतत्वहानिः, सस्वरस्यैव व्यञ्जनस्य व्यवधायकत्वाभ्युपगमात् इति बोध्यम्)।।११।।

प्रभा

तदेव द्वितीयतृतीयपादगतमुदाहरति–**करोतीति।** सहकारस्य आम्रस्य। कलिका मञ्जरी मन्मनः मच्चित्तम् उत्कलिकोत्तरं उत्कण्ठापूर्णम् करोति। तस्योद्दीपकत्वादिति भावः। तथा मन्मनः अव्यक्तमधुरः। मनमनोव्यक्तमधुरो मन्मनो रतिभाषितम् इति विश्वः। मत्तकोकिलनिस्वनः समदकोकिलकलरवः अपि। मदीयं चेत उत्कलिकोत्तरं करोति। अत्र कलिकोत्कलिकोत्तरम् इत्यत्र तकारो यमकमध्ये पतितोपि स्वरशून्यत्वेन तद्व्यवधानं न गण्यते। स्वरयुक्तस्यैव व्यवधायकत्वेनाभ्युपगमात्। अथवा कलिकोत् इत्येष एव वर्णसंघातोत्र द्विरावृत्त इति बोध्यम्।।११।।

विवृति

द्वितीयतृतीयपादयोरादियमकमाह–

करोति कुरुते। कलिका मञ्जरी। कस्य सहकारस्य चूतस्य सम्बन्धिनी। उत्कलिका उत्कण्ठा। तया उत्तरं समधिकं मम मनः मन्मनः मच्चित्तम्। न केवलं सैव मन्मनोऽत्यन्तमधुरः

मधुरतरोऽप्येष मत्तकोकिलनिस्खनः। मत्तश्चासौ कोकिलश्च। तस्य निस्खनः शब्दः स चेत्यपिशब्दस्यार्थः। स चौत्सुक्यमधिकं करोतीत्यर्थः।।

करोतीति। सहकारस्य कलिका मञ्जरी मन्मनः मच्चित्तम् उत्कलिकोत्तरम् उत्कण्ठाबहुलं करोति; मन्मनः मथने मन्यमानः पीडाकर इत्यर्थः ; एषं मत्तकोकिलनिखनश्च करोति।।११।।

कथं त्वदुपलम्भाशाविहताविह तादृशी।
अवस्था नालमारोढुमङ्गनामङ्गनाशिनी॥१२॥

रत्नश्री

तवोपलम्भे समागमे आशा मनोरथः तस्य विहतौ विघाते इह अस्यां सत्यां तादृशी अभिलाषचिन्तनानुस्मृतिगुणकीर्तनोद्वेगविलापोन्माद[मूर्च्छा] व्याधिजडताक्रमेण प्रवृद्धावस्था अङ्गं नाशयतीत्यङ्गनाशिनी दशमी। तादृशीमित्यपि पठ्यते। तत्राङ्गनां तादृशीं त्व[द]नुरागपरवशामिति व्याख्येयम्। [अङ्गनाम्] आरोढुमासादयितुं कथं नालं न समर्था? आरोहत्येव। नात्र सन्देहः। तदनुकम्प्यतामङ्ग! वराकी। किं स्त्रीवधपातकदोहदेनेति [94a] द्वितीयचतुर्थपादादियमकम्॥

हृदयङ्गमा

तदेव द्वितीयचतुर्थ (मध्यान्त) पादगतमुदाहरति, कथमिति। —इह अस्मिन् प्रदेशे, तव उपलम्भः प्राप्तिः, तस्य आशा प्रत्याशा, तस्याः विहतौ विनाशें, अङ्गनाशिनी शरीरनिकृन्तनी, तादृशी अनुभूयमाना, अवस्था स्मरदशाविशेषः, अङ्गनाम् अबलां, मामिति शेषः, आरोढुम् आक्रमितुं, कथं न अलं न समर्था? अपि तु समर्था एव, त्वद्विरहे अहं मृतप्राया जाताऽस्मीति तात्पर्य्यार्थः। (अत्र "विहता विहता" "मङ्गनामङ्गना" इति यमकघटकपदानां द्वितीय चतुर्थपादादिगतत्वेन द्वितीयपादस्य मध्यत्वाच्चतुर्थपादस्य अन्तत्वाच्च द्वितीयचतुर्थ (मध्यान्त) पादगतं मिश्रमव्यवहितमादि-

भागयमकम्। केचिदिमं युक्पादयमकमाहुः ; तल्लक्षणं यथा, –"द्वितीये च चतुर्थे च यमकं यत्र दृश्यते। युक्पादयमकं तत्तु विज्ञेयं कविपुङ्गवैः।।" इति। उदाहरणान्तरं यथा भट्टिकाव्ये, –"रणपण्डितोऽग्र्यविबुधारिपुरे कलहं स राममहितः कृतवान्। ज्वलदग्नि रावणगृहञ्च बलात् कलहंसराममहितः कृतवान्।।" इति)।।१२।।

प्रभा

तदेव द्वितीयचतुर्थपादगतमुदाहरति–**कथमिति।** नायकं प्रति दूत्युक्तिरियम्। इह वसन्तकाले तव उपलम्भः समागमस्तस्य समागमस्य आशाया विहतो विघातौ सति। तादृशी वर्णयितुमशक्या केवलानुभवगम्या अङ्गनाशिनी गात्रक्षयकरी अवस्था मदनपीडावस्थाविशेषः। अङ्गनां तां त्वत्प्रेयसीम् आरोढुम् अभिभवितुम् कथं नालं न समर्था। अपि तु समर्थैव। तव विरहेण सा मरणोन्मुखी जातेति भावः।।१२।।

विवृति

द्वितीयचतुर्थपादयोरादियमकमाह–

कथमाक्षेपे। त्वदुपलम्भाशा, तवोपलम्भः प्राप्तिःसङ्गः तत्र कांक्षा। तस्या विहतिः विघातः। तस्यां विहतौ विद्याते सति इह अवसरे तादृशी अवस्था (नालं न समर्था) अपि तु समर्थैव आरोढुं आक्रमितुं कामङ्गनां स्त्रियं अङ्गनाशिनी अङ्गं नाशयत्येवंशील या(यस्याः)सा इति। तादृशीमिति पाठः। तदा

सुकुमारहृदयामङ्गनाशिन्यवस्था कथमारोढुन्नालमित्यर्थः। कश्चित् सुभगः कयाचित् दूत्याऽभिधीयते।।

कथमिति। इह वसन्ते त्वत्प्राप्त्याशायाः विहतौ विधाते तादृशीं स्मरार्ताम् अङ्गनां अङ्गनाशिनी अवस्था कथं नारोहेत्? सा मरिष्यत्येवेत्यर्थः।।१२।।

निगृह्य नेत्रे कर्षन्ति बालपल्लवशोभिना।
तरुणा तरुणान् कृष्टानलिनो नलिनोन्मुखाः॥१३॥

रत्नश्री

तरुणा वृक्षेण बालैः पल्लवैः शोभमानेन नेत्रे निगृह्य कृष्टान् विक्षिप्तमनसः तरुणान् यूनः अलिनो भ्रमरा नलिनेषून्मुखाः प्रवृत्ताः। नेत्रे चक्षुषी निगृह्य दर्शनसुभगतया गृहीत्वा कर्षयन्ति अभिमुखीकुर्वन्ति। उभयदर्शनवशव्याकुलास्तरुणा इति यावत्। अत्र तृतीयचतुर्थपादादियमकम्॥

हृदयङ्गमा

तदेव तृतीयचतुर्थ (मध्यान्त) पादगतमुदाहरति, निगृह्येति। –नलिनेषु पद्मेशु, उन्मुखाः पतनाभिमुखाः, अलिनः भ्रमराः बालपल्लवैः नवपल्लवैः, शोभते इति तथोक्तेन, तरुणा वृक्षेण, कृष्टान् आकृष्टान्, तद्दर्शनोत्मुकान् इत्यर्थः, तरुणान् यूनः, नेत्रे निगृह्य बलेन गृहीत्वा, कर्षन्ति, निजदर्शनोत्सुकनयनान् कुर्वन्तीत्यर्थः। (अत्र "तरुणा तरुणा" "नलिनो नलिनो" इति पदानां तृतीयचतुर्थपादादिगततया तृतीयपादस्य मध्यत्वेन चतुर्थपादस्य अन्तत्वेन च तथा पादद्वयमिश्रणादिलक्षणतया च तृतीयचतुर्थ (मध्यान्त) पादगतमव्यवहितमिश्रादिभागयमकम्। ततश्च मध्यान्तत्वेन निरूपितं प्रकारत्रयमेवोदाहृतं भवति इति दिक्)॥१३॥

प्रभा

तदेव तृतीयचतुर्थपादगतमुदाहरति–**निगृह्येति।** वसन्तवर्णनमिदम्। नलिनोन्मुखाः कमललुब्धाः। अलिनः भ्रमराः। बालपल्लवैः कोमलपर्णैः शोभिना। समीपस्थेन केनचित् तरुणा कृष्टान् स्वशोभावलोकनार्थं संनिधापितान् तरुणान्। नेत्रे चक्षुषी। निगृह्य गृहीत्वा। कर्षन्ति स्वसौन्दर्यदर्शनप्रवणान् विदधति। वृक्षस्य बालपल्लवावलोकनादपि कमलमधुपानलोलुपानां भ्रमराणां दर्शनं तरुणसार्थस्य अतीव प्रमोदावहं समजनीत्यर्थः।।१३।।

विवृति

तृतीयचतुर्थपादयोरादियमकमाह–

निगृह्य परिभूय, नेत्रे चक्षुषी, केन तरुणा पादपेन, कथंभूतेन बालपल्लवशोभिना अभिनवकिसलयभ्राजिष्णुना। तरुणान् यूनः। कृष्टान् पीडितान् अलिनः भ्रमराः कर्षन्ति बाधन्त इति। किंमूता अलिनः। नलिनोन्मुखाः पद्माभिमुखाः। क्लिष्टानिति पाठः। तत्र बाधितानित्ययमर्थो ग्राह्यः। एवं द्विपादादिविकल्पाः षट्।।

निगृह्येति। बालपल्लवशोभिना तरुणा चूतादिना, आकृष्टान् स्वाभिमुखीकृतान् तरुणान्, नलिनोन्मुखाः कमलवनचारिणः अलिनः भृङ्गाः नेत्रे निगृह्य, कर्षन्ति स्वाभिमुखान् कुर्वन्ति।।१३।।

विशदा विशदामत्तसारसे सारसे जले।
कुरुते करुतेनेयं हंसी मामन्तकामिषम्।।१४।।

रत्नश्री

सरस इदं [सारसं तत्र] सारसे जले, किंभूते? विशतो विगाहमाना आमत्ताः सारसाः पक्षिणो यस्मिन् [तत्र] विशदामत्तसारसे व्यवस्थिता विशदा शुल्का हंसीयं विरहिजनोद्वेजनीयत्वात् मधुरेणापि कुत्सितेनाविषह्येन रुतेन शब्देन हेतुना करणेन [वा] अन्तकस्य मृत्योरामिषं ग्रासं मां कुरुते, मां हन्तीति यावत्। प्रथमद्वितीयतृतीयपाददियमकं विकल्पितमिदम्।।

हृदयङ्गमा

मध्याद्येत्यनेन, प्रतिपादितं प्रथमद्वितीयतृतीयपादगतमेकप्रकारमाह, विशदेति। –विशन्तः प्रवेशं कुर्वन्तः, आमत्ताः उन्मदाः, सारसाः जलपक्षिविशेषा यस्मिन् तादृशे, सारसे जले सरोवरजले, विशदा शुभ्रवर्णा, इयं हंसी राजहंसीत्यर्थः, कुरुतेन कुत्सितरवेण, रवस्य कुत्सितत्वमुद्दीपकत्वेन विरहिणामसह्यत्वात् इति भावः, मां विरहिणमिति यावत्, अन्तकस्य यमस्य, आमिषं भोग्यवस्तु, ("आमिषं पुंनपुंसकम् भोग्यवस्तुनि सम्भोगेऽप्युत्कोचे पललेऽपि च" इति मेदिनी)। कुरुते मां हन्तुं यतते इत्यर्थः। (अत्र "विशदा विशदा" "सारसे सारसे" "कुरुते करुते" इति पदानां प्रथमद्वितीयतृतीयपादादिगतत्वेन द्वितीयतृतीयपादयोर्मध्यत्वेन च प्रथमद्वितीयतृतीय (मध्याद्य) पादगतं मिश्रमव्यवहितमादिभगायमकम्; तच्चैकविधमेवेति बोध्यम्)।।१४।।

प्रभा

अव्यपेतस्य द्विपादप्रकारान् प्रदर्श्य संप्रति त्रिपादगतमादियमकं सप्रभेदं निरूपयन् प्रथमद्वितीयतृतीयपादगतमादौ दर्शयति– **विशदेति** कश्चिद्विरही शरदमालोक्य कथयति। विशन्तः प्रविशन्तः आमत्ताश्च सारसाः पक्षिविशेंषा यस्मिन् तादृशे सारसे सरः संबन्धिनि जले वर्तमाना इयं विशदा निर्मला हंसी मां विरहिणं कुरुतेन विरहिणो मे रुजाकरेण कुत्सितशब्देन अन्तकामिषं यमस्य भोग्यम् कुरुते मां हन्तुं चेष्टते। आमिषं पुन्नपुंसकम् भोग्यवस्तुनि संभोगे–इति भेदिनी। अत्र विशदाविशदा सारसेसारसे कुरुतेकुरुते इति त्रिष्वपि पादेष्वव्यपेतमादियमकं वर्तते। चतुर्थचरणस्तु निर्यमकः।।१४।।

विवृति

त्रिपादादियमकविकल्पेषु प्रथमद्वितीयतृतीयपादादियमकमाह–

विशदा श्वेता हंसी कुरुते विदधाति, कं मां, किं अन्तकामिषं अन्तकस्यामिषं मांसम्। ग्रासं प्रभूतं वा। केन कुरुतेन कुत्सितं रुतं कूजितं, तेन। कुत्सितत्वं च विरहिजनमनः प्रातिकूल्यात्। क्व? जले सारसे। सरस इदं सारसम्। तत्र किंविशिष्टे? विशदामत्तसारसे विशन्त आमत्ताः (सारसाः) यस्मिन्। सारसो नाम पक्षिविशेषः।।

त्रिपादयमकानि चत्वारि दर्शयति–**विशदेत्यादिना।** अन्तः प्रविशदामत्त्सारसपक्षिणि सारसे सरःसम्बन्धिनि जले स्थिता, विशदा इयं हंसी, कुरुतेन श्रवणपरुषेण रवेण मामन्तकामिषं कुरुते; पीडयति इत्यर्थः।।१४।।

विषमं विषमन्वेति मदनं मदनन्दनः।
सहेन्दुकलयापोढमलया मलयानिलः॥१५॥

रत्नश्री

मलयानिलो ममानन्दन पीडाहेतुः अपोढम् अपगतं मलम् अत इति अपोढमलया विशदया इन्दोः कलया सह मदनं कामं नाम विषमं विषम् आशुनाशकत्वात्। अन्वेति अनुसरति उपनयती[?]त्यर्थः। अन्वेत्यनुकरोतीति वा व्याख्येयम्, मलयानिलश्चन्द्रकला च तादृगत्यन्ततापकरत्वात् मदनायत्तौ इत्यर्थः। प्रथमद्वितीयचतुर्थपादादियमकमिदम्॥

हृदयङ्गमा

आद्यन्तेत्यनेन निरूपितं भेदत्रयं क्रमेण दर्शयन् प्रथमं प्रथमद्वितीयचतुर्थ (आद्यन्त) पादगतमुदाहरणेन स्फुटयति, विषममिति। –अपोढ़मलया परित्यक्तमालिन्यया, हिमात्ययादिति भावः, इन्दुकलया चन्द्रखण्डेन सह, मलयानिलः मदनन्दनः मां विरहिणं न नन्दयतीति तथोक्तः मदप्रीतिजननः सन् इत्यर्थः, विषमम् असह्यं, विषं विषरूपं, मदनं कामम्, अन्वेति अनुगच्छति, उद्दीपयतीत्यर्थः, इन्दुकलामलयानिलयोः कामोद्दीपकत्वेन विरहिपीड़कत्वादिति भावः। (अत्र "विषम विषम" "मदन मदन" "मलया मलया" इति पदानां प्रथमद्वितीयचतुर्थपादादिगततया प्रथमद्वितीययोराद्यत्वेन चतुर्थस्य पादस्यान्तत्वेन च प्रथमद्वितीयचतुर्थ (आद्यन्त) पादगतं मिश्रमव्यवहितमादिभागयमकम्। "विषमं विषमन्वेति" इत्यत्र

यम्यमानपदयोरेकस्य सानुस्वारत्वेन असन्तोषश्चेत् "विषमं विषमं क्ष्णौति" इति प्रथमपादः पठनीयः। द्वितीयंविषममित्यस्य विषेण मा उपमा यस्य इति व्युत्पत्त्या विषसदृशमित्यर्थः। क्ष्णौति तीक्ष्णं करोति" इति केचित् पठन्ति)।।१५।।

प्रभा

तदेव प्रथमद्वितीयचतुर्थपादगतमुदाहरति–**विषममिति।** कश्चिद् विरही ब्रूते। मदनन्दनः मम अनन्दनः असंतोषकः। विरहिणः संतापकत्वात्। मलयानिलः अपोढः परित्यक्तः मलः दुर्दिनमालिन्यादिरूपो यया सा तया। इन्दुकलया सह विषमं अप्रसहम्। विषं विषस्वरूपम्। मदनमन्वेति तद्वन्मां पीडयतीत्यर्थः। मदनो मलयानिलः इन्दुकला च मां विषवद् बाधन्ते इत्यर्थः।

अथवा विषमं मदनं मोहकरं च विषं मलयानिलोन्वेतीत्यन्वयः। ननु अत्र द्वितीयविषमपदे अनुस्वारन्यूनतेति चेन्न। नानुस्वारो विसर्गश्च चित्रभङ्गाय कल्पते। इति अनुस्वारन्यूनताया अलंकारिकैरभ्यनुज्ञातत्वात्।।१५।।

विवृति

प्रथमद्वितीयचतुर्थपादादियमकमाह–

विषं दुःसहं, विषं विषकार्यकारित्वेनाभेदोपचारात् मदनो विषमुक्तः। तमन्वेत्यनुव्रजति। मदनं कामम्। किंविशिष्टं मदनन्दनम्। नन्दनं नन्दयति सुखयति इति नन्दन आनन्दनो ममानन्दनो मदनन्दनः। तं मदनन्दनं मत्पीडाकरम्। कोऽसौ मलयानिलः दक्षिणः

पवनः। किमेकाकी नेत्याह। सहेन्दुकलया। चन्द्रलेखया सह। किंविशिष्टया वीतलाञ्छनया।।

विषममिति। विषमं तीक्ष्णं, विषं सन्तं मदनं स्मरं, मदनन्दनः मम अनन्दनः अप्रियो मलयानिलः अपोढमलया त्यक्तकलङ्कया इन्दुकलया सह, अन्वेति। मदनो मलयानिलश्चन्द्रकला च विषवत् बाधन्ते इत्यर्थः।।१५।।

मानिनी मा निनीषुस्ते निषङ्गत्वमनङ्ग मे।
हारिणी हारिणी शर्म तनुतां तनुतां यतः॥१६॥

रत्नश्री

अनङ्ग! तव निषङ्गत्वं तूणीरत्वं शरनिकरपूरयोगेन मा मां निनीषुर्नेतुम् इच्छन्ती मानिनी काचिद् विवक्षिता स्त्री हारिणी मुक्तालतालंकृता, अनेना[हा]र्यं रूपमुक्तम्। स्वभावरूपगुणयोगाञ्च मनोहरा मे मम तनुतां कृशत्वं प्राणसन्देहं यतः गच्छतः शर्म समागमसुखं जीवितं तनुतां करोतु। प्रसीद, आज्ञापयैनाम्। देव! त्वमेवास्याः प्रभवसीति प्रथमतृतीय चतुर्थपादादियमकं विकल्पितम्॥

हृदयङ्गमा

प्रथमतृतीयचतुर्थ (आद्यन्त) पादगतं तदेव उदाहरति, मानिनौति। –हे अनङ्ग! मा मां, ते तव, निषङ्गत्वं तूणत्वम्, अनवरतशरसम्पातेन तदाधारत्वमिति भावः, निनीषुः प्रापयितुमिच्छ, तथा हारिणी हारालङ्कारभूषिता, अत एव हारिणौ मनोहारिणी, मानिनी मानवती इयं नारी, तनुतां क्षीणतां, यतः गच्छतः, प्राप्नुवतः इत्यर्थः, एतत्कृतप्रत्याख्यानजनितचिन्तया इति भावः, मे मम, शर्म सुखं, तनुतां विदधातु इत्यर्थः, यथेयं मानिनी मानं विहाय मामाश्रयति तथा अनुग्रहः कार्य्य इति भावः। (अत्र "मानिनी मानिनी" "हारिणी हारिणी" "तनुनां तनुतां" इति पदानां प्रथमतृतीयचतुर्थपादादिगततया तृतीयपादस्यापि आदित्वेन चतुर्थपादस्यान्तत्वेन च प्रथमतृतीयचतुर्थ (आद्यन्त) पादगतं मिश्रमव्यवहितमादिभागयमकम्)॥१६॥

प्रभा

प्रथमतृतीयचतुर्थपादगतं तदेवोदाहरति- **मांनिनीति।** प्रणयकुपितां मानिनीं प्रसिषादयिषुर्नायको मदनं प्रार्थयते। हे अनङ्ग मदन। मा माम्। ते निषङ्गत्वं निरन्तरकटाक्षशरनिपतनेन तूणीरत्वम्। त्वन्मुक्तशराधारतामित्यर्थः। निनीषुः प्रापयितुमिच्छुः। मानिनीविशेषणमेतत्। हारिणी मुक्ताहारवती अत एव हारिणी मनोहारिणी। मानिनी तनुतां कृशताम् यतः प्राप्नुवतः मे शर्म सुखम् तनुतां विस्तारयतु। यथेयं सुखभोग्या स्यात्तथा त्वया विधेयमित्यभ्यर्थना।।१६।।

विवृति

प्रथमतृतीयचतुर्थपादादियभकमाह-

मानिनी मे शर्म सुखं तनुतां तनोतु। किं चिकीर्षुः निनीषुः नेतुमिच्छुः। निषङ्गत्वमिषुधित्वं अनङ्ग काम (मा)मामित्यर्थः। किंविशिष्टा हारिणी हारोऽस्या अस्तीति हरणशीला हारिणी रमणीया, किं कुर्वतः तनुतां यतः व्रजतः।।

मानिनीति। हे अनङ्ग, मानिनी प्रिया, हारिणी हारवती, हारिणी मनोहारिणी, मा मां, ते तव, निषङ्गत्वं बाणतूणत्वं, निनीषुः नेतुमिच्छुः, तनुतां विरहकार्श्यं, यतः प्राप्नुतः, मे मम शर्म सुखं, तनुतां कुरुताम्। प्रणयकलहेन विमुखीं सती प्रियां मयि प्रसन्नां कुरु इत्यर्थः।।१६।।

जयता त्वन्मुखेनास्मानकथं न कथं जितम्।
कमलं कमलङ्कुर्वदलिमद्दलि मत्प्रिये॥१७॥

रत्नश्री

मम प्रिये मत्प्रिये! तव मुखेनास्मानेवं मुखरान् जयता वशीकुर्वता अकथं न विद्यते कथास्येत्यवचनम्, विकासयोगेन दलानि प्रशस्तानि पत्राण्यस्मिन् इति दलि। प्रबुद्धमिति यावत्, अतश्च मकरन्दलोलुपमधुप[94b]योगात्, अलयोऽस्मिन् विद्यन्ते इति अलिमत्। एवं च गुणयोगात् कमुदकमाश्रयमलङ्कुर्वत् भूषयत् कमलं पद्मपर्यायमपि कथमवचनं [सत्] न जितं जितमेवेति कमलेन मुखमुपमितम्। अत्र द्वितीयतृतीयचतुर्थपादादियमकमाविष्कृतम्॥

हृदयङ्गमा

द्वितीयतृतीयचतुर्थ (आद्यन्त) पादगतं तदेवोदाहरति, जयतेति। –हे मत्प्रिये! मम प्रेयसि! अस्मान् जयता वशीकुर्वता, तव मुखेन कं जलम्, अलंकुर्वत् शोभयत्, तथा अलिमद्दलि अलिमन्ति भ्रमरयुक्तानि, दलानि पत्राणि अस्य सन्तीति तथाभूतं, कमलं पद्मम्, अकथं कथारहितं, निर्विवादं यथा तथा इत्यर्थः, यद्वा, –अकथमिति कमलविशेषणत्वेन योजनीयं, कथारहितमित्यर्थः, कथनाक्षमत्वादचेतनमिति भावः, कथं किं, न जितम्? अपि तु जितमेवेत्यर्थः, अस्माकं चेतनानामपि जयिना ते मुखेन अचेतनानि तादृशानि कमलानि जितानीति का कथेति भावः। (अत्र "नकथं नकथं" "कमलं कमलं" "दलिमत् दलिमत्" इति यमकघटकपदानां द्वितीयतृतीयचतुर्थ (आद्यन्त) पादादिगतत्वात्

द्वितीयतृतीयपादयोरादित्वेनाभिधानाच्च द्वितीयतृतीयचतुर्थ (आद्यन्त) पादगतं मिश्रमव्यवहितमादिभागयमकम्। एवञ्च आद्यन्तेत्यनेनाभिहितास्त्रयः भेदाः उदाहरणेन दर्शिताः)।।१७।।

प्रभा

तदेव द्वितीयतृतीयचतुर्थपादगतमुदाहरति–**जयतेति।** नायकस्य प्रेयसीं प्रति चाटूक्तिः। हे मत्प्रिये अस्मान् जयता स्ववशीकुर्वता। त्वन्मुखेन कम् उदकम। अलंकुर्वत् भूषयत्। तथा अलयः भ्रमराः तद्वन्ति यानि दलानि पत्राणि तानि सन्ति अस्येति अलिमद्दलि। अथवा अलिमद् भ्रमरयुक्तं तथा दलि दलयुक्तं च। कमलम् अकथं कथाशून्यं निर्विवादम् कथनादिवाग्धर्मविहीनं वा। कथं न जितम् जितमेव। सचेतसि लब्धविजयानामचेतनविजये का शङ्केति भावः।।१७।।

विवृति

द्वितीयतृतीयचतुर्थपादादियमकमाह–

जयता अभिभवता केन त्वन्मुखेन कानस्मान्, अकथं अस्तीत्यकथं(?) अकथं न विद्यते कथा शब्दो यस्मिन् तदकथम्, नेति प्रतिषेधे। कथमाक्षेपे। न कथं जितं अपि तु जितमेव। किं कमलं पद्मम्। किं कुर्वन् (त्)करक(कमुदक)-मलंकुर्वन्(त्)भूषयन्(त्)। अलिमद्भ्रमरवत् दलान्यस्य सन्तीति दलि 'मम प्रिया मत्प्रिया) अपि तु अलय एव मद्दलानि अलिमद्दलानि। मद्दलं वाद्यभेदः। तदस्यास्तीति अलिमद्दलि। मम प्रिय कान्ता मत्प्रिया। तस्याः सम्बोधनं हे मत्प्रिये। एतदुक्तं भवति सकथानस्मान् जयता त्वन्मुखेन कथारहितं कमलं सुतरामेव

जितमिति। यो दृ [धृ]ष्टे सति सम्प्रभाषते तमप्यभिभवतः इतराभिभवनं सुकरमेवेति इति त्रिपादादियमकाश्चत्वारः।।

जयतेति। मत्प्रिये, अस्मान् जयता त्वन्मुखेन, अलिमत् नेत्रस्थानीयमभृङ्गं, दलि कपोलस्थानीयदलं, कं जलम् अलङ्कुर्वत्, अकथं मूकं, कमलं कथं न जितम्। मूकत्वात् हीनतया जितमेव।।१७।।

रमणी रमणीया मे पाटला पाटलांशुका।
वारुणीवारुणीभूतसौरभा सौरभास्पदम्॥१८॥

रत्नश्री

रमणी स्त्री काचित् अभिमता रमणीया मनोज्ञा मे मम। किंभूता? पाटलपुष्पवदापाटलमरुणमंशुकं यस्याः सा। तथा सौरभस्य सुगन्धितायाः कृत्रिमस्य सहजस्य चास्पदं भूमिः। कथमिव तादृशी दृश्यते? अरुणीभूता सौरी सूर्यसम्बन्धिनी भा दीप्तिर्यस्याः सा तथाभूता वारुणी पश्चिमा दिगिव रमणीयेति प्रकृतम्। पादचतुष्टयादियमकमुक्तम्॥

हृदयङ्गमा

तदेव सर्वतः इत्यनेन प्रतिपादितं चतुष्पादगतमुदाहरति, रमणीति। –पाटलावत् तदाख्यतरुकुसुमवत्, पाटलं श्वेतरक्तम्, अंशुकं वसनं यस्याः तादृशी, तथा सौरभास्पदं सौरभस्य सौगन्ध्यस्य, आस्पदं स्थानं शोभनगन्धि इत्यर्थः, पद्मिनीजातीयेति भावः, रमणी काचित् कान्ता, अरुणीभूता आरक्तीभूता, सौरी सूर्य्यसम्बन्धिनी, भा दीप्तिर्यस्याः तथाभूता, वारुणीव सुरेव, मे मम, रमणीया रतिप्रिया, भवत्त्विति शेषः। (अत्र "रमणी रमणी" "पाटला पाटला" "वारुणी वारुणी" "सौरभा सौरभा" इति यम्यमानपदानां सर्वपादगतत्वात् प्रथमद्वितीयतृतीयचतुर्थ (सर्व) पादगतं मिंश्रमव्यवहितमादिभागयमकम्। इत्थमादिमध्यान्तेत्यादिना निरूपितस्याव्यपेतादिभागयमकस्यैकादशप्रकाराः उदाहरणैर्दर्शिताः)॥१८॥

प्रभा

सर्वत इत्यनेन प्रतिपादितं पादचतुष्टयगतमव्यपेतमादिभागयमकमुदाहरति—**रमणीति।** पाटलावत् तत्संज्ञकतरुकुसुमवत् पाटलं श्वेतरक्तमंशुकं वस्त्रं यस्याः सा। तथा सौरभास्पदं शोभनगन्धिः। मे रमणी अरुणीभूता आरक्ता। सौरी सूर्यसंबन्धिनी भाः कान्तिर्यत्र तादृशी। वारुणी पश्चिमदिगिव। रमणीया मनोहरा। शोभते इति शेषः। अत्र वारुणीशब्देन मदिराध्वनिः। सापि सौरभास्पदं वर्तते। एवमादिमध्यान्तेत्यादिकारिकया प्रतिपादिता अव्यपेतादिभागयमकस्य दश प्रकारा उदाहृताः॥१८॥

इति पादादियमकमव्यपेतं विकल्पितम्।
व्यपेतस्यापि वर्ण्यन्ते विकल्पास्तस्य केचन॥१९॥

रत्नश्री

आदियमकमव्यपेतं विकल्प्योपसंहरति–इत्युक्तेन प्रकारेण पादानामेकशः द्विशः त्रिशः चतुर्णां च, आदौ आदिर्वा यमकमव्यपेतमव्यवहितं विकल्पितमनेकधा विभक्तम्। तस्य यमकस्य व्यपेतस्य व्यवहितस्यापि, न केवलमव्यपेतस्य विकल्पाः प्रभेदाः केचित् कतिपये, न सर्वे, वर्ण्यन्त उदाह्रियन्त इति॥

हृदयङ्गमा

इतीति। –इति उक्तरूपेण, अव्यपेतम् अव्यवहितं, पादादिगतं यमकं विकल्पितं सप्रभेदम् उदाहृतम्, इदानीं व्यपेतस्य अपि व्यवहितस्यापि, तस्य यमकस्य, केचन, न तु सर्वे इति भावः, विकल्पा भेदाः, वर्ण्यन्ते॥१९॥

प्रभा

अव्यपेतादिभागयमकमुपसंहरति–**इतीति।** पादादि पादादिभागतम्। अव्यपेतं अव्यवहितम्। यमकम् इति एवं विकल्पितम् सप्रभेदमुदाहृतम्। तस्य पूर्वोक्तस्य व्यपेतस्य व्यवहितस्य यमकस्य केचन विकल्पाः भेदाः क्रमप्राप्ताः वर्ण्यन्ते॥१९॥

विवृति

सर्वपादादियमकमाह–

रमणी कान्ता रमणीया रम्या मे मम, पाटल्याः पुष्पं पाटलं, पाटलमिवापाटलं, आपाटलमीषद्रक्तम् अंशुकं वस्त्रं यस्याः सा पाटलापाटलांशुका। केव वारुणीव। वरुणस्येयं वारुणी दिगिवारुणीभूता रक्ता। सूर्यस्येयं सौरी भा दीप्तिः यस्याः सा अरुणीभूतसौरभा। सुरेभर्भावः सौरभं सौगन्ध्यं तस्यास्पदं स्थानं सौरभास्पदम्। किञ्चित् [कश्चित्]कामी प्रियामेव [वं] वर्णयति। सर्वपादादिविकल्पः एक एव।।

चतुष्पादयमकं दर्शयति–**रमणीति।** पाटलापाटलांशुका पाटलकुसुमवदरुणांशुका रमणीया मे रमणी, अरुणीभूतसौरभा सायन्तनसमये अरुणीभूतसूर्यप्रभा, वारुणीव प्रतीचीव, सौरभास्पदं रम्यताभाजनं भवति।।

एवमत्राव्यपेतयमकविकल्पान् पञ्चदशाभिधायोपसंहरन्नाह–

इति। एवं पादादियमकमव्यपेतं अव्यवहितं विकल्पितं विभक्तम्। तत्र ये (ते) षु यमकेषु व्यपेतस्यापि केचन विकल्पाः कतिपयविभागा वर्ण्यन्ते कथ्यन्ते। [मानेन]मानेनोति निरन्तरमावृत्त्या यमकस्याव्यपेतत्वं सान्तरमावृत्त्या व्यपेतत्वम्

अव्यपेतं पादादियमकमुपसंहृत्य व्यपेतं पादादियमकं प्रदर्शयितुमुपक्रमते–**इतीति।** व्यपतयमके एकपादयमकं न सम्भवति, आदिमध्यान्तयमकत्वप्रसङ्गात्।।१८-१९।।

मधुरेणदृशां मानंमधुरेण सुगन्धिना।
सहकारोद्भमेनैव शब्दशेषं करिष्यति॥२०॥

रत्नश्री

एणदृशां स्त्रीणां नानाप्रियजनवैमुख्यं शब्द उपमानेत्यादिवाचकः शेषोऽवशिष्टः, अर्थस्य विगमात् यस्य तं शेषमसन्तं करिष्यति मधुर्वसन्तः। केन? मधुरेण मनोज्ञेन सुगन्धिना सुरभिणा सहकारस्योद्गमेनाङ्कुरेणैव। किं बहुना? स हि तादृशो मानविरुद्धरागमुपनयन् मानस्य शेषीकरणे करणत्वं प्रतिपद्यते। प्रथमद्वितीयपादादिवर्तिव्यपेतयमकम्॥

हृदयङ्गमा

अव्यपेतपादादिभागयमकं दर्शयित्वा व्यपेतादिभागयमकस्य एकस्मिन् पादे असम्भवत्वात् आदौ प्रथमद्वितीयपादगतं तत् उदाहरति, मधुरिति। –मधुर्वसन्तः, मधुरेण मनोहरेण, सुगन्धिना सहकारोद्गमेनैव आम्रमुकुलोदयेनैव उद्गताम्रमुकुलेनवेत्यर्थः, एणदृशां हरिणाक्षीणा, मानम् ईर्ष्याकोपं प्रणयकोपं वा, शब्दशेषं मानेति शब्दमात्रावशिष्टं, करिष्यति, न तु अर्थतो रक्षिष्यतीति भावः। (अत्र ''मधुरेण मधुरेण'' इति प्रथमद्वितीयपादादिगत-यमकघटकपदयोः ''दृशां मानम्'' इति पदद्वयेन व्यवहितत्वात् प्रथमद्वितीयपादगतं व्यवहितं मिश्रमादिभागयमकम्)॥२०॥

प्रभा

तत्र एकपादगतं व्यपेतं सुगममित्युपेक्ष्य प्रथमद्वितीयपादगतं व्यपेतमादिभागयमकमुदाहरति-**मधुरेणेति**। मधुः वसन्तः। मधुरेण

मनोहरेण मधुबिन्दुयुतेन वा। मधुबिन्द्न क्षरतेत्यर्थः। सुगन्धिना सुरभिणा सहकारोद्गमेन चूतप्रसवेन एव एणदृशां हरिणाक्षीणां मानं प्रणयेर्ष्याकोपम्। शब्दशेषं नाममात्रावशिष्टम् करिष्यति। न तु अर्थतोवशेषयिष्यतीत्यर्थः। अत्र मधुरेण मधुरेणेति वर्णसंघावृत्तेर्दृशां मानमिति वर्णचतुष्टयव्यवहितत्वादेतद् व्यपेतयमकम्। एवमग्रेपि बोद्धव्यम्॥२०॥

विवृति

इदानीं व्यपेतं पाददियमकमुदाहरति–

मधुः चैत्रः एणः हरिणः तस्यै(स्ये)व दृशो यासां ताः एणदृशः मृगलोचनाः तासां मानं गर्वं शब्दशेषं नामावशेषं करिष्यति। केन सहकारोद्रमेन। किंमूतेन मधुरेण सुरमणीयेन सुगन्धिना सुरभिणा। प्रथमद्वितीयपाददियमकं व्यपेतपाददियमकं एकस्मिन् पादे न सम्भवतीति भिन्नपादमेवोदाह्रियते। एकपादे हि मध्यान्तयमकमाद्यन्तयमकं वा स्यादिति। एवं सर्वत्र व्यपेतयमकगतिरुन्नेया॥

ततो द्विपादयमकानुदाहरति–**मधुरिति।** मधुः मधुमासः मधुरेण दृष्टिहारिणा सुगन्धिना सहकारप्रसंवेनैव एणदृशां मानं शब्दशेषं करिष्यति॥२०॥

करोऽतिताम्रो रामाणां तन्त्रीताडनविभ्रमम्।
करोति सेर्ष्यं कान्ते वा श्रवणोत्पलताडनम्॥२१॥

रत्नश्री

रामाणामतिताम्रः करः पाणिः तन्त्रीणां वीणागुणानां ताडनं वादनमेव विभ्रमं लीलां करोति विधत्ते, कान्ते पत्यौ विषये श्रवणोत्पलेनावतंसकुवलयेन ताडनं प्रहारं वा सेर्ष्यमीर्ष्यया सह वर्तमानं सासूयं करोति इति प्रकृतम्, तादृशमेव हि कर्म तस्य योग्यम्। प्रथमतृतीयपादादिविषयं यमकमिदम्॥

हृदयङ्गमा

तदेव प्रथमतृतीयपादगतमुदाहरति, कर इति।—रामाणां रमणीनाम्, अतिताम्रः अतिरक्तः, करः पाणिः, तन्त्रीताड़नविभ्रमं वीणावादनरूपं सविलासं कर्म्म, तथा कान्ते प्रणयिनि, सापराधे इति भावः, सेर्ष्यम् ईर्ष्याकोपसहितं यथा तथा, श्रवणोत्पलताड़नञ्च कर्णोत्पलाभ्यां प्रहारमपि, करोति। (अत्र "करोति करोति" इति प्रथमतृतीयपादादिगतत्वात् व्यवहितमिति व्यपेतयमकलक्षण-समन्वयः; ततश्च पूर्ववत् प्रथमतृतीयपादगतं व्यवहितं मिश्रम् आदिभागयमकमिति ज्ञेयम्)॥२१॥

प्रभा

एतदेव प्रथमतृतीयपादगतमुदाहरति—**करोतीति।** विलासिन्या विलासवर्णनमिदम्। रामाणां रमणीनाम्। अतिताम्रः आरक्तः करः तन्त्र्याः ताडनविभ्रमं वीणावादनविलासम् करोति। तथा कान्ते

कृतापराधे नायके सेर्ष्यं यथा स्यात्तथा श्रवणोत्पलेन ताडनं च करोतीति संबन्धः॥२१॥

विवृति

प्रथमतृतीयपादादियमकमाह–

कर: हस्तः अतीव ताम्रः अतिताम्र। अतिरक्तः। कासां रामाणां तन्त्रीताडनविभ्रमं करोति। तन्त्री वीणा तस्याः ताडन तेन विभ्रमं विलासं करोति विधते। न केवलं तमेव करोति। सेर्ष्यं यथा भवति तथा कान्ते श्रवणोत्पलेन कर्णावतंसोत्पलेन ताडनं हननं च करोति। करोति सेर्ष्यं कान्ते वा इति पाठः। तदा वाशब्दः समुच्चये। अथ वा (वा–)शब्द औपम्ये वर्तते। तेन कान्ते श्रवणोत्पलताडनामिव वीणावादनविभ्रमं करोति॥

कर इति। रामाणामतिताम्रः करः तन्त्रीताडनविभ्रमं वीणावादनविभ्रमं करोति; सागसि प्रिये सेर्ष्यं श्रवणोत्पलताडनं च करोति॥२१॥

सकलापोल्लसनया कलापिन्यानुनृत्यते।
मेघाली नर्तिता वातैः सकलापो विमुञ्चति॥२२॥

रत्नश्री

वातैर्नर्त्तिता मन्दमन्दमान्दोलिता [95a] मेघानामाली माला सकलाः सर्वाः न काश्चिदेव। अपो जलानि विमुञ्चति वर्षति, कलापस्य बर्हभारस्योल्लसनं विस्तारः। तेन सह वर्तते सकलापोल्लसनया कलापिन्या मयूराङ्गनया प्रमुदितया अनुनृत्यते वृष्ट्यनन्तरं नट्यते। प्रथमचतुर्थपादादिगोचरं व्यपेतयमकमेतत्॥

हृदयङ्गमा

तदेव प्रथमचतुर्थपादगतमुदाहरति, सकलापेति। –वातैः नर्त्तिता चालिता इत्यर्थः, सकला मेघाली घनश्रेणी, अपः जलानि, विमुञ्चति वर्षति, अनु पश्चात्, अनन्तरमेव इत्यर्थः, सकलापोल्लसनया कलापस्य पिच्छस्य, उल्लसनेन विस्तारीकरणेन सह वर्त्तमानया, कलापिन्या मयूर्य्या, नृत्यते। (वर्षावर्णनमिदम्। अत्र "सकलापो सकलापो" इति यमकपदयोः प्रथमचतुर्थपादादिगतत्वेन व्यवहिततया प्रथमचतुर्थपादगतं मिश्रं व्यवहितमादिभागयमकम्)॥२२॥

प्रभा

एतदेव प्रथमचतुर्थपादगतं दर्शयतिं-**सकलेति**। प्रावृड् वर्ण्यते। वातै- र्नर्तिता सकला मेघाली मेघमाला। अपः उदकानि। विमुञ्चति वर्षति। अनुपश्चात्। कलापस्य बर्हस्य उल्लसनेन

उन्नमनेन सह वर्तते इति सकलापोल्लसना तया। कलापिन्या मयूर्या नृत्यते॥२२॥

विवृति

प्रथमचतुर्थपादादियमकमाह–

सह कलापोल्लासनेन बर्होद्भासनेन वर्तत इति सकलापोल्लसना तया कलापिन्या मयूर्या अनु पश्चात् नृत्यते। मेघाली जलधरमाला। किंभूता नर्तिता नर्तितेव नर्तिता। भ्रमि[ता]कैः वातैः पवनैः सकला निश्शेषा आ[अ]पः पानीयानि विमुञ्चतीति। अथ वा सकलेति मेघालीविशेषणम्। निश्शेषा मेघपंक्तिरित्यर्थः। उत कलः मधुरध्वनिः। तेन सह वर्तत इति सकला। तदानीमपि मेघालीविशेषणम्। [सकला (?) ननु[तु] सकलेत्येव [त्यब्]विशेषणम्। एकत्र सन्ध्यभावः। अन्यत्र मयूरध्वनिरिति [ऋक्पूरब्धूरिति] समासान्तप्रसङ्गतश्च सकलापा इति स्यात्। मेघसमय आयातो न पयोऽद्यापीति ज्ञापयितुं सखीनेवमाह [?]॥

सेति। वातैः नर्तिता सकला मेघाली अपो विमुञ्चति; सकलोपाल्लसनया–कलापानां बर्हाणां उल्लसनेन मण्डलीकरणेन सहितया–कलापिन्या बर्हिण्या अनुनृत्यते च॥२२॥

स्वयमेव गलन्मानकलि कामिनि ते मनः।
कलिकामद्य नीपस्य दृष्ट्वा कां नु स्पृशेद्दशाम्॥२३॥

रत्नश्री

हे कामिनी! ते तव मनश्चित्तं स्वयमात्मनैव तादृश[द्रावक]वस्तुनो दर्शनम् अन्तरेण गलति वर्तमानो मान एव कलिर्वर्तते अर्थान्तरम्। अद्य प्रावृषि नीपस्य तरोः कलिकां साक्षादिवोत्कलिकां दृष्ट्वा कां कीदृशीं दशामवस्थां स्पृशेद् गच्छेद् इति न विद्मः। सुतरां रागवक्तव्यतां यास्यतीति भावः। नु वितर्के। द्वितीयतृतीयपादादिव्यपेतयमकम्॥

हृदयङ्गमा

तदेव द्वितीयतृतीयपादगतमुदाहरति, स्वयमिति। –हे कामिनि। स्वयमेव कान्तानुनयं विनैव, गलन् अपगच्छन्, मानरूपः, कलिः कलहः यस्मात् तादृशं, ते तव, मनः इह वर्षासु इत्यर्थः, नीपस्य कदम्बस्य, कलिकां कोरकं, दृष्ट्वा कां दशाम् अवस्थां, न स्पृशेत्? अपि तु सर्वामेव स्मरदशां गमिष्यतीत्यर्थः, वर्षासु अतिकोमलत्वात् धैर्य्यविरहितं ते मनः विरहे कथं सान्त्वयिष्यसीति भावः। (अत्र ''कलिकामि कलिकामि'' इति यमकपदयोः द्वितीयतृतीयपादादिगतत्वेन व्यवधानात् द्वितीयतृतीयपादगतं मिश्रं व्यवहितम् आदिभागयमकमिति बोध्यम्)॥२३॥

प्रभा

तदेव द्वितीयतृतीयपादगतमुदाहरति–**स्वयमेवेति।** प्रावृडागमं विलोक्य काचित्सखी किंचिदवशिष्टमानां नायिकामाह। हे कामिनि

ते मन इदानी स्वयमेव प्रियानुनयं विना। गलन् मानरूपः कलिः कलहः यस्मात् तादृशं संपन्नम्। तद् इह उपवने नीपस्य कलिकां कोरकं दृष्ट्वा कां दशां न स्पृशेत्। सर्वा अपि मदनावस्थाः प्राप्नुयादित्यर्थः। तवातिकोमलमिदं चेतो विरहे कथं धारयिष्यसीति भावः॥२३॥

विवृति

द्वितीयतृतीयपादादियमकमाह–

स्वयमेव आत्मनैव हे कामिनि ते तव मनः चित्तम्, किंभूतं गलन्मानकलि, मानो गर्वः कलिः कलहः गलन्तौ मनाक् नश्यन्तौ मानकली यस्मात् तत् गलन्मानकलि। अथ वा मान एव कलिः कलिरिव दुःखहेतुत्वात् गलन्नपसरन् यस्मात्। अथ वा मानेन कृतं(तः) कलिः क्रोध इति मध्यमपदलोपी समासः। इदानीमेव तवेत्थंभूतं मनो वर्तते। पुनर्नीपस्य कदम्बस्य कलिकां दृष्ट्वा विलोक्य कान्न स्पृशेद्दशां कामवस्थामासादयेदिति। सर्वामेवावस्थां स्पृशेदिति यावत्।

काचित् **प्रियं** प्रति क्रुद्धा। वर्षासमये अभ्युपगते क्रोधरहितां तां दृष्ट्वा सखी वदति॥

स्वयमेवेति। गलन्मानकलि प्रवसत्प्रणयकलहम्॥२३॥

आरुह्याक्रीडशैलस्य चन्द्रकान्तस्थलीमिमाम्।
नृत्यत्येष चलच्चारुचन्द्रकान्तः शिखावलः॥२४॥

रत्नश्री

एष शिखावलो मयूरः चन्द्रकस्य बर्हस्यान्तोऽग्रभागः लसन्नाकम्पमानश्चारु शोभनः चन्द्रकान्तोऽस्येति लसच्चारुचन्द्रकान्तः आक्रीडशैलस्य क्रीडापर्वतस्य सम्बन्धिनीमिमां सन्निहितचन्द्रकान्तस्य मणेस्तद्रूपां वा स्थलीं भूमिमारुह्य नृत्यति। द्वितीयचतुर्थपादादिव्यपेतयमकम्॥

हृदयङ्गमा

तदेव द्वितीयचतुर्थपादगतमुदाहरति, आरुह्येति। –आक्रीडे उद्याने, यः शैलः क्रीड़ापर्वतः तस्य, इमां चन्द्रकान्तमणिविशेषनिर्मितां स्थलीं स्थानम्, आरुह्य एष शिखाबलः मयूरः, चलन् इतस्ततो गच्छन्, ("लसत्" इति पाठान्तरम्) चारुः मनोज्ञः, यः चन्द्रकः मेचकः, तेन अन्तः रमणीयः, मनोहरः सन् इत्यर्थः, यद्वा, –चारुचन्द्रकस्य अन्तः प्रान्तदेशो यस्य तादृशः सन्, नृत्यति। (अत्र "चन्द्रकान्त चन्द्रकान्त" इति यमकपदयोः द्वितीयचतुर्थपादादिगतत्वेन व्यवधानमिति द्वितीयचतुर्थपादगतं मिश्रं व्यवहितम् आदिभागयमकं ज्ञेयम्)॥२४॥

प्रभा

तदेव द्वितीयचतुर्थपादगतमुदाहरति–**आरुह्येति**। एष शिखावलः मयूरः। आक्रीडः उद्यानम्। पुमानाक्रीड उद्यानम्। इत्यमरः। तत्र यः

शैलः क्रीडापर्वतः तस्य चन्द्रकान्तोपलसंबन्धिनीं स्थलीमारुह्य नृत्यति। कीदृशः लसन्तः विकसन्तः चारवः मनोज्ञाः ये चन्द्रकाः मेचकाः तेन अन्तः मनोहरस्वरूपः। अन्तः प्रान्तेन्तिके नाशे स्वरूपेतिमनोहरे। इति विश्वः। अथवा चन्द्रकाणामन्ताः प्रान्तभागा यस्य इति व्याख्येयम्।।२४।।

विवृति

द्वितीयचतुर्थपादादियमकमाह–

शिखावलः मयूरः नृत्यति नर्तनं करोति। किंभूतः लसच्चन्द्रकान्तः चन्द्रकाणामन्ताश्चन्द्रकान्ताः लसद्भूताः चारवः चन्द्रकान्ता यस्य तथा। किं कृत्वा आरुह्य। कां चन्द्रकान्तस्थलीम्। चन्द्रकान्त(ा) मणिविशेषाः। तेषां स्थलीं(ली)। तामिति सम्बन्धनीयम्। (ताम्। किंसम्बन्धिनी इयम्।) आक्रीडशैलस्य (आ)क्रीडन्ति दीव्यन्ति तस्मिन्निति (आ)क्रीडः। स चासौ शैलश्चेति क्रीडापर्वतः। तस्यां (स्य।) मेघसमय आयातोऽपि तः। (न) सोऽद्यापीत्यमुमर्थमनेन सखीं ज्ञापयति।।

आरुह्येति। चलच्चारुचन्द्रकान्तः–चलन्तः चारवः चन्द्रकान्ताः यस्य सः–शिखावलः आक्रीडशैलस्य उद्यानशैलस्य चन्द्रकान्तस्थलीमारुह्य नृत्यति।।२४।।

उद्धृता राजकादूर्वी ध्रियतेऽद्य भुजेन ते।
वराहेणोद्धृता यासौ वराहेरुपरिस्थिता॥२५॥

रत्नश्री

वराहेण क्रोडवपुषा विष्णुना उद्धृता जलधेर्वरस्योत्तमस्याहेः शेषस्योपरिस्थिता च या असौ सर्वा उर्वी पृथिवी राजकाद् राजसमूहाद् उद्धृता विजित्य गृहीता, अद्य सम्प्रति ते भुजेन बाहुना सर्वाभिसारिणा ध्रियते यथान्यायं परिपाल्यते। तृतीयचतुर्थपादादिव्यपेतयमकम्॥

हृदयङ्गमा

तृतीयचतुर्थपादगतं तदुदाहरति, उद्धृत्येति। –हे राजन्! या असौ उर्वी पृथिवी, वराहेण शूकरमूर्त्तिना भगवता विष्णुना, उद्धृता एकार्णवादुत्थापिता सती, वराहेः श्रेष्ठनागस्य वासुकेः, उपरि स्थिता, पुरा इति शेषः, अद्य सम्प्रति, ते तव, भुजेन सा उर्वी राजकात् राजसमूहात्, उद्धृत्य ध्रियते। (अत्र ''वराहे वराहे'' इति यमकपदयोः तृतीयचतुर्थपादादिगतत्वेन व्यवधानतया तृतीयचतुर्थपादगतं मिश्रं व्यवहितमादिभागयमकम्)॥२५॥

प्रभा

तदेव तृतीयचतुर्थपादगतमुदाहरति–**उद्धृत्येति।** कश्चित् कविः राजानं स्तौति। हे राजन् यासौ वराहेण वराहरूपेण भगवता विष्णुना उद्धृता सागरजलादूर्ध्वमानीता। तथा वराहेः श्रेष्ठनागस्य शेषस्य उपरि या स्थिता। सा उर्वी अद्य राजकाद् राजसमूहाद् उद्धृत्य

आच्छिद्य ते भुजेनं ध्रियते यथान्यायं पाल्यते। केचित्तु स्थिता इत्यत्र अन्तर्भावितण्यर्थमङ्गीकृत्य वराहेण स्थापितेति अर्थं कुर्वन्ति।।२५।।

विवृति

तृतीयचतुर्थपादादियमकमाह–

उद्धृता आच्छिन्ना गृहीता। कुतः राजकात्। राज्ञां समूहो राजकम्। तस्मादुर्वी मेदिनी। ध्रियते पाल्यते। अद्य संप्रति। भुजेन बाहुना। ते त्वदीयेन। कथंभूतेन [-यम्] वराहेणोद्धृतायासौ। वराहेण क्रोडवेषधारिणा हरिणा उद्धृता उत्क्षिप्ता। प्रक्षिप्ता प्रलयकाले जलधेः या असाविति। पुनरपि किंविशिष्टा वराहेरुपरि स्थिता। वरः श्रेष्ठः स चासावहिश्च वराहिरनन्तः। तस्य वराहेरुपरि मस्तके स्थिता यासाविति कश्चित् कञ्चिद्राजानं स्तौति।।

उद्धृतेति। राजकात् राजसमूहात् उद्धृता अपहृता उर्वी अद्य तव भुजेन ध्रियते। या पूर्वं वराहेण उद्धृता समुद्रात् सा वराहेः शेषस्य उपरि स्थिता स्थापिता। स्थिता इत्यत्र अन्तर्भावितण्यर्थः तिष्ठतिः। पृथिवी सकला त्वया ध्रियत इत्यर्थः।।२५।।

करेण ते रणेष्वन्तकरेण द्विषतां हताः।
करेणवः क्षरद्रक्ता भान्ति सान्ध्यघना इव॥२६॥

रत्नश्री

ते तव करेण भुजेन [रणेषु] द्विषतां शत्रूणामन्तं नाशं करोत्यन्तकरेण हता [जनित]क्षताः करेणवो द्विषतां हस्तिनः क्षरद्रक्तं रुधिरमेषामिति क्षरद्रक्ताः तथा सन्तः सन्ध्यानुरक्ता घनाः सान्ध्यघना इव सरागधरापयोधरा इव भान्ति। प्रथमद्वितीयतृतीयपादादिव्यपेतयमकम्॥

हृदयङ्गमा

प्रथमद्वितीयतृतीयपादगतं तदेवोदाहरति, करेणेति। –हे राजन्! रणेषु द्विषतां शत्रूणाम्, अन्तकरेण विनाशकेन, ते तव, करेण हस्तेन, हताः ताड़िताः, अत एव क्षरद्रक्ताः रक्तस्राविणः, करेणवः गजेन्द्राः, ("करेणुरिभ्यां स्त्री नेभे" इत्यमरः) सन्ध्याघना इव सायन्तनमेघा इव, भान्ति शोभन्ते। (अत्र "करेण करेण करेण" इति यमकपदानां प्रथमद्वितीयतृतीयपादादिगतत्वेन व्यपेततया प्रथमद्वितीयतृतीयपादगतं मिश्रं व्यवहितमादिभागयमकम्)॥२६॥

प्रभा

तदेव प्रथमद्वितीयतृतीयपादगतमुदाहरति–**करेणेति**। कश्चित् कविः पराक्रमशालिनं नृपतिं वर्णयति। रणेषु समरेषु। द्विषतां शत्रूणाम् अन्तकरेण विनाशकेन ते करेण हताः ताडिता अत एव क्षरद्रक्ताः गलद्रुधिराः करेणवः गजेन्द्राः संध्याघना इव सायंकालीनारक्तमेघा इव भान्ति शोभन्ते॥२६॥

विवृति

प्रथमद्वितीयतृतीयपादानां आदियमकमाह–

करेण बाहुना ते भवदीयेन रणेषु युद्धेषु अन्तं विनाशं करोतीत्येवं शीलः यः तेन। केषां अन्तकरेण द्विषतामरातीनामिति। अत्र सापेक्षस्यापि गमकत्वादुपपदसमासः। देवदत्तस्य गुरुकुलमित्यादि(वद्) द्रष्टव्यम्। हताः मारिताः करेणवः गजाः भान्ति सन्ध्याघना इव क्षरत् श्चयोतत् रक्तं रुधिरं येभ्यः ते क्षरद्रक्ताः। अत एव सन्ध्याघनैरुपमीयते॥

अथ त्रिपादयमकानि दर्शयति करेणेति। सुगमम्॥२६॥

परागतरुराजीव वातैर्ध्वस्ता भटैश्चमूः।
परागतमिव क्वापि परागततमम्बरम्॥२७॥

रत्नश्री

परा शत्रुभूता चमूः सेना भटैः शूरैर्ध्वस्ता भग्ना। कथमिव? अगे पर्वते [स्थितानां] तरूणां राजिः संघातो वातैरिव। अत्र च व्य[ति]करे [क्वापि] क्वचित् स्थानेऽनिर्दिष्टे परागैः पांशुभिः समरसंक्षोभप्रभवैस्ततं व्याप्तमम्बरमाकाशमिदं परागतं विद्रुतं लीनमिवाभूत्। एवमतितुमुलं [95b] रणंमभवत्। प्रथमतृतीयचतुर्थपादादिव्यपेतयमकम्॥

हृदयङ्गमा

तदेव प्रथमतृतीयचतुर्थपादगतमुदाहरति, परागेति।—हे राजन्! वातैः ध्वस्ता निक्षिप्ता, उत्पाटिता इत्यर्थः, अगस्य पर्वतस्य, तरुराजीव वृक्षश्रेणीव, भटैः सैनिकैः, तव इति शेषः, परा शत्रुपक्षीया, चमूः सेना, ध्वस्ता नाशिता, (अकर्म्मकस्यापि ध्वंसधातोरन्तर्भतण्यर्थत्वात् सकर्म्मकत्वमत्र विवक्षणीयम्) अतश्च परागैः रजोभिः, ध्वंसावशिष्टानां पलायनपराणा शत्रुसैनिकानां पदोत्थापितरेणुभिरित्यर्थः, ततं व्याप्तम्, अम्बरमाकाशं, क्वापि कुत्रापि देशान्तरे, परागतमिव पलायितमिव, धूलिभिरम्बरतलस्यादृश्यत्वादिति भावः। (अत्र "परागत परागत परागत" इति यमकपदानां प्रथमतृतीयचतुर्थपादादिगतत्वेन व्यवहिततया प्रथमतृतीयचतुर्थपादगतं मिश्रं व्यवहितमादिभागयमकम्)॥२७॥

प्रभा

तदेव प्रथमतृतीयचतुर्थपादगतमुदाहरति–**परेति।** राजप्रभावो वर्ण्यते। हे राजन् तव भटैः। वातैः ध्वस्ता उत्पाटिता। परः प्रोत्तुङ्गः अगः पर्वतः तत्संबन्धिनो ये तरवस्तेषां राजी पङ्क्तिः सेव चमूः अरिचमूर्ध्वस्ता विनाशिता। अन्तर्भावितण्यर्थः। तदा परागैः युद्धसंमर्दोत्थितैः पांसुभिः ततं व्याप्तम् अम्बरं क्वापि कल्पनातीते स्थाने परागतमिव पलायितमिव। तदानीं धूलिभिरम्बरमलक्षितमभूदित्यर्थः।।२७।।

विवृति

प्रथमद्वि(तृ)तीयचतुर्थपादादियमकमाह–

वराह(परागः)प्रकृष्टा(ष्टो)यु(योऽ)गः पर्वतः तस्य तरवः। तेषां राजिः [राजी] पङ्क्तिः सा वातैः वस्ते वा(इव ध्वस्ताऽ)धः पातिते(ता) तव हदैः(भटैः) शूरैः चमूर्वाहिनी। वराह(परा)गतमिव प्रब(प)लायितमिव क्वापि परागो धूलिः तेन(त)तं व्याप्तम्बरं गगनम्।।

तृतीयपादराहित्येन त्रिपादयमकोदाहरणं पाठेषु न दृश्यते। परेति–परा विपक्षभूता; अगतरुराजी पर्वतवृक्षपंक्तिः वातैरिव, परा चमूः तव भटैः ध्वस्ता; परागततं धूलिव्याप्तम् अम्बरं क्वापि परागतमिव नष्टमिव।।२७।।

पातु वो भगवान् विष्णुः सदानवघनद्युतिः।
स दानवकुलध्वंसी सदानवरदन्तिहा॥२८॥

रत्नश्री

स त्रैलोक्यविख्यातः विष्णुर्भगवानिति पूजावचनम्। वो युष्मान् पातु अपायाद् रक्षतु सदा नित्यम्। नवस्य नूतनस्य जलगर्भस्य घनस्य मेघस्येव द्युतिर्दीप्तिः अस्येति नवघनद्युतिः। श्याम इति यावत्। दानवानामसुराणां कुलं ध्वंसयति इति दानवकुलध्वंसी। सह दानेन मदेन वर्तते सदानो मत्तः। वरश्चासौ दन्ती च सदानश्चासौ वरदन्ती च कुवलयापीडादिः तं हतवान् सदानवरदन्तिहा। द्वितीयतृतीयचतुर्थपादादिव्यपेतयमकम्॥

हृदयङ्गमा

तदेव द्वितीयतृतीयचतुर्थपादगतमुदाहरति, पात्विति। —नवघनद्युतिः नवीनमेघश्यामः, दानवकुलध्वंसी दैत्यवंशघाती, सदानः समदः, यः वरदन्ती श्रेष्ठहस्ती, कुवलयापीड़ाख्यः इति भावः, तं हतवान् इति तथोक्तः सदानवरदन्तिहा, सः प्रसिद्धः, भगवान् विष्णुः वः युष्मान्, सदा पातु। (अत्र "सदानव सदानव सदानव" इति यमकपदानां द्वितीयतृतीयचतुर्थपादादिगतत्वेन व्यपेततया द्वितीयतृतीयचतुर्थपादगतं मिश्रं व्यवहितमादिभागयमकम्)॥२८॥

प्रभा

तदेव द्वितीयतृतीयचतुर्थपादगतमुदाहरति— **पात्विति।** नवघनद्युतिः नवजलदकान्तिः। दानवकुलध्वंसी दैत्यकुल-

विनाशकः। दानेन मदोदकेन सहितः सदानः स चासौ वरः श्रेष्ठः यः दन्ती कंसप्रयुक्तः कुवलयापीडाख्यस्तस्य हन्ता स भगवान् विष्णुः सदा वः युष्मान् पातु।।२८।।

विवृति

द्वितीयतृतीयचतुर्थपादादियमकमाह–

पातु रक्षतु। वो युष्मान्। भगवान् पुण्यवान् ज्ञानवान् वा। विष्णुः श्रीधरः। सदा नित्यम्। नवाश्च ते घनाश्चेति नवघनाः, तेषामिव द्युतिः छाया यस्य स नवघनद्युतिः कृष्णवर्णः स इति विष्णुः। किं विशिष्टः दानवकुलध्वंसी। दानवाः हिरण्याक्षकालनेमिकैटभादयः। तेषां कुलं समूहः वंशो वा। तद्ध्वंस(य)त इत्येवंशीलः। पुनरपि किंविशिष्टः सदानवरदन्तिहा। सह दानेन मदेन वर्तत इति सदानः, स चासौ वरदन्ती च तं हतवानिति। स क(कि)लकुवलयापीडं मत्तं करीन्द्रं हतवान्। यद्यपि 'ब्रह्मभ्रूणवृत्रेषु क्विप्' इति ब्रह्मादिष्वेवोपपदेषु हन्तेर्भूते क्विप्। नान्योपपदे। तथा वि(ऽपि)शिष्टप्रयोगदर्शनाद्भवति।।

पात्विति। नवघनच्छविः कालमेघकान्तिः, दानवकुलध्वंसी असुरवंशघाती, सदानवरदन्तिहा मत्तकुवलयापीडघाती, स भगवान् विष्णुः सदा वः पातु।।२८।।

कमलेः समकेशान्ते कमलेर्ष्याकरं मुखम्।
कमलेख्यं करोषि त्वं कमलेवोन्मदिष्णुषु॥२९॥

रत्नश्री

ते तव कं शिरः। समाः केशा अस्येति समकेशम्। कस्य? अलेर्भ्रमरस्य अलिन इत्यर्थः। भृङ्गस्येव श्यामशिरोरुहं तव शोभतेतराम्। मुखं च ते कमलेन पद्मेन सहेर्ष्याकरम। तत्साम्यात् कमलमिव मुखं विराजत इत्यर्थः। एवं वराङ्गी त्वं कमला लक्ष्मीरिवोन्मदिष्णुषु ये केचित् कामोन्मादशीलास्तेषु मध्ये कं नाम पुरुषम् अलेख्यमगणनीयमुन्मदिष्णुतया करोषि? यस्तज्जां शोभामीदृशीं पश्यति तं सर्वमेवोन्मादयसि न किञ्चिन्मुञ्चसीत्यर्थः। पादचतुष्टयादिव्यपेतयमकमेकजातीयम्॥

हृदयङ्गमा

तदेव सर्वपादगतमुदाहरति, कमिति। –हे प्रिये! ते तव, कं शिरः, (''कं वारिशिरसोः'' इति शाश्वतः) अलेः भ्रमरस्य, समाः सदृशाः, निविड़कृष्णा इति भावः, केशा यत्र तादृशं, तथा मुखं कमलेर्ष्याकरं कमलस्य द्वेषकरं, पद्मविजयीत्यर्थः, अतस्त्वं कमलेव लक्ष्मीरिव, कं जनम्, उन्मदिष्णुषु उन्मत्तेषु मध्ये, अलेख्यम् अगण्यं, करोषि? अपि तु सर्वानेव उन्मादयसीति भावः। (अत्र ''कमले'' इति यमकघटकपदस्य सर्वपादादिस्थत्वात् व्यवहितत्वाच्च सर्वपादगतं मिश्रं व्यवहितमादिभागयमकम्)॥२९॥

प्रभा

सर्वपादगतं तदेव दर्शयति-**कमलेरिति।** हे भामिनि ते कं

मस्तकम्। अलेः भ्रमरस्य। जातौ एकवचनम्। समकेशम् समानाः कृष्णमेचकाः केशा यस्य तत्। ते मुखं कमलस्य ईर्ष्याकरम् असूयाकारि। तत्सदृशमित्यर्थः। अतः त्वं कमलेव लक्ष्मीरिव। उन्मदिष्णिषु उन्मादवत्सु। कं पुरुषमलेख्यं करोषि अगणनीयं विदधासि। न कमपि। यथा लक्ष्मीः सर्वमुन्मत्तं विधत्ते तथा त्वमपीति भावः।।२९।।

विवृति

सर्वपादानामादियमकमाह–

कं शिरः अलेः भ्रमरस्य समाः केशाः यस्य तत् समकेशि(शं)कालकुन्तलइ[मि]त्यर्थः। अलेस्समकेशमित्यत्र यमकत्वात् समासः। देवदत्तस्य गुरुपुत्रादिवत् द्रष्टव्यम्। त्वे[ते]त्वदीयम्। तथा सु(मु)खं कमलेर्ष्याकरं कमलं (अं)भोजं, तस्य ईर्ष्यां अभ्यसूयां करोतीत्येवंशीलं तम्[त्]। कं पुरुषमलेख्यं गण्यं करोषि त्वं न कि(क)ञ्चिदन्त(:)पातिनं (न) करोषीत्यर्थः। केषु। उन्मदिष्णुषु उन्मादशीलेषु। के(व)। कमलेव लक्ष्मीरिव या वर्तसे।।

चतुष्पादयमकमुदाहरति–कमिति। ते तव कं शिरः अलेः भृङ्गस्य समकेशम्। मुखं कमलेर्ष्याकरम्। कमला लक्ष्मीरिव अभिरूपा त्वं कं युवानं उन्मदिष्णुषु अलेख्यं करोषि? शोभातिरेकेण सर्वानुन्मत्तान् करोषीत्यर्थः।।२९।।

मुदा रमणमन्वीतमुदारमणिभूषणाः।
मदभ्रमदृशः कर्तुमदभ्रजघनाः क्षमाः॥३०॥

रत्नश्री

अदभ्रजघनाः स्त्रियो मदेन यौवनमधुपानादिसम्भूतेन। भ्रमन्त्यो दृशो नेत्राण्यासामिति मदभ्रमदृशः। उदारा महार्हा मणयः पद्मरागेन्द्रनीलादयः रत्नमेखलादिस्वभावा भूषणमलङ्करो यासामिति उदारमणिभूषणाः सत्यः। मुदा प्रीत्या अन्वितं युक्तं रमणं वल्लभं कर्तुं क्षमाः शन्कुवन्ति। रमणमतितरां मोदयन्तीति यावत्। पादचतुष्टये पादादिव्यपेतयमकमेजातीयम्॥

हृदयङ्गमा

एवमव्यपेतव्यपेतयोर्भेदमुदाहृत्य सम्प्रति व्यपेतस्यव सजातीयविजातीयत्वेन प्रकारभेदं दर्शयितुं प्रथमं प्रथमद्वितीययोरेकविधं तृतीयचतुर्थयोश्चान्यविधं तदुदाहरति, मुदेति। –उदाराः उत्कृष्टाः, मणयः रत्नानि, भूषणम्; उदाराणि बहुमूल्यानि, मणिभूषणानि रत्नाभरणानि इति वा, यासां ताः, मदेन मद्यपानजेन सौभाग्यादिजन्यविकारविशेषेण वा, भ्रमन्त्यः घूर्णन्त्यः, दृशो नयनानि यासां तथोक्ताः, तथा अदभ्रं विशालं, जघनं यासां तथाभूताः, प्रमदाः इति शेषः, ("जघनाः" इत्यत्र "मन्मथाः" "मनसः" इति वा पाठकल्पना सङ्गता, प्रथमद्वितीयपादयोः चतुरक्षरघटितयमकवत्तया अत्रापि तदौचित्यात्) मुदा हर्षेण, रमणं प्रियम्, अन्वीतम् अनुगतम्, अधीनमित्यर्थः, रमणं मुदा अन्वीतं हर्षयुक्तमिति वा, कर्त्तुं क्षमाः शक्ताः। (अत्र प्रथमद्वितीयपादादौ "मुदारम मुदारम" इति तृतीयचतुर्थपादादौ च "मदभ्र मदभ्र" इति

यमकघटकपदानां विजातीयत्वेन व्यवहितत्वेन च निर्देशात् प्रथमद्वितीययोस्तृतीयचतुर्थयोश्च विजातीयं मिश्रं व्यवहितमादिभागयमकम्)।।३०।।

प्रभा

इतः परं व्यपेतस्यैव सजातीयविजातीयघटितानि प्रकारान्तराणि दर्शयन् प्रथमद्वितीययोरेकप्रकारं तृतीयचतुर्थयोस्तदन्यप्रकारं दर्शयति–**मुदेति।** उदाराः प्रशस्ताः ये मणयस्तेषां भूषणानि यासां ताः। मदेन मदिरास्वादजनितेन उन्मादेन भ्रमन्त्यः घूर्णन्त्यः दृशो यासां ताः। अदभ्रजघना विशालनितम्बा रमणं मुदा आनन्देन अन्वीतं संयुक्तं कर्तुं क्षमाः सन्ति।।३०।।

विवृति

चतुष्पादयमकमेव भिन्नरूपावृत्ति त्रिभिरुदाहरणैर्दर्शयति–मुदेत्यादिना। अन्वीतं सङ्गतम्; ई गतौ इत्यस्मात् कर्तरि निष्ठा। शेषं सुगमम्। अत्र प्रथमद्वितीययोः पादयोः एका आवृत्तिः, तृतीयचतुर्थयोः एका आवृत्तिः।।३०।।

उदितैरन्यपुष्टानामारुतैर्मे हृतं मनः।
उदितैरपि ते दूति! मारुतैरपि दक्षिणैः।।३१।।

रत्नश्री

हे दूति! अन्यपुष्टानां कोकिलानां सम्बन्धिभिरारुतैः शब्दैरुदितैः सम्पन्नैः मे मम मनो हृतं गृहीतम्। न केवलमेभिः। ते तवोदितैरालापैः पेशलैर्दक्षिणैर्मारुतैरपि पवनैश्च हृतमिति प्रकृतम्। प्रथमतृतीययोर्द्वितीयचतुर्थयोश्च पादयोरादितो व्यपेतयमकम्।।

हृदयङ्गमा

प्रागुक्तप्रकारमेव प्रथमतृतीययोरेकविधं द्वितीयचतुर्थयोश्चान्यविधमुदाहरति, उदितैरिति।—हे दूति! अन्यपुष्टानां कीकिलानाम्, उदितैः उत्थितैः, आरुतैः आकूजितैः, समन्तात् उद्गतझङ्कारैरित्यर्थः, तथा ते तव, उदितैः कथितैरपि, प्रियाक्लेशसूचकैर्वचनैरपीत्यर्थः, तथा दक्षिणैः मारुतैः मलयानिलैरपि, मे मम, मनः हतं व्यथितमित्यर्थः। (अत्र प्रथमतृतीयपादादौ ''उदितै उदितै'' इति द्वितीयचतुर्थपादादौ च ''मारुतै मारुतै'' इति यम्यमानपदानां विजातीयत्वात् पादादिभागस्थत्वात् व्यवहितत्वाञ्च प्रथमतृतीययोर्द्वितीयचतुर्थयोश्च विजातीयं मिश्रं व्यवहितमादि- भागयमकम्)।।३१।।

प्रभा

तदेव प्रथमतृतीययोर्द्वितीयचतुर्थयोश्चोदाहरति—**उदितैरिति।** कश्चित् प्रियाविरहसंतप्तो ब्रूते। आः इति खेदे। अन्यपुष्टानां कोकिलानाम्। उदितैः उद्गतैः। रुतैः मे मनो हतम् हिंसितं

व्यथितमिति भावः। न केवलं तैरेव हतं अपि तु हे दूति ते उदितैः संदेशवचनैरपि। तथा दक्षिणैः मारुतैः मलयानिलैरपि हतम्।।३१।।

विवृति

प्रथमद्वि(तृ)तीययोः द्वितीयचतुर्थयोः पादयोरादियमकमाह–

इति। उदितैरुद्गतैरन्यैः पुष्टानां परभृतानामारुतैरासमन्ततो रुतानि जीवि[शब्दि?]तानि कूजितानि तैर्मदीयं कृ(हृ?)तं पीडितं मनः चित्तम्। न परं तैरवे। उदितैरपि जल्पितैरपि। हे दूति त्वदीयैर्हृतं मतं(?) मे मनः तथा मारुतैरपि पवनैरपि दक्षिणैः केरलविषयादाय(ग)तैः।।

उदितैरिति। वसन्तकाले सापराधः सामदानादिभिः अप्रसादिताप्रियः पश्चात्तापवत्या तया प्रेषितां कृतचाटुवचनां दूती प्रत्याह–अन्यपुष्टानां कोकिलानाम्, उदितैः जातैः, आरुतैः आरावैः, दूतिं तव उदितैः वचनैः, दक्षिणैः मारुतैरपि, मे मनो हृतम्। अत्र प्रथमतृतीययोः पादयोः एका आवृत्तिः ; द्वितीयचतृर्थयोरेका आवृत्तिः।।३१।।

सुराजितह्रियो यूनां तनुमध्यासते स्त्रियः।
तनुमध्या क्षरत्स्वेदसुराजितमुखेन्दवः॥३२॥

रत्नश्री

स्त्रियो यूनां तनुमङ्गमध्यासते अधिशेरते पुरुषायितयोगेन। किंभूताः? सुरया मदिरया जिता उत्सा[96a]रिता ह्रीस्त्रपा अस्यामिति सुराजितह्रियोऽत्यन्तमत्ताः। तनु क्षामं मध्यमुदरमासामिति तनुमध्याः, क्षरता स्वेदेन श्रमजलेन मुक्ताजालकेनैव सुष्ठु राजितमलंकृतं मुखमिन्दुकान्त्यादिना आसामिति क्षरत्स्वेदसुराजितमुखेन्दवः। द्वितीयतृतीययोः प्रथमचतुर्थयोश्च पादयोरादितो व्यतेतयमकम्॥

हृदयङ्गमा

प्रागुक्तमेव प्रथमचतुर्थपादयोरेकविधं द्वितीयतृतीययोश्चान्यविधमुदाहरति, सुरेति। –तनु क्षीणं, मध्यं कटिदेशः यासां ताः, क्षरद्भिः सात्त्विकभावोदयेन गलद्भिः, स्वेदैः घर्मोदविन्दुभिः, सुराजिताः सुशोभिताः, मुखेन्दवः मुखचन्द्रा यासां तादृश्यः, स्त्रियः कामिन्यः, सुरया मद्यपानेन, जिताः पराभूताः, अपगता इति यावत्, ह्रीर्लज्जा यासां तथाभूताः सत्यः, यूनां तरुणानां, तनुं शरीरम्, अध्यासते अधितिष्ठति। (अत्र प्रथमचतुर्थपादादौ ''सुराजित सुराजित'' इति द्वितीयतृतीयपादादौ च ''तनुमध्या तनुमध्या'' इति यमकघटकपदानां विजातीयत्वात् व्यवहितत्वाच्च प्रथमचतुर्थयोर्द्वितीयतृतीययोश्च विजातीयं मिश्रं व्यवहितमादिभाग- यमकम्)॥३२॥

प्रभा

एतदेव प्रथमचतुर्थयोर्द्वितीयतृतीययोरुदाहरति–**सुराजितेति।** मधुपान- गोष्ठीवर्णनमेतत्। तनुमध्याः कृशोदर्यः। क्षरत्प्रस्त्रवन् यः स्वेदः तेन सुराजिताः सुशोभिता मुखेन्दवः मुखचन्द्रा यासां ताः। तथा सुरया मदिरासेवनेन जिता परास्ता ह्री लज्जा याभिस्ताः स्त्रियः यूनां तरुणानाम् तनुं शरीरमध्यासते आश्रयन्ति।।३२।।

विवृति

प्रथमचतुर्थयोः द्वितीयतृतीययोरादियमकमाह–

सुरा(र)या मदिरा(र)या जिता ह्रीर्लज्जा यासां ताः सुराजितह्रियः यूनां तरुणानां तनुः(नुं) शरीरमा(मध्या)सते अधितिष्ठन्ति स्त्रिय(:। तनु) कृशा(शं) मध्ये यासां ताः तनुमध्यमाः(?) क्षामोदर्यः। क्षरत्स्वेदसुराजितमुखेन्दवः। क्षरंश्चासौ स्वेदश्च क्षरत्स्वेदः। श्च्योतद्धर्माम्भः। तेनसुष्ठु राजिताः शोभित(ा)मुखेन्दवो यासां ताः। इति व्यपेतपादादियमक-विकल्पास्त्रयोदश।।

सुरेति। सुगममेतत्।।३२।।

इति व्यपेतयमकप्रभेदोऽप्येष दर्शितः।
अव्यपेतव्यपेतात्मा विकल्पोऽप्यस्ति तद्यथा॥३३॥

रत्नश्री

एवं विकल्प्य निगमयति- इत्युक्तेन विधिना व्यपेतस्य यमकस्य प्रभेदोऽपि विकल्पश्चैव प्रकृतो दर्शित उदाहृतः। न केवलमव्यपेतमयमकविकल्प इति अपिशब्देनाचष्टे। अव्यपेतव्यपेतश्चात्मा स्वभावो व्यामिश्रो यस्य विकल्पस्य, प्रकरणाद् यमकसम्बन्धिनः, सोऽप्यस्ति, न केवलमुक्तः शुद्धः। अस्येति पाठे अस्य यमकस्य सम्बन्धी विद्यत इति गम्यते। कीदृशोऽसौ? तद्यथेत्युदाहरति॥

हृदयङ्गमा

प्राक् अव्यपेतं व्यपेतञ्च यमकं पृथक् उदाहृत्य सम्प्रति तयोरेकत्रमिश्रणात् अपरान् भेदान् दर्शयन्नाह, इतीति।—इति उक्तप्रकारेण, एषः व्यपेतानां व्यवहितानां, यमकानां प्रभेदोऽपि (अपिकारेण प्राक् अव्यपेतयमकप्रभेदः दर्शित इति समुच्चीयते) दर्शितः उदाहृतः ; अव्यपेतः अव्यवहितः, व्यपेतः व्यवहितश्च, आत्मा स्वरूपं यस्य तादृशः, उभयमिश्र इत्यर्थः, विकल्पः प्रभेदः अपि, अस्ति। तत् यथेति उदाहरणार्थम्॥३३॥

प्रभा

एतावत्पर्यन्तमव्यपतंव्यपेतयोः शुद्धस्वरूपयोराकारो दर्शितः। तमुपसंहरन् संमिश्रणात्मकं तयोः स्वरूपं दर्शयति-**इतीति**। इति एवमुक्तप्रकारेण व्यपेतानां व्यवहितानां यमकानां प्रभेदा दर्शिताः।

अपिना प्रागेव निर्दिष्टानामव्यपेतानां संग्रहः। अव्यपंतः अव्यवहितः व्यपेतः व्यवहितश्च आत्मा स्वरूपं यस्य तादृशः। विकल्पः भेदः। अस्ति। तद् यमकं यथा तथा दर्शयामीति शेषः॥३३॥

विवृति

इत्युक्तन्यायेन व्यपंतपादादियमकविकल्पोऽप्येप दर्शितः। अव्यपेतव्यपेतात्मा विकल्पोऽप्यस्ति। अव्यपेतः स्वावयववर्णावृत्त्या, व्यपेतो विजातीयपदपादा [द]व्यवधानात्। अव्यपेतव्येपता(वा)त्मानौ ये(स्व)भावौ यस्य स तथाभूतो भेदोऽप्यस्ति तृतीयो राशिरस्ति। यद्यप्ययमव्यपेतयमकविकल्प एवान्तर्भवति तथाऽपि उक्तलक्षणान्तर्गतोऽपि उभयथा व्यपदिश्यते। किञ्चिद्वैधर्म्यदर्शनात्। अस्ति हि लोके ह्य(व्य?)पदेशः येभि(पि) प्र(प्रा)सादनिवासिनः ते भूमिनिवासिनोऽपि अभिधीयन्त इति। तद्यथेत्यादिना उदाहरति॥

व्यपेतयमकमुपसंहृत्य अव्यपेतव्यपेतादियमकं दर्शयाम इत्याह–इतीति। विकल्पो भेदः॥३३॥

सालं सालम्बकलिकासालं सालं न वीक्षितुम्।
नालीनालीनवकुलानाली नालीकिनीरपि॥३४॥

रत्नश्री

सा आली सखी काचिद् विवक्षिता विरहातुरा वीक्षितुं न अलं [न] शन्कोति, किम्? आलम्बनमालम्बः सह तेन वर्तते सालम्बा आलम्बमानाः समन्ततोऽवरूढा इत्यर्थः। सालम्बाः कलिका यासां सालानां शाखानां ताः सालम्बकलिकासाला यस्य सालस्य तरुविशेषस्य सर्जस्य तमीक्षितुं विरहज्वरसम्भूता-मनोरोचकत्वा[न्ना]लम्। सालम्बाः कलिका एव परिक्षेपसाधर्म्येण सालः प्राकारो यस्येत्यपि व्याख्यायते। न केवलमेवम्। आलीनाः श्लिष्टा वकुलाः केसरतरवः पुष्पसमृद्धियोगाद् यैरित्यालीनवकुलान् अलीन् भ्रमरानपि पूर्ववद्वीक्षितुं नालमिति प्रकृतम्। नालमस्यास्तीति नालीकं पद्मम्। अन्येषां दृश्यत इति दीर्घत्वम्। तद्विद्यते आसामिति नालीकिनीः पद्मिनीरपि वीक्षितुं नालमिति प्रकृतम्। दुष्करं वराकी जीविष्यतीति काचिद् विरहिणीं सखीमुद्दिश्य कञ्चिदेवं वक्तीति प्रथमद्वितीययोस्तृतीयचतुर्थयोश्च पादयोरादितोऽव्यपेतव्यपेतं यमकम्॥

हृदयङ्गमा

तत्र प्रथमद्वितीयपादे एकविधं तृतीयचतुर्थपादे चान्यविधमव्यपेतव्यपेतात्मकमादिभागयमकमुदाहरति, सेति। –सा आली मम सखी, सालम्बा आलम्बेन सम्यक् लम्बमानत्वेन सह वर्त्तमानाः, लम्बमाना इत्यर्थः, याः कलिकाः कोरकाः, ताः सलति चलति, आन्दोलते इत्यर्थः, यस्य तादृशं, यद्वा,–ताभिः सलति

शोभते इति तथोक्तं, सालं वृक्षमात्रं सर्जवृक्षं वा, (''सालः पादपमात्रेऽपि प्राकारे सर्जपादपे'' इति मेदीनी) वीक्षितुं द्रष्टुं, न अलं न शक्ता, कलिकायाः उद्दीपकत्वादिति भावः, तथा आलीनवकुलान् आलीनाः सम्यक्तया आश्रिता इत्यर्थः, वकुलाः वकुलवृक्षा यैस्तथाविधान् वकुलासक्तान् इत्यर्थः, (आलीयन्ते अत्र इति अधिकरणे क्त-प्रत्ययः) अलीन् भ्रमरान्, अपीति शेषः, न, वीक्षितुम् अलमिति पूर्वतो योजनीयम्; तथा अलीकं मिथ्यावाक्यं, विद्यते यासां तादृशीः अलीकिनीरपि मिथ्यावादिनीरपि, प्रियस्ते आगमिष्यत्यचिरेणेत्यादिना मिथ्यावचनेन सान्त्वयन्तीरपि इति भावः, सखीरिति शेषः, न, वीक्षितुम् अलम् इति अत्रापि पूरणीयम्। (विदेशस्यं नायकं प्रति नायिकाप्रेरिताया दूत्या उक्तिरियम्। अत्र प्रथमद्वितीयँपादादौ ''सालं सालं सालं सालं'' तृतीयचतुर्थपादादौ च ''नाली नाली नाली नाली'' इति यम्यमानपदानाम् अव्यवधानत्वेनाव्यपेतत्वं, तथा मध्ये ''वकलिका'' ''नवकुला'' इत्यक्षराणां व्यवधानत्येन व्यपेतत्वच्चेति उभयात्मकं, पादानामादिगतत्वाच्चादिभागसंख्यकं, पूर्वार्द्धापेक्षया परार्द्धस्य विभिद्यतया च विजातीयत्वमिति प्रथमद्वितीयपादगतं तृतीयचतुर्थपादगतश्च उभयात्मकं विजातीयमिश्रादिभागयमकमिति बोध्यम्)।।३४।।

प्रभा

तत्र प्रथमद्वितीययोस्तृतीचतुर्थयोस्तदुदाहरति-**सालमिति।** वसन्ते कस्याश्चिद् दूती नायकं प्रति तदवस्थां वर्णयति। अत्र पदानि। सा अलम् सालम्वकलिकासालम् सालम् न वीक्षितुम् न अलीन् आलीनबकुलान् आली नालीकिनीः अपि इति। सा आली

मत्सखी। आलम्बा लम्बमाना याः कलिकाः कोरकाः। मञ्जर्य इति भावः। ता एव आच्छादकत्वात् सालः प्राकारः। सालः प्राकारवृक्षयोः। इति अनेकार्थध्वनिमञ्जरी। तेन सहितम्। सालम् वृक्षम्। आम्रवृक्षमिति भावः। विक्षितुं न अलम्। तस्य उद्दीपकत्वादिति भावः। तथा आलीयन्ते अत्र इति आलीनाः। अधिकरणे क्तः। तथा च आलीनाः आश्रयीकृता बकुला यैस्तान् आलीनबकुलान् अलीन् वीक्षितुं नालम्। तथा नालीकिनीः पद्मिनीः। नालीकौ पद्मनाराचौ। इति त्रिकाण्डशेषः। अपि वीक्षितुं सा नालम्। अत्र केचित् सालम्बकलिकासालमित्यस्य सालम्बा लम्बमानत्वेन सह वर्तमाना याः कलिकाः ताः सलति गच्छति इति सालम्बकलिकासालः तम्। तथा नालीकिनीः मिथ्यावादिनीः झटिति तव प्रिय आगमिष्यति इति मिथ्या प्रियवादिनीः सखीः अपि वीक्षितुं नालमित्यर्थं प्रदर्शयन्ति। अपरे केचन सालम्बकलिकासालम् इत्यत्र सालम् इत्यस्य रलयोरभेदत्वमाश्रित्य सारमिति पदं परिकल्प्य सालम्बकलिकाभिः सारं श्रेष्ठम् इति अर्थं दर्शयन्ति। अन्ये पुनः सालम्बकलिकासु सालः आलेन अलिकदम्बेन विषेण वा सहितः। अथवा सालम्बकलिकाभिः सालः सभूषणः यः सालवृक्षः तम् इति विवृण्वन्ति। अत्र प्रथमपादे सालं सालं इति अव्यपेतम्। तस्यैव द्वितीयपादे पुनरावृत्तिरिति व्यपेतं च। तथा उत्तरार्धे नाली नाली इत्यत्रापि अक्षरद्वयापेक्षया अव्यपेतम् चतुरक्षरापेक्षया व्यपेतम् इति रहस्यम्।।३४।।

विवृति

तत्र व्यपेताव्यपेतं प्रथमद्वितीययोः तृतीयचतुर्थयोः पादयोरादियमकमुदाहरति–

सालं सालद्रुमं, किं विशिष्टं सालं, सालम्बकलिकासालं सालम्बाश्च ताः कलिकाश्च ता एव सालः प्राकारो यस्या(सौ)सालम्बकलिकासालः। अथवा सालम्बकलिकाभिः सारः उत्कृष्टः तम्। सा आली सखी वीक्षितुं द्रष्टुं नालं न समर्था। न परं सालमेव। तथा नालीन् षट्पदानपि विक्षितुं अलम्। कथंभूतान्। आलीनवकुलान् आलीन आश्रितो वकुलः केसरतरुः यैस्ते आश्रितवकुलाः तान्। तथा नालीकिनीरपि न सा पद्मिनीरपि द्रष्टुमलमिति। केचित् सपत्नीरपीति। कयाचिद्वसन्तसमयमधिकृत्य काचित् विरहव्यथाकदर्थिता उच्यते। यतो(?)विरहज्वर-सम्भूतमनोज्ञारोचकस्य जनस्यैवंविधस्य रमणीयवस्तुदर्शनस्य दुःखहेतुत्वात्। तदुक्तम्। 'दुःखिते मनसि सर्वमसह्य'मिति। सालं सालमिति निरन्तरव्यावृत्त्या अव्यपेतात्मकत्वम्। कलिकेत्यादिना व्यवधानात् पुनः व्यपेतात्मकत्वम्॥

सेति। सा, अलं, सालम्बकलिकासालं, सालं, न वीक्षितुम्, न, अलीन्, आलीनवकुलान्, आली, नालीकिनोः, अपि। सा आली सखी सालम्बकलिकासालम् आलम्बमानमञ्जरी-श्रेष्ठसहितम्—सालः सारः, रलयोरभेदात्—सालं वृक्षं चूतादिं वीक्षितुं न अलम्। आलीनवकुलान् आश्लिष्टवकुलकुसुमान् अलीन् भृङ्गान् नालीकिनीः पद्मिनीरपि वीक्षितुं नालमिति वाक्यद्वयमेतत्। अत्र प्रथमद्वितीययोः पादयोः एकमव्यपेतव्यपेतं, तृतीयचतुर्थयोः एकमव्यपेतव्यपेतम्॥३४॥

कालं कालमनालक्ष्यतारतारकमीक्षितुम्।
तारतारम्यरसितं कालं कालमहाघनम्॥३५॥

रत्नश्री

कालं समयं काला महान्तो घना अस्मिन्निति कालमहाघनम्। विपुलनीलजलदम्। तारस्य भावस्तारता उच्चैस्तरत्वम्। तया गाम्भीर्ययोगेन रम्यं कान्तं रसितं गर्जितं मेघसम्बन्धि यस्मिन्निति [96b] तारतारम्यरसितं गम्भीरघनगर्जितगर्भम्। अनालक्ष्यास्तिरोहिताः, मेघपिहितत्वात्। तारा उज्ज्वलास्तारका नक्षत्राणि अस्मिन्निति अनालक्ष्यतारतारकं कालं विरहिणि जने कृतान्त[सदृश]मतिदुःसहत्वाद् वीक्षितुं का नाम स्त्री संयुक्ताऽपि प्रागेव वियुक्ता। अलं शन्कोति? नैव काचित्। इति प्रावृष उत्कण्ठाकारित्वमुद्भावितम्। प्रथमचतुर्थयोर्द्वितीयतृतीययो-रादितोऽव्यपेतव्यपेतयमकं नैकजातीयम्॥

हृदयङ्गमा

तदेव प्रथमचतुर्थपादयोरेकविधं द्वितीयतृतीययोश्चान्यविधमुदाहरति, कालमिति।–का, विरहिणी रमणीति शेषः, अनालक्ष्या मेघाच्छन्नत्वाददृश्याः, तारा महत्वः, समुज्ज्वला इत्यर्थः, तारका नक्षत्राणि यत्र तथोक्तं, तथा तारतया अत्युञ्चत्वेन, अरम्याणि श्रोत्रविरसानि, रसितानि मेघगर्जितानि यस्मिन् तादृशं, तथा कालाः कृष्णवर्णाः, महान्तः प्रगाढ़ाः, घना मेघा यस्मिन् तथाभूतं, कालं विरहिणां प्राणनाशकत्वात् यमस्वरूपं, कालं वर्षाकालम्, इक्षितुं द्रष्टुम्, अलं समर्था? न काऽपीत्यर्थः। (अत्र प्रथमचतुर्थपादादौ "कालं कालं कालं कालम्" इति

द्वितीयतृतीयपादादौ च ''तारतार तारतार'' इति यम्यमानपदानां पूर्ववदव्यवहितव्यवहितत्वेन उभयात्मकं विजातीयं मिश्रमादिभागयमकम्। ''कालं कालमानालक्ष्य'' इत्यत्र ''कालं कालं दुरालक्ष्य'' इति ''कालं कालमहाघनम्'' इत्यत्र च ''कालं कालंकृतं घनैः'' इति पाठं केचित् सम्यङ्मन्यन्ते, कालं कालम् इति प्रथमपादे द्वयोरपि सानुस्वारत्वेन चतुर्थपादेऽपि तदौचित्यात्। घनैः कालंकृतं कुत्सितालङ्कारवन्तं कृतमिति तत्रार्थः)।।३५।।

प्रभा

तदेव प्रथमचतुर्थयोर्द्वितीयतृतीययोश्चोदाहरति–**कालमिति**। प्रावृट्- समयमागतं वीक्ष्य नायिकया प्रेषिता दूती तं वदति। का विरहिणी। अनालक्ष्याः मेघाच्छादितत्वाद् अदृश्याः ताराः निर्मलमौक्तिकाः इव तारा नक्षत्राणि यस्मिंस्तम्। तारो निर्मलमौक्तिके। इति हेमचन्द्रः। ताराः स्थूला उज्ज्वला वा इति केचित्। तारतया अत्युच्चस्वरतया अरम्यम् अमनोहरं रसितं गर्जितं यस्मिंस्तम्। कालाः कृष्णवर्णा महाघना यत्र तम्। कालं मृत्युस्वरूपम्। कालं प्रावृट्कालं वीक्षितुमलं समर्था का इत्यर्थः। अत्र यमके अनुस्वारन्यूनता न दोषायेति पूर्वं (३.१५) कथितमनुसंधेयम्।।३५।।

विवृति

प्रथमचतुर्थयोः द्वितीयतृतीययोः पादादियमकमाह–

का विरहिणी कालं समयं वीक्षितुं द्रष्टुं अलं न कदा(का)चिदित्यर्थः। किंविशिष्टमित्याह अनालक्ष्यतारतारकं अनालक्ष्याः ताराः उज्ज्वलाः भास्वराः तारकाः ज्योतीषि यस्मिन्नसौ

तत्तथा। तारतारम्यरसितं तारं उच्चैः श्रुतिः तस्य भावः तारता तया रम्यं रमणीयं रसितं गर्जितं यस्मिन् तम्। अथवा तारतयाऽरम्यं अरमणीयं विरहित्वात्। तं(?) कालं(:) कृतान्त(:। तभिव)। मरणात्मकत्वात्। तथा कालमहाघनं कालाः महान्तो घना यस्मिन्निति। ननु(तु) कालशब्दो वर्षापर्यायो व्याख्यातव्यः। तस्यासाधारणविशेषणत्रयोपादानादेव लब्धत्वात्। अतो यमपर्यायो व्याख्यायते। अन्यथा अर्थादापन्नस्य स्वशब्देन पौ(पु)नर्वचने पौनरुक्त्यदोषप्रसङ्गः।।

प्रथमतृतीययोरेकमव्यपेतव्यपेतं, द्वितीयचतुर्थयोरेकमव्यपेतव्यपेतमुदाहरणीयम्; तन्न दृश्यते पाठेषु। केति–का, अलं पर्याप्ता, अनालक्ष्यतारतारकं भेघैः अदृश्यितघवलतारकं, तारतारम्यरसितम् उच्चतया अरम्यं दुःसहं रसितं स्तनितं यस्मिन् तं, कालं मृत्युभूतं, कालमहाघनं कृष्णबृहनमेघम्; एवंभूतं कालं प्रावृषम्, ईक्षितुं का पर्याप्ता? सामर्थ्याद्विरहिणीति गम्यते। अत्र प्रथमचतुर्थयोः पादयोरेकमव्यपेतव्यपेतं द्वितीयतृतीययोरेकम्।।३५।।

याम यामत्रयाधीनायामया मरणं निशा।
यामयाम धियास्वार्त्याया मया मथितैव सा॥३६॥

रत्नश्री

यामानां त्रयं त्रयोः प्रहराः। तत्राधीन आयत्त आयामो दैर्घ्यं यस्यास्तया निशा रात्र्या वर्षायमाणया हेतुभूतया मरणमनुयामो गच्छामो वयं भवदर्थे। तन्नेदमस्मान् दुनोति। किं त्विदमतिकष्टम्-यामङ्गनामहं गतवानस्मि सेदानीमसूनामार्तिं पीडामायातीत्यस्वार्त्याया प्राणार्तिदुःखनिर्वेशा[१]। मया अधिया तत्परित्यागात् दुर्बुद्धिनेदृशेन मया सा मथितैव हतैव। नात्र सन्देहः। न हि सा मद्विरहिता जीवति वराकी। स्वविरहदुःखनिमित्तत्वात् तन्मरणस्य मया मथितैवत्युक्तम्। एवं विपद्यमानेन मया सह सापि वराकी मथिताऽनया निशेति वा योज्यम्। एवं वियुक्तः कश्चित् कामी प्रियामनुशोचति। पादचतुष्टयादियमकं व्यपेत मव्यपेत[मेक]रूपम्॥

पादादियमकविकल्पमुपसंहरति-

हृदयङ्गमा

तदेव पादचतुष्टयगतमुदाहरति, यामेति। -यामत्रयस्य प्रहरत्रितयस्य, अधीनः आयत्तः, आयामो दैर्ध्यं यस्याः तादृश्या सुदीर्घप्रहरत्रयव्यापिन्या, ("त्रियामां राजनीं प्राहुस्त्यक्तवाद्यन्त-चतुष्टयम्" इति वचनात् निशायाः त्रियामात्मकत्वं बोध्यम्) निशा रजन्या हेतुना, मरणं याम मृत्युं प्राप्नुम, वयमिति शेषः, (प्रार्थनायां लोट्) निशायाः सातिशयविरहोद्दीपकत्वादिति भावः। ननु

किमित्येवममङ्गलमाशास्यते इत्याह, यामिति। –धिया मनसा, यां कान्ताम्, अयाम अगच्छाम, यस्याश्चिन्तया कालमयापयाम इत्यर्थः, यां जीवितसर्व्वस्वाभिमानमोचरतामकुर्म्म इत्यर्थो वा, सा आयामया अतिदीर्घया, कल्पकोटिशतवत् दीर्घतरया अनया रजन्या इत्यर्थः, अस्वत्तर्या असूनां प्राणानाम्, अर्त्तिः पीड़ा तया द्वारभूतया, मथितैव प्रायेण विनाशितैव, भविश्चंतीति शेषः ; यया निशया कठोरस्यापि मम प्राणां मतप्रायाः, तथैव निशया मद्वियोगेन सुकुमारतरायाः कान्तायाः प्राणा अवश्यमेव यास्यन्ति, अतो मम मरणमेव श्रेय इति भावः। यद्वा, –मरणं याम इति (सम्भावनायां लोट्) वयं मरिष्याम इति सम्भावयाम इत्यर्थः ; अस्तु अस्माकं मृत्युः, न तत्र किमपि दुःखं, किन्तु धिया याम् अयाम (या-धातोर्लङि उत्तमपुरुषवबहुवचनस्य रूपमिदम्) अस्वर्त्त्याया अस्वर्त्तिं मद्विरहेण प्राणव्यथाम्, आयाति प्राप्नोतीति तादृशी, (आङ्पूर्वकात् या-धातोः क्विपि रूपम्) सा मयैव मथिता नाशिता, विदेशागतस्य ममैव प्रणयिनो विरहे दीना सा म्रियते इत्येव मे महद्दुःखमिति भावः। (निशायां प्रदीप्तकामाग्नेः विरहिणः स्वावस्थानुभवेन अनुमितकान्तावस्थस्य विलापोक्तिरियम्। अत्र "याम याम" इति यमकपदस्य पादचतुष्टयस्यादौ स्थिततत्वेन अव्यवहितव्यवहितत्वेन च सर्वपादगतं मिश्रमुभयात्मकमादिभागयमकम्)॥३६॥

प्रभा

तदेव पादचतुष्टयगतमुदाहरति–**यामेति।** कश्चिद्विरही स्वविरहेण मृतां भार्यामुपश्रुत्य मरणं प्रार्थयते। अत्र पदच्छेदः–याम यामत्रयाधीनायामया मरणम् निशा याम् अयाम धिया स्वर्त्या या

मया मथिता एव सा। अथवोत्तरार्धे-धिया अस्वर्त्यायामया इति पदच्छेदः। यां पूर्वं वयम् अयाम अगच्छाम। तदनन्तरं मद्वियोगेन या स्वर्त्या सुदुःखितया। धिया बुद्ध्या। मद्विरहचिन्तया इत्यर्थः। उपलक्षिता। इत्थंभूतलक्षणे तृतीया। सा मया मथितैव विदशगमनेन मारितैव। अतो वयमपि यामः प्रहरः तस्य त्रयं तस्य अधीनः आयत्तः आयामः विस्तारः यस्याः सा तया। निशा रात्र्या। त्रियामां रजनीं प्राहुस्त्यक्त्वाद्यन्तचतुष्टयम्। इति वचनादिति भावः। मरणं याम प्राप्नुयाम। तद्विरहेण अचिरादेवं मृत्युर्भवत्विति प्रार्थना। केचन पुनः यां नायिकां धिया अयाम विदूरस्थितत्वात् संकल्पेनैव अगच्छाम सा असूनां अर्तिं पीडाम् आ संमताद् अयते गच्छति तादृशः अस्वार्त्या यः आमयः मदनज्वरो यस्याः सा। यामत्रयाधीनायामया निशा रात्र्या मथितैव। तस्या विरहिण्याः संतापकत्वात्। अतः वयमपि मरणं याम इत्यर्थं विशदयन्ति।।३६।।

विवृति

सर्वपादादियमकमाह—

हे सखे या(ं) वल्लभामया(म)गताः स्म(:) किं वपुषेत्याह धिया बुद्ध्या सङ्कल्पनेनेति यावत्। सा वल्लभा मया सह मथितैव बाधितैव। पीडितैव (इति) यावत्। किंभूता सेत्याह अस्वार्त्यायाः (या)असवः प्राणाः तेषामर्तिः पीडा मद्विरहव्यथा[ता]समन्तादयते गच्छति अनुसरतीत्यस्वार्त्यायाः(या)। पचादिपाठादच्। जलधरादिवत्। अतो न कर्मण्यण्। तस्मिन् सति दोषः। कया मथितेत्याह। निशा रात्र्या। कथंभूतया। यया वयं मरणं यामः(?)। पञ्चत्वमाप्नुमः(?)किंविशिष्टयेत्याह याम(त्र)याधीनायामया, यामाः प्रहराः तेषामाश्रयं(षां यत् त्रयं) तस्मिन्नधीन आयत्तः

आयामो दैर्ध्यं यस्या असौ तथा। तया। कश्चित् परवशः स्वानुरक्तां दयितां सङ्गन्तुं अलभमानः प्रथमं तथाकामा(?)ऽनल-ज्वालावलीढवपुः कान्तां स्मरज्वरातुरां निशम्य सख्ये कथयति। अथ च यामत्रयाधीनायामया निशा मरणं यामः(म)। नात्रोद्वेगः। स्वार्त्या धिया सुतरां खिन्नेन मनसा यामयाम गतास्मः सा अया अप्रा(पा)पा। मन्दबुद्धिः(ना) मयैव मथिता नाशिता। अत्र तूद्वेग इति यावत्। अयमर्थः। अस्मद्विनाशे न खेदः। किं तु खिन्नमनसा यां संस्मरामः सा मद्वियोगे न जीवति यतः ततोऽत्रैव खेद इति। मरणस्यात्महेतुत्वान्मयैव मथितेति व्यवहृतिः। सङ्केतस्थः कश्चित् कामी प्रियामनागतामुपलभ्य एवं खिद्यते। अथ च स्वार्त्या अत्यन्तक्लेशेन कथमपीति यावत्। यां अयां प्राप्तवानस्मि सा मया एवं मथिता खण्डिता। कयेत्याह। अधिया। (धोः)कार्यविवेकक्षमा बुद्धिः। तया रहितत्वादित्यर्थः। शेषं समानम्।।

यामेति। विप्रोषितः प्रियः प्रावृषि स्वप्रियावस्थां विमृश्य विषीदति। याम प्राप्नुयाम, यामत्रयाधीनायामया प्रहरत्रयाधीनविस्तारया, मरणं भृतिं, निशा रात्र्या–'पद्दन्नोमास्' इत्यादिना अत्र निशाशब्दस्य निश्–भावे सति तृतीयैकवचनम्–याम् यच्छब्दः, अयाम अगच्छाम, धिया बुद्ध्या, अस्वार्त्यायामया–अस्वार्त्यायः प्राणपीडां प्राप्तः आमयो मदनज्वरो यस्याः सा, मथितैव हतैव, सा हृदयं गता वल्लभा। अस्यार्थः–यामिमां धिया अयाम सा यामत्रयाधीनायामयाः निशा अस्वार्त्यायामया सती मथितैव; ततो वयमपि मरणं याम। अत्र चतुर्षु पादेषु एकरूपावृत्त्या अव्यपेतव्यपेतम्।।३६।।

इत्यादिपादयमकविकल्पस्येदृशी गतिः।
एवमेव विकल्प्यानि यमकानीतराण्यपि॥३७॥

रत्नश्री

इत्युक्तेन प्रकारेण आदिश्चासौ पादश्च, अवयवे समुदायोपचारात्। तत्र यमकं पादादियमकमित्यर्थः। तस्य विकल्पः प्रभेदः। तस्याव्यपेतस्य व्यपेतस्य च गतिः स्वरूपमीदृश्येवंविधा दर्शितेति शेषः। आदिपादयमकवत् मध्यान्तपादयमकमनुगन्तव्यमित्यतिदिशति–एवमादिपादयमकविकल्पन्यायेनैव इतराणि मध्यान्तवर्तीन्यपि, न केवलं पूर्वाणि। यमकानि सुकराणि प्रभेद्यानि, स्वयमनुगन्तव्यानि, दिशस्तादृशो दर्शितत्वात्।

तानि चैवं विकल्पनीयानीति–

प्रियां सखे! सखेदां तामनुनीय कथञ्चन।
आनय त्वरितं कुर्मः कर्म भूयो न तादृशाम्॥

जितेन्द्रियतयासाद्य [97a] सदायति यतिश्रियम्।
लोकद्वयेऽपि लोकोऽयं त्वयि शासति नन्दति॥

गत्वा देशान्तरं वित्तं नाहमर्जितुमीश्वरः।
प्रिये विना विनाशं त्वामसवो यान्ति मे ध्रुवम्॥

त्यज मानधने मानं घनगर्जितडम्बरः।
किं करिष्यति कालोऽयं प्रियावृतिवृतिश्रियः॥

[वरं तथा तथागतो ददातु] येन दुर्जयाः।

जीयन्ते विषया एते विविधामयहेतवः।।
शूरास्ते नयनिष्णाता व्यसनप्रभवं भवम्।
ये जयन्ति महात्मानः प्रजारक्षणदीक्षिताः।।
सत्यपावित[राज्य]स्य राजन् सततमित्यसौ।
द्विषां भयङ्करकरस्तव कल्पद्रुमायते।।
षडभिज्ञस्य वः पातु पादः षड्दोषविद्विषः।
जगद्विजयविख्यातं बलं येनाजितं जितम्।।
एवं द्विचतुष्पादमध्यान्तयमकं विकल्पनीयम्।।
तान्यपि किं न विकल्प्यन्ते इति चेदाह–

हृदयङ्गमा

आदिभागयमकस्य भेदानभिधाय तत् उपसंहरति, इतीति। –इति उक्तरूपस्य, पादादिस्थयमकानां विकल्पस्य भेदस्य, ईदृशी एवम्प्रकारा, गतिः नियमः ; इतराणि पादमध्यान्तभागगतानि अव्यपेत-व्यपेत- तन्मिश्रितानि च, यमकानि अपि, एवमेव प्रांगुक्तप्रकारेणैव, एकद्वित्र्यादिरूपेण तथा आदिमध्यान्तेत्यादि-रूपेणैव च इत्यर्थः, विकल्पयानि भेद्यानि।।३७।।

प्रभा

पादादियमकप्रभेदमुपसंहरति–**इतीति।** पादादियमकानां विकल्पस्य भेदस्य ईदृशी दर्शितस्वरूपा गतिः दिक्। इतराण्यपि मध्यान्तभागगतानि अव्यपेतव्यपेततन्मिश्ररूपाणि। एवमेव

दर्शितप्रकारेणैव एकद्वित्रिचतुष्पादेति कारिकया कथितप्रकारेण। विकल्प्यानि परिकल्प्य ज्ञातव्यानि। स्वल्पाः प्रकारा मया उदाहृतास्तेनैव मार्गेण अन्ये ऊहनीया इति भावः।।३७।।

विवृति

इदानीं पादादियमकं(क)विकल्पं व्याख्याय प्रकृतमुपसंहरति–

इति पादादियमकविकल्पगतिः इत्थमेव विकल्प्यानि यमकानीतराण्यपि। एवंप्रकारा वा आदियमकविकल्पस्य गतिः प्रक्रिया ईदृशी। एवमेव अनेन क्रमेण विकल्प्यान्यूह्यानि यमकानि इतराण्यपि अन्यान्यपि मध्यादिमध्यान्तसर्वयमकरूपाणि।।

इतीति अव्यपेते व्यपेते च पादादियमकभेदा दर्शिताः। एवं मध्ययमकान्तयमकादिमध्ययमकादयः।।३७।।

न प्रपञ्चभयाद् भेदाः कार्त्स्न्येनाख्यातुमीप्सिताः।
दुष्कराभिमता एव दर्श्यन्ते तत्र केचन॥३८॥

रत्नश्री

भेदा यमकविकल्पाः सुकराः कार्त्स्न्येन साकल्येन [न] लक्षिताः [यतः] पादमध्यान्तभाविनोऽपि आख्यातुं दर्शयितुं [न] ईप्सिता नेष्टा अस्माभिः। कुतः? प्रपञ्चेति ग्रन्थविस्तरभयाद् हेतोः। मा भूदतिविस्तर इति संक्षिप्तकाव्यलक्षणप्रणयनप्रतिज्ञानात्। तस्मात् केचिदेव भेदाः प्रकाराः दर्शिताः। इदानीं तु तत्र यमकेषु दुष्करत्वेन दुष्करा इत्येवाभिमता इष्टा दुष्करा एव न सुकरा अपि भेदा मध्ययमकादिविकल्पाः केचन कियन्तो, न सर्वे प्रपञ्चभयात् निदर्श्यन्ते॥

हृदयङ्गमा

निखिलयमकभेदा मयैव ग्रन्थकृता कथं न दर्शितास्तत्राह, नेति। –प्रपञ्चभयात् विस्तारभयात्, कार्त्स्न्येयन साकल्येन, भेदाः आख्यातुं न ईहिताः न चेष्टिताः, ये तु भेदाः, दुष्करत्वेन अभिमताः स्वीकृताः, अन्येषामिति शेषः, अत्र ते केचन, वर्ण्यन्ते उदाह्रियन्ते, केचन एव भेदा मया दर्शयिष्यन्ते, न तु क्वत्स्नाः, अपरे तु प्रागुक्तादिभागयमकरीत्या स्वयमेव वेदितव्या इति भावः॥३८॥

प्रभा

स्वयं कुतो न दर्शिता अन्ये प्रकारा इति तत्कारणं कथयति–**नेति**। प्रपञ्चभयाद् विस्तारभयाद् भेदाः शेषाः विकल्पाः कार्त्स्न्येन साकल्येन आख्यातुं कथितुम् न ईहिताः इच्छिताः।

उर्वरितेषु ये प्रभेदा दुष्करा विरचयितुं बोद्धुं वा ते केचन अत्र प्रबन्धे मया वर्ण्यन्ते प्रदश्र्यन्ते।।३८।।

विवृति

कुतः पुनस्तद्भेदा न दर्शिता इत्याह–

तद्भेदाः कात्स्न्र्येनाख्यातुमीप्सिता (?) प्रपञ्चभयात् ग्रन्थगौरवभयात् भेदाः मध्याद्याद्यन्तविकल्पाः कात्स्नर्येन सामस्त्येन नाख्यातुमीप्सिताः। दुष्कराभिमता येन(तु) वर्ण्यन्ते तत्र तेषु यमकेषु मध्ये केचन।।

नेति। ते सर्वे प्रपञ्चभयात् न कात्स्न्र्येन अभिधीयन्ते, दुष्कराभिमता एव केचन वर्ण्यन्ते।।३८।।

स्थिरायते यतेन्द्रियो न हीयते यतेर्भवान्।
अमायतेयतेऽप्यभूत् सुखाय तेयते क्षयम्॥३९॥

रत्नश्री

स्थिरा अनपायिन्यः, तत्कारणानुष्ठानाविच्छेदात्। आयतिरुभयलोकाभ्युदयरूपा अस्येति स्थिरायते इत्यामन्त्रणमेतत् कस्यचित्। अन्यकार्यान्निरुद्धानि संवृतानि इद्रियाणि बुद्धीन्द्रियाणि चक्षुरादीनि कर्मेन्द्रियाणि पादादीनि वा येनेति यतेन्द्रियो भवान् यतेर्मुनेर्न हीयते नावकृष्यते यतेन्द्रियत्वादेव। न केवलमेतत्। न विद्यते माया परवञ्चना यस्य अमायस्तस्य भावोऽमायता [निःशाठ्यं] परोपकारिता च, तव इयते एतावते महते क्षयं नाशम् अयते अगच्छते स्थिराय सुखाय कामायेति चित्तानुग्रहाय नित्यसुखार्थमभूत्। सर्वत्र सम्पन्नो भवान्। न क्वचिदपि विपन्न इत्यर्थः। [97b] पादचतुष्टयमध्ययमकमेकरूपमव्यपेतात्मकमत एवेदृशं दुष्करम्।

हृदयङ्गमा

तत्र सर्वपादगतमव्यपेतव्यपेतात्मकं मध्ययमकमुदाहरति, स्थिरायते इति। –स्थिरा चिरस्थायिनी, आयतिरुत्तरकालो यस्य तत्सम्बुद्धौ, ("उत्तरः काल आयतिः" इत्यमरः) हे स्थिरायते! अक्षय्यसुखभाजन!, भवान् यतेन्द्रियः जितेन्द्रियः, अतः यतेः संयमात्, समाधेरित्यर्थः, न हीयते च्युतो न भवति, इन्द्रियसंयमाभावे हि समाधेः स्थिरत्वं न सम्भवतीति भावः, (यदुक्तं, –"बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति" इति) ते तव, अमायताऽपि अमायित्वमपि, मायाराहित्यंमपीत्यर्थः, इयते

एतत्परिमाणाय, परिच्छेत्तुमशक्याय इत्यर्थः, तथा क्षयं नाशम्, अयते अगच्छते, अक्षयाय इत्यर्थः, सुखाय परानन्दाय, अभूत्। (अत्र सर्वेषु पादेषु ''यते यते'' इति पदं पादमध्ये आवृत्तं, तच्च एकस्मिन् पादे पुनरावर्त्तने अव्यपेतं पादान्तरापेक्षया च व्यपेतमिति अव्यपेतव्यपेतमिश्रसर्वपादगतमध्यभागयमकम्)।।३९।।

प्रभा

तत्र अव्यपेतव्यपेतं सर्वपादगतं मध्ययमकमुदाहरति–**स्थिरेति**। कश्चिद् जीवन्मुक्तं सत्पुरुषं स्तौति। स्थिरा अनश्वरा आयतिः प्रभावः उत्तरकालो वा यस्य तत्संबुद्धिः। यतानि संयतानि इन्द्रियाणि एकादशेन्द्रियाणि यस्य सः। भवान् यतेः योगिनः तपस्विनो वा न हीयते न्यूनो न भवति। संयतेन्द्रियत्वादिधर्मवत्त्वात्। ते अमायता निष्कपटता ऋजुतेत्यर्थः। मायोपाधिराहित्यं वा। क्षयं विलयम्। अयते अप्राप्नुवते। शाश्वतायेत्यर्थः। इयते एतत्परिमिताय अतिविस्तृताय सुखाय आनन्दाय अभूत्। प्रमाणिका छन्दः। प्रमाणिका जरौ लगौ। इति तल्लक्षणम्।।३९।।

विवृति

सर्वपादयमक(मव्यपेत)व्यपेतमुदाहर्तुमाह–

स्थिराः अविनश्वराः आयतयः यस्य तस्य राज्ञः आमन्त्रणम् हे स्थिरायते! यतानि इन्द्रियाणि चक्षुरादीनि मनषष्ठानि यस्य सः तं यतेन्द्रियम्(?)। अत एव कृतारिषड्वर्गजयः निगृहीतेन्द्रियग्रामो भवान् यतेः तपस्विनः न हीयते। नाभिभविष्यते। न विद्यते माया शाठ्यं यस्यासावमायः। तस्य भावः अमायता। अशठता। इयते

इयत्प्रमाणाय सुखाय ते तवाभूज्जाता। किंभूताय अयते क्षयं विनाशमगच्छते। शाश्वतायेत्यर्थः।।

अव्यपेतव्यपेते सर्वपादमध्ययमकं दर्शयति–**स्थिरेति**। स्थिरा निश्चला आयतिः प्रभावो यस्य सः सम्बोध्यते, यतेन्द्रियो जितेन्द्रियः भवान् यतेः योगिनो न हीयते। तव अमायता सत्यव्यवहारिताऽपि, क्षयं अयते अप्राप्नुवते, इयते सुखाय अभूत्।।३९।।

सभासु राजन्नसुराहतैर्मुखै-
र्महीसुराणां वसुराजितैः स्तुताः।
न भासुरा यान्ति सुरान्न ते गुणाः
प्रजासु रागात्मसु राशितां गताः॥४०॥

रत्नश्री

हे राजन्, सभासु परिषत्सु महीसुराणां ब्राह्मणानां मुखैः किंभूतैः? सुरया हतेति, न तथा असुराहतास्तैरमद्यदूषितैः पवित्रैः। वसुना धनेन यथाकामं प्रतिपादितेन राजितैः प्रीतियोगात् विकसितैः कर्तृभूतैः स्तुता वर्णितास्ते तव त्यागसत्त्वशौर्यादयो भासुराः, दोषासङ्करादुज्ज्वलाः परिशुद्धाः प्रजासु इह लोकेषु रागोऽनुरक्तिर्नृपविषय आत्मा स्वभावस्तत्प्रधानत्वाद् यासामिति रागात्मसु मन्त्रानुरक्तासु विषये राशितां प्रचयतामभिव्याप्तियोगेन गता मर्त्यलोकं सकल व्याप्य कीर्तिद्वारेण सुरान् देवान् न न यान्ति किं तु यान्त्येव। स्वर्गेऽपि प्रसिद्धास्ते इत्यर्थः। चतुष्पादमध्ययमकमेकरूपं व्यपेतमिति॥

हृदयङ्गमा

प्रतिपादं केवलव्यपेतमध्यमध्ययमकमुदाहरति, सभास्विति। –हे राजन्! महीसुराणां भूदेवानां, ब्राह्मणानामित्यर्थः, असुराहतैः सुरापानेन अहतैः अनाशितैः, मदिरापानपराङ्मुखतया पवित्रैरिति यावत्, वसुना तेजसा भवद्दत्तधनलाभेन वा, राजितैः शोभितैः प्रफुल्लैर्वा, मुखैः सभासु स्तुताः कीर्त्तिताः, भासुराः समुज्ज्वलाः,

तथा रागात्मसु अनुरागपरासु, प्रजासु जनेषु, राशितां बहुलीभावं, गताः, प्रभूतसमादरं प्राप्ता इत्यर्थः, ते तव, गुणाः सुरान् देवान्, न यान्ति न प्राप्नुवन्ति, इति न, अपि तु यान्त्येवेत्यर्थः, सुरा एव एतादृग्गुणवन्तः सन्तीति भावः। (अत्र "सुरा" इति पदं प्रतिपादमेव व्यवहिततया पादमध्यस्थितत्वाच्च मिश्रं व्यपेतञ्च मध्यमध्यभागयमकम्)।।४०।।

प्रभा

तदेव चतुष्पादगतं मध्ययमकं केवलव्यपेतमुदाहरति— **सभास्विति।** कश्चित्कविर्नृपं वर्णयति। हे राजन् असुरा दानवाः तैः अहतैः अताडितैः। त्वयि शासितरि दानवा महीसुरान् न पीडयामासुरिति भावः। अथवा सुरया मद्येन आहता भ्रष्टा न भवन्तीति असुराहताः तैः। वसुभिः संपद्भिः राजितैः सुशोभितैः। त्वद्वितीर्णधनलाभेन सदा सतेजस्कैरित्यर्थः। महीसुराणां ब्राह्मणानाम्। मुखैः श्रेष्ठैः। द्विजप्रमुखैरित्यर्थः। सभासु स्तुताः प्रशंसिताः। तथा रागात्मसु त्वदाज्ञापालनेन त्वयि अनुरागस्वभावासु प्रजासु राशितां गताः राशीभूता बहुलीभूता इत्यर्थः। तथा भासुराः उज्ज्वला एतादृशास्ते गुणाः सुरान् न यान्तीति न। अपि तु यान्त्येव। देवास्त्वद्गुणान् स्तुवन्तीत्यर्थः। मुखैरित्यत्र मखैरिति पाठे असुरबाधारहितैर्यज्ञैरित्यर्थः।।४०।।

विवृति

व्यपेतं सर्वपादमध्ययमकमाह—

हे राजन् ते गुणाः सुरान् देवान् न न यान्ति यान्त्येव। त्वद्गुणाः स्वर्गमपि व्याप्ता इत्यर्थः। तत्र अमराङ्गनाभिगीतयशा भवानित्यर्थः।

किंभूतास्ते गुणाः भासुराः भासनशीलाः। पुनरपि किंभूताः स्तुताः गीताः। कैः मुखैः आननैः। कासु सदस्सु परिषत्सु। पुनरपि किंभूतैः असुराहतैः। सुरया मदिरया आहतानि दूषितानि न, पुनर[तानि अ]सुराहतानि। त्वयि परिपालनं कुर्वति न कश्चिदपि आकृष्य(अकृत्य)कारीत्यर्थः। [?]तैः वसु वित्तं तेन राजितानि अनुरागवन्ति....। किंभूता गुणाः प्रजासु चतुर्वर्णाश्रमलक्षणासु रागात्मस्वनुरागवतीषु राशितां गताः पुञ्जीभूताः॥

सर्वपादमध्ययमकमेव व्यपेतमेकरूपं दर्शयति **सभास्विति**। राजन् वसुराजितैः भवद्दत्तवसुहर्षितैः असुराहतैः मद्यपानेन अनुपहतैः विशिष्टैरिति यावत्, महीसुराणां द्विजानां मुखैः सभासु गोष्ठीषु स्तुताः, भासुराः उज्ज्वलाः, रागात्मसु अनुरागमयीषु, प्रजासु राशितां गताः पुञ्जीभूताः तव गुणाः सुरान् न न यान्ति, स्वर्लेकिऽपि प्रथन्ते॥४०॥

तव प्रिया सञ्चरिताप्रमत्त या
विभूषणं धार्यमिहाशुमत्तया।
रतोत्सवामोदविशेषमत्तया
न मे फलं किञ्चन कान्तिमत्तया॥४१॥

रत्नश्री

हे सञ्चरिताप्रमत्त इति सरोषं विरुद्धलक्षणमामन्त्रणम्। दुर्वृत्तप्रमत्तेति गम्यते। सहस्त्राक्षोऽन्ध इति यथा। असच्चरिते विप्रिये वा अप्रमत्ता अवहिता असच्चरिताप्रमत्त व्यलीकशील इति संबोध्यते। या तव प्रिया वल्लभा तया रतमेवोत्सवस्तत्र स एव वा आमोदविशेषः प्रीत्यतिशयः तेन मत्तया गर्वितया। अंशवोऽस्मिन् सन्तीत्यंशुमद् भासुरं [वि]भूषणं मेखलादिकं धार्यमङ्गे निवेश्यम्। तस्याः प्रसाधनं सफलं किमस्माकं तेन विफलेन भारमात्रेण! कान्तिमत्तया विभूष[णोत्थया] मे मम न किञ्चित् फलं प्रयोजनमस्ति। एवमप्यहं तव द्वेष्येव। तव परवशस्य। इहेति वाचोयुक्तौ। इह वा प्रस्तावे, काचिदङ्गना प्रियं प्रस्तावे क्वचित् प्रसाधने नियुञ्जानं एवमीर्ष्यति॥ पादचतुष्टयान्तयमकमेकरूपव्यपेतमिति॥

हृदयङ्गमा

प्रतिपादं व्यपेतमध्यमध्ययमकमुदाहृत्य सम्प्रति सर्वपादगतं तादृशमेवान्तयमकमुदाहरति, तवेति। –हे असच्चरित। धूर्त्त!, हे प्रमत्त! अनवहित!, इह अस्मिन् समये, सम्प्रतीत्यर्थः, या तव प्रिया प्रणयिनी, जनसमाजे अधुना या त्वया प्रेमास्पदत्वेन कीर्त्त्यमाना

इत्यर्थः, तया, एवेति शेषः, रतोत्सवेन यः आनन्दविशेषः, तेन मत्तया आसक्तया सत्या इत्यर्थः, अंशुमत् समुज्ज्वलं, विभूषणम् आभरणं, धार्य्यं, तथा च विभूषणधारणस्य रतोत्सवानन्दविधायकताप्रयोजनं, न तु त्वयि अन्यासक्ते मम सख्याः तत् सम्भवति, अतः किमिति तया तत् धार्य्यम्? तवाधुनिकप्रिययैव तत् धर्त्तुं युज्यते इति भावः। ननु शोभार्थमपि सख्या ते विभूषणं ध्रियतां तत्र आह, प्रयोजनमिति। –हि तथा हि, कान्तिमत्तया स्वाभाविकसौन्दर्य्यवत्तया हेतुना, मत्सख्या इति शेषः, प्रयोजनम् आवश्यकं, विभूषणधारणस्येति शेषः, नास्ति न विद्यते एवेत्यर्थः, नैसर्गिकी विलक्षणा कान्तिरेवास्याः शोभां जनयति, किं पुनरलङ्कारान्तरधारणेनेति भावः। (अन्यासक्तं शठनायक-मलङ्कारधारणे कथमस्या विराग इति पृच्छन्तं प्रति सख्या उक्तिरियम्। "असच्चरित प्रमत्त" इत्यत्र "सञ्चरिताप्रमत्त" इति तथा "प्रयोजनं नास्ति हि" इत्यत्र "न मे फलं किञ्चन" इति क्वचित् पाठः। अत्र "मत्तया" इति पदस्य प्रतिपादान्तगतत्वात् व्यवहितत्वाच्च सर्वपादगतं मिश्रं व्यपेतमन्तभागयमकम्)।।४१।।

प्रभा

अथ व्यपेतं पादचतुष्टयगतमन्तयमकमुदाहरति–**तवेति।** अन्यासक्तहृदयं भूषणार्पणेनानुनयन्तं नायकं प्रति कुपिताया वचनमिदम्। हे अप्रमत्त कपटानुनये सावहित। तव या सच्चरिता साधुचरित्रा। सोल्लुण्ठवचनमेतत्। प्रिया प्रेयसी। तया इह उत्सवप्रसङ्गे। अंशुमत् किरणोज्ज्वलम्। इदं भूषणं धार्यम्। कथंभूतया रते त्वया सह विलासे य उत्सवः तद्भवः यः

आमोदविशेषः संतोषातिशयः तेन मत्तया उद्रिक्तया। त्वया किमिति न धार्यते इत्यत्र उत्तरयति–**प्रयोजनमिति।** मम कान्तिमत्तया विभूषणेन कान्तिसंपन्नतया प्रयोजनं नास्ति। यतोन्यासक्तो भवान् अतः कान्तिसंपन्नताया मम किं प्रयोजनम्। अथवा कान्तिमदिदं भूषणं किमिति न धार्यते तत्रोत्तरयति–मे कान्तिमत्तया भूषणकान्तिविशेषेण प्रयोजनं नास्ति। अनुरागकाङ्क्षिणी अहं न भूषणकान्तिमपेक्षे तदुक्तम्–कामिनीनां मंडनश्रीः व्रजति हि सफलत्वं वल्लभालोकनेन। इति। मयि निरनुरागस्य तव कान्तिमद् भूषणप्रदानं व्यर्थमेवेति भावः। अत्रान्यैः कृता अर्थाः सदोषा इत्युपेक्षिताः।।४१।।

विवृति

व्यवहितं सर्वपादान्तयमकमुदाहरति–

हे सच्चरित! सतां पण्डितानां चरितं सच्चरितं तद्यस्य विद्यते स सच्चरितः। तस्यामन्त्रणं हे सच्चरित! अप्रमत्त या प्रमादरहित या प्रिया प्राणवल्लभा तया विभूषणमाभरणं धार्यं धरणीयम्। अथ वा सच्चरिते अप्रमत्तः सच्चरिताप्रमत्तः। हे सच्चरिताप्रमत्त! या प्रिया तया विभूषणं धार्यमित्यर्थः। भवान् खलु कृत्यकरणे सक्तः। तस्मात् तया विभूषणं धार्यम्। अंशुमत् प्रभायुक्तम्। इह किंविशिष्टया रतोत्सवामोदविशेषमत्तया रतं स्मरक्रीडा तदेवोत्सवः तत्र सङ्गतो[सञ्जात आ–]मोदः हर्षः सुरभिगतया [–लता वा]तेन विशेषतो मत्ता तया। न मे नैव मम फलं किञ्चन किमपि कान्तिमत्तया कमनीयतया यतः प्रियेषु सौभाग्यफला हि चारुता।

सापराधं प्रियं प्रति रुष्टा काचित् हस्तगतं भूषणमेवमुक्त्वा परित्यजति।।

पादान्तयमकमेकरूपं दर्शयति। तवेति। हे असच्चरिताप्रमत्त असतां चरितेषु अवहित; तव प्रिया या रतोत्सवामोदविशेषमत्ता तया इदं अंशुमत् उज्ज्वलं भूषणं धार्यं, कान्तिमत्तया न मे किञ्चिदस्ति फलम्, इति सापराधं आभरणदानेन अनुनयन्तं कान्तं वल्लभा अधिक्षिपति।।४१।।

भवादृशा नाथ! न जानते नते
रसं विरुद्धे खलु सन्नतेनते।
य एव दीनाः शिरसा नतेन ते
चरन्त्यलं दैन्यरसेन तेन ते।।४२।।

रत्नश्री

हे नाथ स्वामिन्! भवादृशास्त्वद्विधा महात्मानः नतेः परप्रणामस्य रसं स्वादं कीदृशोऽसाविति न जानते न विदन्ति। न नमन्तीति यावत्। किं कारणम्? खलु यस्मात् सन्नोऽवसन्नो दुर्गतस्तस्य भावः सन्नता। इनस्य भाव इनता। सन्ततेनते दौर्गत्यैश्वर्ये नाम विरुद्धे परस्परव्याहते। [98a] यदि सन्नः कथमिनः? अथेनः कथं सन्नः? तादृशश्चे[नो] नातिरसज्ञः [सन्नतायाः] इति भावः। त्वं चेनः तस्माद् भवादृशा नते रसं न जानत इति निगमनीयम्। के तर्हि नतिरसज्ञा इत्याह—य इत्यादि। य एव केचिद् दीना दुर्गतास्त एव ते तवेनस्य [सविध इति शेषः] नतेन सप्रणिपातेन शिरसा पूर्वोक्तेन दैन्येन कार्पण्येन तद्विधास्वाद्यत्वाद् रसेन लक्षिताः सन्तोऽल म[त्य]र्थं चरन्ति प्रवर्तन्ते। ऐश्वर्यं न क्वचिन्नमति। दारिद्र्यमेव सर्वत्र प्रणिपतति इति पिण्डार्थः। चतुष्पादान्तयमकमेकरूपमव्यपेतात्मकमिति।।

हृदयङ्गमा

पादचतुष्टयगतमव्यपेतव्यपेतमन्तभागयमकमुदाहरति, भवादृशा इति।—हे नाथ! प्रभो!, भवादृशाः त्वादृशा जनाः, नतेः नतभावस्य, रसम् आस्वादं, न जानते न विदन्ति, यतः सन्नतं सम्यक्

नतिभावश्च, इनता प्रभुता च ते सन्नतेनते नतिः प्रभुता चेत्यर्थः, विरुद्धे विपरीते, खलु निश्चये, नैकाधारे वर्त्तेते इति भावः, ये जनाः, दीनाः दरिद्राः, ते एव केवलं, तेन प्रसिद्धेन, दैन्यरसेन दैन्यरूपेण विषेण हेतुना, (रसो गन्धरसे जले। श्रृङ्गारादौ विषे वीर्य्ये तिक्तादौ द्रवरानयोः। देहधातुप्रभेदे च पारदास्वादयोः पुमान्।।'' इति मेदिनी) नतेन शिरसा ते तव, (तवेति कर्मणि षष्ठी) अलम् अत्यर्थं, चरन्ति अतिशयेन त्वां सेवन्ते इत्यर्थः। (अत्र सर्वेषु पादेषु अन्तगतं ''नते नते'' इति पदं पुनरावृत्तं, तच्च न प्रतिपादं व्यवहितं किन्तु पादान्तरे व्यवहितमिति मिश्रमुभयात्मकम् अन्तभागयमकम्)।।४२।।

प्रभा

पादान्तेषु अव्यपेतमुदाहरति–**भवादृशा इति।** कश्चिन्मानधनः सेवकः प्रभुशक्तिसनाथं नृपं प्रशंसति। हे नाथ प्रभो। भवादृशा वीर्यशालिनो नृपाः। नतेः नमनस्य रसं आस्वादं न जानते। यतः सन्नतं सन्नतिः सुप्रणामस्तथा इनता प्रभुता च सन्नतेनते। उभे विरुद्धे निसर्गतो भिन्नास्पदे खलु। ये जनाः। दीना दरिद्राः। त एव केवलं नतेन शिरसा चरन्ति सेवन्ते। तेन तादृशेन शिरोनमनरूपेण दैन्यरसेन ते अलम्। तव संबन्धो मा भूद् इति भावः।।४२।।

विवृति

सर्वपादान्तयमकमव्यपेत[व्यपेत]माह–

हे नाथ त्वादृशा उन्नतप्रकृतयः नतेः नम्रतायाः दैन्यस्य रसमनुभवं न जानते न विदन्ति। कुतो न जानते। विरुद्धे विरोधिन्यौ

खलु सन्नतेनते सन्नो दीनः इनः प्रभुः तयोः भावः ते सन्नतेनते यतः ततः य एव पुरुषाः दीनाः (ते) शिरसा नतेन नम्रेण चरन्त्यतः [चरन्तु] अलं पर्याप्तं, दैन्यरसेन दीनतापरिग्रहेण न(?)तेन हेतुना ते तव।।

पादान्तेष्वव्यपेतव्यपेतमुदाहरति **भवादृशा** इति। नाथ हे स्वामिन् इति वल्लभोपालम्भः, भवादृशाः नतेः प्रणतेः, रसमनुभवितुं न जानते। सन्नतं सन्नतिः, इनता स्वामिता, चेति द्वन्द्वसमासः ; ते द्वे अपि विरुद्धे परस्परविरुद्धे खलु। ये दीनाः कृपणाः त एव नतेन शिरसा चरन्तु कामम्। तेन दैन्यरसेन, ते तव, अलं निषेधे। सापराधं पादप्रणामकारिणं कान्तं काचिदुपालभते।।४२।।

लीलास्मितेन शुचिना मृदुनोदितेन
व्यालोकितेन लघुना गुरुणा गतेन।
व्याजृम्भितेन जघनेन च दर्शितेन
सा हन्ति तेन गलितं मम जीवितेन॥४३॥

रत्नश्री

लीलास्मितेन विलासहसितेन शुचिना विशदेन मृदुना कोमलेनोदितेनालापेन लघुना लोलेन च व्यलोकितेन वीक्षितेन गुरुणा मन्थरेण गतेन गमनेन व्याजृम्भितेन विस्तीर्णेन जघनेन नितम्बेन च दर्शितेन सर्वेणैतेन मन्मथशस्त्रप्रकरायमाणेन सा काचिदङ्गना हन्ति। प्रदत्तेन घातेन मार्मवेधहेतुना गलितं विगतं मम जीवितेन। नान्यदिह किञ्चित् कारणमिति कश्चित् कामातुरो विरौति। चतुष्पादमध्यान्तयमकमेकरूपं व्यपेतम्॥

हृदयङ्गमा

प्रतिपादगतव्यपेतमध्यान्तयमकमुदाहरति, लीलेति। –सा नायिका, शुचिना निर्मलेन, लीलास्मितेन सविलासेषद्धसितेन, मृदुना कोमलेन, उदितेन वचनेन, लघुना इष्टेन प्रार्थितेनेत्यर्थः, लघुना अल्पेन इति वा, असम्पूर्णेनेत्यर्थः, ("त्रिष्विष्टेऽल्पे लघुः" इत्यमरः) व्यालोकितेन अपाङ्गदर्शनेनेत्यर्थः, गुरुणा नितम्बादिभरमन्थरेण, गतेन गमनेन, व्याजृम्भितेन विशेषतो जृम्भया, (जृम्भायाश्च अनुरागव्यञ्जकत्वमुक्तं यथा, –"जृम्भते स्फोटयत्यङ्गं बालमाश्लिष्य चुम्बति" इति) तथा दर्शितेन जघनेन च केनचित् व्याजेन जघानप्रदर्शनेनेत्यर्थः, हन्ति व्यथयति, मामिति

शेषः, तेन च हेतुना, मम जीवितेन जीवनेन, गलितं गतं, विनष्टप्रायमिवेत्यर्थः। (भावे क्तप्रत्ययः। अत्र "तेन" इति पदं प्रतिपादं मध्येषु अन्तेषु च पुनः पुनरावृत्तं, तच्च व्यवहितमिति मिश्रं व्यवहितं मध्यान्तयमकम्)।।४३।।

प्रभा

चतुर्षु पादेषु मध्यान्तयोर्व्यपेतयमकमुदाहरति–**लीलेति**। सा नायिका। शुचिना विशदेन। लीलास्मितेन सविलासहासेन। मृदुना कोमलेन। उदितेन वचसा। लघुना स्वल्पेन। असमग्रेणेत्यर्थः। व्यालोकितेन वीक्षणेन। गुरुणा सविलासमन्थरेण। गतेन गमनेन। व्याजृम्भितेन जृम्भा च अनुरागव्यञ्जिका तेन जृम्भामिषेण सूचितानुरागेण। तथा दर्शितेन दर्शनविषयीकृतेन। जघनेन जघनप्रदेशेन। एभिः साधनैः। हन्ति व्यथयति। तेन हेतुना। मम जीवितेन गलितं विलीय च्युतमिव। भावे क्तः।।४३।।

विवृति

सर्वपादमध्यान्तयमकं व्यपेतमाह–

सा वल्लभा मां हन्ति। तेन हेतुना मम जीवितेन गलितम्। केन हन्तीत्याह। लीलास्मितेन ईषद्धसितेन। शुचिना अनवद्येन। मृदुनोदितेन पारुष्यरहितेन जल्पितेन। व्यालोकितेन लघुना कटाक्षनिरीक्षितेन। गुरुणा गतेन मन्थरगमनेन। व्याजृम्भितेन जघनेन प्रदर्शितेन।।

पादमध्यान्तेषु व्यपेतमेकरूपमुदाहरति लीलेति। मृदुना उदितेन भाषितेन। स्पष्टमन्यत्।।४३।।

श्रीमानमानमरवर्त्मसमानमान-
मात्मानमानतजगत्प्रथमानमानम्।
भूमानमानयति यः स्थितिमानमान-
नामानमानमतमप्रतिमानमानम्॥४४॥

रत्नश्री

श्रीमान् नित्यं लक्ष्म्या युक्तः। न क्वचिदेकत्र[स्थः] सर्वमयत्वादित्यमान् विभुरिति यावत्। स्थितिमान् सदा स्थित्यनुगतः नित्य [इत्यर्थः]। एवंभूतो य आत्मानं स्वभावं भूमानं बहुतां विश्वरूपत्वात्। आनयति प्रापयति। किंभूतम्? अमरवर्त्मना आकाशेन समानं तुल्यं मानं प्रमाणं यस्येत्यमरवर्त्मसमानमानम् आकाशवदप्रमाणम्। आनते भक्तिमति जगति जनेषु प्र[थ]मानो विजृम्भमाणो मानः पूजा यस्येत्यानतजगत्प्रथमानमानं जगत्पूज्यम्। आनते जगति [प्रथमानः] प्रादुर्भवन् मानोऽनुग्रहो य[स्य] इति [वा] योज्यम्। तमेवंविधं विष्णुमानमत हे जनाः [इति शेषः]। पुनः किंविशिष्टम्? अमानान्यपरिमितानि नामानि यस्ये[त्य]माननामानं सर्वमयत्वादनन्ताभिधानम्। अप्रतिमानोऽनुपमः मानोऽभ्युन्नतिरस्येत्यप्रतिमानमानम्। [98b] क्वचिदानमतेति पाठः। तत्र बलिबन्धने भुवं मितवन्तं भूमानम् आनानां प्राणिनां [मतं] शरणतया इष्टमात्मानं परपुरुषं विष्णुम्। तमित्यर्थाद् य इत्युपात्तत्वात्। आनमत हे जना इति व्याख्येयम्। शेषं समानम्। चतुष्पादमध्यान्तयमकमेकरूपमव्यपेतव्यपेतात्मकम्॥

हृदयङ्गमा

प्रतिपादगतमव्यपेतव्यपेतमध्यान्तयमकमुदाहरति, श्रीमानिति। –(अत्रैवं पदविभागः, –श्रीमान्, अमान्, अमरवर्त्मसमानमानम्, आत्मानम्, आनतजगत्प्रथमानमानम्, भूमानम्, आनमत, यः, स्थितिमान्, अमाननामानम्, आनमतम्, अप्रतिमानमानम् इति) हे भक्ताः! अमरवर्त्म आकाशं, तस्य समानं मानं परिमाणं यस्य तथोक्तम् आकाशवत् सर्वव्यापिनमित्यर्थः, आनतेषु प्रह्वीभूतेषु, उपासनार्थं नम्रीभूतेषु वा, जगत्सु प्रथमानः विस्तारं गतः, मानः सम्मानः, पूजनमित्यर्थः, यस्य तादृशं, सर्वजगत्पूज्यमानमित्यर्थः, भूमानं महान्तम्, अमानम् अपरिमितम्, असङ्कुच्यमित्यर्थः, नाम यस्य तथाभूतं, तथा आ ईषत्, अनन्ति प्राणन्ति, श्वसन्तीत्यर्थः, ये ते आनाः प्राणायामपरायणा योगिन इत्यर्थः, तैः मतं पूजितं योगेन ज्ञातमित्यर्थो वा, आनमतं योगिपूजितं योगिगम्यं वा इत्यर्थः, तथा अप्रतिमानः असदृशः, मानो यस्य तादृशं सर्वाभिमतमित्यर्थः, यद्वा,–अप्रतिमानम् अनुपमं, मानं ज्ञानं यस्य तं केवलं मनः संयमेन ज्ञायमानमित्यर्थः, एवम्भूतम् आत्मानं परमात्मानं, ब्रह्म इत्यर्थः, आनमत नमस्कुरुत, यूयमिति शेषः। नन्वेवम्भूतस्य चार्वाकादिभिरनङ्गीकृतस्यात्मनोऽङ्गीकारे किं प्रमाणमित्यत आह, य इति। –यः आत्मा, श्रीमान् स्वयं प्रकाशमानः, तथा अमान् अपरिमितः, विभुत्वात् क्वचिदपि न परिमात्तीति भावः, तथा स्थितिमान् सच्चिदानन्दरूपतया सततस्थायी, जगतामुत्पत्तिस्थितिलयकारित्वेन नित्य इत्यर्थः। (अत्र सर्वेषामेव पादानां मध्येष्वन्तेषु च "मानमान" इति पदस्य अव्यवधानेन पुनः पुनरावर्त्तनात् अव्यपेतं, तथा "मरवर्त्मस" इत्यादिवर्णानां व्यवधानतया व्यपेतञ्च मध्यान्तयमकम्। एकवर्णात् परं मान इत्यस्यावृत्तेः कथं

मध्ययमकत्वमित्यपि न शङ्कनीयम्, आद्यन्तवर्णयोरन्तरालस्यैव मध्यत्वेनाभिधानात्)।।४४।।

प्रभा

तदेवाव्यपेतव्यपेतमुदाहरति–**श्रीमानिति।** भगवतस्त्रिविक्रमस्य परमात्मनो वर्णनमिदम्। तत्र पदानि। श्रीमान्। अमान्। अमरवत्मर्समानमानम्। आत्मानम्। आनतजगत्प्रथमानमानम्। भूमानम्। आनमत। यः। स्थितिमान्। अमाननामानम्। आनमतम्। अप्रतिमानमानम्। अन्वयः–यः श्रीमान् स्थितिमान् अमान् तम् अमाननामानम् आनमतम् अप्रतिमानमानम् आनतजगत्प्रथमानमानम् भूमानम् अमरवर्त्मसमानमानम् आत्मानम् आनमत। यः त्रिविक्रमः श्रीमान् लक्ष्मीवान्। स्थितिमान् मर्यादावान्। जगत्स्थितिकर्तेत्यर्थः। अमान् न मातीत्यमान्। अपरिच्छिन्नस्वरूपः सर्वव्यापित्वाद् वर्तते इति शेषः। तम् अमाननामानम् अमानानि अपरिमितानि नामानि यस्य तम्। आनमतम् आ ईषद् अनन्ति जीवन्ति ते आनाः प्राणसंयमवन्तो योगिनस्तैर्मतं ज्ञातम्। अथवा तेषां मतम् इष्टम्। अप्रतिमानमानं प्रतिमीयते एभिरिति प्रतिमानानि प्रमाणानि तैर्मानं ज्ञानं यस्य तथा न भवतीति अप्रतिमानमानस्तम्। लौकिकप्रमाणैरगम्यम्। आनते उपासनार्थं शरणमागते जगति लक्षणया तत्स्थे जने प्रथमानः प्रख्यायमानः मानः पूजा यस्य तम्। भूमानं भूमापकम्। एकेन पदा भुवो व्यापनात्। तथा अमरवर्त्मसमानमानम् अमरवर्त्म आकाशस्तेन समानं मानं यस्य। गगनव्यापिस्वरूपत्वादिति भावः। आत्मानम् अतति सातत्येन वर्तते इति आत्मा तम्। त्रिविक्रमरूपं श्रीहरिम् आनमत प्रह्वीभूय शरणं गच्छत।।४४।।

विवृति

प्रथमतृतीययोरव्यपेतं [?] द्वितीयचतुर्थयोश्चाव्यपेतव्यपेत मध्यान्तयम- कमुदाहर्तुमाह–**श्रीमानमानित्यादि।**

आत्मानं परमपुरुषम्। असाधारणविशेषोपादानाद्विष्णुमेवाह। तमानमत प्रणमत। यः स्थितिमान् धैर्यवान्। उत्पत्तिविनाशरहितो मर्यादावान् वा। शश्वत् [यश्च] श्रीमान् लक्ष्मीवान्। यश्च अमान् जगत्यपर्याप्तावकाशः। अमराः देवाः। तेषां वर्त्म मार्गः, आकाशः तेन समानं सदृशं मानं परिमाणं यस्यासावमरवर्त्मसमानमानः। तमाकाशवद्व्यापकमित्यर्थः। अनन्तं (आनतं) च तज्जगच्च तत् तत्र प्रथमानं प्रख्यायमानो मानः पूजा यस्य तमानतजगत्प्रथमानमानम्। भूः पृथ्वी। तां मिमीते स्म भूमानः। कर्तरि ल्युट्। 'कृत्यल्युटो बहुल'मिति कर्तरि ल्युट्। तं भूमानम्। स किल वामनवेषव्याजेन बलिमथनोद्यतः चक्रवालाचलपरिक्षिप्तां क्षितिं एकपादेनामिमीत। न विद्यते मानं प्रमाणमेषां तान्यमानानि। अन्य(अ)परिसंख्येयानि नामान्यभिधानानि हरिजनार्दनमधुसूदनादि[दीनि] यस्यासावमानननामा नं (तम्) आनन्ति जीवन्तीत्याप्राणिनः तैर्मतः तमानमन्तः [तम्]। न पुनरा(ना)नां मतमिति [वि]ग्रहः। 'क्तेन च पूजाया'मिति समासप्रतिषेधात्। .... (?) तृतीयाविभक्त्यनुत्पत्तिरिति न मन्तव्यम्। भूतकालसामान्यविवक्षायां निष्ठेत्यनेन क्तप्रत्ययोत्पत्तौ 'न लोकाव्ययनिष्ठाखलर्थतृना'मिति षष्ठ्याः प्रतिषेधात् कर्तरि तृतीया स्यादेव। ननु वर्तमाने लडित्यधिकृत्य मत्वान्य[मत्याद्य]र्थेभ्यो धातुभ्यो वर्तमान एव काले क्तप्रत्ययस्योक्तत्वात् भूतकाले निष्ठेत्यनेन क्तप्रत्ययानुपपत्तेः तृतीयार्थपत्ति[ऽनुपपत्ति]रिति चेत् सत्यमेतत्।

किन्त्वपवादविषये क्वचिदुत्सर्गस्यापि समावेश इति मन्यादिभ्यो भूतेऽपि निष्ठा भवत्येव। अन्यथा कथमेतदुक्तं भाष्यकारेण–'तैः सूत्रविन्यासोऽपि न ज्ञात'इत्यलमि [म]तिप्रसङ्गेन। ततः स्थितमानैर्मतमानमतमित्यनवद्यम्। अप्रतिमानमान[म्। अ]प्रतिमानोनुपमो मानोऽभिमानो यस्या[सा]वप्रतिमानमानः। तम्।।

पादमध्यान्तेषु अव्यपेतव्यपेतमुदाहरति श्रीति। श्रीमान् अमान्, अमरवर्त्मसमानमानम्, आत्मानम्, आनतजगत्प्रथमानमानं, भूमानम्, आनमत, यः, स्थितिमान्, अमाननामानं, आनमतम्, अप्रतिमानमानम्। श्रीमान् लक्ष्मीपतिः, अमान् अमितः, अमरवर्त्मसमानमानम् आकाशसदृशप्रमाणम्, आत्मानं परमात्मानम्, आनतजगत्प्रथमानमानम् आनतेषु जगत्सु प्रथमानो मानो बहुमानो यस्य तं, भूमानं भुवो मातारं, आनमत प्रणमत, यः यच्छब्दः, स्थितिमान् जगतः स्थितिकर्ता, अमाननामानं अमितनामधेयम्, आनमतम्–अन प्राणने इत्यस्मात् आङ्पूर्वात् कर्तरि पचाद्यचि आनाः प्राणिनः–तेषां मतं पूजितम्, अप्रतिमानमानम् अनुपमाहङ्कारम्। आत्मानं आनमत इति सम्बन्धः।।४४।।

सारयन्तमुरसा रमयन्ती
सारभूतमुरुसारधरा तम्।
सारसानुकृतसारसकाञ्ची
सा रसायनमसारमवैति॥४५॥

रत्नश्री

सा काचिदभिमता स्त्री सारभूतमुत्कृष्टमुरुसारं सुवर्णं भूषणीकृतं धारयतीति मुरुसारधरा। उरुसारधरेति पाठे-उरुसारं स्त्रीजनोचितं गुणोत्कर्षं धारयतीति व्याख्येयम्। सहारसेन रणितेन वर्तन्त इति सारसा पक्षिणः[२]। सारसै रसद्भिरनुकृता तुल्या तत्समानशब्दत्वात् सारसकाञ्ची मेखला यस्या इति सारसानुकृतसारसकाञ्ची तमिष्टं कञ्चित्। पाठान्तरे-सारभूतं नागरकवृत्तसम्पन्नम्। सारयन्तं रसादुपरमयन्तम्। उरसा पयोधरभारेण परिरम्भेण रमयन्ती रन्तुं प्रयुञ्जाना आत्मना सुखयन्ती वा, रसायनमजरत्वादिसुखंयोगमपि असारमल्पमेवेति मन्यते। सुरतसुखमेव भृशं बहु मन्यते। तथाविधो हि तदाभिमानो [जा]यते। चतुष्पादादिमध्ययमकमेकरूपं व्यवहितम्॥

हृदयङ्गमा

प्रतिपादगतं व्यपेतादिमध्ययमकमुदाहरति, सारयन्तमिति। –उरुसाराणि स्वर्णभूषणानि धरतीति तथोक्ता, ("उरुसारं सुवर्णं स्यात्" इति व्याडिः) तथा अनुकृतः सारसः पक्षिविशेषः, सारसकूजितमिति भावः, यया सा, सारसकूजितसंवादिनीत्यर्थः, ["जातिकालसुखादिभ्यः परा निष्ठा वाच्या" (वा०) इति

निष्ठान्तस्य परनिपातः] सारसा सशब्दा, काञ्ची मेखल यस्यास्तथाभृता, सा रमणी, सारयन्तम् आश्लिष्यन्तं ("सृआस्तरणे" इत्यस्य चौरादिकस्य रूपम्) सारयन्तम् आत्मान मभिसारयन्तमिति वा, सारभूतं जगत्सु उत्कर्षत्वेन गणितं, तं जीवितसर्वस्वतामापन्नं पतिमित्यर्थः, उरसा वक्षः स्थलेन, रमयन्ती प्रीणयन्ती, प्रत्यालिङ्गनेन सुखयन्ती सतीति यावत्, रसायनं जराव्याधिहरं भेषजमपि, जराव्याध्याक्रान्तिप्रतिरोधकत्वेन अमृतमपीति भावः, असारं तुच्छम्, अवैति जानाति, प्रियालिङ्गनसुखादमृतमपि तुच्छमवगच्छतीत्यर्थः। (अत्र प्रत्येकपादेषु आदिमध्ययोः "सारसार" इति यमकघटकीभूतपदस्य व्यवधानेन पुनः पुनरावृत्तेः मिश्रं व्यवहितमादिमध्ययमकम्)।।४५।।

प्रभा

पादचतुष्टयगतं व्यपेतमादिमध्ययमकं दर्शयति–**सारेति**। मिथुनयोः संभोगोत्र वर्ण्यते। सा नायिका। सारयन्तं संकेतस्थान आत्मानं प्रापयन्तम्। अत एव सारभूतं श्रेष्ठभूतम्। सर्वसुखसारभूतमित्यर्थः। तं नायकम् उरसा रमयन्ती आलिङ्गनेन प्रमोदयन्ती। पुरुषायितरतेनेति केचित्। तथा सारवा सशब्दा अत एव अनुकृताः सारसाः यया एतादृशी काञ्ची मेखला यस्याः सा। सारसरवानुकारिमेखलाधारिणीत्यर्थः। तथा उरु विपुलं सारं सौन्दर्यसारं तस्य धरा उरुसारधरा। अथवा उरुसारं सुवर्णभूषणं धारयन्ती एतादृशी। उरुसारं सुवर्णं स्यात्। इति व्याडिः। रसायनम् अमृतमपि असारं निःसारम् तुच्छमिति यावद् अवैति जानाति। कान्तालिङ्गनसुखतोमृतं अतीव निकृष्टमिति मन्यत इति भावः।।४५।।

विवृति

व्यपेतं सर्वपादादिमध्ययमकमाह–

कामस्तत्र (शास्त्र) प्रणेतृवात्स्यायनान्य(द्य)भिहितानि-(नेक?) सारणप्रयोगं प्रयोजयन्तं तं वल्लभं रमयन्तीश्रममाणं प्रेरयन्ती। केन उरसा वक्षसा। का, [सा] रसायनं विद्याय (वैद्योप)दिष्टं रसायनं जरामरणव्यान्धिध्वंसि असारं फुल्लमवैति मन्यते। किंविशिष्टं तं सारभूतं सं(?)सारमिव वर्तमानम्। किंविशिष्टा। उरुसारधरा अ(उरु)सारं सुवर्णं तद्धरति वहति। कनकाभरणभूषिता। पुनरपि किंविशिष्टेत्याह। आरसः शब्दः। तेनानुकृताः सारसाः पक्षिणः यया साऽऽरसानुकृतसारसा सा चासौ काञ्ची च रशना सह तया वर्तत इति या सा सारसानुकृतसारसकाञ्चीति पूर्वेण सम्बन्धः।।

व्यपेतमादिमध्यमुदाहरति– **सारयन्तमिति।** उरुसारधरा विपुलसौन्दर्यधरा, सारवानुकृतसारसकाञ्ची–सारवा सनादा, अत एव अनुकृतसारस- पक्षिशब्दा काञ्ची यस्याः–सा, सारभूतं सुन्दरं, उरसा सारयन्तं गाढम् आलिङ्गन्तमित्यर्थः, वल्लभं रमयन्ती काचित् रसायनम् असारं अवैति।।४५।।

नयानयालोचनयानयानया–
नयानयान्धान् विनयानयायते।
न यानयासीर्जिनयानया नया–
नयानयास्तं जनयानयाश्रितान्॥४६॥

रत्नश्री

अनया न विद्यतेऽयो विगमो यस्या इति। अनयाऽनया स्थिरा आयतिरभ्युदयो यस्येत्यनयायते! आनयने प्राप्तौ[१]। अन्धान[वलोकना]- शक्तान्। विनय नयाभिज्ञान् नयानयसमर्थान् विधेहि। कथं? नयस्य त्रिवर्गोपायस्यानयस्य तद्विपर्ययस्य चालोचन[ा] विवेचना। तया नयानयालोचनया। अनया अपरोक्षया हेतुभूतया करणेन वा। अपि च यानयानहितोपायान् न अयासीः न प्राप्तवानसि तान्नयान्। आनयनमानयः प्राप्तिस्तमाश्रितान् प्राप्तियुक्तान् प्राप्तान् जनय कुरु। आनयेति यावत्। कथम्? जिनस्य तथागतस्य यानं यान्ति प्राप्नुवन्ति स्मरन्त्यनेन हितमिति आगमः। तं याति यथावद् वेत्तीति जिनयानयास्त्वम्। अतश्च प्रज्ञाबलादेव हितप्राप्तेर्न क्वचिद् यानं यात्रापरिक्लेशं याति गच्छत्याचरतीति अयानयास्त्वं क्वचि[99a]दगच्छन् व्यवहित एव सर्वनयनिरन्तरं तथागतसमयम[भ्य]सन् सर्वान्नयान् प्राप्नुहीत्यर्थः। प्रथमतृतीययोः पादयोराद्यन्तयमकमेकरूपमव्यपेतव्यपेतं, द्वितीयचतुर्थयोरादि-मध्ययमकमेकरूपमव्यपेतव्यपेतात्मकमिति॥

हृदयङ्गमा

प्रथमतृतीयपादयोरव्यपेतव्यपेतमाद्यन्तयमकं द्वितीय-

चतुर्थयोस्तादृशमादिमध्ययमकञ्च एकत्र दर्शयति, नयेति। –(अत्र पदविच्छेदप्रकार एवं द्रष्टव्यः, –नयानयालोचनया, अनया, अनयान्; अयानयान्धान्, विनय, अनयायते; न, यान्, अयासीः, जिनयानयान्, अयानयान्, अयान्, तान्, जनय, अनयाश्रितान् इति) हे अनयायते! न अयते गच्छतीति अनया अपायरहिता, आयतिः उत्तरकालः यस्य तत्सम्बोधनम्; हे अस्खलितशासन प्रभो!, अनया एवंविधया, परिदृश्यमानयेत्यर्थः, नयानयालोचनया नयः नीतिः, अनयः दुर्नीतिः, तयोरालोचना तया, अयं नयो ग्राह्यः अयमनयो हेय इत्यादिरूपसदसद्विवेकेनेत्यर्थः, अनयान् नयनहितान्, अत एव अयस्य शुभावहविधेः, ("अयः शुभावहो विधिः" इत्यमरः) आनये आनयने, अनुष्ठाने इत्यर्थः, अन्धान् आत्महितमपश्यत इत्यर्थः, जनान् इति शेषः, विनय विनीतान् कुरु, यथा ते नीतिमार्गानुसारिणः भवेयुः तथा विधेहि इत्यर्थः, किञ्च जिनयानं जैनमार्गं, यान्तीति तथोक्तान् बौद्धमतावलम्बिनः, अत एव अयानम् अमार्गं, विरुद्धपन्थानमित्यर्थः, यान्तीति तादृशान् अपथगामिनः, अत एव अनयाश्रितान् दुर्नयानुसारिणः, स्वस्याशुभमवलम्बमानानित्यर्थः, यान् जनान्, त्वं न अयासौः न गतवानसि, यैः सङ्गं त्वं न कृतवानसि इत्यर्थः, तान् बौद्धमतावलम्बिनो जनान्, अं विष्णुं यान्तीति तथाभूतान् वैष्णवधर्मावलम्बिनः, जनय कुरु। (अत्र प्रथमद्वितीयपादयोः "नयानया" इत्यस्य आदावन्ते चाव्यवधानेन पुनरावर्त्तनात् तृतीयचतुर्थपादयोश्चादौ मध्ये चाव्यवधानेनावृत्तेः क्रमेण अव्यपेतम् आद्यन्तयमकम् आदिमध्ययमकञ्च एकत्रैव दर्शितमिति दिक्)।।४६।।

प्रभा

इदानीमव्यपेतव्यपेतयमकं चतुर्ष्वपि पादेष्वाद्यन्तम् अथवा प्रथमतृतीयपादयोरद्यनतं द्वितीयचतुर्थयोश्चादिमध्यम् उदाहरति– **नयेति।** तत्र तावत् पदानि। नयानयालोचनया। अनया। अनयान्। अयानयान्धान्। विनय। अनयायते। न। यान्। अयासीत्। जिनयानयाः। नयान्। अयानयान्। तान्। जनय। अनयाश्रितान्। अन्वयः–हे अनयायते अनया नयानयालोचनया अनयान् अयानयान्धान् विनय। तथा अनयाश्रितान् तान् अयानयान् नयान् जनय। यान् जिनयानयाः न अयासीत्। कश्चित्सचिवो नृपं प्रजानुशासनमुपदिशति। हे अनयायते एति गच्छतीति अया विनाशशीला तादृशी न भवतीति अनया अनपायिनी आयतिः उत्तरकालः यस्य तत्संबुद्धिः। अनया मयोपदिश्यमानया। नयानयालोचनया नयः नीतिः अनयः अनीतिः तयोरालोचना विमर्शस्तया। अनयान् नयविमुखान्। अत एव अयानयान्धान् अयः शुभावहो विधिः अनयः तद्विरुद्धः तयोः अन्धान्। शुभाशुभविवेकशून्यान् इत्यर्थः। विनय शिक्षय। शासनेन सन्मार्गानुयायिनः कुरु। (तथा) अनयाश्रितान् उन्मार्गगामिनः। तान् श्रुतिस्मृतिप्रसिद्धान्। अयानयान् अयं शुभमानयन्तीति अयानयान्। आङ्पूर्वकान्नयतेः पचाद्यचि द्वितीयाबहुवचनम्। शुभप्रापकान्। नयान् नीतीः। जनय उपदिश्य विस्तारयेत्यर्थः। यान् नयान्। जिनयानयाः जिनस्य बुद्धस्य यानं धर्ममार्गस्तं यातीति जिनयानयाः। जैनागमानुसारी नास्तिकः। न अयासीन् नानुसृतवान्। श्रुतिस्मृत्युदितान् नीतिमार्गान् उन्मार्गयायिजनेभ्य उपदिशेत्यर्थः।

अत्र बहुभिष्टीकाकारैर्विविधा अर्थाः प्रदर्शिताः। परं तेषां सदसद्विचारचर्चा गौरवभयान्नात्र वितन्यते।।४६।।

विवृति

प्रथमद्वि[तृ]तीययोराद्यन्त(यमकं) द्वितीयचतुर्थयोः मध्यादियमक- (मव्यवहित)व्यवहितमुदाहर्तुमाह–**नयानयेत्यादि।**

सन्धिविग्रहयानासनसंश्रयद्वैधीभावानां गुणानां याथात्म्येनानुष्ठानं नयन्तु वि(नयस्तद्वि)पर्ययोऽनयः तौ नयानयौ। तयोरालोचनं यस्य (?) विमर्शो यस्यां सा नयानयालोचना दण्डनीतिः। तदुक्तं 'दण्डनीत्यां नयानया'विति। तया नयानयालोचनया दण्डनीत्या अनया प्रत्यक्षमनुभूयमानया। आनो बलं, तद्यातीत्यानया क्षिप्तया (तद्वती आना तया) आनया चतुरङ्गबलानुसारिण्या। अनया न यद्वापि (नयानयान्धान्) नयनयादु[वु]क्तलक्षणयोः [ंणौ] तयोरन्धं धान[रन्धाः] अन्धा इव कार्याकार्यविपर्यासितमतयो मूढाः तान्। विनय शिक्षय। हे राजन् इत्यध्याहार्थम्। कथम्भूतः आसमन्ततो नयेनोपायेन आयतिराज्ञा प्रभुता यस्य तस्यामन्त्रणम् हे आनयायते। नीयन्त इति नया अभिप्रायाः। 'पुंसि संज्ञायां घः प्रायेणे'ति। तानयासीदगमत् भवान्। कथम्भूतान् जिनयानयान् जिनः सुगतः तस्य यानं ज्ञानं तद्याती[न्ती]ति जिनयानयान् [:] तान्। अयः पुण्यं तदस्यास्तीति [?] अर्शादिपाठादच् समासान्तः। तानयान्। अय एव अनः प्राणाः तं यात्यथ वा अयश्चानश्चायानौ। तौ याति। यः असावयानयः तस्यामन्त्रणं हे अयानय। अस्तान् निरस्तान् जनय सम्पादय। कानित्याह अनयाश्रितान्। अनयः उक्तलक्षणः। अयः पुण्यं

तत्प्रतिषेधो वा अनयः पापं, तदाश्रितान् पुरुषान् इति। केचिदव्यपेतमेत(व्यपेत)मादिमध्ययमकमाहुः। यथा नयेति। नयो युक्तिः। तद्विपरीतोऽनयः। तयोरालोचना विवेचनम्। नयानयालोचना तया। अयः पुण्यं, तस्यानयः प्रापणं अयानयः। तस्मिन्नन्धा नयानयानयान्धाः। अनयाः उपद्रवाः। त एव आयतिः सम्पद्येषां ते तथोक्ताः। जिनो बुद्धः। तस्य यानं मार्गं तद्यातीति जिनयानयाः नयानं अयानं अचलमितियावत्। तद्यातीति अयानयाः। अनयममार्गमाश्रयन्तीत्यनयाश्रिताः। हे कृतिन् बुद्धिमन् अनया नयानयालोचनया अनयानयान्धानयो(न् अनय) यतीन् विनय शान्तान् कुरुष्व। दमयेति यावत्। दुर्दान्तदमनं कथमित्याह। जनयानयास्सुगतमार्गानुसारी अयानया अचलितस्त्वं यान्विधीन् हिंसादिकान्नायासीः नानुष्ठितवानसि। तवान् (तान्) विधीन् अनयाश्रितां(तान्) पुरुषाणां[?]जनयामार्गगतेषु पुरुषेषु स(ग)तांस्तान् कुर्विति यावत्। सत्ववधात् विरतं कञ्चन धार्मिकं राजानं प्राणिवधे नियोक्तुकामो मन्त्री कोऽप्येवमब्रवीत्।।

पादादिमध्येषु अव्यपेतव्यपेतं दर्शयति–नयेति। कश्चिद्राजानमविनीतान् शिक्षयेति प्रार्थयते। नयानयालोचनया, अनया, कृतीन्, अयानयान्धान्, विनयानयायते, न, यान्, अयासीः, जिनयानयान्, नरान्, अयानयान्, तान्, जनय, आनय, आश्रितान्। नयानयालोचनया न्यायान्यायपर्यालोचनया, अनया एतया, कृतीन् कुशलान्, अयानयान्धान्–अयः पुण्यम्, अनयः अपुण्यम्–तयोः अन्धान् अज्ञान्, विनयानयायते–विनयेन सदाचारेण आनया आनीयमाना आयतिः समृद्धिः यस्य तस्य सम्बोधनं, न–निषेधे, यान्–यच्छब्दः, अयासीः–अगच्छः, जिनयानयान्–जिनः बुद्धः

तस्य यानं सिद्धान्तः—तेन यान् गामिनः नरान्, अयानयान् अमार्गान् गतान्, जनय कुरु, आनय जीवय, आश्रितान्। विनयानयायते कृतीन् अनया क्रियमाणया नयानयालोचनया यान् न अयासीः अयानयान्धान् अयानयान् तान् जिनयानयान् जनय—अहिंसापरान् कुरु इत्यर्थः ; आश्रितान् आनय जीवय।।४६।।

रवेण भौमो ध्वजवर्तिवीरवे।
रवेजि सयत्यतुलास्त्रगौरवे।।
रवेरिवोग्रस्य पुरो हरेरवे।
रवेत तुल्यं रिपुमस्य भैरवे।।४७।।

रत्नश्री

भूमेरपत्यं भौमो नरकासुरः अवेजि विद्रुतः। केन? रवेण नादेन। कस्य? ध्वजे वर्तमानस्य वीरस्य विक्रान्तस्य वेः पक्षिणः। गरुत्मत इति यावत्। कुत्र? अतुलमसमम् अस्त्राणां गौरवं भारो यत्रेत्यतुलास्त्रगौरवे संयति युद्धे। अत एव भैरवे भीमे यस्य ध्वजचिह्नस्येदृशो विक्रमस्तस्यैतस्य तु रोचिष्णो रवेः सूर्यस्येवोग्रस्य तेजस्विनः पुरोऽग्रतो रिपुं भौममन्यं वा अवेर्मेषस्यतुल्यमवेत जानीतेति चतुष्पादाद्यन्तयोरेकरूपं व्यपेतयमकमव्यपेतं च।।

हृदयङ्गमा

व्यपेतं सर्वपादगतमाद्यन्तयमकमुदाहरति, रवेणेति।—भौमः भूमिसुतः, नरकासुरः इति यावत्, ध्वजवर्त्तिनः श्रीकृष्ण रथध्वजस्थितस्य, वीरस्य वीर्य्यशालिनः, वेः पक्षिणः, गरुड़स्य इत्यर्थः, रवेण नादेन, अतुलम् अनुपमम्, अस्त्राणां गौरवं गुरुत्वं बहुत्वं वा यस्मिन तादृशे, भैरवे भयङ्करे, संयति सङ्ग्रामे, अवेजि उद्वेजितः, त्रासित इत्यर्थः, तथा हि, रवेः सूर्य्यस्येव, उग्रस्य तेजोराशेः इत्यर्थः, अस्य हरेः श्रीकृष्णस्य सिंहस्य च, पुरः अग्रे, रिपुं शत्रुं, नरकमिति यावत्, अवेर्मेषस्य, तुल्यं सदृशम्, अवेत जानीत, यूयमिति शेषः। (श्रीकृष्णस्य नरकासुरेण युद्धवर्णनमिदम्।

अत्र चतुर्णामेव पादानामादावन्ते च ''रवे'' इति पदस्य व्यवधानतया पुनःपुनरावर्त्तनात् मिश्रं व्यवहित-माद्यन्तयमकम्)।।४७।।

प्रभा

पादचतुष्टयगतं व्यपेतमाद्यन्तयमकमुदाहरति–**रवेति**। भगवतः श्रीकृष्णस्य नरकासुरेण सह युद्धवर्णनमिदम्। अतुलानां अनुपमानानां अस्त्राणां गौरवं वैपुल्यं यत्र तादृशि। तथा भैरवे बिभीषणे। संयति संग्रामे। ध्वजवर्ती यो वीरः शूरः विः गरुडस्तस्य। रवेण सिंहनादेन। भौमः नरकासुरः। अवेजि अकम्पत। ध्वजवर्तिपक्षिणो रवेन यस्येदृशी अवस्था स हरेः पुरतः कथं कल्पनीय इत्याह–**रवेरिति**। रवेरिव सूर्यस्येव। उग्रस्य तेजसा तीक्ष्णस्य। अस्य प्रसिद्धविक्रमस्य। हरेः हरिः श्रीकृष्णः स एव हरिः सिंहस्तस्य। पुरः अग्रभागे। रिपुं नरकासुरम्। अवेः मेषस्य। तुल्यं समानम्। अवेत जानीत। अत्र संयच्छब्दस्य सामान्ये नपुंसकम् इत्यनेन नपुंसकत्वं ज्ञेयम्। केचित्तु संयति भैरवे अतुलास्त्रगौरवे सति रवेण अवेजि इति योजयन्ति। तथैव वीरवेरिति हरेर्विशेषणत्वेन कल्पयन्ति।।४७।।

विवृति

चतुर्ष्वपि पादेषु आद्यन्तयमकं व्यवहितमुदाहरति–

हरेः विष्णोः रवेण ध्वनिना अवेजि उद्विग्नः। कोऽसौ? भौमः नरकासुरः। कथम्भूतो हरे[रि]रित्याह ध्वजवर्तिवीरवेः ध्वजवर्ती केतुवर्ती वीरः शूरः विः पक्षी गरुडो यस्य तस्य। क्व अवेजि, संयति संग्रामे। कथम्भूते अतुलास्त्रगौरवे अनुपमास्त्राणां गौरवं

गुरुत्वं यत्र तस्मिन्। रवेरिवोग्रस्य आदित्यस्येव असह्यप्रतापस्यास्य पुरः पुरस्ताद्रिपुं शत्रुमवेर्मेषस्य तुल्यं सदृशं जानीत। भैरवे भयानके संयतीति पूर्वेण सम्बन्धनीयम्।।

आद्यन्तयोः एकरूपं व्यपेतं दर्शयति–**रवेणेति।** अतुलास्त्रगौरवे भैरवे संयति, ध्वजवर्तिवीरवेः--ध्वजे वर्तमानः वीरो विः गरुडो यस्य तस्य–हरेः कृष्णस्य रवेण सिंहनादेन भौमः नरकः अवेजि उद्वेजितः त्रासितः ; रवेः इव उग्रस्य प्रतापिनः अस्य हरेः पुरः रिपुम् अवेः तुल्यं मेषतुल्यम् अवेत। अस्य हरेः पुरः रिपुं सिंहस्य पुरो मेषमिव बुध्यध्वम् इत्यर्थः।।४७।।

मयामयालम्ब्यकलामयामया-
मयामयातव्यविरामयामया।
मयामयार्तिं निशयामयामया-
मयामयामूं करुणामयामया।।४८।।

रत्नश्री

अमूं तामिष्टां काञ्चिद् रूपसम्पत्त्यादियोगात् अय इष्टफलं दैवमस्यास्तीति अयाम्। अर्श आदित्वादच्। गुणवतीम्, किंभूताम्? मयामयार्तिं डुमिञ् प्रक्षेपणे येन मयः प्रक्षेपः परित्यागो विरह इति यावत्। मय एवामयो विकारस्तस्य स एव वा आर्तिः व्यथा यस्या इति मयामयार्तिं विरहव्याधिपीडिताम्। अतश्च मयामयालम्ब्यकलामयामयाः अविकारो दक्षस्तस्यापकृतस्तेनालम्ब्यो गृहीत इति व्यथाकरत्वात् सरोषमधिक्षिप्तः कलामयश्चन्द्र एव पीडाकरत्वादामयो रोगो यस्य इति मयामयालम्ब्यकलामयामया। केन? तेन निशा रात्र्या हेतुना अयातव्यो विरामोऽन्तो यमित्ययातव्यविरामयाऽनवसानया विरहवशात्। अतश्च[न]- मानं मा भिदादिषितोङिति[1] भिदादिदर्शनादङ् [?] विद्यते येषामित्यमा अपरिमिता यामाः प्रहरा [अ]स्या इत्यमयामया। ततश्चातिदुःखहेतुत्वादधिक्षिप्यते अमयेति. निश्रीकया मा श्रीर्न विद्यतेऽस्या इति कृत्वा अमया [अमं] तद्विरहविकारं यातीत्यमया विरहदुःखपीडितेन सह अमय संगमयं [99b] हे करुणामय! सानुक्रोशमये मित्रेति कश्चित् सुहृदामन्त्र्यते। चतुष्पादाद्यन्तयमकमेकरूपमव्यपेतव्यपेतमिति।।

हृदयङ्गमा

अव्यपेतव्यपेतं चतुष्पादगतमाद्यन्तयमकमुदाहरति, मयेति। –(अत्रायं पदविभागः,–मयामयालम्ब्यकलामयामयाम्; अयाम्, अयातव्य- विरामयामया; मया, अमयार्त्तिं, निशया, अमया, अमया; अमय, आमय, अमूं, करुणामय, आमया इति) हे अमय! मिनोति क्षिपति, त्यजति दूरमिति यावत्, इति मयः स न भवतीत्यमयः सर्वास्ववस्थासु मामनुवर्त्तमानः, तत्सम्बोधनं, ("डु मिञ् क्षेपणे" इत्यस्य कर्त्तरि ड प्रत्ययः) यद्वा, –हे अमय! नास्ति माया यस्य तत्सम्बुद्धौ, हे अकपट! इत्यर्थः, (आकारलोपो महाकविप्रयोगादविरुद्धः) अत एव हे करुणामय! दयामय!, सखे! इति शेषः, (एतेन सम्बोधनपदद्वयेन स्वप्रार्थनायाम् अवश्यमेवानुकूल्यं करिष्यतीति सूचितम्) आमं रोगं, कामपीड़ामिति यावत्, याति प्राप्नोतीति आमयाः तेन आमया कामार्त्तेन इत्यर्थः, ["आतो धातोः" (६/४/१४० पा०) इति आकारलोपः] मया सह, मयः अपचयः, कलाक्षय इति यावत्, ("मय गतौ" इत्यस्य रूपम्) अमयः उपचयः, कलावृद्धिरिति यावत्, ताभ्याम् अपचयोपचयाभ्यामित्यर्थः, क्षयवृद्धिशीलत्वात् इति भावः, आलम्ब्यः आश्रयणीयः, यः कलामयः कलात्मकश्चन्द्रः, तस्मात् आमयः रोगः, कामपीड़ा इत्यर्थः, यस्याः तादृशीं, चन्द्रस्य कामोद्दीपकत्वादिति भावः, अमं रमणीम्, आमय सङ्गमय इत्यर्थः, ("अम गतौ" इत्यस्य णिचि रूपम्) यतः अहम् अयातव्यः अप्राप्तव्यः, विरामः अवसानं येषां तादृशाः, यामाः प्रहरा यस्यास्तादृश्या दीर्घयामया इत्यर्थः, अत एव नास्ति मा परिमाणं यस्यास्तथाभूतया अमया सुदीर्घया इत्यर्थः, अत एव

अमया नास्ति मा शोभा यस्याः तथोक्तया अतिकुत्सितया इत्यर्थः, विरहिणामिति भावः, निशया रजन्या हेतुना, मयः गमनं, प्राप्तिरित्यर्थः, ("सर्वे गत्यर्थाः प्राप्त्यर्थाः" इति नियमात्) तद्वैपरीत्यम् अमयः तेन अमयेन अप्राप्त्या, तस्या इति भावः, अर्त्तिं पीड़ां, तदप्राप्त्या सातिशयां कामपीड़ामिति यावत्, अयां प्राप्नवम्। ("या गतौ" इत्यस्य रूपम्। कस्यचित् विरहिणः सखायं प्रत्युक्तिरियम्। ("अत्र प्रत्येकपादानामादावन्ते च "मया मया" इति पदस्य पुनः पुनः सान्निध्यप्रयुक्ततया अव्यवहितं तथा "लम्बयकला" इत्यादिवर्णानां मध्यस्थतया व्यवहितञ्च मिश्रमाद्यन्तयमकम्)।।४८।।

प्रभा

तदेवाव्यपेतव्यपेतं पादचतुष्टयगतमाद्यन्तमुदाहरति—**मयेति**। तत्र तावत्पदच्छेदः। मया मयालम्ब्यकलामयामयाम् इति प्रथमचरणे। अयाम् अयातव्यविरामयामया इति द्वितीये। मयामयार्तिं निशया अमया अमया इति तृतीये। अमय अमय अमूं करुणामय अमया इति चतुर्थे। तत्रान्वयः—हे अमय करुणामय अयातव्यविरामयामया अमया अमया निशया मयामयार्तिम् अयाम् (अतः) अमया मया मयालम्ब्यकलामयामयाम् अमूम् अमय। अस्यार्थः—अमय नास्ति मा माया कपटं यस्य तत्संबुद्धिः। हे निष्कपट। करुणामय करुणापरिपूर्ण। सखे। अयातव्यः गमनानर्हो विरामो येषां ते अयातव्यविरामाः। अतिदीर्घा इत्यर्थः। अयातव्यविरामा यामा यस्याः सा अयातव्यविरामयामा तया। अतिदीर्घयेत्यर्थः। अमया मा शोभा सा नास्ति यस्यां सा। तया अमया। निःश्रीकयेत्यर्थः। संतापजनकत्वेन निःशोभावहयेति यावत्। अत एव

अमयाअमावास्यासदृशया। विरहान्धकारबहुलयेत्यर्थः। निशया रात्र्या। साधनभूतया। अहम् मयामयार्तिं मयः क्षयः स एव आमयः रोगः तस्य आर्तिं पीडाम्। विरहक्षीणतामिति भावः। अयाम् प्राप्तवान्। अतः अमया नास्ति मा परिमाणं यस्य स अमः मदनः तं यातीति अमयाः तेन। मदनपरिपूर्णेनेत्यर्थः। मया मया सह। मयालम्ब्यकलामयामयाम् मयः क्षयः तेन आलम्ब्या आश्रयणीयाः याः कलाः ताभिः परिपूर्णः मयालम्ब्यकलामयः चन्द्रमाः स एव आमयो यस्यास्ताम्। चन्द्र दर्शनेन संजातपीडामित्यर्थः। अत्र मयालम्ब्य इतिचन्द्रकलाविशेषणं नायिकासंतापकत्वेन रोषसूचनायेति ज्ञेयम्। अमूं नायिकाम् अमय संयोजय।।४८।।

विवृति

सर्वपादेष्वव्यवहितमाद्यन्तयमकमुदाहर्तुमाह—**मयेति।**

मयः क्षयः, आमयः रोगः, क्षयव्याधिरित्यर्थः। तेन अ(आ)लङ्घ्यः स्ववशीकः [कृतः] कलामयश्चन्द्र एव आमयो रोगो यस्याः सा तथोक्ता। 'मया मयालम्ब्य कलामयामया'मिति पाठः। तदा मयामयः क्षयव्याधिः तेन आलम्ब्यते आश्रीयत इति मयामयालम्ब्यः स चासौ कलामयश्चन्द्रः स एवामयो रोगः यस्याः सा मयामयालम्ब्यकलामयामया तां [अयां] पुण्यवतीम्। अयातव्यः अप्राप्यः विरामो अवसानं मृत्युः येन असावयातव्यविरामः। तस्यामन्त्रणं हे अयातव्यविराम! आयुष्मन् सखे यां वल्लभामहमयां सङ्गमं गतोऽस्मि किंविशिष्टां? अयामयार्तिं, यमनं यामः, तस्य प्रतिषेधोऽयामः अनुपरमः तं यातीत्ययामया। अथ वा याममत्र यातीत्ययामया इति क्रियाप्रतिषेधः। समासस्तु अश्राद्धभोज्यादिषु पाठात् सिद्धः। अविनाशिनी आर्तिः

पीडा विरहव्यथा यस्याः सा अयामयार्तिः। तामयामयार्तिम्। कयाहमयां इत्याह निशया रात्र्या हेतुभूतया, किंविशिष्टयेत्याह। अमयामयामया, अमन्ति रुजन्तीत्यमाः। अमाः यामाः प्रहराः यस्याः सा तया अमयामया। अथवा 'अम गत्यादिषु'। अमन्ति गच्छन्तीत्यमाः। अमाः गच्छन्तः यामाः यस्याः सा अमयामा। विरहित्वाद्रात्रेः दैर्ध्यं द्योत्यते। मया सह आमय संयोजय। अमूं कान्ताम्। हे करुणामय कारुणिक, सखे। किंविशिष्टेन मया। आमो रोगः विरहपीडा। तं याति यस्स आमया इति क्विप्। तेन आमया विरहव्यथाभाजा। ततोऽयं समुदायार्थः। यां वल्लभां पुण्यवतीं गतोऽस्मि सङ्कल्पेन न शरीरेण रात्र्या हेतुभूतया तां चन्द्रदर्शनव्याधिव्यथात(क)दर्थितामनुपरतविरहव्यथाः[थां] हे सखे कारुणिक मया विरहव्यथाभाजा सह संयोजय इति केनचित् कश्चित् सखा स्मराभितप्तेन प्रियतमासङ्गमं प्रति प्रार्थ्यत इति एवं केचित् योजयन्ति। तत्तु न सम्यक्। द्वितीयतृतीयपादयोर्यति-सम्बद्धत्वाद्वियुजोऽवश्यमिति वचनात्। अत्र कथमर्थ इति चेत् निशया रात्र्या हेतुभूतया मयामयार्तिः मारयतीति मयः। न मारयतीत्यमयः स एवार्तिः पीडा जीवमृतिरित्यर्थः। वल्लभानुपलब्धौ मरणमेव श्रेय इति मन्वानो ब्रूते। [तां] अयां गतवानस्मि। किंविशिष्टया निशयेत्याह। अयातव्यविरामयामया अप्राप्यावसानप्रहरया विरहित्वात्[?] प्रतीतिः। अमयामया आमः व्याधिः यामः आयामः दैर्ध्यमिति यावत्। तं यातीत्यामयामया। तृतीयैकवचनं मया आमयेति। शेषं समानम्॥

पादाद्यन्तेषु अव्यपेतव्यपेतं दर्शयति—**मयेति**। मयामया-लङ्घ्यकलामयामयाम्, अयाम्, अयातव्यविरामयामया, मया, अमयार्ति, निशया, आमयाम्, अयाम्, अय, आमय, अमूं,

करुणामय, आमया। मयामयालङ्घ्यकलामयामयाम्–मयः क्षयः, स एव आमयः व्याधिः, तेन अलङ्घ्यः अप्राप्यः, कलामयः चन्द्रः, तेन आमं खेदं यातीति आमयाः–तां, पूर्व्र[र्ण?]चन्द्रजनितखेदामिति यावत्; अयाम्–अयः पुण्यम्, तद्वतीम्, अर्शआदित्वादच्; अयातव्यविरामयामया–अयातव्यविरामः अप्राप्यावासानः, यामः प्रहरः, यस्याः तया; मया स्वेन; अमयार्तिं अक्षयपीडां; निशया रात्र्या; आम आगच्छ–अम गत्यादिषु, तस्मात् आङ्पूर्वात् लोण्मध्यमपुरुषैकवचनम्; यां यच्छब्दः ; अयाम् अयासिषम्; अय अभिमत दैव; आमय आगमय, संयोजय इति यावत्; अमूं एताम्; करुणामय कृपाःसागर; आमया–आमः खेदः, तं याता, यातेः विचि तृतीयैकवचनन्। अयमर्थः–करुणामय अय, आम मे सन्निधत्स्व, मयामयालङ्घ्यकलामयामयाम् अयाम् अमयार्तिम् अमूं हृदयस्थितां दयिताम् आमया मया आमय, अयातव्यविरामयामया अनया निशया याम् अयाम्।।४८।।

मतांधुनानारमतामकामता–
मतापलब्धाग्रिमतानुलोमता।
मतावयत्युत्तमताविलोमता–
मताम्यतस्ते समता न वामता॥४९॥

रत्नश्री

ते तव अताम्यतो दुश्चरिताभावात् प्रज्ञाकौशलाद् वार्थसिद्धि [आप्नुवतः] सम्बन्धिन्यां मतौ बुद्धौ विषये समता रागद्वेषादिवैषम्याभावादेकान्तोचिता दक्षिणतैव प्रवर्तते। यदाह–न वामतेति, न दुष्टता काचित्। किंविशिष्टा? उत्तमताया प्रधान[त्व]स्य विलोमतां प्रातिकूल्यमधमताम् अयती अगच्छन्ती, किंतु अतापेनाकृच्छ्रेण लब्धा प्राप्ता अग्रिमताया अनुलोमता आनुगुण्यं ययेत्यतापलब्धाग्रिमतानुलोमता अ[क्लेशेन सर्वराजपूरोवर्तित्वं त]वेति यावत्। आरमतां तपस्विनामकामतामलुब्धतांः मतां प्रशस्तां धुनाना जयन्ती तदुपमितेति यावत्। समता प्रवर्तत इति निगमनीयम्। चतुष्पादादिमध्यान्तयमकं व्यपेतमेकरूपमिति॥

हृदयङ्गमा

व्यपेतादिमध्यान्तयमकमुदाहरति, मतामिति। –(पदविभागश्चैषः, –मतां, धुनाना, आरमताम्, अकामताम्; अतापलब्धा, अग्रिमतानुलोमता; मतौ, अयती, उत्तमताविलोमताम्; अताम्यतः, ते, समता, न, वामता इति) हे साधो! इति सम्बोधनपदम् अत्र अध्याहर्त्तव्यम्; अताम्यतः कदाऽपि अखिद्यतः, सदा प्रसन्नमनस

इत्यर्थः, ते तव, मतौ चित्ते, आरमताम् आत्मन्येव रममाणानां, विषयव्यावृत्तानां योगिनामित्यर्थः, मतां सम्मतां, योगिभिरादृतामित्यर्थः, अकामतां निःस्पृहताम्, अपीति शेषः, धुनाना कम्पयन्ती, उत्कर्षवत्तया तामपि तिरस्कुर्वतीत्यर्थः, तथा अतापेन अक्लेशेन, लब्धा प्राप्ता, स्वाभाविकीत्यर्थः, तथा अग्रिमतायाः श्रेष्ठतायाः, अनुलोमता आनुकूल्यं यया तादृशी श्रेष्ठत्वसम्पादिनीत्यर्थः, तथा उत्तमताया गुणवत्तायाः, विलोमतां प्रतिकूलताम्, अयती अगच्छन्ती गुणवत्त्वसमानाधिकरणा इति भावः, समता अपक्षपातित्वं, सर्वत्र समदर्शित्वमित्यर्थः, विद्यते इति शेषः, वामता प्रतिकूलता तु, न, विद्यते इति शेषः। (कस्यचित् सधोर्गुणकीर्त्तनमिदम्। अत्र प्रतिपादानामादौ मध्ये अन्ते च "मता" इति पदस्य पुनः पुनर्व्यवहितत्वेनावृत्तेः व्यवहितमादिमध्यान्तयमकम्)।।४९।।

प्रभा

अथ व्यपेतमादिमध्यान्तयमकं पादचतुष्टयगतमुदाहरति–**मतेति।** कस्यचित्पुरुषविशेषस्य वर्णनमिदम्। अत्र पदच्छेदः-मता धुनाना आरमताम् अकामताम्। अतापलब्धाग्रिमतानुलोमता। मतौ अयती उत्तमताविलोमताम्। अताम्यतस्ते समता न वामता। अन्वयः–अताम्यतः ते मतौ उत्तमताविलोमताम् अयती अतापलब्धाग्रिमतानुलोमता आरमताम् अकामतां धुनाना मता समता न वामता। अस्यार्थः–अताम्यतः कथमपि ग्लानिमगच्छतः। ते तव। मतौ बुद्धौ। उत्तमताविलोमताम् उत्तमताया विलोमतां प्रातिकूल्यं निकृष्टताम्। अयती अगच्छन्ती। निकृष्टतामभजमाना इत्यर्थः। अतापलब्धाग्रिमतानुलोमता अतापेन अक्लेशेन लब्धे

अग्रिमतानुलोमते श्रैष्ठ्यानुकूल्ये यया सा। तथा आरमताम् आत्मारामाणाम्। व्याङ्परिभ्यो रमः इति परस्मैपदम्। अकामतां निरिच्छताम्। धुनाना स्पृहामुत्पादयन्तीत्यर्थः। (एतादृशी) मता इष्टा। समता सर्वभूतमैत्री। अस्तीत्यर्थः। तथा वामता वैषम्यम् नास्तीत्यर्थः।।४९।।

विवृति

सर्वपादेषु व्यवहितमादिमध्यान्तयमकमाह–

हे राजन्! ते तव (मतौ) बुद्धौ अयन(ति) उपभौ(ढौ)कते का समता समञ्जसता न वामता न वक्रता। किं कुर्वतः तवेत्याह अका(ता)म्यतः अनाकांक्षतः। कामित्याह उत्तमताविलोमतां उत्तमस्य भावः उत्तमता तस्य विलोमता प्रतिकूलता जघन्यता। तामनभिलषतः। किंभूता सा (स)मतेत्यत आह धुनाना निरस्यन्ती अकामतां निस्पृहतां किंविशिष्टां; मतां सम्मतां; केषां आ समन्ततः अ(?)रमतां विरमतां तपस्विनाम्। पुनरपि किंविशिष्टा समतेत्याह। अतापेन अक्लेशेन लब्धा प्राप्ता अग्रिमतायां पुरः सरतायां अनुलोमता आनुलोम्यं अ(य)यासा अतापलब्धाग्रिम(त)ानुलोमता अथ च ते मतौ समता न वामता अस्ति नास्तीत्यर्थात् गम्यते। कीदृशी समतेत्याह उत्तमताविलोमतामयन्ती उत्तमस्य भावः उत्तमता तस्या अविलोभतामानुकूल्यमयन्ती गच्छन्ती। शेषं पूर्ववत्।।

आदिमध्यान्तरेषु एकरूपं व्यपेतं दर्शयति–**मतामिति**। मतां, धुनाना, आरमताम्, अकामताम्, अतापलब्धाग्रिमतानुलोमता, मतौ, अयति, उत्तमताविलोमताम्, अताम्यतः, ते, समता, न, वामता।

मतां इष्टाम्, धुनाना क्षिपन्ती; आरमतां विषयेभ्यो विरमतां योगिनाम्; अतापलब्धाग्रिमतानुलोमता–अतापेन अक्लेशेन लब्धा प्राप्ता, अग्रिमतायाः श्रैष्ठ्यस्य अनुलोमता अनुकूल्यं, यया सा; मतौ बुद्धौ; अयति गच्छति; उत्तमताविलोमतां श्रैष्ठ्यस्य प्रातिकूल्यम्; अताम्यतः अकांक्षतः, तमु कांक्षायाम्; ते तव; समता सर्वभूतमैत्री; न प्रतिषेधे; वामता क्वचित् प्रतिकूलता। अयमर्थः–आरमताम् अकामतां मतां धुनाना वामता, उत्तमताविलोमताम् अताम्यतः ते, मतौ न; अतापलब्धाग्रिमतानुलोमता समतैव भवति। इति मुमुक्षुं कश्चित् प्रशंसति।।४९।।

कालकालगलकालकालमुखकालकाल–
कालकालपनकालकालघनकालकाल।
कालकालसितकालका ललनिकालकाल–
कालकालगतु कालकालकलिकालकाल॥५०॥

रत्नश्री

कालकालो महाकालः शङ्करः तस्य गलः कण्ठः कलिरेव कालः। कालमुखो गोलाङ्गलः। कालकालगलश्च कालश्च कालमुखश्च तेषां कालकं कृष्णत्वम्। तदालाति गृह्णातीति मूलविभुजादिदर्शनात् कः। कालकालगलकालकालमुखकालकालः। कालं कायन्ति शब्दायन्ते इति कालका मयूराः तेषामिदं कालकं, कालकं च तदालपनं कं रुतं चेति कालकालपनकम्। अलीनां समूह आलः। आलवत् कालाः कृष्णा घना मेघा यस्मिन् काले स आलकालघनकालः। स चासौ कालकालपनकालकालघनकालकालश्चेति विशेषणसमासः। तद्वत् कालः कृष्ण इति विष्णोरामन्त्रणमिदम्। कमुदकमालवन्तीति [? आलान्तीति] कालाः। पूर्ववत् कः। काल एव कालकाः स्वार्थे कः। कालकैर्मेघैः। तदुपजीविभिः परिवारभूतैरालसति भातीति कालकालसि समुद्रे, क्विवन्तस्य सप्तम्यन्तस्य रूपम्। तत्र तका[? उत्का] विष्णुविरहात् कृच्छ्रजीवितात् लकालोका[?] ललनिका स्त्रीः लक्ष्मीरिति यावत्। किंविशिष्टा? अलकानामालिः

[सन्दष्टयमकलक्षणं उक्तार्गतमपि विशिष्योच्यते–]

हृदयङ्गमा

सम्प्रति अव्यपेतव्यपेतात्मकमादिमध्यान्तयमकमुदाहरति, कालेति। –(पदच्छेदस्त्वयम्; –प्रथमपादे एकं पदम्; कालकालघनकालकालपनकाल, काल; कालकालसितकालका, ललनिका, अलकालकालका, आलगतु, कालकाल, कलिकाल, काल इति) हे कालकालगलकालकालमुखकालकाल! कालस्य संहारकस्य, शिवस्य इत्यर्थः, ("कलनात् सर्वभूतानां स कालः परिकीर्त्तितः" इति वचनात्) यः कालगलः नीलवर्णः कण्ठः, तथा कालः यमः, तथा कालमुखः वानरविशेषः ते (एतेषां द्वन्द्वः) कालकालगलकालकालमुखाः, तेषां कालकं कृष्णत्वम्, आलाति आदत्ते इति तत्सम्बुद्धौ, हे शिवकण्ठादिवत् कृष्णवर्ण!, तथा हे कालकालघनकालकालपनकाल! कं जलम्, आलाति गृह्णाति, बिभर्त्तीत्यर्थः, इति कालः सजलः, अत एव कालः कृष्णवर्णः, यो घनः मेघः, तस्य काले समये, वर्षास्वित्यर्थः, कायन्ति शब्दायन्ते इति कालकालघनकालकाः मयूरा इत्यर्थः, ("कै शब्दे" इत्यस्य क्विपि रूपम्) तेषाम् आलपनानि मुखानि, कालकालघनकालकालपनानि, तद्वत् कलते शब्दायते इति तत्सम्बुद्धौ, हे मयूर इव षड्जस्वरेण आलपनशील! इत्यर्थः, ("कालकालपनकालकालघनकाल!" इति पाठे तु–काले वर्षासु, कायन्तीति कालकाः मयराः, तेषाम् आलपनं निनादं, कालयति प्रेरयति, प्रकटयतीत्यर्थः, तादृशः, तथा कालः पूर्वोक्तव्युत्पत्त्या जलपूर्ण इत्यर्थः, यो घनः मेघः, तद्वत् काल! श्यामल! सजलजलदश्याम इत्यर्थः) पुनश्च हे कालकाल! कालस्य यमस्य, कालः संहारकः तत्सम्बुद्धौ, यमभयनिवर्त्तक! इत्यर्थः, यद्वा,

–कालेन समयात्केन आत्मना, कालयति प्रेरयति, भूतानीति शेषः, यस्तत्सम्बुद्धौ, (“कालस्वरूपं रूपन्तत् विष्णोर्मैत्रेय! वर्त्तते” इति स्मृतेः विष्णोः कालस्वरूपत्वमवगन्तव्यम्) किञ्च, हे कलिकालकाल! कलिकालस्य कलियुगस्य, कालः मृत्युस्वरूपः, कल्किरूपेण दण्डयिता इत्यर्थः, तत्सम्बुद्धौ, हे काल! हे कृष्ण!, कालकालसितकालका कालकेन कृष्णवर्णतया, आलसितं शोभितं, कं शिरः यैः, तादृशाः अलकाः चूर्णकुन्तलाः यस्यास्तादृशी, (“कं जलम्, आलातीति कालं सरः, तत्र कायन्तीति कालकाः हंसाः, तेषामिव आलसितं लीलागमनं ययोः तादृशौ कालकौ पादौ यस्याः सा इति केचित् व्याख्यायंन्ते) अलकालकालका अलकान् चूर्णकुन्तलान्, अलते मुक्तादिभिर्भूषयतीति तादृशी अलकाली, (“अलङ् भूषायाम्” इत्यस्य अणि रूपम्) तथा कलमेव कालं मधुरमित्यर्थः, तत् यथा तथा कायति वदतीति तादृशी कालका मधुरभाषिणीत्यर्थः, ततश्च अलकाली चासौ कालका चेति (कर्मधारयः), ललनिका अनुकम्पनीया ललना, राधा इत्यर्थः, आलगतु त्वया सम्मिलिता भवतु इति निर्गलितोऽर्थः। (श्रीकृष्णं प्रति श्रीराधायाः सख्या उक्तिरियम्। अत्र सर्वेषामेव पादानामादिमध्यान्तेषु “कालकाल” इति पदमव्यवहिततया पुनः पुनरावृत्तमिति अव्यवहितं तथा “गल मुख” इत्यादीनां व्यवहिततया व्यवहितञ्च आदिमध्यान्तयमकम्)।।५०।।

प्रभा

चतुर्षु पादेषु आदिमध्यान्तयमकमव्यपेतव्यपेतं दर्शयति– **कालेति।** तत्र पदच्छेदः– कालकालगलकालकालमुखकाल–

कालकालकालपनकालकाल- घनकालकालकालकालसितकालका ललनिका अलकालकालक आलगतु कालकाल कलिकालकाल।
अन्वयः–हे अलकालकालक कालकाल कलिकालकाल कालकालगलकालकालमुखकालकालकालकालपन- कालकाल- घनकालकालकालकालकालकालसितकालका ललनिका (मयि) आलगतु। अर्थः–कश्चित् कामी त्वत्प्रसादेन प्रिया मामालिङ्गतु इति वर्षाकालं प्रार्थयते। हे अलकालकालक अलका यक्षपुरी तस्या अलकः भूषकः कुबेरः तद्वत् अलक पर्याप्तिकारक। यक्षेश्वरो यथा पर्याप्तं धनं वितरति तथा पर्याप्तं जलं त्वं वितरसि इत्यर्थः। कालकाल कालेषु वसन्तादिषु काल श्रेष्ठ। देवदेववत् द्वितीयकालशब्दस्य श्रेष्ठार्थता। वर्षाकालस्य इतरापेक्षया श्रेष्ठता जीवनप्रदत्वेन बोद्धव्या। तथा कलिकालकाल कलिकाः कोरकान् अलन्ति भूषयन्ति इति कलिकालकाः वसन्तादयः कालास्तेभ्योपि अल समर्थ। एवंभूत हे वर्षाकाल। ललनिका प्रशस्तललना। प्रशंसायां कन्। आलगतु मामाश्लिष्यतु। ललनां विशिनष्टि कालेति। कालः यमः तस्यापि कालः महेशः। सर्वसंहारकत्वादिति भावः। तस्य गल एव गलकः कालकालगलकः। अलीनां समूहः आलः। कालं मुखे यस्य स कालमुखो वानरविशेषः। कालः कलिः। स च कृष्णवर्णः। कालः यमः। सोपि कृष्णवर्ण एव। कालं कृष्णं कं शिरो येषां ते कालकां मयूरास्तेषाम् आलपनस्य कालः रलयोरभेदात् कारस्तत्संपादकः। तथा कालाः कृष्णाः घना यत्र स चासौ कालः कालघनकालः। कालकालपनकालश्चासौ कालघनकाल इति कर्मधारयः पश्चात्सर्वेषां द्वन्द्वः। तेन हरगलअलिसमूह–कलियुग–यम–घनसमया एते पञ्च पदार्था निष्पन्ना। तैरिव कालकैः कृष्णैः अलकैः कुन्तलैरालसितं भूषितं

अत एव कालं कृष्णवर्णं कं शिरो यस्या इति काल....कालका। परे त्वेतत्पद्यं कृष्णवर्णनपरं मन्यन्ते। ते च द्वितीयचरणे कालकालघनकाल- कालपनकालकाल इति पाठमङ्गीकुर्वन्ति। तेषामर्थपरिपाटी तावदियम्। पदच्छेदः। प्रथमपादे एकमेव पदम्। द्वितीये कालकालघनकालकालपनकाल काल इति द्वे पदे। तृतीयचतुर्थयोः कालकालसितकालका ललनिका अलकालकालका आलगतु कालकाल कलिकालकाल इति। अर्थः—कालः संहारकः। कलनात् सर्वभूतानां स कालः परिकीर्तितः। इति वचनात्। कालगलः नीलकण्ठः। उभयोः कर्मधारयः। कालकालगलः। कालः यमः। कालमुखो वानरविशेषः। त्रेषां द्वन्द्वः। कालकालगलकालकालमुखाः। तेषां कालकं कृष्णत्वम् आलाति आदत्ते इति तत्संबुद्धिः। कालकालगलकालकाल-मुखकालकाल। तथा कं जलम् आलाति गृह्णाति इति कालः सजलः अत एव कालः कृष्णवर्णो यो घनस्तस्य काले समये। वर्षाकाले इत्यर्थः। कायन्ति शब्दायन्ते इति कालकालघनकालकाः। मयूरा इत्यर्थः। तेषाम् आलपनानि मुखानि तद्वत् कलते शब्दायते इति कालकालघनकालकालपनकाल। मयूरवन्मधुरभाषिन् इत्यर्थः। तथा कालस्य यमस्यापि काल कालकाल। मृत्युनिवारकेत्यर्थः। तथा कलिकालस्य काल विनाशक। कल्किरूपेण कलिनिवर्तकेत्यर्थः। एवंगुणविशिष्ट हे काल कृष्णवर्ण कृष्ण। कालकेन कृष्णवर्णेन आलसितं भूषितं कं मस्तकं यैस्तादृशा अलकाः कुन्तला यस्यास्तादृशी। अलकालकालकाअलकान् कुन्तलान् अलते मुक्तादिभिर्भूषयतीति अलकाली। तथा कलमेव कालं मधुरं यथा तथा कायति शब्दायते इति कालका। मधुरभाषिणी। अलकाली चासौ कालका च अलकालकालका।

स्त्रिकाः पुंवदिति पुवंद्भावः। ललनिका राधा। आलगतु त्वयि संसक्ता भवतु इति। अत्रापि विविधाः पदपदार्थास्तत्तट्टीकाकारैर्दर्शिताः। विस्तरभयात्तान्सर्वान् दर्शयितुं न प्रभवामः।।५०।।

विवृति

चतुर्ष्वपि पादेषु अव्यवहित(व्यवहित)मादिमध्यान्तयमकमाह—

कालो यमः तस्य कालः विपक्षत्वादनुत्पत्तिविनाशधर्मकत्वाच्च कालकालो महेश्वरः। तस्य गलः कण्ठः। कालो मृत्युः। कालं कृष्णं मुखमाननं यस्यासौ कालमुखो गोलाङ्गूलः कृष्णवानरः कालकालगलश्च कालश्च कालमुखश्चेति द्वन्द्वः। तेषां कालत्वं (कं) कृष्णत्वं द्वन्द्वं मनोज्ञादिभ्यश्चेति पुत्र इति अलमतिशयेन कालं कृष्णं शिरो यस्यासौ अलकालको मयूरः पृषोदरादिपाठादच् । अत्र मोरनुस्वारलोपः। तस्यालपितं विलपितं यस्मिन् असौ अलकालकालपनः। स चासौ कालश्च वर्षासमयः। तत्र कालधनः कृष्णजलदः कालकालगलकालकालमुखकालश्च (कं च) अलकालकालपनकालकालघनश्चेति द्वन्द्वः। यद्वा (तद्वत्) अतिशयेन कालाः कालकालाः। कालकाला एव कालकालकाः। ते च ते अलकाश्चेति 'विशेषणं विशेष्येण बहुल'मिति समासः। तेषामालसितं विलसितं तेन कालं कमनीयं कं शिरः यस्याः सा कालकालगलकाल कालमुखकालकालकालकाल (पनकालकाल) घनकालकालकालकालसितकालका इति बहुव्रीहिः ललनैव ललनिका। अलका नाम यक्षपुरी। तस्या आलकः प्रभुः

अलकालकः धनदः स इवालकः प्रभुः तस्यामन्त्रणं हे अलकालकालक धनदतुल्य! आलगतु सङ्गच्छताम्। हे कालकाल वर्षासमय। किं विशिष्ट। कलिकालकाल कलिश्चासौ कालश्च कलिकालः। तद्वत् कालः कृष्णः। तस्यामन्त्रणम्। अथवा कलिकालकालकलिकालो दुर्भिक्षः। तस्य कालः अन्तकः। सस्यनिष्पत्तिहेतुत्वाद्विपक्षः। तस्य सम्बोधनं हे कलिकालकाल। कालकाल वर्षाकाल। अलकालकालक यक्षपुरीनाथवत् समर्थ। एवंविशेषणविशिष्टकालधम्मिल्लभारसितमस्तका आलिङ्गतु। मामिति अध्याहार्यम्।

अथ च कालो मृत्युः। काला दुर्गा वा। तस्या अयमिति कालः। काल ईश्वरो गलः कण्ठः। गल एव गलकः। संज्ञायां कन्। कालस्य गलकः कालगलकः। आलयो [आलाः] भृङ्गाः आलय [ला]एव आलकाः(?) कालमुखं दिनादिः। कलिरेव कालः स्वार्थिकोऽण्। कालः प्रकृष्टोऽस्यास्तीति कालः युवा। कालं कृष्णं कं शिरो यस्य तथोक्तः। कालको मयूरः कालश्चासौ कालकश्च कालकालकः। युवमयूर इति यावत्। तस्यालपनं कालकालकालपनम्। कालकालकालपनस्य कालः समयः कालकालकालपनकालः। कालकालकालपनकाल एव कालोऽवधिः यस्य स तथोक्तः। कालकालकालपनकालकालश्चासौ घनकालश्च कालकालकालपनकालकालघनकाल(:)। काल एव कालकः। कालेनेव मृतेनेव कालगलकेनेव महादेवकण्ठेनेव आलैरिव भृङ्गैरिव कालमुखेनेव दिनादिनेव कालेनेव कलियुगेनेव कालकालकालपनकालकालघनकालेनेव कालकैः कृष्णैः अलकैरालसितं शोभितं कालकं शिरो यस्याः सा तथोक्ता। सर्वमेतल्ललनिकाविशेषणं विक्षिप्तचितप्रयुक्तमिति बहूपमानत्वेऽपि नेदं दुष्यति। शेषं समानम्।

केचिदेवं योजयन्ति। कालकालगलः (ल)। अत्यन्तनीलकण्ठः [ण्ठ] कालो मृत्युः तस्य कालो नाशहेतुः मुखं वदनं यस्य सः। तस्यामन्त्रणम्। कालकालमुख। काला पृथिवी कृष्णवर्णत्वात्। कालकाल(क): आदित्यः कालमि(इ?)ति निमेषादियुगपर्यन्तः। तं करोतीति कालकारकः आलपनमित्याकाशं शब्दैकगुणत्वात् गुणेन गुणी लक्ष्यते। कालो यजमानः। क इति ब्रह्मा। तस्मै(आलाति) ददातीति कालः। कालघनश्चन्द्रः। कृष्णसारो मृगो यस्मिन् विद्यते स कालघनः। कं जलम्। अनिलो (अलो) वायुः। गत्वरस्वभावत्वात्। कालो वह्निः। के जले लीयत इति कालः। (काल एव कालकः) स्वार्थे कप्रत्ययः। काला च कालकारकश्च आलपनं च कालश्च कालघन(श्च) कं च अलश्च कालश्चेति समाहारद्वन्द्वः। एकवद्भावश्च। अष्टमूर्त इत्यर्थः। भगवान्। हे (हे भगवान्) ललनिका ललना आलगतु आश्लेषणं करोतु। कीदृग्विशिष्टेत्याह अलकालसितकालका अलकैः ललाटपट्टचुम्बिभिः कचैरालसितं शोभितं कालं कं शिरो यस्याः सा तथोक्ता। किंविशिष्टा अलकालकालक अलका नाम यक्षपुरी तस्या आलकः प्रभुः तस्यालकः सखा यस्य (यः) तस्यामन्त्रणं हे अलकालकालक! वैश्रवणसख; कालः कामः। कं सुखं ददातीति कालः। तस्य कालः अन्तकः स कालकालः हे कालकाल कामसूदन, कलिकाले प्रलयकाले कालः संहारशीलः संहाररुद्रेति यावत्। कश्चित् कामी प्रियोपलब्धौ भगवन्तं महेश्वरं स्तौति तस्या लाभर्थमिति।

चतुर्षु पादेषु आदिमध्यान्तयमकम् अव्यपेतव्यपेतं दर्शयति- कालकालेति। प्रियाविरहितः कश्चित् अत्र घनकालं प्रार्थयते। कालकालगलकाल–कालकालः ईश्वरः, तस्य गलवत् काल;

कालमुखकालकाल मृत्युमुखे काल: क्षेपणं, तत्करोतीति काल:, कर्मण्यण्, रलयोरभेद:, विरहिणां पीडाकर इति यावत्; कालकालपनकालकाल–कृष्णं शिरो येषां ते कालका: मयूरा:, तेषां आलपनस्य काल: कार: करणं, तस्य काल समय; घनकारकाल वर्षाकाल; कालकालकाल–कालकं चेत:, तत् आलातीति आदत्ते इति आङ्पूर्वात् ला दाने इत्यस्मात् कप्रत्यय:, मनोहरेति यावत्; यद्वा कालकालसितकालका–का ईषत्, अलकै: आ समन्तात् लसितं शोभितं, कालं कृष्णं, कं मूर्धा, यस्या: सा; ललनिका प्रशस्तललना, प्रशंसायां क: अलकालकालक–अलका नगरी, तां अलङ्करोतीति अलकालक: वैश्रवण:, तद्वत् अलक समर्थ, सामर्थ्यवाचिन: अलं शब्दात् णिचि ण्वुल्; आलगतु अश्लिष्यतु; कालकाल–का: शब्द: कै गै शब्दे भावे क्विप्, कां रातीति कार: काल:, कं जलम् आलातीति काल: मेघ:, कार: काल: यस्मिन् तस्य सम्बोधनम्; कलिकालकाल–कले: कलहस्य कारं क्षेपं करोतीति, प्रणयकलहशान्तिकरेति यावत्। एवंभूतघनकाल कालकालसितकालका ललनिका मां आलगतु–इत्यन्वय:।।५०।।

सन्दष्टयमकस्थानमन्तादी पादयोर्द्वयोः।
उक्तान्तर्गतमप्येतत् स्वातन्त्र्येणात्र कीर्त्यते॥५१॥

रत्नश्री

[तदुदाहरति–]

हृदयङ्गमा

सम्प्रति सन्दष्टयमकस्थानं निर्दिशति, सन्दष्टेति। –द्वयोः पादयोः ऊर्ध्वाधोभावेन स्थितयोः सन्निहितयोः चरणयोरित्यथः, अन्तादी प्रथमपादस्य अन्तः द्वितीयपादस्य आदिः, तथा द्वितीयपादस्यान्तः तृतीयपादस्यादिः, एवं तृतीयपादस्य अन्तः चतुर्थपादस्यादिश्च, एतौ पादांशौ इत्यर्थः, सन्दष्टयमकस्य सन्दंशाकृति–यमकस्य, स्थानं विषयः, सन्दंशः यथा उभयभागमाक्रम्य वर्त्तते तथा इदमपि पादयोरन्तादिभागमाक्रम्य वर्त्तते इति निष्कृष्टार्थः ; एतत् मन्दष्टयमकम्, उक्तेषु यमकेषु, अन्तर्गतमपि "रवेण भौमः" इत्यादौ पतितमपीत्यर्थः, अत्र स्वातन्त्र्येयण पृथग्भावेन, कीर्त्यते वर्ण्यते, विशेषादिति भावः। (एतत् यमकमन्यैरुक्तत्वादत्रोल्लिख्यते, स्वमते तु प्रागुक्तभेदान्तर्गतमेवैतदिति बोध्यम्। केचिदिदं काञ्चीयमकमित्याहुः ; यथा, –एकस्यान्तेऽपरस्यादौ सदृशं दृश्यते यदि। तत् काञ्चीयमकं नाम व्याहृतं मुनिपुङ्गवैः॥" इति। उदाहरणान्तरं भट्टिकाव्ये यथा, –"पिशिताशिनामनुदिशं स्फुटतां स्फुटतां ज़गाम परिविह्वलता। ह्वलता जनेन बहुधा चरितं चरितं महत्त्वरहितं महता॥" इति)॥५१॥

प्रभा

स्वोक्तभेदेषु पादचतुष्टयगतव्यपेताद्यन्तयमके संभवदपि अन्यैः

कंचिद्विशेषं भेदं परिकल्प्य संदष्टयमकमिति कल्पितं तन्निरूपयति-**संदष्टमिति।** द्वयोः पादयोः अन्तादी प्रथमस्य अन्तो द्वितीयस्य आदिस्तौ अन्तादी। स्थानम् आश्रयो यस्य तद् अन्तादियमकमिति भावः। एतत् संदष्टयमकम्। उक्तान्तर्गतमपि पूर्वोक्तप्रकारेषु पादचतुष्टयगतव्यपेताद्यन्तयमकेन्तर्भूतमपि (रवेण भौम इत्युदाहरणे (३.४७) संभवदपि) स्वातन्त्र्येण कंचिद् विशेषं परिकल्प्य प्राचीनानुरोधेन स्वतन्त्रतया अभिधीयते। विशेषस्तु उदाहरणे स्फुटीभविष्यति।।५१।।

विवृति

'आदिमध्यान्तमध्यान्तमध्याद्याद्यन्तसर्वत' इति यदुक्तं यमकं तदुदाहृत्य यमकान्तरं दर्शयितुकाम आह–

सन्दष्टेति। सन्दष्टश्चासौ यमकश्च सन्दष्टयमकः तस्य स्थानं प्रदेशः। पादयोः द्वयोरर्धयोः अन्तादी अन्तश्चादिश्च अन्तादी इति द्वन्द्व(ः) यमकलक्षणम्। अन्तपादस्यादिपदं आदिपादस्यान्तपदं यदि यमकरूपं स्यात् तदा सन्दष्टयमकमित्युच्यते।

ननु च रवेण भौमो ध्वजवर्तिवीरवेरित्यादिषु सन्दष्टयमकलक्षणस्यान्तर्भूतत्वात् पुनः किमिति सन्दष्टयमकलक्षणनिरूपणं पृथगित्याशङ्क्याह–

यद्यप्याद्यन्तयमकादिषु अन्तर्भवत्येतत् तथाऽपि विशेषणार्थं पृथग्वर्ण्यत इति।

कञ्चित् पादाद्यन्तयमकभेदं सन्दंष्टयमकं नाम दर्शयति-**सन्दष्टेति।** उक्तान्तर्गतं–मायामयेत्यादौ सन्दष्टयमकत्वमप्यस्ति आद्यन्तयमकत्वमप्यस्ति; अत्र तु सन्दष्टयमकत्वमेव।।५१।।

उपोढरागाप्यबला मदेन सा
मदेनसा मन्युरसेन योजिता।
न योजितात्मानमनङ्गतापिता–
ङ्गतापि तापाय ममास नेयते॥५२॥

रत्नश्री

[समुद्न्यमकलक्षणंमाह–]

हृदयङ्गमा

तत्र सन्दष्टयमकमुदाहरति, उपोढ़ेति। –सा अबला मदेन यौवनजनितविकारेण, मद्यपानजेन वा, उपोढ़ः उद्रिक्तः, रागः अनुरागो यस्यास्तादृशी, मय्यनुरागिणी अपि इत्यर्थः, अत एव योजितः अभिनिवेशितः, आत्मा मनः यस्यां तथाभूताम्, अनङ्गतापिताम् अनङ्गं कामं, स्वकार्य्यकरणाक्षममिति भावः, तापयति पीड़यतीति तादृशी अनङ्गतापिनौ तस्या भावः तां, गताऽपि मदनुरागिणी मत्कामा च सत्यपीत्यर्थः, मदेनसा ममापराधेन हेतुना, मन्युरसेन क्रोधावेगेन, योजिता संसृष्टा, क्रोधपरवशा सतीत्यर्थः, मम इयते एतत्परिमाणाय, तापाय पीड़ायै, न आस न जगाम, इति न, अपि तु जगाम एवेत्यर्थः, सा मम अतीव सन्तापकारणतां प्रापेति भावः। ("अस गत्यादानदीप्तिषु" इत्यस्य रूपम्। सखायं प्रति कस्यचित् मानिन्या प्रत्याख्यातस्य उक्तिरियम्। अत्र प्रथमपादान्ते द्वितीयपादादौ च "मदेन सा मदेनसा" तथा द्वितीयपादान्ते तृतीयपादादौ च "न योजिता न योजिता" तथा तृतीयपादान्ते चतुर्थपादादौ च "ङ्गतापिता

ङ्गतापिता" इत्येतेषां सन्देशाकारेणावस्थानात् संन्दष्ट-यमकम्)।।५२।।

प्रभा

संदष्टमुदाहरति–**उपोढेति**। कश्चित् कामी स्वापराधेन कुपितां नायिकां स्वस्मिन् विमुखीं विज्ञाय स्वावस्थां सुहृदे कथयति। सा अबला मदेन तारुण्यमदेन मदिरास्वादमदेन वा उपोढरागापि प्रवृद्धरत्यभिलाषापि मदेनसा मदीयापराधेन गोत्रस्खलनरूपेण कर्त्रा मन्युरसेन क्रोधावेशेन योजिता संयोजिता क्रोधपरवशीभूता इत्यर्थः। (अत एव) अनङ्गतापितां मदनसंतापविशिष्टाम्। अवस्थामिति शेषः। गतापि प्राप्तापि। मदनसंतप्तापीत्यर्थः। अत्मानं चेतः। न योजिता मयि न योजितवती। मयि मनोनुरागं न बबन्ध। (अतो) मम इयते एतावते महते तापाय संतापाय न आस न बभूव। अपि तु काक्का बभूवेति भावः। अथवा इयते एतावते। स्वल्पपरिमिताय तापाय। न आस न बभूव। अपि तु महते संतापाय बभूवेत्यर्थः। आस इति तिङन्तप्रतिरूपकमव्ययम् इति शाकटायनः। अन्ये तु आस रराज इति अर्थं मत्वा अस् गतिदीप्त्यादानेषु इति भौवादिकस्य लिटो रूपमाहुः।।५२।।

विवृति

सन्दष्टयमकमुदाहरति–

उपोढो जातः रागो यस्याः सा उपोढरागा अबला मानिनी कृशतनुः केन हेतुभूतेन उपोढरागा सञ्जाता अभिलाषितेत्याह। मदेन मदिराविकारेण तथाऽपि मदेनसा मम एनः पापं तेन मदेनसा मत्पापेन कर्तृणा मन्युः क्रोधः स चासौ रसश्च तेन मन्युरसेन सह

योजिता सङ्घटिता। युजिर्योगे इत्यस्मिन् लुटि रूपम्। यद्यपि क्रोधो रौद्ररसस्य स्थायीभावो न रसः तथाऽप्यभेदोपचारात् कार्यकारणयोः कथञ्चिदेकत्वपरिणामात् क्रोधोऽपि स्त एव इति मन्युरसस्य क्रोधव्या(त्वा)ख्याने न दोषः। अत एव न योजिता आत्मानं मया सहेति सामर्थ्यादवसीयते। सम्बन्धस्य द्विष्ठत्वादन्यस्य चाश्रूयमाणत्वात् अप्रकृतत्वाच्च। न योजितेत्यादिकर्तरि क्तः। न केवलमेतदेव। तथाऽनङ्गतापितांगताऽपि अनङ्गो मन्मथः तेन तापितं च तदङ्गं च तस्य भावः अनङ्गतापितांगतापि स्मरशरसन्दीपितशरीरतापि मम पूर्वमियते इत्यत्प्रमाणाय तापाय खेदाय नास न बभूव। यथा संप्रतीति आसे[स्ते]ति स्वररव[सः] प्रयोगः। अस्तेरनुप्रयोगादन्यत्र भूमावस्यार्धधातुकेति[?] प्रतिषेधाभावात्। अनङ्गतापितेति पाठः। अनङ्गेन मदनेन तापिता सा अबला गता प्राप्ताऽपि मे इयते तापाय न मरणायैव भवति। मन्युरसेन योजितेत्यत्र मन्युरसेन क्रोधरसेन या उ जिता उ इति समुच्चये। मदेन च मन्युरसेन च या जिता स्वीकृता इत्यर्थः।।

तदुदाहरति–**उपोढेति**। उपोढरागा, अपि, अबला, मदेन, सा, मदेनसा, मन्युरसेन, योजिता, न, योजिता, आत्मानम्, अनङ्गतापितां, गता, अपि तापाय, मम, आस, नेयते। मदेन क्षीबतया, उपोढरागाऽपि धृतरत्यभिलाषाऽपि, मदेनसा मदपराधेन गोत्रस्खलनरूपेण प्रयोजकेन, मन्युरसेन योजिता, पश्चादनङ्गतापितां स्मरसञ्ज्वरवत्तां, गताऽपि, आत्मानं न योजिता न योजितवती शरीरं मयि नार्पितवती, सा मम नेयते अनियते अपरिमिताय, तापाय आस वभूव।।५२।।

अर्धाभ्यासः समुद्‌गः स्यादस्य भेदास्त्रयो मताः।
पादाभ्यासोऽप्यनेकात्मा व्यज्यते स निदर्शनैः॥५३॥

रत्नश्री

[व्यवहितं समुद्‌गमुदाहरति–]

हृदयङ्गमा

इत्थं पादभागयमकानि दर्शयित्वा सम्प्रति समस्तपादगतयमकानि दर्शयन् आदौ समुद्गयमकमाह, अर्द्धाभ्यास इति। –अर्द्धस्य पादद्वयस्य, (अर्द्धशब्दोऽत्र न केवलं श्लोकीयपूर्वार्द्धपरार्द्धपरः, किन्तु यत्किञ्चित्पादद्वयपरः इति बोध्यम्) अभ्यासः पुनरावृत्तिः, समुद्गः तदाख्यः, स्यात्; (समुद्गशब्देन सम्पुटक उच्यते, स यथा भागद्वयात्मकः तथा अयमपि पादद्वयात्मक इति तथा व्यपदेशः ; तदुक्तं रुद्रभट्टेन, –"अर्द्धं पुनरावृत्तं जनयति यमकं समुद्गकं नाम" इति) अस्य समुद्गस्य, त्रयो भेदाः मताः ख्याताः। (तथा च, प्रथमतृतीयौ द्वितीयचतुर्थौ च पादौ तुल्यौ इत्येकः, प्रथमद्वितीयौ तृतीयचतुर्थौ च तथा इति द्वितीयः, तथा प्रथमचतुर्थौ द्वितीयतृतीयौ च इति तृतीयः)॥–

समस्तपादगतयमकेषु पादाभ्यासयमकमाह, पादाभ्यास इति। –पादाभ्यासः एकैकचरणस्य पुनरावृत्तिः अपि, अनेकात्मा अनेकविधः, पादस्य एकद्वित्रिरभ्यासत्वेन एकादशविध इत्यर्थः, (तथा च प्रथमो द्वितीये तृतीये चतुर्थे च इति त्रयः ; द्वितीयः तृतीये चतुर्थे चेति द्वौ; तृतीयश्चतुर्थे इत्येकः ; पुनश्च प्रथमः

द्वितीये तृतीये च, द्वितीये चतुर्थे च, तथा तृतीये चतुर्थे च, द्वितीयस्तृतीये चतुर्थे च इति चत्वारः ; तथा प्रथमो द्वितीये तृतीये चतुर्थे च इत्येकः, इति मिलित्वा एकादशविधः) सः अर्द्धाभ्यासः पादाभ्यासश्च, निदर्शनैः वक्ष्यमाणैः उदाहरणैः, व्यज्यते व्यक्तीर्क्रियते।।५३।।

प्रभा

एतावत्पर्यन्तं पादभागयमकं सप्रपञ्चं निरूप्य ततः समस्तपादयमकप्रभेदान् चिकथयिषुराह–**अर्धाभ्यास इति।** अर्धस्य श्लोकस्य पादद्वयस्य न तु पूर्वार्धमात्रस्यैव। तथा सति अग्रे कथितस्य भेदत्रयस्य अनुपपत्तिः स्यात्। अभ्यासः आवृत्तिः। समुद्गः स्यात्। यथा समुद्गः संपुटकः भागद्वयात्मकः तथायं पादद्वयात्मकः। अस्य त्रयो भेदा मता इष्टाः। ते यथा प्रथमतृतीयौ द्वितीयचतुर्थौ पादौ समानौ इत्येकः। (३.५४) प्रथमद्वितीयौ तृतीयचतुर्थौ समानौ इति द्वितीयो भेदः। (३.५५) प्रथमचतुर्थौ द्वितीयतृतीयौ समानौ इति तृतीयः प्रकारः। (३.५६) पादाभ्यास एकैकस्यैव पादस्यावृत्तिः। अनेकात्मा अनेकविधः। स निदर्शनैः उदाहरणैर्व्यज्यते समुद्गोदाहरणानन्तरं दर्शितोदाहरणेषु स्फुटीक्रियते। दर्शितोदाहरणक्रमस्तु प्रथमो द्वितीये (३.५७) प्रथमस्तृतीये (३.५८) प्रथमश्चतुर्थे (३.५९) इति त्रयः प्रकाराः। द्वितीयस्तृतीये (३.६०) द्वितीयश्चतुर्थे (३.६१) इति द्वौ। तृतीयश्चतुर्थे (३.६२) इत्येकः। प्रथमो द्वितीये तृतीये च (३.६३)। प्रथमो द्वितीये चतुर्थे च अथवा पाठभेदेन प्रथमस्तृतीये चतुर्थे च (३.६४)। द्वितीयस्तृतीये चतुर्थे च (३.६५) इति चत्वारः प्रकाराः। प्रथमो द्वितीये तृतीये चतुर्थे च इत्येकः प्रकारः (३.६६)। सर्वे मिलित्वा एकादश प्रकारा

ज्ञेयाः। तेष्वेकः प्रकारोनुदाहृतः कविना पाठभेदेन कल्पनीयः॥५३॥

विवृति

सन्दष्टयमकमप्येवं प्रदर्श्य पुनर्यमकान्तरं दर्शयन् समुद्गयमकलक्षणमाह–

जातेः वृत्तस्य वा यदर्धं तस्य यो अभ्यासः आवृत्तिः सः समुद्गः स्यात् भवेत्। तस्य समुद्नस्य भेदाः विकल्पाः त्रयः। व्यवहिताव्यवहितोभयरूपरूपः त्रिविधो यः सः(ऽभ्यासः) समुद्नो भवतीत्यर्थः। न केवलं समुद्ग एव त्रिचिधः तथा पादाभ्यासोऽप्यनेकात्मा पादस्यैकशो द्विस्त्रिश्च योऽभ्यासः सोऽपि व्यवहिताव्यहितोभयभेदेन अनेकात्मा अनेकरूपः स्यात्। स च व्यज्यते निदर्शनैरुदाहरणैरिति॥

एवम् आदिमध्यान्तयमकादीनि प्रदर्श्य अर्धाभ्यासं पादाभ्यासं च प्रदर्शयितुमुपक्रमते **अर्धेति**। अर्धाभ्यासः पादद्वयाभ्यासः॥५३॥

ना स्थेयः सत्त्वया वर्ज्यः परमायतमानया।
नास्थेयः स त्वयावर्ज्यः परमायतमानया॥५४॥

रत्नश्री

[अव्यवहितं समुद्रमुदाहरति–]

हृदयङ्गमा

तत्र समुद्गस्य भेदत्रयं दर्शयिष्यन् प्रथमं पूर्वपादार्द्धस्योत्तरपादार्द्धेन समताहेतुकं प्रथमतृतीययोः द्वितीयचतुर्थयोश्च पादयोः तुल्यतालक्षणं यमकं दर्शयति, नेति। –परमायतः अतिदीर्घः, मानो यस्याः तादृश्याऽपि, अस्थेयः न अतिस्थिरं, सत्वं स्वभावः व्यवसायो वा यस्याः तथाभूतया, त्वया भवत्या, स ना पुरुषः, प्रियतम इत्यर्थः, न वर्ज्यः न प्रत्याख्येयः ; परं किन्तु, आयतमानया यत्नवत्या सत्या, आस्थेयः आदर्त्तव्यः, तथा आवर्ज्यः सप्रेमव्यवहारेण वशीभूतः कार्य्यश्च, तव स्वभावो व्यवसायो वा न स्थिरतरः, अतः प्रियपरित्यागे पश्चात्ताप एव फलं, तस्मात् यथाऽयं स्ववशे तिष्ठेत् तथा यत्नः क्रियतामिति भावः। (मानिनीं प्रति तत्सख्या उक्तिरियम्। अत्र प्रथमतृतीयौ द्वितीयचतुर्थौ च तुल्याविति समुद्गभेदः। उदाहरणान्तरं यथा भट्टिकाव्ये, –"समिद्धशरणा दीप्ता देहे लङ्का मतेश्वरा। समिद्धशरणादीप्ता देहेऽलङ्कामतेश्वरा॥" इति)॥५४॥

प्रभा

समुद्गस्य पूर्वकथितान् भेदान् क्रमेण दर्शयति–**ना स्थेय इति।** कुपितनायिकां प्रति नायकानुसरणाय तत्सख्या उक्तिरियम्। तत्र तावत् पदानि। ना स्थेयः सत्त्वया वर्ज्यः परमायतमानया। न

आस्थेयः स त्वया आवर्ज्यः परम् आयतमानया इति। परमायतोत्यन्तविस्तृतो मानो यस्याः सा तया। अतिमानशालिन्या। तथा स्थेयः स्थिरतरं सत्त्वमभिप्रायः स्वभावो वा यस्याः सा तया। निश्चलस्वभाविकया। त्वया स ना नायकः। न वर्ज्यः परित्याज्यः। किंतु आस्थेयः आदरणीयः। न केवलमादरणीय एव परम् आयतमानया प्रयत्नं कुर्वत्या आवर्ज्यः आवर्जनीयः। अनुकूलाचरणेन स्ववशीकरणीयः। सर्वगुणसंपन्नोयं नायकस्तस्मिन्ननादरं मा कुरु तं संमानय अनुकूलाचरणैश्च स्ववशमानयेत्यर्थः।।५४।।

विवृति

तत्र तावत् व्यवहितं समुद्गमुदाहरति–

न विद्यते आस्था आदरो यस्याः सा अ(?)नास्था। तस्याः सम्बोधनं अ(?)नास्थे सखि इति। यः त्वया वर्ज्यः परिहर्तव्यः ना पुरुषः। किंविशिशिष्टया। परमायतमानया परमः प्रकृष्टः आयतो दीर्घः मानो हर्षो यस्याःसा परमायतमाना तया त्वया स एव तावदवर्ज्य आराध्यः सेव्यः। (स्थेयः)सत्वयास्थेयः स्थिरतरं सत्त्वमात्मनो बलं यस्याः सा स्थेयस्सत्वा तया। परमायतमानया परं आदरवत् आयतमानया प्रयत्नं कुर्वाणया। अथ च त्वया स न वर्ज्यः न त्याज्यः। कीदृग्भूतया त्वयेत्याह आ(अ)स्थेयस्सत्वया अस्थिरतरमनोबलया ना पुरुषः आस्थेयः आदृत्यः आ(अ)वर्ज्यश्चावर्जनीय इति। शेषं पूर्ववत्।।

प्रथमतृतीययोः द्वितीयचतुर्थयोश्च पादयोः व्यपेताभ्यासं दर्शयति नेति। ना, स्थेयस्सत्त्वया, वर्ज्यः, परमायतमानया, न,

आस्थेयः, सः, त्वया, आवर्ज्यः, परम्, आयतमानया। ना पुरूषः ; स्थेयस्सत्त्वया स्थिरतरचित्तया; वर्ज्यः परित्याज्यः ; परमश्च आयतश्च मानः प्रणयकलहः यस्याः तया; नेति प्रतिषेधे; आस्थेयः विश्वास्यो बहुगुणः ; सः त्वया आवर्ज्यः अङ्गीकार्यः ; परं भृशम्; आयतमानया प्रयत्नं कुर्वत्या। सापराधेन दयितेन वशीकृता सखी नायिकां प्रति आह–स ना स्थेयस्सत्त्वया परमायतमानया त्वया न वर्ज्यः ; आस्थेयः परम् आयतमानया आवर्ज्य इति।।५४।।

नरा जिता माननया समेत्य।
न राजिता माननयासमेत्य॥
विनाशिता वै भवतापनेन
विनाशिता वैभवतापनेन॥५५॥

रत्नश्री

[व्यवहिताव्यवहितं समुद्गमुदाहरति–]

हृदयङ्गमा

प्रथमद्वितीयपादयोस्तृतीयचतुर्थयोश्च पादयोः समतालक्षणं समुद्गस्य भेदान्तरमुदाहरणेन दर्शयति, नरा इति। –माननया सम्मानेन, समेत्य सङ्गत्य, स्थितेन इति अध्याहार्य्यं, मानवतेत्यर्थः, भवता अयनेन गमनेन, सङ्ग्रामयात्रयेत्यर्थः, जिताः पराभूताः, नराः रिपव इत्यर्थः, माननययोः सम्माननीत्योः, आसं क्षेपम्, अभावमित्यर्थः, एत्य प्राप्य, न राजिताः न शोभिताः, भवत्सकाशात् पलाय्य कथञ्चित रक्षितजीवनानां शत्रूणां सम्माननीतिशून्यतया अतीव दुर्दशा जातेत्यर्थः। पलायमानानामेषा गतिरुक्ता, ये तु साहसिका न तथा, तेषां गतिमाह, विनाशिता इति। –वैभवं विभुत्वं, तायति विस्तारयति इति तथोक्तेन, ("तायृञ पालनविस्तारयोः" इत्यस्मात् नन्द्यादित्वात् ल्यु-प्रत्ययः) भवता विनाशिता वै निहतास्तु, रिपवः इति शेषः, विना पक्षिणा, गृध्रेण इत्यर्थः, अशिताः भक्षिताः। (राज्ञः स्तुतिरियम्। अत्र प्रथमद्वितीयौ तथा तृतीयचतुर्थौ च तुल्यौ इति समुद्गभेदः)॥५५॥

प्रभा

समुद्गस्य द्वितीयं प्रभेदं दर्शयति–**नरेति**। कश्चित्प्रभविष्णुं नृपं

स्तौति। तत्र पदच्छेदः। नराः जिताः माननयासम् एत्य न राजिताः माननया समं इत्य विनाशिता वैभवतापनेन विना अशिताः वै भवता आपनेन इति। हे सम सश्रीक। मया श्रिया सहितः समस्तत्संबुद्धिः। माननया संमानेन। इत्य संगन्तुं योग्य। इण्धातोः एतिस्तुशास्वदृजुषः क्यप् इति क्यप्। संमान्येत्यर्थः। एतादृश हे राजन् (त्वया) जिता नरा अरयो माननयासस्तम्। माननययोरपसरणम्। एत्य प्राप्य न राजिताः न शोभिता नष्टप्रभा भवन्तीत्यर्थः। त्वत्तः पराजयं प्राप्य समराङ्गणात्पलायिता विगतप्रभा भवन्तीत्यर्थः। आप्नोति इति आपनः सर्वव्यापक इत्यर्थः। तेन आपनेन सर्वव्यापकेन भवता। वैभवेन विभुत्वेन। यत्तापनं शत्रूणां संतापनं तेन विनाशिता हताः। वै अतः। विना गृध्रादिभिर्भक्षिता इत्यर्थः॥५५॥

विवृति

अव्यवहितं समुद्गमुदाहरति–

हे राजन् येन [ये] नराः जितास्सङ्ग्रामे पराजिताः। कथ कृत्वा भवता पराजिता इत्याह– माननया समेत्य मानना पूजना तया समेत्य संपूज्य[सङ्गम्य] ते नरा न[रा]जिता न शोभिताः किं प्राप्य माननयासमेत्य मानो गर्वः नयो नीतिः। मानश्च नयश्च माननयौ तयोरासो निरासः तमेत्य प्राप्य। ये तावत् सङ्ग्रामे भवता पराजिताः ते न राजिताः। [न] केवलं न राजिता एव विनाशिता मारिता एव। [ये] पुनः भवता मारिताः तेषां का गतिरन्तभाव इत्याह विना गृध्रेण पक्षिणा अशिता भक्षिता वै स्पुटम्। कथंभूतेन वैभवताव[प]नेन। विभोर्भावो वैभवं तत्तापयत्यनयत्येवंशीलो वैभवताव[प]नः। तेन वैभवताव[प]नेन। रिपुप्रभुत्वापहारिणा।

कथंभूतेन विना। आव[प]नेन। आप्नोति व्याप्नोति सम्पत् शिवम् (सम्यक् दिवं)। आपनः तेन।।

प्रथमद्वितीययोः तृतीयचतुर्थयोश्च अव्यवहितम् अर्धाभ्यासं दर्शयति **नरा** इति। नराः, जिताः, माननयासम्, एत्य, न राजिताः, माननया, सम, इत्य, विनाशिताः, वैभवतापनेन, विना, आशिताः, वै भवता अपनेन। अयमर्थः—सम सश्रीक, माननया इत्य मान्य, राजन्, त्वया जिताः, नराः, माननयासं मानस्य नयस्य च असं क्षेपम्, एत्य प्राप्य, न राजिताः नोज्ज्वलाः—पराजिताः बभूवुः ; वैभवतापनेन—वैभवेन प्रभुत्वेन परेषां तापनेन, अपनेन अकुटिलेन—पन कौटिल्ये इत्यस्मात् पचाद्यच्, भवता विनाशिताः हताः, वै अतः, विना पक्षिणा गृध्रादिना आशिताः भक्षिताः।।५५।।

कलापिनां चारुतयोपयन्ति।
वृन्दानि लापोढघनागमानाम्।।
वृन्दानिलापोढघनागमानां।
कलापिनां चारुतयोऽपयन्ति।।५६।।

रत्नश्री

[99b 10] यमिति। वृन्दानिलापोढघनागमानां हंसानामिति यावत्। आरुतयो निनदा अपयन्ति विरमन्ति चेति समुद्गस्य त्रयो भेदा निदर्शिताः।।

पादाभ्यास[100a]मधिकृत्याह–

हृदयङ्गमा

प्रथमचतुर्थपादयोर्द्वितीयतृतौयपादयोश्च तुल्यतालक्षणं समुद्गभेदान्तरमाह, कलापिनामिति। –लापेन केकाध्वनिना, ऊढः प्राप्तः, घनकालः सम्प्राप्त इति प्रकटित इति भावः, घनागमः वर्षाकालः यैः तादृशानां, कलापिनां मयूराणां, वृन्दानि समूहाः, चारुतया शोभया, वर्षाकालजनितया इति भावः, उपयान्ति सङ्गच्छन्ते, शोभां प्राप्नुवन्तीत्यर्थः ; तथा वृन्दानिलेन वार्षिकसङ्घातवायुना, अपोढः निरस्तः, घनः नृत्यविशेषः, ("घनं स्यात् कांस्यतालादिवाद्यमध्यमनृत्ययोः" इति मेदीनी) तद्विशिष्टः आगमः आगमनं, सविलासागमनमित्यर्थः, येषां तादृशानां, परित्यक्तसविलासगतिकानाम् इत्यर्थः, के जले, लपन्ति नदन्तीति तथोक्तानां, कलम् अव्यक्तमधुरध्वनिम्, आप्नुवन्ति इति तथोक्तानां वा कलापिनां हंसानां च, आरुतयः मधुरस्वराः, अपयान्ति

अपगच्छन्ति, प्रतिरुद्धा भवन्तीत्यर्थः, वर्षासु हंसानां मदराहित्यादिति भावः। (वर्षावर्णनमिदम्। अत्र प्रथमचतुर्थौ तथा द्वितीयतृतीयौ तुल्यौ इति समुद्गभेदः)।।५६।।

प्रभा

तृतीयप्रभेदं दर्शयति–**कलापिनामिति।** वर्षाकालवर्णनमिदम्। तत्र पदानि–कलापिनाम् चारुतया उपयान्ति। वृन्दानिलापोढघनागमानाम्। वृन्दानिलापोढघनागमानाम्। कलापिनाम् च आरुतयोपयान्ति इति। लापः केकाध्वनिः ऊढः प्राप्तो यस्मात्। आहिताग्न्यादित्वाद् लापशब्दस्य पूर्वनिपातः। तादृशो घनानां मेघानाम् आगमो येषां ते तथा। अथवा लापेन ऊढः सूचितो घनागमो यैस्ते तेषाम्। कलापिनां मयूराणाम् वृन्दानि चारुतया सौन्दर्येण उपयान्ति संगच्छन्ते। वर्षासु मयूराणां यौवनवत्त्वात्सौन्दर्यातिशय इति भावः। तथा के पानीये लपितुं आरवं कर्तुं शीलं येषां ते कलापिनः हंसाः। अथवा कलं मधुरारावम् आप्नुवन्ति ते कलापिनस्तेषां कलापिनां हंसानाम् आरुतयः आरावाश्च अपयान्ति गच्छन्ति। वर्षासु तेषां मदशून्यत्वात्। हंसान् विशिनष्टि **वृन्देति।** वृन्दानिला संघीभूता वायवस्तैरपोढो दूरीकृतो घनागमो नृत्यविशेषागमो येषां तेषाम्। घनं स्यात्कांस्यतालादिवाद्यमध्यमनृत्ययोः। इति मेदिनी। मेघानिलैः परित्यक्तसविलासगमना इत्यर्थः।।५६।।

विवृति

व्यवहिताव्यवहितं समुद्रमुदाहरति–

शिखण्डिनां वृन्दानि कुलानि चारुतया सुन्दरतया सह

उपयान्ति सङ्गच्छन्ते। किंभूतानां कलापिनामित्याह–लापोढघनागमानां, लपनं लापः शब्दः। तेन ऊढः कथितः घनागमः वर्षासमयः यैस्ते लापोढघनागमाः तेषाम्। तथा कलापिनां च कमुदकं तत्र लपन्ति एवंशीलाः कलापिनः हंसाः तेषां चारुतराः(आरुतयः) स्वराः अपयान्त्यपगच्छन्ति क्षीयन्ते। किंभूतानां वृन्दानिलापोढघनागमानां वृन्दानिलो बहुलानिलः। तेनोपोढो निरुद्धो घनो गाढ आगमः आगमनं सञ्चारो येषां ते वृन्दानिलापोढघनागमाः तेषाम् इति।।

प्रथमचतुर्थयोः द्वितीयतृतीययोश्च पादयोः व्यवहितम् अव्यवहितञ्च अर्धाभ्यासं दर्शयति–कलापिनामिति। कलापिनां, चारुतया, उपयान्ति, वृन्दानि, लापोढघनागमानां, वृन्दानिलापोढघनागमानां, कलापिनां, च, आरुतयः, उपयान्ति। लापः शब्दः, तेन ऊढः सूचितः, घनागमः वर्षागमः, यैः तेषां कलापिनां मयूराणां, वृन्दानि चारुतया उपयान्ति; वृन्दानिलापोढघनागमानां–वृन्दानिलः पुञ्जीभूतः वायुः प्रचण्ड इति यावत्, तेन अपोढः निराकृतः, धनः गाढः, आगमः सञ्चारः, येषां तेषाम्; कं जलं, तस्मिन् लपनशीलाः कलापिनः हंसाः, तेषां च आरुतयः शब्दाः अपयान्ति। इति अर्धाभ्यासाः त्रयो दर्शिताः।।५६।।

न मन्दयावर्जितमानसात्मया
नमन्दयावर्जितमानसात्मया।
उरस्युपास्तीर्णपयोधरद्वयं
मया समालिङ्ग्यत जीवितेश्वरः॥५७॥

रत्नश्री

दयया अनुग्रहेण वर्जितं विरहितं मानसं चित्तं यस्य तादृश आत्मा आवर्जितः स्वीकृतश्च मानो गर्वः तेन सात्मा स्वभावीभूतोऽभ्यासाद् यस्याः तयैवंभूतया मया मन्दया जडया नमन् प्रणिपतन् जीवितेश्वरः प्रियः न समालिङ्ग्यत न परिष्वक्त इत्यनुशोचति काचित्। कथम्? उपास्तीर्णं निवेशितं भरन्यस्तपयोधरद्वयं यस्मिन् समालिङ्गन इति क्रियाविशेषणम्। कुत्रेत्यपेक्षायामुरसीति योज्यम्, असमस्तत्वादिति॥

हृदयङ्गमा

समुद्गयमकभेदमभिधाय सम्प्रति अनेकविधं पादाभ्यासयमकमुदाहरिष्यन्, प्रथमं प्रथमद्वितीयपादगतं तदुदाहरति, नेति। –मन्दया मूढया, तत्कालोचितप्रतिपत्तिविधुरया इत्यर्थः, अवर्जिते अत्यक्ते, माने प्रणयजन्ये ईर्ष्याजन्ये वा कोपे, सात्मया सयत्नया, यत्नवत्या इत्यर्थः, यत्नेन मानं रक्षन्त्या इति यावत्, ("आत्मा पुंसि स्वभावे च प्रयत्नमनसोरपि" इति मेदिनी) यद्वा, –आवर्जितः अनुकूलं मत्वा स्वीकृत इत्यर्थः, मानः ईर्ष्यारोषलक्षणो यया सा, तथा सात्मा आत्मवती तया, (अनयोः कर्मधारयः) तथा दयया वर्जितौ प्रियस्य मलिनमुखं दृष्ट्वाऽपि कृपाविरहितौ, मानसम् आत्मा स्वभावश्च तौ यस्याः तथाभूतया,

मया नमन् कृतापराधतया पादयोः पतन्, अपीति शेषः, जीवितेश्वरः प्राणनाथः, उरसि वक्षसि, प्रियस्येति भावः, उपास्तीर्णम् अर्पितं, पयोधरद्वयं स्तनयुगलं यस्मिन् तद्यथा तथा, न समालिङ्ग्यत नाश्लिष्यत। ("सात्मया" इत्यत्र "सार्थया" इति पाठे–एकत्र–अपरित्यक्तमानसमूहया, अन्यत्र–दयावर्जितमानस-प्रयोजनयेत्यर्थः। नायकं निराकृत्य गलितमानाया मानिन्या अनुतापोक्तिरियम्। अत्र प्रथमद्वितीयौ पादावभ्यस्तौ इति पादाभ्यासयमकम्)।।५७।।

प्रभा

अथानेकविधं पादाभ्यासमुदाजिहीर्षुः प्रथमं प्रथमद्वितीयपाद-गतमुदाहरति–**नमन्दयेति**। पदच्छेदः–नमन् दयावर्जितमानसात्मया न मन्दया अवर्जितमानसात्मया उरसि उपास्तीर्णपयोधरद्वयम् मया समालिङ्ग्यत जीवितेश्वर इति। प्रथममुपेक्षितवल्लभायाः पश्चात्सानुशयाया नायिकाया वचनमिदम्। दयया वर्जितौ मानसम् अन्तः करणम् आत्मा च स्वभावाश्च यस्याः सा तया। तथा अवर्जिते अपरित्यक्ते माने सात्मया सयत्नया। सप्रयत्नं मानं परिरक्षन्त्या इत्यर्थः। आत्मा पुंसि स्वभावेपि प्रयत्नमनसोरपि इति मेदिनी। अत एव मन्दया मूढया। मया जीवितेश्वरः प्राणनाथो नमन् प्रणतिपरोपि। उरसि जीवितेश्वरस्य वक्षसि। उपास्तीर्णम्। आसञ्जितं पयोधरद्वयं यथा स्यात्तथा न समालिङ्ग्यत नालिङ्गितः।।५७।।

विवृति

तदेवं त्रिप्रकारमपि समुद्गमुदाहृत्य अवसरप्राप्तं पादाभ्यासंसमुदाहरति तत्राव्यवहितमेकशः प्रथमपादाभ्यासमाह–

नमन् प्रणमन् पादयोः पतन् जीवितेश्वरः मया मन्दया जडप्रकृत्या सत्या न समालिङ्ग्यत नालिङ्गितः। किंभूतया दयावर्जितमानसात्मया दयया करुणया वर्जितः रहितः मानसः तस्या[मानसस्या]त्मा स्वरूपं यस्याः सा तथाभूता तया। पुनरपि किंविशिष्टया। आवर्जितमानसात्मया आवर्जितो मानसात्मा अहंकारः यया सा तथोक्ता तया। कथन्नालिङ्गितः इत्याह। उरस्युपस्तीर्णपयोधरद्वयं उरसि वक्षसि उपस्तीर्णं पयोधरद्वयं स्तनयुगं यस्मिन् तद्यथा भवति तथा। काचित् उपस्थितप्रेमप्रणतप्रियतमसमागमं मानिनी [निराकृत्य?] स्मरहुताशनसन्तप्ततनुरनुशोचति।।

पादाभ्यासाः षट्–प्रथमद्वितीयपादयोः प्रथमतृतीयपादयोः प्रथमचतुर्थपादयोः द्वितीयतृतीयपादयोः द्वितीयचतुर्थपादयोः तृतीयचतुर्थपादयोश्चेति। तत्र प्रथमद्वितीययोः अव्यवहितं पादयमकं दर्शयति–नमन्निति। नमन्, दयावर्जितमानसात्मया, न, मन्दया, आवर्जितमानसात्मया। सापराधं पादप्रणतं प्रियतमम् अवधूय सानुशयायाः नायिकायाः वचनम्। नमन् पादयोः पतन्, दयावर्जितमानसात्मया दयावर्जितमनः स्वरूपया, नेति प्रतिषेधे, मन्दया अज्ञया, आवर्जितमानसात्मया–आवर्जितम् अङ्गीकृतम्, मानस्य प्रणयकलहस्य, सात्मम् अनुकूल्यं, यया–तया। नमन् जीवितेश्वरः दयावर्जितमानसात्मया आवर्जितमानसात्मया मन्दया मया उरसि उपास्तीर्णपयोधरद्वयं न समालिङ्ग्यत।।५७।।

सभासुराणामबला विभूषिता
गुणैस्तवारोहि मृणालनिर्मलैः।
स भासुराणामबला विभूषिता
विहारयन्निर्विश सम्पदः पुराम्॥५८॥

रत्नश्री

तव गुणैर्मृणालवन्निर्मलैः परिशुद्धैः सुराणां सभा देवपर्षदारोहि कीर्तिद्वारेण प्राप्ता। किंभूता? [अबला] बलनाम्नोऽसुरस्य शक्रनिरस्तस्य तत्रासम्भवात्, न विद्यते बलोऽस्यामिति कृत्वा। वसत्यस्यामित्युषिता गत्यर्थानाप्यादाधारे[?] च इत्याधारे क्तः। विभोः शक्रस्य उषिता वासाधारः विभूषिता शक्राध्यासिता। धर्मार्थकाममयैर्गुणैर्व्याप्तभुवनः स त्वमिदानीं पुरां वरभवनयुजां नगराणां भासुराणां विभूतिभिर्भ्राजिष्णूनां सम्पदोऽभ्युदयान्. सुखानि निर्विश अनुभव। अबलाः स्त्रियः विभूषिताः विहारयन् भ्रमयन् [रमय]न्निति। कृतकृत्यस्य कामोपभोगो दर्शित इति।।

हृदयङ्गमा

तदेव प्रथमतृतीयपादगतमुदाहरति, सभेति। –हे राजन्! मृणालनिर्म्मलैः मृणालवत् परिशुद्धैः, तव गुणैः शौर्य्यादिभिः, अबला बलासुररहिता, इन्द्रेण निहतत्वात् बलासुरोत्पातविहीना इत्यर्थः, तथा विभूषिता देवभोग्यद्रव्यजातैः विशेषेण सज्जिता, यद्वा, –विभोः प्रभोः, ब्रह्मणः विष्णोः शङ्करस्य इन्द्रस्य वा इत्यर्थः, उषितं वसतिः यस्यां तादृशी, सुराणां देवानां, सभा सुंधर्म्माख्या, आरोहि आरूढ़ा, बलासुरविनाशादधुना देवसभास्था निर्भयाः सन्तः

तव गुणान् गायन्तीत्यर्थः, स त्वं, विभूषिताः विशेषेण अलङ्कृताः, अबलाः सुन्दर्य्यः, विहारयन् रमयन् सन्, भासुराणां दीप्यमानानां, समृद्धानाम् इत्यर्थः, पुरां नगराणां, सम्पदः ऐश्वर्य्याणि, निर्विश उपभुङ्क्ष्व। (रजानं प्रति वैतालिकस्योक्तिरियम्। अत्र प्रथमतृतीयौ अभ्यस्ताविति पादाभ्यासयमकम्)।।५८।।

प्रभा

प्रथमतृतीयपादगतमुदाहरति-**सभेति**। अबला बलसंज्ञकदैत्य-शून्या। इन्द्रेण तस्य निषूदनादिति भावः। तेन च सभाया निर्भयत्वम्। विभुना स्वामिना महेन्द्रेण उषिता अध्यासिता एतादृशी सुराणां सभा सुधर्माख्या तव मृणालनिर्मलैः मृणालवत् स्वच्छैः शीतलैश्च तैर्गुणैः आरोहि अध्याक्रान्ता। देवसभायामिन्द्रादयस्त्वद्गुणान् वर्णयन्तीत्यर्थः। स त्वं विभूषिताः अलंकृता अबला विहारयन् रमयन् भासुराणाम् उज्ज्वलानाम् पुराम् संपदो निर्विश उपभुङ्क्ष्व। कस्यचित् राज्ञः प्रशस्तिरियम्।।५८।।

विवृति

द्वितीयपादव्यवहितं प्रथमपादाभ्यासमाह–

सुराणां देवानां सभा अ स्थानिका। किंविशिष्टा। अबला। न विद्यते बलः दानवः यस्यां सा अबला। तस्येन्द्रेण व्यापादितत्वात्। अत एव बलभिदुच्यते त्रिदशाधीशः। (पुनः)किंविशिष्टा विभूषिता। विभवः प्रभवः बृहस्पतिप्रभृतयः, तैरुषिता सेविता। या सा सभा। हे राजन् ते तव गुणैः विद्याविनयसत्यत्यागादिभिः आरोहि आरूढा। किंविशिष्टैः। मृणालनिर्मलैः मृणालधवलैः। यस्य

सः इत्थंभूतस्त्वं पुरां नगराणां भासुराणां भासनशीलानां अबलाः स्त्रीर्विभूषिताः अलङ्कृताः विहारयन् रमयन् संपदो लक्ष्मीर्निर्विशानुभव।।

प्रथमतृतीययोः व्यवहितं पादयमकं दर्शयति–**सभेति**। सभा, सुराणाम्, अबला, विभूषिता; सः, भासुराणाम्, अबलाः, विभूषिताः। राजन्, अबला बलासुररहिता, विभूषिता–विभुना इन्द्रेण उषिता अध्यासिता, सुराणां सभा, मृणालनिर्मलैः तव गुणैः आरोहि व्याप्ता; त्वाम् इन्द्रोऽपि सदसि प्रशंसति इत्यर्थः ; स त्वम् इह, विभूषिताः अलंकृताः अबलाः तरुणीः विहारयन् रमयन्, भासुराणां उज्ज्वलानां पुरां सम्पदः निर्विश अनुभव।।५८।।

कलं कमुक्तं तनुमध्यनामिका
स्तनद्वयो च त्वदृते न हन्त्यतः।
न याति भूतं गणने भवन्मुखे
कलङ्कमुक्तं तनुमद्ध्यनामिका॥५९॥

रत्नश्री

कलं मधुरम्। उक्तं वचनम्। स्तनद्वयी पयोधरयुगलं च तनोः शरीरस्य सम्बन्धिनो मध्यस्य नामिका आवर्तिका स्त्रीणामित्यर्थात्। कं नाम नरं न हन्ति? किं तु सर्वमेव हन्ति। अभिलाषादिकामावस्थाः क्रमेण दशमीं नयन्तीति कृत्वा हन्तीत्युच्यते। त्वदृते त्वामन्तरेण। त्वमेव केवलमनेन [न] हन्यसे जितेन्द्रियत्वात्। तनुमद्ध्यनामिकेत्यत्र तनुत्वमाने हिशब्दो यस्मादर्थे। यत एवम्, अतः कारणात् भवान् मुखमादिः गुणैरग्रनीतत्वात्[१], यस्मिन् गणने सत्पुरुषसंख्यायां तस्मिन् भवन्मुखे गणने क्रियमाणे कलङ्कमुक्तं निर्दोषं तनुमत्, भूतं[२] सकलनिष्कलपरिमाणव्यतिरिक्तं भूतं पुरुषं व्याप्यभूतम्। अनामिका कनिष्ठानन्तराङ्गुलिर्न याति न गच्छति। त्वां प्रथमं कनिष्ठिकायां गुणवत्त्वया गणयित्वा [स्थितस्य] त्वमिव निष्कलङ्को द्वितीयायामनामिकायां गणयितव्यो [100b] नास्तीत्यर्थः॥

हृदयङ्गमा

तदेव प्रथमचतुर्थपादगतमुदाहरति, कलमिति। –कलं मधुरम्, उक्तं वचनं, विलासिनीनामिति अध्याहार्य्यम्; तथा तनु क्षीणं,

मद्ध्यं कटिदेशं, नमयतीति तथोक्ता पृथुतरेत्यर्थः ; यद्वा, –तनोर्मद्ध्यास्य नामिका, निजभरेण इति भावः, ("अजादिहलन्तोऽदीर्घात्" इति क्वचित् पाक्षिको मध्यशब्दस्य धकारद्विर्भावः) स्तनद्वयी च, त्वदृते त्वां विना, कं जनं, न हन्ति? न पीड़यति? अपि तु त्वां परित्यज्य सर्वमेव इत्यर्थः, अतः कारणात्, भवन्मुखे भवदादिविषये, गणने सङ्ख्याने, भवादृशां जितेन्द्रियाणां गणनायामित्यर्थः, हि निश्चितम्, अनामिका अङ्गुष्ठतश्चतुर्थी अङ्गुलिः, कलङ्कमुक्तं निर्दोषं, तनुमत् शरीरि, भूतम् अपरं प्राणिनं, न याति न गच्छति, त्वां विना अन्यं न गणयति इत्यर्थः, जगत्यस्मिन् के के जितेन्द्रियाः सन्तीति गणनाप्रस्तावे कनिष्ठाङ्गुल्या प्रथमं त्वां गणयित्वा अनामिकया अन्यं कमपि गणयितुं न शन्कोति भवादृशजितेन्द्रियान्तराभावादिति भावः। (कमपि महान्तं प्रत्युक्तिरियम्। अत्र प्रथमचतुर्थौ पादावभ्यस्ताविति पादाभ्यासयमकम्। अत्रेदमवधेयं, –चतुर्थपादे "तनुमद्ध्यानामिका" इति पदस्य तनुमत् हि अनामिका एवं विश्लेषं कृत्वा व्याख्याने तनुमद्ध्यनामिकेति धकारस्य दकारयुक्तत्वं भवति, ततश्च प्रथमपादस्थतनुमध्यपदस्य दकारयुक्तत्वाभावे यमकत्वहानिमाशङ्क्य प्रथममध्यशब्दस्यापि द्विर्भावः व्याख्यातृभिरङ्गीकृतः, परन्तु मध्यशब्दस्य धकारस्य द्विर्भावः अप्रसिद्धः, अतः वयमत्रेदं मन्यामहे यत्, चतुर्थपादे –कलङ्कमुक्तं तनुमधि शरीरमधिकृत्य, शरीरधारि इत्यर्थः, भूतं न याति एवं व्याख्याने प्रथम–मध्यपदस्य धकारस्य द्विर्भावरूपकष्टकल्पनां विनाऽपि व्याख्यानसङ्गतिरिति सुधीभिर्विभाव्यम्) ।।५९।।

प्रभा

तदेव प्रथमचतुर्थपादगतमुदाहरति–**कलमिति।** कश्चिज्जितेन्द्रियं पुरुषं स्तौति। तत्र पदच्छेदः–कलं कम् उक्तं तनुमध्यनामिका इति प्रथमचरणे। कलङ्कमुक्तं तनुमद् हि अनामिका इति चतुर्थचरणे। अत्र स्त्रीणामित्यध्याहार्यम्। तथा च स्त्रीणां कलं मधुरम् उक्तं भाषितम्। तथा तनुः कृशः सूक्ष्मो वा यो मध्यस्तस्य नामिका स्वभारेण तं नमयन्ती एतादृशी स्तनद्वयी। विस्तृतं स्तनयुगलमित्यर्थः। त्वदृते त्वां विना कं न हन्ति। सर्वान् अपि पीडयतीत्यर्थः। त्वं तु ललनावचोभिः सौन्दर्येण च मुग्धो न भवसीति भावः। अतः अतः कारणात्। भवान् एव मुखः प्रमुखो यत्र तादृशे समाजे गणने जितेन्द्रियाणां परिगणने। प्रस्तुते सति। अनामिका कनिष्ठिकासविधे वर्तमाना अङ्गुलिः। कर्त्री कलङ्कमुक्तं दोषशून्यम्। जितेन्द्रियमिति भावः। तनुमत् सशरीरम्। भूतं जन्तुम् न याति न प्राप्नोति। हीति निश्चये। जितेन्द्रियाणा गणनाप्रसङ्गे प्रथमं भवान् कनिष्ठिकामारोहति। त्वत्तुल्यस्य पुरुषस्याभावाच्च अनामिकां न कोप्यन्यः प्राप्नोति। अनामिका सार्थवती बभूवेत्यर्थः। त्वमनुपमोसीति भावः।।५९।।

विवृति

द्वितीयतृतीयपादव्यवहितं प्रथमपादाभ्यासमाह–

त्वदृते त्वां विहाय अन्यं कं जनं न नि(?)हन्ति। किं तु हन्त्येव। किं तदित्याह कलं मधुरं उक्तं भाषितं तथा स्तनद्वयी च स्तनयुग्मं च। किंभूता स्तनद्वयीत्याह–तनुमध्यनामिका तनु च यन्मध्यं च तस्य नामिकायाः [नामिका] नामनक्रियायाः कर्त्री।

अनेन असाधारणजितेन्द्रियत्वमुक्तम्। 'स्त्रीभिः कस्य न खण्डितं भुवि मनः' इत्येतदपि त्वत्तोऽन्यत्र व्याप्रियत इत्युक्तम्। अतो हेतोः मूर्तं (भूतं) प्राणिनं तनुमच्छरीरिणम्। कलङ्को दोषः। तेन मुक्तं दोषरहितम्। हि स्फुटं अनामिका(या) कनिष्ठिकाया द्वितीयस्थानस्थिता सा अङ्गुली अनामिकेत्युच्यते। सा न याति। क्व। गणने संख्यानिर्देशे एको द्वाविति कर्तव्ये। भवन्मुखे भवत्प्रधाने।।

प्रथमचतुर्थयोः व्यवहितं पादाभ्यासं दर्शयति–**कलमिति।** अत्र कश्चित् जितेन्द्रियं स्तौति। कलं, कम्, उक्तम्, तनुमध्यनामिका; कलङ्कमुक्तम्, तनुमत्, हि, अनामिका। कलं मधुरं, कं किंशब्दः, उक्तं वचनं, तनुमध्यनामिका–तनोः कृशस्य मध्यस्य अवलग्नस्य नामिका नमयित्री; कलङ्कमुक्तं कलङ्करहितम्–जितेन्द्रियम् इति यावत्, तनुमत् शरीरि, हि यस्मात्, अनामिका उपकनिष्ठाङ्गुलिः। स्त्रीणाम् इत्यध्याहार्यम्। स्त्रीणां कलम् उक्तम् तनुमध्यनामिका स्तनद्वयी च त्वदृते कं न हन्ति? सर्वान् बाधते हि यतः, अतो भवन्मुखे गणने प्रस्तुते सति कलङ्कमुक्तं तनुमत् भूतं अनामिका न याति। त्वयि प्रथमं कनिष्ठाङ्गुल्या गणिते द्वितीयाङ्गुलिः त्वत्सदृशं गणयितुं न लभत इति भावः।।५९।।

यशश्च ते दिक्षु रजश्च सैनिका
वितन्वतेऽजोपम! दंशिता युधा।
वितन्वतेजोऽपमदं शितायुधा
द्विषां च कुर्वन्ति कुलं तरस्विनः॥६०॥

रत्नश्री

अजोपम विष्णुतुल्य! ते तव सैनिकाः सेनाचरा नराः शितमायुधमेषामिति शितायुधाः तीक्ष्णहेतयः। दंशिता वर्मिताः। तरस्विनः शूराः सन्तः यशश्च कीर्तिं च ते रजश्च पार्थिवं दिक्षु वितन्वते विस्तारयन्ति। युधा रणेन तुमुलेन। द्विषां च कुलं [वि]तनु प्रहारशतजर्जरत्वाद् विगतशरीरम्। न विद्यते तेजोऽस्येत्यतेजः निष्प्रभावम्। विगतो मदोऽस्मादित्यपमदं वीतगर्वं कुर्वन्तीति॥

हृदयङ्गमा

द्वितीयतृतीयपादगतं पादाभ्यासयमकमुदाहरति, यश इति। —हे अजोपम्! अजराजसदृश!, नारायणसम्! इति वा, हरसम! इति वा, ("अजा विष्णुहरच्छागाः" इत्यमरः) दंशिताः सन्नाहवन्तः, शितानि तीक्ष्णानि, आयुधानि अस्त्राणि येषां ते तथोक्ताः, तथा तरस्विनः महावेगाः, अप्रतिहतवेगा इत्यर्थः, ते तव, सैनिकाः योद्धृपुरुषाः, युधा सङ्ग्रामेण, दिक्षु यशश्च तथा रजश्च पांशुञ्च, वितन्वते विस्तारयन्ति; तथा द्विषां शत्रूणां, कुलञ्च समूहञ्च, वितनु देहरहितम्, अतेजः तेजोहीनं, तथा अपमदं निरहङ्कारञ्च, कुर्वन्ति विदधति। (विजिगीषुस्तुतिरियम्। अत्र द्वितीयतृतीयावभ्यस्ताविति पादाभ्यासयमकम्)॥६०॥

प्रभा

द्वितीयतृतीयपादगतं तद्दर्शयति–**यश इति।** कस्यापि विक्रमशालिनो नृपस्य स्तुतिरियम्। अत्रावृत्तपादयोः पदच्छेदः–वितन्वते अजोपम दंशिताः युधा। वितनु अतेजः अपमदं शितायुधाः इति। हे अजोपम विष्णुसदृश। ते दंशिताः कवचिनः शितायुधाः तीक्ष्णायुधास्तरस्विनः वेगवन्तश्च। सैनिका युधा युद्धेन दिक्षु रजो युद्धसंमर्दोत्थां धूलिं यशः जयाल्लब्धं यशश्च वितन्वते विस्तारयन्ति। तथा द्विषां कुलं समूहम् वितनु विनाशात्तनुशून्यम्। अतेजः तेजः शून्यम्। अपमदं गलितगर्वम् च कुर्वन्ति।।६०।।

विवृति

अव्यवहितद्वितीयपादाभ्यासमाह–

यशश्च तथा रजश्च ते तव सैनिकाः दिक्षु वितन्वते विस्तारयन्ति। हे राजन् अजोपम। अजो ब्रह्मा। तेन उपमा यस्य तस्यामन्त्रणं ब्रह्मसमेत्यर्थः (अथवा अजो नाम कश्चिद्राजा इक्ष्वाकुवंश्यः। तेन समेति) दंशिताः कृतसन्नाहाः। कया हेतुभूतया युधा संग्रामेणेति यावत्। किं तदेव तव सैनिकाः वितन्वते। उतान्यदपि कुर्वन्तीत्याह द्विषां शत्रूणां कुलं समूहं च कुर्वन्ति। किंविशिष्टानां तरखिनां वेगवतां प्रधावनं कुर्वतामित्यर्थः। कथंभूतं कुर्वन्तीत्याह–वितनु विगतशरीरं अतेजः तेजोरहितं अपमदं अपगतगर्वम्। किंविशिष्टास्सैनिका इत्याह–सितायुधाः सितानि निर्मलानि तीक्ष्णानि आयुधानि शस्त्राणि येषां ते तथाविधाः वितन्वते। अजोपमर्द(दं)शितायुधा इति पाठः। तदाऽपि स एवार्थः।।

द्वितीयतृतीययोः पादयोः अव्यवहितं यमकं दर्शयति–**यश इति।** वितन्वते, अजोपम, दंशिताः, युधा; वितनु, अतेजः, अपमदं, शितायुधाः। हे अजोपम विष्णुसदृश, ते तव सैनिकाः, दंशिताः कवचिताः, शितायुधाः तीक्ष्णायुधाः, तरस्विनः जविनश्च सन्तः, युधा दिक्षु रजश्च यशश्च वितन्वते–धूलीम् उत्थापयन्ति यशश्च प्रथयन्ति; किञ्च द्विषां कुलं, वितनु विशेषेण कृशम्, अतेजः तेजोरहितम्, अपमदं निर्मदं च कुर्वन्ति।।६०।।

बिभर्ति भूमेर्वलयं भुजेन ते
भुजङ्गमोऽमा स्मरतो मदञ्चितम्।
श्रृणूक्तमेकं स्वमवेत्य भूधरं
भुजङ्गमो मा स्म रतो मदं चितम्॥६१॥

रत्नश्री

ते तव भुजेन अमा सह भूमेर्वलयं महीमण्डलं बिभर्ति धारयति भुजङ्गमः शेषो नागराजः। नक एव ते भुजः। [अतः] स्वमात्मीयं भुजं बाहुं भुवं पृथिवीं धारयति वहतीति भूधरमवेत्य ज्ञात्वा मम भुजो स्वयं धारयतीति मदमहङ्कारं चितमुपचितमुदीर्णं [रतः] अभिनिविष्टः सन् मा स्म गमस्त्वं मा गच्छतु भवान्। इतीदमेकं प्रधानमुक्तं वचनम्। अञ्चितं हितं श्रृणु गृहाण। मत् मत्तः सकाशात् स्मरतः जानतः। प्राप्तज्ञानः एवमुदास्ते भवान् यदि न विरुद्धं [व्यवहरति], तदा सुतरां शोभते विनयालङ्कृतगुणत्वादितीदमेकं मद्वचनं सर्वगुणभूषणं ग्राह्यमिति॥

हृदयङ्गमा

तदेव द्वितीयचतुर्थपादगतमुदाहरति, बिभर्त्तीति। —हे राजन्! भुजङ्गमो वासुकिः, ते तव, भुजेन अमा सह, त्वद्भुजवलसाहाय्येनेत्यर्थः, भूमेर्वलयं भूमण्डलं, बिभर्त्ति धत्ते। एतावता गर्वो न विधेय इत्याह, स्मरत इति। —स्मरतः पूर्ववृत्तं विजानत इत्यर्थः, मत् मत्तः, मत्सकाशादित्यर्थः, अञ्चितं पूजितं, सर्वजनसम्मतम् इत्यर्थः, एकम् उक्तं वचनं, श्रृणु आकर्णय; किन्तदित्याह, —स्वं स्वकीयं, भुजं भूधरं भूधारणक्षमम्, अवेत्य

ज्ञात्वा, रतः प्रीतः सन्, चितं प्रवृद्धम्, अत्यन्तमित्यर्थः, मदं गर्वं, मास्म गमः न गच्छ, गर्वं मा कुरु इत्यर्थः। (राजानं प्रत्युपदेशगर्भस्तुतिरियम्। अत्र द्वितीयचतुर्थावभ्यस्ताविति पादाभ्यासयमकम्)।।६१।।

प्रभा

द्वितीयचतुर्थपादगतं तदुदाहरति–**बिभर्तीति।** अत्र द्वितीयतुर्थयोः पदच्छेदः–भुजंगमः अमा स्मरतः मत् अञ्चितम्। भुज गमः मा स्म रतः मदं चितम्। कश्चिद्राजानं व्याजस्तुत्या प्रशंसति। हे राजन् ते भुजेन अमा सह भुजंगमः शेषो भूमेर्वलयं बिभर्ति। अतः स्मरत एतत् सर्वं ज्ञातवतो मत् मत्तः। अञ्चितं सकलैः प्रशंसितम् उक्तं वचनम् शृणु। किं तत्तदाह–स्वं स्वीयम्। एकं असहायम् भुजं भूधरं भूमिधारकम् अवेत्य विज्ञाय रतः संतुष्टः सन्। चितम् उपचितम् स्फीतमित्यर्थः। मदं गर्वम् मा स्म गमो मा याहि।।६१।।

विवृति

व्यवहितं द्वितीयपादाभ्यासमाह–

भुजङ्गमः अनन्तः एषः भूमेः वलयं क्षितितलं बिभर्ति दधाति। किमेक एव नेत्याह। ते तव भुजेन बाहुना। अमा सह। त्वद्भुजबलसहायमन्तरणैकाकी शेषाहिः महीभारं वोढुंन समर्थ इति स्मरतः अवधारयतः। तेन तावदञ्चितं पूजितं सूक्तमेकं वचनं श्रृणु आकर्णय। मदस्मत्तः (मत्तः)। स्मरतः जानत इति मदित्यस्य विशेषणम्। किं तदेकं सूक्तमित्याहं स्वं निजं भुजं बाहुं अवेत्य ज्ञात्वा भूधरं भूः पृथ्वी तां धारयतीति भूधरस्तमूढभारः रतो हृष्टः

तं(त्वं) राजन् मदं गर्वं चितं राशीभूतं मा स्म गमः। मा कार्षीः त्वं गर्वमित्यर्थः।।

द्वितीयचतुर्थयोः पादयोः व्यहितं यमकं दर्शयति–बिभर्तीति। भुजङ्गमः, अमा, स्मरतः, मत्, अञ्चितम्; भुजं, गमः, मा, स्म, रतः, मदं, चितम्। राज्ञः व्याजस्तुत्या चाटु करोति। स्मरतः विमृशतः, मत् मत्सकाशात्, एकम् अञ्चितं पूजितं उक्तं श्रृणु; स्वं भुजं भूधरम् अवेत्य बुध्वा, रतः प्रीतः, चितं मदं सञ्चितं गर्वं, मा स्म गमः ; ते भुजेन अमा सह, भूमेः वलयं कश्चित् भुजङ्गमः बिभर्ति। शेषेण यावती भूः ध्रियते, तावती समस्ता तव भुजेन ध्रियते इति भावः।।६१।।

स्मरानलो मानविवर्धितो यः
स निर्वृतिं ते किमपाकरोति।
समन्ततस्तामरसेक्षणे न
समं ततस्तामरसे क्षणेन॥६२॥

रत्नश्री

हे तामरसेक्षणे पद्माक्षि! न विद्यते रसः कामादरोः यस्या इत्यरसेऽरसिके! प्रियसङ्गमसुखवैमुख्यादेवमामन्त्रिता सरोषम्। स्मरः काम एव अनलः तापकारित्वात्। स्मरानलो यो मानेन प्रियसङ्गमविरोधेन गर्वेण वर्धितो दीपितः, सोऽयं क्षणेनैकेन समं सह नाधिकेन कालेन ततो विस्तृतः क्षणमात्रेण विजृम्भितः ते तव निर्वृतिं सुखतां प्रति विशिष्टायासं प्रयोगसम्भवं समन्ततः सर्वथा किं नापाकरोति न हन्ति? अपाकरोत्येव। तस्मात् संगम्यतां प्रियम्। किमनेन दग्धमानेनेति॥

हृदयङ्गमा

तदेव तृतीयचतुर्थपादगतमुदाहरति, स्मरानल इति। —हे तामरसेक्षणे! पद्मलोचने!, ("अथ तामरसं पद्मे ताम्रकाञ्चनयोरपि" इति मेदिनी) रक्तोत्पलनयने! इति वा, मानजनितकोपेनेति भावः, ("रक्तोत्पलं तामरसम्" इति कोषः) हे अरसे! अरसिके!, मानेन विवर्द्धितः विशेषेण वृद्धिं गतः, ते तव, यः स्मरानलः कामाग्निः, स ततः विस्तारं गतः सन्, क्षणेन उत्सवेन, समं सह, समन्ततः सर्वतोभावेनेत्यर्थः, तां पूर्वानुभूतां, निर्वृतिं सुखं, किं न अपाकरोति? न निरस्यति?, अपि तु

रिनस्यत्येवेत्यर्थः, नितरां कामपीड़िताऽसि अत इदानीमेव मांन मुञ्च विलम्बेनालमिति भावः। (मानिनीं प्रति तत्सख्युक्तिरियम्। अत्र तृतीयचतुर्थावभ्यस्ताविति पादाभ्यासयमकम्)।।६२।।

प्रभा

तृतीयचतुर्थपादगतं तदुदाहरति–**स्मरेति।** काचित् सखी प्रियानुगमनाय नायिकां प्रार्थयते। हे तामरसेक्षणे आरक्तपङ्कजनयने कोपादारक्तनयने इति भावः। अरसे अरसिके। उपालम्भोक्तिरियम्। यो मानविवर्धितो मानेन वृद्धिं गमितस्तथा क्षणेन उत्सवेन समं ततः परिपूर्ण एतादृशः स स्मरानलो मदनाग्निः समन्ततः सर्वभावेन तां पूर्वानुभूतां ते निर्वृतिं परमानन्दं न अपाकरोति किम्। अपितु करोत्येव। अतः सुखविनाशकं कोपं त्यक्त्वा तं सेवस्वेत्यर्थः।।६२।।

विवृति

तृतीयपादाभ्यासमाह–

स्मरानलः कामाग्निः मानविवर्धितः मानेन कोपेन विवर्धितः संवर्धितः यः सः निर्वृतिं तां प्राक्तनीं प्रियसमागमजनितां हे तामरसेक्षणे पङ्कजलोचने सखि किं ते तव नापकरोति निरस्यति। समन्ततः समन्तादप[ा]करोत्येव। समं युगपत्ततो विस्तीर्णः। हे अरसे नीरसे क्षणेन झटिति। कांचिद्वयस्यां सञ्जातस्मरज्वरां मानग्रहग्रस्तविग्रहामवलोक्य काचिच्चतुरविलासिनी मर्मस्पृक् नर्मपूर्वकमिदमाह।।

तृतीयचतुर्थयोः पादयोः अव्यपेतं पादयमकं दर्शयति स्मरेति।

समन्ततः, तामरसेक्षणे, न; समं, ततः, तामरसे, क्षणेन। यः मानविवर्धितः स्मरानलः सः, हे तामरसे–तामः शरीरग्लानिः, तस्मिन् रसो यस्याः तस्याः सम्बोधनम्–तामरसेक्षणे पङ्कजाक्षि, समन्ततः परितः, समं युगपत्, ततः विस्तीर्णः, ते निर्वृतिं क्षणेन किं न अपाकरोति? अपाकरोत्येव, मानः परित्यज्यतां इति भावः।।६२।।

प्रभावतो नामन वासवस्य
प्रभावतोऽनाम नवासवस्य।
प्रभावतो नाम न वा सवस्य
विच्छित्तिरासीत् त्वयि पिष्टपस्य॥६३॥

रत्नश्री

प्रभा अस्यास्तीति प्रभावतो दीप्तिमतः गुणोत्कर्षात्। वासवस्य शक्रस्य। नामयतीति हे नामन जेतः! प्रभावतः प्रभावात् शक्तिविशेषप्रभावेण शक्रतुल्येति यावत्। नमनं नामः स न विद्यतेऽस्येति हे अनाम! परप्रणिपातानभिज्ञ! सर्वातिरेकात्। यत एवं [101a] गुणयुक्तो भवान्, अतः कारणात् त्वयि पिष्टपस्य जगतः प्रभौ स्वामिनि सति सवस्य यागस्य नवः प्रत्यग्र आसवः सोमो विलक्षणः पानविशेषः अस्मिन्निति नवासवस्य सोमयागस्येति यावत्। विच्छित्तिर्विघातः। नाम सर्वथा वाचोयुक्तौ वा। न वा नैवासीदभूत्। सर्वदा धर्मक्रिया प्रवर्तत इति कश्चिन्नरपतिः स्तूयते॥

हृदयङ्गमा

पादत्रयाभ्यासं क्रमशो दर्शयितुमादौ प्रथमद्वितीयतृतीयपादगतं दर्शयति, प्रभावत इत्यादि। —हे प्रभावतः प्रभावात्, स्वतेजसा इत्यर्थः, प्रभावतः प्रभा दीप्तिः तत्सम्पन्नस्य, वासवस्य इन्द्रस्यापि, नामन! नामयति नतं करोतीति तत्सम्बुद्धौ, यज्ञभङ्गपारिजातहरणादिना इन्द्रस्यापि गर्वहरणादिति भावः, नामेति प्रसिद्धौ, हे अनाम! नास्ति आमो रोगो यस्य यस्माद्वा तत्सम्बुद्धौ, त्वयि विष्टपस्य भुवनस्य, प्रभौ अधिपे सति, दुर्वृत्तदमनादिना जगत्

पालयति सतीत्यर्थः, अतोऽस्मात् कर्मणः, कंसासुरादिनिधनादित्यर्थः, नवासवस्य नवस्य आसवस्य सुरायाः, सवस्य वा यज्ञस्य च, विच्छित्तिर्विच्छेदः, नासीत् न अभवत्, भोगिनां सुरापानोत्सवः धर्मिष्ठानां यज्ञादिकञ्च सततं प्रववृते इत्यर्थः। (श्रीकृष्णस्तुतिरियम्। अत्र प्रथमद्वितीयतृतीयपादानामभ्यासात्पादत्रयाभ्यासयमकम्)।।६३।।

प्रभा

पादत्रयगतं यमकं दिदर्शयिषुरादौ प्रथमपादत्रयगतमुदाहरति– **प्रभावत इति।** तत्र तावत् पदानि। प्रभावतः अनाम न वासवस्य। प्रभावतः नामन वा सवस्य। प्रभौ अतः नाम नवासवस्य। विच्छित्तिः आसीत् त्वयि विष्टपस्य। कश्चित् सन्नृपतिं स्तौति। हे प्रभावतः स्वप्रभावेन। अनाम नमनं नामः। न विद्यते नामः यस्य स अनामः। तत्संबुद्धिः। कमपि नृपं शरणत्वेन अकृतप्रणाम इत्यर्थः। तथा नामन शत्रून् नमयतीति नामनः तत्संबुद्धिः। त्वयि विष्टपस्य भुवनस्य। प्रभौ स्वामिनि सति। वासवस्य इन्द्रदेवतासंबन्धिनः। प्रभावतः कान्तिमतः। सवस्य यज्ञस्य। विच्छित्तिः विच्छेदो न आसीत्। ब्राह्मणा इन्द्रदेवताकान् यज्ञान् वितेनुरित्यर्थः। वा समुच्चयार्थे। तथैव नवासवस्य नूतनमद्यस्य। विच्छित्तिः विच्छेदः। पानेन विनाश इति यावन् न आसीत्। अन्ये तु अयं श्लोकः कृष्णवर्णनपर इति मन्यन्ते। तद्यथा–हे प्रभावतः प्रभासंपन्नस्य। इन्द्रस्यापि नामन विनम्रकारक। यज्ञभङ्गपारिजातहरणादिना इन्द्रस्य गर्वहरणादिति भावः। तथा नास्ति आमः रोगो यस्य तत्संबुद्धिः अनाम। त्वयि विष्टपस्य प्रभौ सति नवासवस्य नूतनसुरायाः।

सवस्य यज्ञस्य च विच्छेदो नासीत्। यदूनां सुरापानोत्सवो धार्मिकाणां च यज्ञक्रियाः सततं प्रावर्तन्त। यदूनां सुरापानोत्सुकत्वं पुराणप्रसिद्धमेव।।६३।।

विवृति

अव्यवहितं प्रथमपादाभ्यासं दर्शयति–

प्रभावतः प्रभावेन वासवस्याखण्डलस्य तामनन्तमनन्तं (नामननमनं) कारयतीति नामनः तस्यामन्त्रणम्। [नमन-]क्रियाया कारक, प्रभावतः (?) प्रभावतः तेजस्विनः वासवस्य नामेति। स्फुटम्। नवः प्रत्यग्रः आसवः सुरा। दुग्धाब्धिमथनोत्थिता यस्य तस्य नामनः। अथवा आसवस्य मद्यस्य नाम न वा आसीत् नैवाभूत्। वाशब्दः एवकारार्थे। कदेत्याह। त्वयि भवति विष्टपस्य जगतः प्रभौ स्वामिनि सति। अतो हेतोः। सवस्य सूयत इति सवः यागः तस्य नासीन्न बभूव। केत्याह विच्छित्तिः विच्छेदः। त्वयि भुवनं रक्षति कदाचित् न यज्ञानां विच्छेदो जात इत्यर्थः। अथ वा किंविशिष्टस्य सवस्य यज्ञस्य नवासवस्य नवः आसवः (स)यस्मिन् स नवासवः। सः कः पौण्डरीकः। पौण्डरीके यागे सुराऽप्यस्ति। यदुक्तम्–

'पौण्डरीके सुरां पिब'

इति। अतः यज्ञविशेषणं नवासवस्येति।।

अथ पादस्य द्विरभ्यासेन चत्वारि दर्शयिष्यन् प्रथमं प्रथमद्वितीयतृतीयपादैः उदाहरणं दर्शयति **प्रभावत इति।** प्रभावतः, नामन, वासवस्य; प्रभावतः, अनाम, नवासवस्य; प्रभौ, अतः,

नाम, न, वा, सवस्य; विच्छित्तिः, आसीत्, त्वयि, विष्टपस्य। प्रभावतः तेजस्विनः, वासवस्य शक्रस्य, प्रभावतः स्वमहिम्ना, नामन न्यक्कारकर, नवासवस्य नवस्य आसवस्य, अनाम अप्रापक। अमु गतौ इत्यस्मात् आङ्पूर्वात् पचाद्यच्–अमद्यप इति यावत्, त्वयि विष्टपस्य प्रभौ सति, अतः अस्मिन् लोके, सवस्य यज्ञस्य, विच्छित्तिः न वा आसीत्। न–वा शब्दौ नेत्यर्थे; अनवरतं क्रतवः प्रवर्त्यन्ते इति भावः।।६३।।

परं पराया बलवा रणानां
धूलीः स्थलीर्व्योम विधाय रुन्धन्।
परंपराया बलवारणानाम्
परं पराया बलवारणानाम्॥६४॥

रत्नश्री

परमुत्कृष्टम्। गुणयोगात् परं शक्र परायाः त्वं युद्धरसेनातिगतवानसि। किंभूतम्? बलं सामर्थ्यं वारयतीति बलवाः। वारयतेः क्विबन्तस्य रूपम्। कस्य? रणानां परसमराणां परयुद्धाभिभावीति (?) कुर्वन्। बलवारणानां सेनागजानां बलं प्राणं वाति गच्छतीति बलवः। आतोऽप्रादेः कः। सप्राणः आरणः शब्दो येषामिति बलवारणानां गम्भीरोदीर्णगर्जितानां सम्बन्धिन्याः परम्परायाः परिपाट्या घटायाः सत्त्वादियोगात् प्रकृष्टायाः सकाशात् धूलीः स्थलीः पांशुप्रकरान् तत्प्रेरणाय विधाय कृत्वा पराया इति परम्पराया इति बाह्यधूली स्थलीविकारेति। लुग्लोपलक्षणा पञ्चमी। व्योमाकाशं रुन्धन्नावृण्वन् पराया इति प्रकृतम्॥

हृदयङ्गमा

तदेव प्रथमद्वितीयचतुर्थपादगतमुदाहरति, परमिति। –(अत्र पदच्छेदप्रकारो यथा, –परं, परायाः, बलवाः, रणानाम्; परम्परायाः बलवारणानाम्; परं, पराय! अबलवारणानाम् इति) हे पराय! परः उत्कृष्टः, अयः शुभावहविधिर्यस्य तत्सम्बुद्धौ, हे परमकल्याणिन्नित्यर्थः, हे बलवाः! बलेन शक्त्या, वारयति निवारयति, शत्रूनिति शेषः, तत्सम्बुद्धौ, (वारयतेः क्विपि रूपम्)

त्वं बलमेषामस्तीति बलाः बलवन्तः, (अर्शआदित्वादच् प्रत्ययः) वारणां हस्तिनः येषु तथोक्तानां, तथा अबलान् दुर्बलान्, वारयन्ति विमुखीकुर्वन्तीति अबलवारणाः तेषां, रणानां युद्धानां, परम्परायाः समूहस्य, स्थलीः रणभूमीरित्यर्थः, धूलीर्विधाय रेणुमयीः कृत्वा, प्रभूतरथाश्वसैन्यानां पादताड़नेनेति भावः, व्योम आकाशं, रुन्धन् आच्छादयन् सन्, धूलीभिरिति भावः, परं श्रेष्ठं, बलिनमिति यावत्, परं शत्रुं, परायाः गतवान्, जितवान् असीत्यर्थः, (परापूर्वकात् याधातोः लङः मध्यमपुरुषैकवचनम्। राज्ञः स्तुतिरियम्। अत्र प्रथमद्वितीयचतुर्थाः पादा अभ्यस्ता इति पादत्रयाभ्यासयमकम्)।।६४।।

प्रभा

प्रथमद्वितीयचतुर्थपादगतं तद्दर्शयति–**परंपराया इति।** पदच्छेदः। परंपरायाः बलावारणानाम्। परं परायाः बलवारणानाम्। धूलीः स्थलीः व्योम्नि विधाय रुन्धन्। परं परायाः बलवाः रणानाम्। राज्ञः प्रभाववर्णनमिदम्। बलस्य शत्रुसैन्यस्य वारणानां निवारकाणाम्। बलवारणानाम् प्रबलगजानाम्। परायाः श्रेष्ठायाः। परंपराया पङ्क्तेः। हेत्वर्थे पञ्चमी। परंपरारूपहेतुना। रणानां स्थलीः भूमीः। व्योम्नि वियति। धूली धूलिरूपाः। विधाय बलवाः बलेन सामर्थ्येन शत्रून् वारयतीति बलवाः। त्वं परंश्रेष्ठम्। परं शत्रुम्। रुन्धन् व्याप्नुवन्। परायाः अगाः। परापूर्वकस्य यातेर्लङो रूपम्। शत्रुमाक्रान्तवानसीत्यर्थः।।६४।।

विवृति

द्वि[?]तीयपादव्यवहितं प्रथमपादाभ्यासं द्विराह–

परं वैरिणं पराया अगमः गतोऽसि। कथंभूतः त्वं बलवाः बलं शक्तिः तद्वातीति बलवाः वाते(:) क्विप्। यद्वा बलं वैरिवीर्यं चतुरङ्गं वा वारयति निषेधतीति बलवाः। वारयतेः णिचि क्विप्। रेफस्य विसर्जनीये रूपम्। रन्नानां (रणानां) संग्रामाणां धूलीनां स्थलीः पांसुराशीः व्योम्नि नभः स्थले विधाय कृत्वा रुन्धन् पर[रं]स्वामिनं पराया: प्रकृष्टायाः परम्परायाः घटायाः बलवारणानां बलेन सामर्थ्येन युक्ता ये वारणा हस्तिनः तेषाम्। .... (अथवा बलवारणानां या परम्परा समूहः तां रुन्धन्। कीदृशी परम्परेत्याह पराया प्रकृष्टागमनां प्रचुरागमने(ति) यावत्। अन्यत् समस[-मान]म्)।।

प्रथमद्वितीयचतुर्थपादैः यमकं दर्शयति–**परम्पराया** इति। परम्परायाः, बलवारणानां, परं, परायाः, बलवारणानां, धूलीः, स्थलीः, व्योम्नि, विधाय, रुन्धन्, परं, पराया, बलवाः, रणानाम्। रणानां बलवाः बलज्ञः–वातेः विचि रूपम्–बलवारणानां परबलनिवारणानां, बलवारणानां बलवतां गजानां, परायाः उत्कृष्टायाः, परम्परायाः पङ्क्तेः, परं परतः स्थितं, परं शत्रुं, हयखुरजनिताः धूलीः व्योम्नि स्थलीः विधाय, विश्वं रुन्धन् चक्षुषोः अविषयं कुर्वन् सन्, परायाः अगाः। अनेकगजघटान्तरितं दूरस्थमपि शत्रुं गतवान्, गजांश्च शत्रुं च हतवान् इत्यर्थः।।६४।।

न श्रद्धधे वाचमलज्ज! मिथ्या–
भवद्विधानामसमाहितानाम्।
भवद्विधानामसमाहितानां
भवद्विधानामसमाहितानाम्॥६५॥

रत्नश्री

हे अलज्ज! भवद्विधानां युष्मादृशानाम्। असमाहितानां विक्षिप्तचेतसां भवे संसारे द्वौ प्रकारौ अहङ्कारममकारौ रागद्वेषौ वा येषामिति भवद्विधानाम्। अत एव यथा आत्मा न वञ्चनीय[:] तथा परोऽपीति समप्रवृत्त्यभावादसमाहितानाम्। असमाश्च तेऽहिताश्चेति विग्रहः। अत एव न विद्यते हितं श्रेयो धर्मो येषामिति अहितानां वाचं मिथ्या भवत् वितथं जायमानं विधानमनुष्ठानमन्यथा विधायान्यथाकरणाद् यस्यामिति मिथ्याभवद्विधानाम्। अत एवासमस्यातुलस्य महतः अहेः सर्पस्येव तानो गतिः कौटिल्यादियोगात् यस्यामित्यसमाहितानां गिरो न श्रद्दधे न [101b] प्रत्येमीति केनचित् कश्चित् सरोषमधिक्षिप्यत इति॥

हृदयङ्गमा

द्वितीयतृतीयचतुर्थपादगतं पादत्रयाभ्यासमुदाहरति, नेति। –हे अलज्ज! निस्त्रप!, असमाहितानाम् अनवहितचित्तानाम्, अन्यासक्तत्त्वात् असंयतात्मनाम् इत्यर्थः, तथा असमा असदृशाः, अतिबहुला इत्यर्थः, अहिताः शत्रवः येषाम्, अधिकशत्रूणामित्यर्थः, भवद्विधानां त्वत्सदृशानां धूर्त्तानां, मिथ्याभवत् असत्यम्भवत्, विधानं कार्य्यं यस्यास्तां कार्य्येषु

अपरिणतामित्यर्थः, तथा असमः विषमः, अतिदारुण इत्यर्थः, यः अहिः सर्पः, तस्येव तानो विस्तारः, वक्रगतिरिति यावत्, यस्याः तादृशीम्, अतिवक्रदारुणामित्यर्थः, पुनश्च भवे उत्पत्तौ, श्रवणमात्र एवेत्यर्थः, द्विधा द्विविधः, अनः प्राणः, अर्थरूपः इति यावत्, यस्याः तथाभूताम्, अर्थानामेव वाचां प्राणत्वात् इति भावः, यद्वा, –भवे द्वे द्विप्रकारे, धाने धारणे, अर्थग्रहणे इत्यर्थः, यस्या तां, श्रवणसमकालमेव द्व्यर्थबोधिकामित्यर्थः, वाचं न श्रदधे न विश्वसिमि। (शठनायकं प्रति नायिकाया उक्तिरियम्। अत्र द्वितीयतृतीयचतुर्थपादानामभयासात् पादत्रयाभ्यासयमकम्)।।६५।।

प्रभा

अत्र प्रथमतृतीयचतुर्थपादाभ्यासोदाहरणमावश्यकम्। परं तन्नोपलभ्यते। न च टीकाकारैरपि विवृतमस्तीति तद्बहोः कालादारभ्य विच्छिन्नमिति भाति। अतस्तद्विमर्शकैर्मार्गणीयम्। इदानीं पुनः, द्वितीयपादमारभ्य चतुर्थपादान्तानां पादत्रयगतं यमकमुदाहरति–न **श्रद्दधे इति**। पदच्छेदः–न श्रद्दधे वाचम् अलज्ज मिथ्याभवद्विधानां असमाहितानाम् भवद्विधानां असमाहितानाम् भवद्विधानाम् असमाहितानाम्। हे अलज्ज निर्लज्ज। भवद्विधानां भवत्सदृशानाम् वाचं उक्तिम् न श्रद्दधे न विश्वसिमि। कथंभूतां वाचम्। मिथ्याभवद्विधानां मिथ्याभवद् असत्यं भवद् विधानम् प्रतिपाद्यं यस्याः सा ताम्। तथा असमाहितानाम् असमः असरलः वक्र इति यावत्। यः अहिः सर्पः तद्वत् तानो विस्तारो यस्याः सा ताम्। अतिवक्रामित्यर्थः। तथा भवद्विधानां भवत् प्रतिक्षणं नवं नवं जायमानं विधानं विधिर्यस्यास्ताम्। अथवा भवे उच्चारणसमये एव द्विधा आनः प्राणः अर्थरूपो यस्यास्ताम्। किंभूतानां भवद्विधानाम्।

असमाहितानाम् नास्ति समाहितं समाधानं येषां तथाविधानाम्। सदैव व्यग्रवृत्तीनामित्यर्थः। तथैव असमाहितानां न समाः असमाः विषमाः ये अहिताः शत्रवस्तेषां असमाहितानाम्। मम विषमशत्रुस्वरूपाणामित्यर्थः॥६५॥

विवृति

द्वितीयपादस्य द्विरभ्यासमाह–

न श्रद्दधे न प्रत्येमि। वाचं गिरं त्वदीयां मिथ्या वितथार्थां अलज्जां (ज्ज)निस्त्रपां (प) भवद्विधानां त्वादृशानां असत्यभाषणानामेवंवादिनः(नां) असमाहितानां न समाहिता असमाहिताः तेषां चपलानाम्। कथंभूतां वाचं भवद्विधानं(नां) भवज्जायमानं विधानं प्रकारो यस्या (स्ताम्) एवं वादिनो भवन्तः किंविशिष्टा इत्याह–असमाहितानां विषमशत्रूणां, पुनरपि किंविशिष्टानामित्याह भवद्विधानां भवे नीलकण्ठे द्विधा भेदो येषां ते तथोक्ताः। अथवा (भवद्)द्विधानां द्वैधीभावः। भव(द्)द्विधानं यस्या[अ]सौ भव(द्)द्विधानां(ना) [भवद्]द्वैधीभावानां(–भावा तां), अथवा भवती जायमाने द्वै(द्वि)धाने सत्यानृतलक्षणे सत्यां[यस्यां] सा भवद्विधानां (–ना ताम्)। पुनरपि किंविशिष्टां वाचमित्याह। असमाहितानां न समः असमः स चासावहिश्च तस्येव तानः प्रपञ्चः यस्याः सा असमाहितानेति। असमाहितानां विषमद्वेषिणाम्। हे अलज्ज त्वादृशानामस्थिरचित्तानां गिरं व्यलीकां जायमानां अप्रयोजनं कुटिलभुजङ्गसमानां जातद्वैधीभावां सत्यानृतसमाश्रयामहं न प्रत्येमीत्यर्थः॥

अथ द्वितीयपादं विना त्रिपादावृत्तेः उदाहरणं पाठान्तरेषु

अन्वेष्टव्यम्। अत्र प्रथमपादं विना त्रिपादावृत्तिं दर्शयति–**नेति।** न, श्रद्दधे, वाचम्, अलज्ज, मिथ्याभवद्विधानाम्, असमाहितानां भवद्विधानाम्, असमाहितानां, भवद्विधानाम्, असम, अहितानाम्। हे अलज्ज निर्लज्ज, असम–समः सश्रीकः–असम अलक्ष्मीक; भवद्विधानां–भंनक्षत्रं, भवत् आकाशं, भवतः इव विधा प्रकारः येषां तेषाम्–तुच्छस्वरूपाणामिति यावत्–भवद्विधानां भवादृशानाम्, असमाहितानां प्रमत्तानां, मिथ्याभवद्विधाना मिथ्याभूतप्रकाराणाम्, अहितानां हितेतराणाम्, असमाहितानां विषमभुजङ्गविस्ताराम्–कुटिलामिति यावत्, वाचं न श्रद्दधे। एवंविधानां भवादृशानाम् एवंभूतां वाचं न श्रद्दधे, तेषां मिथ्यावादित्वात्।।६५।।

सन्नाहितोमानमराजसेन
सन्नाहितोमानमराजसेन।
सन्ना हितोमानमराजसेन
सन्नाहितो मानम राजसे न॥६६॥

रत्नश्री

अहितानामुमाभिख्या अहितोमा। सन्ना नि[र]स्ता अहितोमा यत इति हे सन्नाहितोम निरस्तशत्रुशोभ! आनमतीत्यानमः कर्तर्यच्। राज्ञः सेना राजसेना। आनमा आनता राजसेना यस्मिन्निति हे आनमराजसेन! न नमतीत्यनमः हे अनम! रजसो विकारो राजसो दुष्टः। न राजसोऽराजसः सात्त्विकः। हे अराजस! इन स्वामिन्! हिता उमा गौरी यस्य स हितोमः। न विद्यते मा श्रीरस्येत्यमः। न अमोऽनमः सश्रीकः। राजा चन्द्रः। स[ललाटभूषा] यस्येति अनमराजा, हितोमश्चासौ अनमराजा च हितोमानमराजा शङ्करः। तेन सेनः सनाथः तद्युक्तोऽहितमानमराजसेनः। [तस्य सम्बुद्धिः]। सन्नाहितो दंशितः मानमाहितः आगतः प्राप्तः सन्ना सत्पुरुषः स न भवन् त्वं मा न राजसे, एवं चानेकगुणयुक्तस्त्वमतितरां राजस इत्यर्थः। अत्र हेतुफलभावो यथायथं योजनीयः। यतः सन्नाहितः, तस्मादानमराजसेनः सन्नाहितोमश्च, यतश्च मानमाहितः, तस्मादनमः। यतश्च हितोमानमराजसेनः, तस्मादसन्ना अराजसश्च। यतश्चैतदेवं अतो राजसे वा नेति॥

हृदयङ्गमा

पादत्रयगतं द्विरभ्यासतुदाहृत्य इदानीं पादचतुष्टयगतं

त्रिरभ्यासमुदाहरति, सन्निति। –हे सन्! साधो!, हे आहितोमानमराजसेन! न नमन्तीति अनमाः ब्राह्मणाः, (पचादित्वादच्) अनमानां राजा अनमराजश्चन्द्रः, (चन्द्रस्य द्विजराजापरपर्य्यायत्वात्) उमा पार्वती च, अनमराजश्च तौ उमानमराजौ, आहितौ स्वाङ्गे धृतौ, उमानमराजौ पार्वतीद्विजराजौ येन सः आहितोमानमराजः शिवः, तेन सेनः इनः प्रभुः, उपास्य इति यावत्, ("इनः सूर्य्ये प्रभौ" इत्यमरः) तेन सह वर्त्तमानः सेश्वरः इत्यर्थः, तत्सम्बुद्धौ, हे शिवभक्त! इत्यर्थः, तथा हे अमानम! अमाना अपरिमाणा, मा लक्ष्मीः, सम्पदित्यर्थः, यस्य तत्सम्बुद्धौ, हे प्रभूतसम्पत्तिमन्!, पुनश्च हे राजसेन रजोगुणजक्रोधादिविकारेण, मानम! मा नम्यते न वशीक्रियते इति तत्सम्बोधनं, हे क्रोधलोभाद्यनायत्तीकृत! इत्यर्थः, किञ्च हे अमानमराजसेन! मानः सम्मानः, मा लक्ष्मीः ते मानमे, न विद्येते मानमे यस्याः सा अमानमा सम्मानसम्पद्विहीना, राजसेना विपक्षराजचमूर्यस्य तत्सम्बुद्धौ, सन्नाहितः कृतयुद्धौद्योगः सन्, न राजसे न शोभसे, त्वमिति शेषः, यतस्त्वं सन्नाहितः सन्ना अवसादं गताः, अहिताः शत्रवो यस्य तथोक्तः, तथा सन्ना सत्पुरुषः, साधुः इत्यर्थः, ततश्च हितः सर्वेषां हिते रत इत्यर्थः, अतस्तव युद्धयात्रा न युज्यते इति भावः। (शैवं राजानं प्रति युद्धनिवर्त्तकवचनम्। अत्र सर्व एव पादा अभ्यस्ताः)।।६६।।

प्रभा

इदानीं पादचतुष्टयवृत्तिं त्रिरभ्यासमुदाहरति-**सन्नाहितोमानेति**। कश्चिद्राजानं स्तौति। तत्र तावत्पदच्छेदः-सन् आहितोमानमराजसेन। सन्नाहित उमानम राजसेन। सन्ना हितः अमान् अमराजसेन।

दर्ता ३११६१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सन्नाहितः मा अनम राजसे न। अन्वयार्थः-हे अनम नमतीति नमः न नमः अनमः तत्संबुद्धिः। कस्यापि पुरुषस्य अप्रणत इत्यर्थः। तथा आहितोमानमराजसेन न नमन्ति परं इति अनमाः द्विजास्तेषां राजा अनमराजः द्विजराजः। चन्द्र इत्यर्थः। सोस्माकं ब्राह्मणानां राजा इति श्रुतिः। उमा च अनमराजश्च उमानमराजौ तौ आहितौ स्वाङ्के स्वशिरसि च स्थापितौ येन स आहितोमानमराजः शंकरः। इनेन सह इति सेनः। सनाथ इति यावत्। आहितोमानमराजेन सेनः तत्संबुद्धिः आहितोमानमराजसेन। शंकरस्वामिक इत्यर्थः। तथा सन्नाहित सन्नाः अवसन्नाः विनष्टा इति यावत्। अहिताः शत्रवः यस्य तत्संबुद्धिः। विनष्टशत्रो। तथा उमानम नमतीति नमः उमायाः नम उमानम। उमाभिवादक। तथा राजसेन राजसाः रजोगुणप्रधानाः क्षत्रियास्तेषाम् इन स्वामिन्। क्षत्रियश्रेष्ठ। तथा अमराजसेन अमरान् अजति क्षिपतीति अमराजा एतादृशी सेना यस्य तत्संबुद्धिः हे अमराजसेन। देवाभिभवकसैन्य। एतादृश हे नृप। त्वं सन्ना सत्पुरुषः। तथा हितः सर्वभूतहितः। अमान मातीति मान् न मान् अमान् महानित्यर्थः। तथा सन्नाहितः कवचितश्च सन् न मा राजसे। अपितु राजसे एव। अत्रापि तत्तट्टीकाकारैर्विविधा अर्था दर्शितास्ते तत्रैव द्रष्टव्याः।।६६।।

विवृति

प्रथमपादस्य त्रिरभ्यासमाह–

उमा ब्रह्मा। तस्य समानः [मानः] उमानः पूजा सन्नाहितः सन्नद्धः। सज्जीकृतः उमानो ब्रह्मपूजा यस्मिन् तस्मिन्(?) सन्नाहितोमानं यथा भवति एवम्। अराजसो रजोगुणेन निर्वृत्तः [राजसः न राजसः], अराजसः सत्त्वप्रकृतिः तस्यामन्त्रणं हे

अराजस। इह(न) स्वामिन्। सन्ना नष्टा अहितानामरातीनां उमा कार्तिः यस्मादसौ सन्नाहितोमः न नमतीत्यनमा राज्ञः सेना चतुरङ्गसैन्यं अनमा अभङ्गा राजसेना यस्यासौ अनमराजसेनः। सन्ना सत्पुरुषः। उमा गौरी, न विद्यते आ(अ)मो रोगो यस्यासावनमः स चासौ राजा च क्षयामयरहितश्चन्द्रः उमा चानमराजश्च उमानमराजौ। आहितौ स्थापितौ अर्धदेहजटाजूटयोरुमानमराजौ येनासावाहितोमानमराजः शिवः। तेन सेनः सह तेन स्वामिना वर्तत इति सेनः। देहार्धमूर्धविधृतगौरीचन्द्रहरसनाथः। (अथवा हिता उमा गौरी यस्य स हितोमः। मा लक्ष्मीः सा न विद्यते यस्य सोऽमः। न अमः अनमः। सश्रीक इति यावत्। अनमो राजा चन्द्रो यस्य सोऽनमराजा। हितोमश्चासावनमराजा च हितोमानमराजा। ईश्वर इति यावत्। इनः स्वामी तेन सह वर्तत इति सेनः हितोमानसमराज्ञा सेनः सनाथः हितोमानमराजसेनः। महादेवसनाथ इति यावत्।) सन्नाहितः कृतसन्नाहः मा प्रतिषेधे। अनमः अकृतप्रणामः उन्नत कृत राजसे शोभसे नेति द्वितीयायाः (तोयः) प्रतिषेधः। तेनायमर्थः। हे राजन् सत्पुरुषो यः त्वं कृतसंन्नाहः मा न राजसे अपि तु राजस एव। सन्नाहितोमान[नं] त्वतः (कृत) ब्रह्मपूजा[जं] यथा भाव्येवं हे ध्वस्तारातिकीर्ते अभङ्गचतुरङ्गबल, गौरीचन्द्रधरहरसनाथ, परमेश्वर, रजोरहित, स्वामिन्निति कश्चिदुपश्लोक्यते।।

त्रिरभ्यासं महायमकं नाम दर्शयति–**सन्नाहित** इति। सन्नाहितः, मानम्, अराजसेन; सन्ना, हितः, अमानम, राजसे, न; सन्नाहितः, अमानमराजसेन; सन्, न, आहितोमानमराजसेन। सन्नाहितः, कवचितः ; मानम् अभिमानम्; अराजसेन–राजसाः रजोगुणवन्तः, अराजसाः तदितरे, सात्त्विकाः इति यावत्, तेषां इनः स्वामी अराजसेनः– तस्य सम्बोधनम्; सन्ना सत्पुरुषः ; हितः

गतः; अमानम अमितलक्ष्मीक; राजसे शोभसे; नेति निषेधे; सन्नाहितः सादितशत्रुः ; अमानमराजसेन-अमा अमिता, अनमा उन्नता, राजा राजमाना, सेना यस्य तस्य सम्बोधनम्; सन् भवन्; नेति निषेधे; आहितौ प्राप्तौ, उमा गौरी आनमो वक्त्रः राजा चन्द्रश्च, येन सः-आहितोमानमराजः, तेन सेन सस्वामिक। हे अराजसेन, अमानम, अमानमराजसेन, आहितामानमराजसेन, मानं हितः सन् सन्नाहितः सन्नाहितः सन्ना त्वं न न राजसे। इति दृष्टादृष्टबलाभ्यां जितशत्रुं राजानमुपस्तौति।।६६।।

सकृद् द्विस्त्रिश्च योऽभ्यासः पादस्यैवं प्रदर्शितः।
श्लोकद्वयं तु युक्तार्थं श्लोकाभ्यासः स्मृतो यथा॥६७॥

रत्नश्री

सकृदेकवारं द्विः वारद्वयं त्रिः वारत्रयं च पादस्य सम्बन्धी योऽभ्यासः स एवम् उक्तेन प्रकारेण दर्शितः समुदाहृतः। श्लोकयोर्द्वयं द्वौ श्लोकौ युक्तोऽर्थोऽभिधेयं येनेति युक्तार्थमपृथगर्थयुक्तम्, इत्यनूद्य श्लोकाभ्यासः स्मृतो विज्ञायते इति विधीयते यथेत्युदाहरति॥

हृदयङ्गमा

सम्प्रति पादाभ्यासमुपसंहृत्य श्लोकाभ्यासं निर्दिशति, सकृदिति। –एवम् उक्तप्रकारेण, पादस्य सकृत् एकवारं, द्विः वारद्वयं, त्रिश्च वारत्रयञ्च, यः अभ्यासः पुनरावृत्तिः, सः प्रदर्शितः उदाहृतः। (तत्र सकृदभ्यासः पादद्वयगतः, द्विरभ्यासः पादत्रयगतः, त्रिरभ्यासः पादचतुष्टयगत इति बोद्धव्यम्)। युक्तः सङ्गतः, अर्थोऽभिधेयः यस्य तं सङ्गतार्थम्, एकवाक्यतापन्नमित्यर्थः, श्लोकद्वयं समानानुपूर्वपदवर्णघटितं पद्यद्वितयं, श्लोकाभ्यासः श्लोकाभ्याससंज्ञकः, स्मृतः कथितः। यथेति वक्ष्यमाणोदाहरणार्थम्॥६७॥

प्रभा

पादाभ्यासमुपसंहरन् श्लोकाभ्यासं दर्शयति–**सकृदिति।** पादस्य श्लोकतुरीयभागस्य। सकृत् एकवारम्। द्विः द्विवारम्। त्रिः त्रिवारम् च। यः अभ्यासः आवृत्तिः। स प्रदर्शितः उदाहृतः। तत्र सकृदभ्यासः

पादद्वयगतः, द्विरभ्यासः पादत्रयगतः, त्रिरभ्यासश्च पादचतुष्टयगत इति बोध्यम्। युक्तः एकवाक्यार्थतया परस्परसंबद्धः अर्थः अभिधेयो यस्मिंस्द् युक्तार्थम्। एकवाक्यतया एकविशेष्यकान्वयबोधकमित्यर्थः। श्लोकद्वयम् समानानुपूर्विकं श्लोकाभ्यासयमकमित्यर्थः। स्मृतः। यथेति उदाहरणप्रस्तावाय।।६७।।

विवृति

पादाभ्यासमुदाहृत्य प्रकृतमुपसंहरति–

एकशो द्विः द्विशः। त्रिः त्रिशः यः पादस्याभ्यासः आवृत्तिस्स दर्शितः उक्तः इत्यर्थः। एवमनन्तरोक्ति[क्त]न्यायेन श्लोकद्वयन्तु जातेर्वृत्तस्य वा द्वयं युग्मं युक्तार्थमनुरूपार्थं श्लोकाभ्यासः समा[तदा]वृत्तिः स्मृतः चिन्तितः। यथेत्युदाहरति।।

एवं पादाभ्यासं दर्शयित्वा श्लोकाभ्यासमुपक्षिपति– **सकृदिति।** युक्तार्थं परस्परसम्बद्धार्थम्। अनेन पदभेदपठितं व्यावर्तयति।।६७।।

विनायकेन भवता वृत्तोपचितबाहुना।
स्वमित्रोद्धारिणाभीता पृथ्वीयमतुलाश्रिता।।६८।।

रत्नश्री

भवता त्वया, विनयति जगत् सनातने मार्गे निवेशयतीति [तेन] विनायकेन विनेत्रा। वृत्तो वर्तुल उपचितः पीनो बाहु[102a]रस्येति वृत्तोपचितबाहुना। सुष्ठु अमित्राण्युद्धरतीति स्वमित्रोद्धारिणा इयं पृथ्वी भूमिरभीता स्वपरचक्रोपद्रवाभावात् निर्भया, अतुला विपक्षैस्तुलयितु- मशक्यत्वाद् अपरोपमा, आश्रिता अधिष्ठिता वर्तत इति कश्चिद् राजा स्तूयत इत्यनेनार्थेन तावदेकः श्लोकः।।

तव तावदीदृशोऽभ्युदयः, त्वद्विपक्षस्य का गतिरित्ययमेव श्लोकोऽर्थान्तरेणाभ्यस्यते–

हृदयङ्गमा

तमेव श्लोकाभ्यासमुदाहरति, विनायकेनेति। –हे राजन्। विनायकेन विनेत्रा, दुर्जनानां शासित्रा इत्यर्थः, तथा वृत्तौ वर्त्तुलौ, उपचितौ पीनौ च, बाहू भुजौ यस्य तथोक्तेन, महाभुजेनेत्यर्थः, स्वमित्राणां सु शोभनानाम्, अमित्राणां शत्रूणां, शौर्य्यादिसम्पन्नानामपि रिपूणामित्यर्थः, उद्धारिणा विनाशकेन, तथा अतुलाश्रिता तुलां तुलनाम्, आश्रयतीति तुलाश्रित, स न भवतीति अतुलाश्रित् तेन, केनापि सादृश्यं न भजता इत्यर्थः, निरुपमेण इति यावत्, (श्रयतेः क्विप्) भवता हेतुना, इयं पृथ्वी वसुधा, अभीता दुर्जनेभ्यो भयरहिता जाता इत्यर्थः।।६८।।

प्रभा

प्रस्तुतं श्लोकाभ्यासयमकमुदाहरति–**विनायकेनेति** कश्चिद् विनष्टारिर्नृपः स्तूयते। तत्र प्रथमश्लोकस्थतृतीयान्तानि पदानि अरिविशेषणानि द्वितीयश्लोकस्थानि वर्णनीयनृपविशेषणानीति ज्ञेयम्। तथा च अयमर्थः। विनायकेन विगतो नायको यस्य विनायकस्तेन नियामकशून्येन। तथा वृत्तोपचितबाहुना वृत्तौ संजातौ उपचितं चितासमीपे बहू यस्य तेन नष्टप्रायबाहुना इत्यर्थः। स्वमित्रोद्धा स्वमित्त्राणि स्वंसुहृदः। अथवा स्वं वित्तं मित्राणि च उज्जहाति परित्यजति इति स्वमित्त्रोद्धा। उत्पूर्वकाद् ओहाक् त्यागे इत्यस्मात् क्विपि तृतीयैकवचनम्। तथा भीता भियं इता गतेन। भयभीतेन। भवता सता। अरिणा शत्रुणा। पृथ्वी दीर्घा। यमतुला रणपराङ्मुखानां क्षत्रियाणां दण्डनार्थं तप्तायोनिर्मिता लोकप्रसिद्धा तुला। आश्रिता आरूढा।।६८।।

विनायकेन भवता वृत्तोपचितबाहुना।
स्वमित्रोद्धारिणाभीता पृथ्वी यमतुलाश्रिता॥६९॥

रत्नश्री

विगतो नायकोऽस्मादिति विनायकेन नेतृशून्येन त्वयि रुष्टे परित्रायकस्याभावात्। भवता सता। चितायाः समीप उपचितम्। वृत्त उपरतो निर्जीवः [स्वपक्ष]समुदायोपरमात् उपचितो बाहुरस्येति वृत्तोपचितबाहुना। अत एव सुहृत्परित्यागात् स्वानि मित्राणि उज्जहातीति स्वमित्रोद्धा, [उत्पूर्वकस्य ओहाक् त्यागे इत्यस्य] क्विबन्तस्य तृतीयैकवचनान्तस्य रूपम्। अरिणा त्वया विपक्षेण। अभीता अभिमुखमागता। पृथ्वी महती यमस्य तुलां उपमालक्षणाम्। आश्रिता प्राप्ता। त्वदरातेः पुनरीदृशी गतिः। अनेनार्थान्तरेण स एव श्लोक अभ्यस्त इति श्लोकाभ्यासोऽयमीदृशः॥

हृदयङ्गमा

विनायकेनेति।—किञ्च अभीता युद्धाय भवदभिमुखमागच्छता, (अभिपूर्वादिण्धातोः क्विपि तृतीयैकवचनम्) अरिणा शत्रुणा, तवेति शेषः, विनायकेन नायकरहितेन, तथा वृत्तौ जातौ, उपचितौ चितामुपगतौ, श्मशानस्थचितामारूढौ इत्यर्थः, [उपगतौ चितामिति विग्रहेण "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" (वा०) इति तत्पुरुषः] बाहू यस्य तथोक्तेन, तथा स्वमित्राणि निजबन्धून्, स्वानि धनानि, मित्राणि बन्धूंश्च इति वा, उज्जहाति परित्यजतीति स्वमित्रोद्धाः तादृशेन, परित्यक्तस्वजनेन परित्यक्तधनबान्धवेनेत्यर्थः वा, [स्वमित्रशब्दात् उत्पूर्वकस्य जहातेः क्विपि तृतीयैकवचनम्

"आतो धातोः" (६/४/१४० पा०) इति धातोराकारलोपः] भवता पूर्वोक्तप्रकारेण सता, पृथ्वी गुर्वी, यमतुला यमस्य अन्तकस्य, तुला परिमाणयन्त्रं, विचारस्थानम् इति भावः, (मानयन्त्रे न्यूनाधिकत्वनिश्चयवत् कृतान्तविचारालयेऽपि पुण्यपापनिश्चयकरणात् तस्य तुलायन्त्रतुल्यत्वमवगन्तव्यम्) आश्रिता प्राप्ता, यमसदनं गतम् इत्यर्थः। (राज्ञः स्तुतिविषयकं श्लोकद्वयमिति। समानवर्णादिघटितश्लोकद्वयस्य युक्तार्थत्वात् श्लोकाभ्यासोऽयम्। केचित्तु श्लोकद्वयावृत्तिरूपं श्लोकाभ्यासयमकं महायमकमाहुः ; उदाहृतञ्च यथा, –"अभियाता वरं तुङ्गं भूभृतं रुचिरं पुरः। कर्कशं प्रथितं धाम ससत्त्वं पुष्करेक्षणम्।।" पुनरपि– "अभियाऽतावरम्–" इत्यादिपठनरूपं श्लोकद्वयम्)।।६९।।

प्रभा

अस्वैव श्लोकस्य नृपपरत्वेन व्याख्या यथा-**विनायकेनेति।** इयम् एषा। पृथ्वी भूमिः। भवता त्वया। तु पुनः। आश्रिता अधिष्ठिता। अतुला अनुपमा। अभीता भयशून्या च वर्तते इति शेषः। कथंभूतेन भवता। विनायकेन विशिष्टेन नायकेन। समीचीनविनेत्रा इत्यर्थः। वृत्तौ वर्तुलौ उपचितौ पुष्टौ बाहू यस्य तेन। वर्तुलपीवरभुजेनेत्यर्थः। तथा सुष्ठु यथा स्यात्तथा अमित्रान् शत्रून् उद्धर्तुं शीलं यस्य तेन स्वमित्रोद्धारिणा। उत्खातशत्रुणेत्यर्थः।।६९।।

विवृति

हे राजन् पृथ्वीयं मही अतुला निरुपमा। आभीता भयरहिता।

भवता त्वया आश्रिता पालयितुमारब्धा। किंविशिष्टेन भवतेत्याह विनायकेन साहसमुख्यो नायकः विशिष्टा नायका यस्यासौ विनायकः तेन विनायकेन। यद्वा विशिष्टसामन्तेन नयतीति नायकः सेनापतिर्वा सहवर्तत इति विनायकः। तेन। वृत्तोपचितबाहुना वृत्तौ वर्तुलौ परिणाहिनावुपचितौ मांसलौ बाहू यस्यासौ वृत्तोपचितबाहु। तेन। सुष्ठु अमित्रानुद्धरति उत्खनतीति अमित्रोद्धारी तेन। रिपुनिर्मूलकेनेत्यर्थः। अयमेकोऽर्थः। द्वितीयोऽर्थो व्याख्यायते। अरिणा वैरिणा पृथ्वी महती यमतुला यमः कृतान्तः तस्य तुला डोला विचारो वा अभीता अभिमुखमिता प्राप्ता श्रिता [किंविशिष्टा आश्रिता] [?] किंविशिष्टेन अरिणेत्याह विनायकेन विगतनायकेन भवता सता। वृत्तः संवृत्तः उपचितः मृतदहनार्थं पुञ्जीकृतः काष्ठानि चिता तस्याः समीपं[पे] बाहुः यस्यासौ उपचितबाहुः तेन। स्वस्यात्मीयस्य मित्रं बन्धुजनः तदुज्जहाति इति स्वमित्रोद्धाः तेन स्वमित्रपरित्यागिना। स्वमित्रोद्धा इत्युत्पूर्वस्य जहातेः क्वचि [क्विपि] तृतीयैकवचने आतो धातोरित्याकारलोपे हस्य 'झयो होऽन्यतरस्या'मिति पूर्वसवर्णत्वं रूपम्।।

तत्र प्रथमश्लोकं दर्शयति—**विनायकेनेति।** विनाभूतः अयः इष्टदैवं यस्य सः विनायकः, शैषिकः कप्, तेन विनायकेन; भवता सता; वृत्तोपचितबाहुना—उपचितं चितासमीपे, वृत्ताः बाहवो ज्ञातयो, यस्य तेन, बाहुशब्दो लक्षणया ज्ञातिषु प्रयुक्तः, हतज्ञातिना इति यावत्; स्वमित्रोद्धास्वम् आत्मीयं मित्रम् उद्धा उज्झता, ओहाक् त्यागे इत्यस्मात् विचि तृतीयैकवचनम्; अरिणा शत्रुणा; भीता त्रस्ता; पृथ्वी भूः ; यमतुलाश्रिता अन्तकसाम्यभाजा,

क्रूरेणेति यावत्। एवंभूतेन शत्रुणा पृथ्वी भीता इति प्रथमश्लोकार्थः। अथ द्वितीयश्लोकार्थ उच्यते। विनायकेन विनेत्रा; भवता त्वया; वृत्तोपचितबाहुना सुवृत्तमांसलभुजेन; स्वमित्रोद्धारिणा–सुष्ठु अमित्रान् उद्धरता निर्मूलयता; अभीता–भियम् एतीति भीत्, इण् गतौ इत्यस्मात् क्विप्, भीता बिभ्यता, तदन्येन अभीता निर्भयेन; आश्रिता प्राप्ता; इयं पृथ्वी भूः; अतुला निरुपमा अभूत्।।६८–६९।।

एकाकारं चतुष्पादं तन्महायमकाह्वयम्।
तत्रापि दृश्यतेऽभ्यासः सा परा यमकक्रिया॥७०॥

रत्नश्री

एकः समान आकारः स्वरूपं येषामित्येकाकारः, सर्वतो यमकयोगात् चत्वारः पादा यस्य यत्रेति वा। एकाकारचतुष्पादं यत्, तदीदृशं महञ्च यत् तद् यमकं च, सर्वयमकप्रधानत्वात्, महायमकमित्याह्वयः संज्ञा अस्येति महायमकाह्वयं वेदितव्यम्। एकाकारचतुष्पादत्वं प्रत्येकं सर्वतो यमकयोगाद् विनाभ्यासादपि सम्भवतीत्याह—तस्यापीत्यादि। तस्यापि महायमकस्यापि न केवलं समूहादेरभ्यासः त्रिपादावृत्तिर्दृश्यते। अत एवेयमीदृशी परा सर्वयमकक्रियाप्रधानत्वात्। यमकस्य क्रिया प्रयोगः। अत एवेदं [102b] त्रिपादाभ्यासाद् भिद्यते। तत्र प्रत्येकं पादेषु सर्वतो यमकाभावात् केवलं पादयमकमात्रं त्रिरभ्यस्यते॥

तदुदाहरन्नाह—

हृदयङ्गमा

पादचतुष्टयगतस्य त्रिरभ्यासरूपयमकस्य प्रतिचरणमवान्तराभ्यासे वैचित्र्यविशेषसम्भवात् महायमकसंज्ञामाह, एककारेति। —एकाकाराः अभिन्नाः, चत्वारः पादा यत्र तादृशं, तत् यमकं, महायमकाह्वयं महायमकसंज्ञं, ज्ञेयमिति शेषः ; तत्रापि एकाकारचतुष्पादरूपमहायमकस्य पादमध्येऽपि, अभ्यासः पुनरावृत्तिः, पादखण्डस्येति भावः, दृश्यते, अतः सा परा श्रेष्ठा, यमकक्रिया यमनप्रकारः, यमकवत्पद्यानुष्ठानमित्यर्थः,

पादचतुष्टयाभ्यासे यत्र पादखण्डस्यापि अभ्यासः तत् महायमकमिति निष्कर्षः। (महायमकत्वञ्च ईदृशयमनविधेः वैचित्र्याधायकतया उत्कृष्टत्वात् बोध्यम्। ननु पादचतुष्टयाभ्यासयमके यथा चतुष्पादानां तुल्यावृत्तिस्तथैवात्रापि, किं ततो महायमके वैचित्र्यम् इत्यतो भेदप्रदर्शनाय पादखण्डाभ्यासवैचित्र्यमेव महायमकलक्षणमित्युक्तं, ततश्च चतुष्पादानामुभयत्रैव एकाकारत्वेऽपि प्रतिपादखण्डस्य पुनरावृत्तिपुरसरं चतुष्पादानामैकरूप्यन्तु महायमकत्वम् इति निष्कर्षः। उक्तञ्च कण्ठाभरणे, –''एकाकारचतुष्पादं महायमकमुच्यते। श्लोकाभ्यासश्च तत्राद्यं पुनरभ्यासमर्हति।।'' इति। केचित्तु चतुष्पादानामेकरूपात्मकमिदं महायमकं सर्वपादयमकमाहुः ; यथा, –''बभौ मरुत्वान् विकृतः समुद्रो बभौ मरुत्वान् विकृतः समुद्रः। बभौ मरुत्वान् विकृतः समुद्रो बभौ मरुत्वान् विकृतः समुद्रः।।'' इति)।।७०।।

प्रभा

पादचतुष्टयगतस्य अभ्यासस्य प्रतिपादमवान्तराभ्यासे रचनान्तरविशेषात् संज्ञान्तरमवश्यमिति तद्दर्शयति–**एकाकारेति** एकाकारम् एकानुपूर्विकं चतुष्पादं महायमकसंज्ञकं भवति। संज्ञाया बीजं दर्शयति। तत्रापि तत्र पादमध्येपि अभ्यासः पादांशस्य आवृत्तिर्दृश्यते। अत एव सेयं यमकक्रिया यमकव्यापारः। परा श्रेष्ठा। अत्यन्तप्रतिभाशालिसाध्यत्वाद् इति भावः।।७०।।

विवृति

श्लोकाभ्यासमप्येवं प्रदर्श्य महायमकलक्षणं प्रदर्शयितुकाम आह–

चत्वारः पादा यस्य (एकाकाराः तद्) एकाकारः (र) चतुष्पादः (दं) महायमकाह्वयं महायमकमित्याह[ह्व]यो नाम यस्य। कस्यापि[तत्रापि] दृश्यते अभ्यास आवृत्तिः अर्धपादेनैकशो निर्वहणमित्यर्थः सा परा प्रकृष्टा यमकक्रिया यमकरचना।।

एकेति। एकाकारचतुष्पादं पद्यं महायमकं नाम भवति। एकरूपार्धपादाष्टकात्मकं पद्यं परयमकं नाम।।७०।।

समानयासमानया समानया स मानया।
समानयासमान या समानयासमानया॥७१॥

रत्नश्री

यासः प्रयासः खेदः। मानश्च प्रियविषयं प्रातिकूल्यम्। यासमानौ तुल्यौ, यदा समाना, तदायासोऽपीति समकालत्वात्। यथा चायासस्तापयति तथा मानोऽपि प्रियसङ्गमसुखविरहादिति। यस्याः तया समानयासमानया। सह मानेनार्हणेन गुणयोगाद् वर्तत इति समानया मान्यया अनया कयाचिदिष्टया। स त्वम्। असम गुणोत्कर्षादनुपम! [मा] मां समानय संगमयेति कञ्चित् सुहृदमभ्यर्थयति कश्चित् कामी। पुनः सा विशिष्यते-या प्रणयिनी सह मया श्रिया वर्तत इति समा कान्तिमती। अनयस्याकार्यस्यासौ निषेधः तस्य मानं प्रमाणमनुभवं यातीति अनयासमानया। अकार्यपरिहारज्ञतया अनयासमानयेति निगमनीयम्॥

यदुक्तम्–

अत्यन्तबहवस्तेषां भेदाः संभेदयोनयः [३.३],

तत्र दिङ्मात्रं सुकररूपं दर्शयन्नाह–

हृदयङ्गमा

उदाहरति, समानेति। –(अत्रायं पदच्छेदः, –समानयास, मा, अनया; समानय, असमानया; समानया, समानया; समान, या, समानया इति) हे समानयास। समानः एकरूपः, यासः यत्नः यस्य तत्सम्बुद्धौ, सर्वत्र तुल्यप्रयत्न इत्यर्थः, तथा समान! समदर्शिन्!,

सर्वत्र आत्मवद्दर्शन इत्यर्थः, यद्वा, –समः अभिन्नः, आनः प्राणः यस्य सः, अभिन्नहृदय!, सखे! इति भावः, या नायिका, समानया मा लक्ष्मीः, शोभा इत्यर्थः, नयः नीतिः, विद्या इत्यर्थः, ताभ्यां सह वर्त्तमाना, सुन्दरी विदुषी चेत्यर्थः, अत एव असमानया मानः सम्मानः, तेन सह वर्त्तमानया, सम्माननीयया इत्यर्थः, यद्वा, –समानयासमानया इत्येकं पदं, यासः यत्नः, मानः ईर्ष्यारोषः, तौ समानौ यस्यास्तया इत्यर्थः, अनया नायिकया, मा मां, समानय सङ्गमय, अस्याः सङ्गमस्य अतीवादरणीयत्वात् अतीवपीड़ादायकमेतन्मानं शीघ्रं सान्त्वयन् अनया मां संयोजय इति भावः। (मन्मथोन्माथाविष्टस्य कस्यचित् वयस्यं प्रति प्रार्थनेयम्। अत्र पादचतुष्टयाभ्यासे पादखण्डस्यापि अभ्यासात् महायमकम्)।।७१।।

प्रभा

महायमकमुदाहरति– **समानयेति।** कश्चित् प्रेयसीसमागमसंपादनाय सखायं प्रार्थयति। तत्र तावत् पदच्छेदः–समानया असमानया। समानयासमानया। सः मा न या असमानया। समानय असम अनया। अन्वयार्थः। हे असम निरुपम। मत्सखे। सः त्वम्। मा माम्। समानयासमानया समानं तुल्यं यासस्य आयासस्य मानं परिमाणं यस्याः सा तया। समदुःखयेत्यर्थः। तथा समानया मानसहितया मानिन्या इत्यर्थः। तथा असमानया निरुपमया। अनया नायिकया समानय संयोजय। रोषाविष्टायास्तस्या अनुनयने अनुबन्धं त्यज इति वदसि चेत्तर्हि शृणु। या सा नायिका। असमानया मा लक्ष्मीः शोभा इति यावत्। तथा नयः नीतिश्च मानयौ ताभ्यां

सहिता तादृशी न भवतीति तया असमानया। सौन्दर्यनयाभ्यां शून्येत्यर्थः। न भवति नास्ति। सा सुन्दरी विदुषी च वर्तते। अतो नोपेक्ष्या इति भावः।।७१।।

विवृति

एवं लक्षणं प्रदर्श्य महायमकमाह–

यानं(यसनं) यासः प्रयत्नः। मानः पूजा। यासश्च मानश्च यासमानौ समानौ सदृशौ ऊनाधिकभावरहितौ यासमानौ यस्याः सा समानयासमाना तया। अविद्यमाना समाना सदृशी यस्याः सा असमाना तया असमानया निरुपमया। मानो अभिमानो गर्वो वा। सह तेन वर्तत इति समाना। तया। साभिमानया सगर्वया वा। सम आनः प्राणो जीवितं (य)या सा समानप्राणा सह(?) तया समानया प्राणसमया वल्लभया समानय समागमय। समाङ्पूर्वो णीञ् सङ्गमे वर्तते। असमानां(नं) स्वस्मादधिकबलं यातीत्यसमानयः। तस्यामन्त्रणं हे असमानय। असम सखे अनया सह मां स त्वं संयोजयेति कश्चित् केनापि प्रियासमागमं प्रति प्रार्थ्यते। समानप्रयत्नपूजया निरुपमया सगर्वया प्राणसन्निभया वल्लभयाऽनया हे असमानय असम सखे मां योजयेति समुदायार्थः।।

तत्र महायमकं दर्शितम्, परयमकं दर्शयति–**समानयेति।** समानया, असमानया, समानयासमानया, सः, मा, न, या, असमानया, समानय, असम, अनया। समानया सबहुमानया; असमानया; निरुपमया; समानयामानया–यासः स्मरक्लेशः, समानं

यासस्य मानं परिमाणं यस्याः तया, समानुरागया इति यावत्; सः त्वम्; मा माम्; न प्रतिषेधे; या प्रस्तुता; असमानया–मानयाभ्यां सहिता समानया, तदन्या असमानया; समानय सङ्गमय; असम निरुपम; अनया एतया। हे असम सखे स त्वं मां समानयासमानया समानया असमानया अनया समानय, या असमानया न भवति।।७१।।

धराधराकारधरा धराभुजां
भुजा महीं पातुमहीनविक्रमाः।
क्रमात् सहन्ते सहसा हतारयो
रस्योद्धुरा मानधुरावलम्बिनः॥७२॥

रत्नश्री

धरां धारयतीति धराधरः शेषो भुजगराजः, तस्याकारं सादृश्यं धारयन्तीति धराधराकारधराः। धराभुजां राज्ञां भुजा बाहवः। अहीनः पर्याप्तो विक्रमः शौर्यम् एषामित्यहीनविक्रमाः। सहसा त्वरितमकालक्षेपेण हता अरयोऽमीभिरिति हतारयः। रयेण वेगेन रंहसा उद्धुरा दुर्धराः। मान एव धूः कृत्यम्। मानधुरामवलम्बत इति मानधुरावलम्बिनः। महीं पृथिवीं पातुं रक्षितुं सहन्ते कल्पन्ते तादृशगुणयोगात्। क्रमात् शास्त्रविहितेन क्रमेण न्यायेनेति यावत्। इह संदष्टयमकमादिमध्ययमकव्यपेतं मध्ययमकं व्यपेतमिति संभिन्नमुदाहृतम्॥

हृदयङ्गमा

"अत्यन्तबहवस्तेषाम्" इत्यादिना प्रतिपादितेषु बहुषु भेदेषु पूर्वं सजातीयसम्मिश्रणजनितप्रभेदाः दर्शिताः, इदानीं विजातीयमिश्रणोदाहरणं दर्शयति, धरेति। –धराधराकारधराः धरायाः पृथिव्याः, धरः धारणकर्त्ता, नागराजः इत्यर्थः, तस्य आकारं सादृश्यं, धरन्तीति तादृशाः धराधराकारधराः अतिदीर्घा इत्यर्थः, अहीनविक्रमाः अहीनः अनल्पः, विक्रमः वीर्य्यं येषां ते, अथवा,–अहीनस्य अहीनां प्रभोः, नागाधिपस्यानन्तस्येत्यर्थः,

विक्रम इव विक्रमो येषां तादृशाः, तथा सहसा बलात्, हतारयः हताः नाशिताः, अरयः शत्रवो यैः तथोक्ताः, तथा रयोद्धुराः रयेण वेगेन, उद्धुराः उत्कटाः, अतिवेगवन्त इत्यर्थः, तथा मानधुरावलम्बिनः मानस्य धुरां भारम्, अवलम्बन्ते इति तथाभूताः, सम्मानरक्षका इत्यर्थः, धराभुजां राज्ञां, भुजाः बाहवः, क्रमात् शत्रोराक्रमणात्, शक्तित इति वा, स्वसामर्थ्यादित्यर्थः, ("क्रमश्चानुक्रमे शक्तौ कल्पे चाक्रमणेऽपि च" इति मेदिनी) महीं पृथ्वीं, पातुं रक्षितुं, पालयितुं वा, सहन्ते क्षमन्ते। (अत्र प्रथमे पादे अव्यवहितमादिमध्ययमकं, पादानाञ्च सन्धिषु अव्यवहितमन्तादियमकं सन्दंशयमकञ्च, द्वितीयपादे पुनः वर्णद्वयव्यवहितं "मही मही" इति व्यपेतं मध्ययमकं, तृतीये च पादे एकवर्णव्यवहितं "सह सह" इति, चतुर्थे च वर्णद्वयव्यवहितं "धुरा धुरा" इति मध्ययमकम्। इत्थं बहूनां विजातीयानां सम्मिश्रणमत्र इत्यवधेयम्)।।७२।।

प्रभा

अत्यन्तबहवस्तेषां भेदाः संभेदयोनयः। (३.३) इति प्रतिज्ञातबहुप्रभेदेषु सजातीयमिश्रणजनितभेदाः प्रदर्शिताः। इदानीं विजातीयमिश्रणभेदा अपि संभवन्तीत्युदाहरेण दर्शयति– **धराधरेति**। नृपभुजवर्णनमेतत्। धराभुजां भूपतीनाम्। भुजाः बाहवः। कीदृशाः धराया धरः धारकः शेषः तस्य आकारस्य धराः। तत्सदृशदीर्घाः समर्थाश्च इत्यर्थः। तथा अहीनविक्रमाः अहीनः अन्यूनः विक्रमो येषां ते अहीनविक्रमाः। महापराक्रमशालिनः इत्यर्थः। तथा सहसा सपद्येव। हतारयः निषूदितशत्रवः। रयोद्धुराः रयेण वेगेन उद्धुराः उत्कटाः। मानधुरावलम्बिनः मानस्य धूः

मानधुरा तां अवलम्बन्ते इति मानधुरावलम्बिनः। सन्मानाभिमानिन इति यावत्। क्रमात् पूर्वजानुक्रमेण। महीं पृथ्वीम् पातुं रक्षितुं सहन्ते समर्था भवन्ति। अत्र धराधराकारधरा धरा इत्यव्यपेतव्यपेतयमकम्। भुजां भुजेति संदष्टयमकम्। महीं पातुमही इति सहन्ते सहसा इति च व्यपेतयमकम्। रयो रयो इति अव्यपेतयमकं संदष्टयमकं च। धुरा मानधुरा इति व्यपेतयमकम्। एवं बहुप्रकाराणां अत्र संसृष्टिः।।७२।।

विवृति

सङ्कीर्णमुदाहरति–

धराधराकारधराधराभुजामिति प्रथमादे (आदि)-मध्याव्यपेतं(त) यमकं भुजा महीं पातुमहीनविक्रमा इति द्वितीयपादे व्यपेतं मध्ययमकं अहीनविक्रमाः क्रमात् सहन्ते हतारयो रयोद्धुरा इत्यत्र सन्दष्टं रयोद्धुरामानधुरावलम्बिनः इत्यत्र व्यपेतं मध्यपादयमकम्। एवमूह्यं (एवमाद्यं, अथ वा, एवं मिश्रम्) एकस्मिन्नेव वृत्ते इत्यतः सङ्कीर्णमुच्यते। अस्यायमर्थः। धरा पृथ्वी। तां धरति बिभर्ति धराधरः शेषः। तस्याकारः आकृतिः। तं धराधराकारम् धरति दधातीति धराधराकारधरा भोगिभोगसदृक्षा इत्यर्थः। धरां भुञ्जन्ति रक्षन्ति इति धराभुजो राजानः। तेषां भुजाः हस्ता महीं पृथ्वीं पातुं रक्षितुं अहीनः अप्रच्युतो विक्रमो वीर्यं येषां ते अहीनविक्रमाः। यद्वा अहयः सर्पाः। तेषामिनः स्वामी शेषः तस्येव विक्रमो येषां ते अहीनविक्रमाः। क्रमात् न्यायात् सहन्ते समर्थयन्ति (र्था भवन्ति)। सहसा झटिति हता अरयो यैस्ते सहसा हतारयः। रयो वेगः तेन उद्गता धूर्व्यापारो येषां ते तथोक्ताः। धीरान् [णां] धुरमवलम्बितुं शीलं येषां ते धीरधुरावलम्बिन इति[?] समुदायार्थः।।

अव्यपेतव्यपेतादीनां यमकानां सम्भेदयोनयो बहवो यमकभेदाः इत्युक्तम्; अव्यपेतसन्दष्टयमकानां मिश्रणेन एकमुदाहरणं दर्शयन् प्रस्तुतं यमकम् उपसंहरति–**धराधरेति।** धराभुजां भूभुजां, धराधराकारधराः **गिरिसदृशाः**–अथवा धरा पृथ्वी धराधरः शेषः तस्य आकारं धारयन्तीति धराधराकारधराः शेषभोगसङ्काशाः, सहसा हतारयो रयोद्धुराः मानधुरावलम्बिनः भुजाः, अहीनविक्रमात् अन्यूनविक्रमात्, क्रमात् व्यापारात्, मही पातुं सहन्ते क्षमन्ते।।७२।।

आवृत्तिः प्रातिलोम्येन पादार्धश्लोकगोचरा।
यमकं प्रतिलोमत्वात् प्रतिलोममिति स्मृतम्।।७३।।

रत्नश्री

[103a] आवृत्तिरभ्यासः। कथं? प्रातिलोम्येन प्रतीपतया लक्षिता, नानुलोम्येन, किंविषया? पादश्चार्धश्च प्रकरणात् श्लोकस्य, श्लोकश्च [तेषां] समुदायः गोचरो विषयो यस्या इति पादार्धश्लोकगोचरा। पादगोचरा, अर्धविषया, श्लोकाश्रया चेति त्रिविधमनूद्य प्रतिलोमं नाम यमकं स्मृतमिति विधीयते। कुतः? प्रतिलोमत्वात् तस्या इति गम्यते। प्रतिलोमेति कृत्वो। यत् त्वनुलोम्ना स पादाभ्यासादिरिति भावः।।

तदुदाहरन्नाह—

हृदयङ्गमा

इत्थम् अनुलोमयमकभेदानुक्तवा इदानीं प्रतिलोमभेदान् दर्शयन्नाह, आवृत्तिरिति। —प्रातिलोम्येन वैपरीत्येन, पादार्द्धश्लोकगोचरा पादार्द्धश्लोका गोचरा विषया यस्याः सा पादगोचरा, श्लोकार्द्धगोचरा, श्लोकगोचरा च एवं त्रिविधा इत्यर्थः, आवृत्तिः अभ्यासः, प्रतिलोमत्वात् वैपरीत्येनावृत्तत्वात्, प्रतिलोमं प्रतिलोमाख्यं, यमकम् इति स्मृतम्। (तथा च यत्र पूर्वपादस्य प्रतिलोमावृत्त्या उत्तरपादः भवति, उत्तरपादस्यापि विलोमेनावृत्त्या पूर्वपादः सम्भवति, तत् पादगोचरं प्रतिलोमयमकम्; तथा पूर्वार्द्धस्य प्रतिलोमावृत्त्या श्लोकपूर्व्वार्द्धं चेत् भवति तदा अर्द्धगोचरं प्रतिलोमयमकम्; तथा एकस्य श्लोकस्य प्रतिलोमावृत्त्या श्लोकान्तरं श्लोकान्तरस्यापि तथैवावृत्त्या पूर्वश्लोको भवति चेत्

तदा श्लोकगोचरं प्रतिलोमयमकमिति निष्कर्षः। तस्य चोक्तरीत्या त्रैविध्यम्)।।७३।।

प्रभा

एतावत्पर्यन्तमनुलोमाभ्यासे यमकप्रभेदा दर्शिताः। इदानीं तु प्रतिलोमाभ्यासे यमकप्रभेदान् दर्शयति–**आवृत्तिरिति।** प्रातिलोम्येन विलोमतया। पादः श्लोकचरणः अर्धम् श्लोकार्धम् तथा श्लोकः संपूर्णः श्लोकः ते गोचरा विषयाः यस्याः सा। पादगोचरा अर्धगोचरा श्लोकगोचरा इत्यर्थः। आवृत्तिः अभ्यासः। प्रतिलोमत्वात् प्रतिलोमावृत्तेः। प्रतिलोमं यमकम् इति स्मृतम्। एवं च पादार्धश्लोकगतत्वेन तस्य त्रयः प्रभेदा इति भावः। तथाच यत्र पूर्वपादस्य प्रतिलोमावृत्त्या उत्तरापादस्तथा पूर्वार्धस्य प्रतिलोमावृत्त्या उत्तरार्धः एवमेव पूर्वश्लोकप्रतिलोमावृत्त्या च उत्तरश्लोकः संपद्यते तत् प्रतिलोमयमकमित्यर्थः।।७३।।

विवृति

प्रतिलोमयमकलक्षणमाह–

प्रातिलोम्येन प्रातिकूल्येन आवृत्तिः वर्णानां पादार्धश्लोकगोचरा पादश्चार्धश्च श्लोकश्चेति द्वन्द्वः। ते गोचरो विषयो यस्याः सा तथा। तद्यमकं प्रतिलोममिति स्मृतम् वर्णानां प्रतिलोमत्वादिति हेतुपदम्।।

एवमनुलोमयमकं प्रदर्श्य प्रतिलोमयमकलक्षणमाह–**आवृत्तिरिति।** वर्णानां प्रातिलोम्येन आवृत्तिः प्रातिलोमयमकम्। तत् त्रिविधम्–पादप्रतिलोमम्, अर्धप्रतिलोमम्, श्लोकप्रतिलोमं चेति।।७३।।

यामताश कृतायासा सा याता कृशता मया।
रमणारकता तेऽस्तु स्तुतेताकरणामर॥७४॥

रत्नश्री

कृशस्य भावः कृशता। कृतो जनित आयासः श्रमो ययेति कृतायासा। या कृशता दौर्बल्यम्। सा याता प्राप्ता मया अमता प्रतिकूलतां [गता] आशा, अर्थात् सुरतमनोरथो यस्येति हे अमताश मत्सङ्गमासहिष्णो! हे रमण! अकरणेनाकृतिमत्त्वेन अमर! अकरणामर सत्यदेव! यद्वा अकरणे अविहिते प्रमत्त! अमर देव! तव स्तुतम्। तदितः प्राप्तः हे स्तुतेत वर्णनेन प्राप्त! ते तव अरकता गमनमेवास्तु। किमागमनेन, इयर्ति गच्छतीत्यरको [गन्ता] ततो भावप्रत्ययस्तल् विधीयते। समयमतिक्रम्यागतः कश्चित् प्रियः कयाचित्तु सरोषमित्थमधिक्षिप्यते। इदं पादप्रतिलोमयमकम्। प्रथमस्य तृतीयस्य च पादस्य [क्रमशः] प्रातिलोम्येन पाठे श्लोकनिष्पत्तिः॥

हृदयङ्गमा

प्रतिलोमयमकस्य त्रैविध्यं दर्शयन् प्रथमं पादगोचरमुदाहरति, येति। –हे मताश! मता ज्ञाता, आशा अन्यासङ्गविषयिणीं तृष्णा यस्य तत्सम्बुद्धौ, या कृशता क्षीणता, कृतायासा कृतः जनितः, आयासः क्लेशः, ममेति भावः, यया तथोक्ता, ममात्यर्थं क्लेशदायिनीत्यर्थः, सा मया आयाता प्राप्ता, तव दुश्चेष्टितेन पूर्व्वमेव मया महती कृशता अधिगतो, इदानीमपि सैव भविष्यति, काऽधिका? अतः यथारुचि क्रियतामिति भावः, हे रमण!

सन्तोषजनक! हे स्तुतेत! स्तुतं स्तवम्, इत प्राप्त, स्तवार्ह! इत्यर्थः, अथवा, –स्तुतं प्रशस्तम्, इतं गतिः, आचरणमिति यावत्, यस्य सः तत्सम्बुद्धौ, यद्वा, –स्तुतात् इतः च्युतः अस्तवार्हः, निन्दिताचरणात् अप्रशंसनीय इत्यर्थः, तत्सम्बुद्धौ, तथा हे अकरणामर! अकरणे अकार्य्यानुष्ठाने, अमरः देवसदृश इत्यर्थः, देववत् अकार्य्यमननुतिष्ठन्निति, देववत् अकार्य्यानुष्ठाननिरत इति वा भावः, तत्सम्बुद्धौ, (देवानामकार्य्यकरणमहल्याजारत्वादिकमिति बोध्यम्। सर्वमेतत् सम्बोधनपदं सोल्लुण्ठनपरमवगन्तव्यं, प्रकृतानुपयोगित्वात्) ते तव, आरकता ऋच्छतीति आरकः, ("ऋण्गतौ" इत्यस्मात् णकप्रत्ययः) तस्य भावः आरकता गन्तृत्वं, यथेच्छगामिता इत्यर्थः, अस्तु भवतु, त्वं यां कामयसे तामेव व्रज नात्र त्वया स्थातव्यमिति भावः। (मानिन्या नायकं प्रति सकोपोक्तिरियम्। अत्र प्रथमपादस्य प्रतिलोमावृत्त्या द्वितीयपादस्तथा द्वितीयस्य प्रतिलोमावृत्त्या प्रथमपादः, एवं तृतीयचतुर्थयोरपि, तेनात्र पादविषयं प्रतिलोमयमकम्)।।७४।।

प्रभा

पादप्रतिलोममुदाहरति–**यामतेति।** अन्यत्रासक्तस्य वल्लभस्य नायिकाकृतं भर्त्सनमिदम्। हे अमताश अमते अनिष्टे गर्हिते अन्यासङ्गे आशा यस्य तत्संबुद्धिः। कृतायासा कृतः विहितः आयासः क्लेशः यया सा कृतायासा। एतादृशी या कृशता त्वत्प्रतीक्षाक्लेशेन जनिता कृशता। सा मया याता प्राप्ता। त्वद्विरहेण यद्दुःखमनुभाव्यं तदनुभूतमेव। तस्मात् हे स्तुतेत स्तुतात् स्तवनात् इत भ्रष्ट। निंद्याचरितेत्यर्थः। तथा अकरणामर अकरणे अनुचितानुष्ठाने

अमर देववन्निष्प्रतिबन्ध। इन्द्रादयो देवा यथा अहिल्यासंभोगादिक-मनुष्ठितवन्तस्तद्वदप्रशस्ताचरणशील। अथवा नास्ति करणं क्रिया यस्य तत्संबुद्धिः। कर्तव्याचरणशून्य। तथा आमं विरहरोगं राति ददाति इति आमर। एतादृश हे रमण नाथ। ते तव। आरकता इयर्तीति आरकः। ऋधातोः कर्तरि ण्वुल्। तस्य भाव आरकता गन्तृता। अस्तु। इतो याहीत्यर्थः।।७४।।

विवृति

तदुदाहरन् तत्र (पाद)प्रतिलोममाह–

'यामताश कृता या सा' इत्येकः पादः। स एव प्रातिलोम्येन पठ्यते ततोऽसावेव द्वितीयः पादो भवति। 'सा याता कृशता मया'। 'रमणारकता तेऽस्तु' इत्यपरः पादः। प्रातिलोम्येन पठ्यमानः 'स्तुतेताकरणामर' इति चतुर्थः पादो भवति। तदेवं पादद्वयं प्रातिलोम्येन पठ्यमानं पादद्वयं भवतीति पादप्रातिलोम्यमुच्यते।।

अस्यायमर्थः। मता आशा यस्मिन्नसौ मताशः। तस्यामन्त्रणं हे मताश कल्याणाशेति यावत्। कृतः आयासः खेदो यया सा कृतायासा सा[?] जनितखेदा या सा कृशता सा याता प्राप्ता अतः किं परमधिकं भविष्यतीति। हे रमण कान्त आरकतास्ते (तेऽस्तु) आर्तिं आरयति) गच्छतीत्यारकः। तस्य भावः आरकता आर्तिता (?)गमनं अस्मद् गृहात्तवास्तु भवतु। आगमनमस्मदन्तिके तव मा भूदिति। स्तुतं स्तवमेतीति स्तुतेतः तस्यामन्त्रणं हे स्तुतेत स्तवप्राप्त। अकरणामर अविद्यमानं करणं कृतिः येषां ते अकरणाः। अकरणाः (अ)कृत्रिमाः अमर्त्याः अमराः हरिहरादयो देवा यस्य

अकरणमरः। हे सत्यदेव। इदं चोपहासपरमीर्ष्यावचनम्–स्तुतेताकरणामरेति। तेनायमर्थः। हे दयित निर्दैवत निन्दाविषयासत्यवादिन् अधार्मिक नास्तिक येन त्वया जनिताशेन मम ईदृशी सम्पादितपरितापा कृता (कृशता) तस्य तव ममागारे आगमनं कदाचिदपि मा भूदिति कयाचित् कश्चित् कान्तः कुपितया प्रेमपरवशया सेर्ष्यमभिधीयत इति। (अथ च हे मताश कल्याणाश या सा कृतायासा, त्वद्दर्शनं प्रति कृतप्रयत्ना सा याता सा प्रिये(या) गते ति यावत्। अत एव मया कृशता याता कृशत्वं गतम्। हे रमण प्रिय। स्तुतेत स्तुतिप्राप्त अकरण अप्रतिबद्ध अमर देव ते तव आरकता आगन्तृता अस्तु भवतु। देशान्तरस्था (स्थां–स्थौ वा) मातरं पितरं चोपगतायां बालायामवधिमतिक्रम्यागतं तत्प्रिया सखी ईर्ष्यया काचिदेवं अभिहितवती। मता प्रशस्ता आशा चित्तं यस्य स तथोक्तः। कृतः आयासः प्रयत्नो यया सा तथोक्ता। आरकः गतं(तः) तद्भावः आरकता। स्तुतं स्तुतिः। तदितः स्तुतेतः। करणं क्रिया। तन्न विद्यते यस्य स अकरणः। क्वचिद्व्यापारेऽनियुक्त इति यावत्। अमर इति स्तुतिपरम्। अथ च रमण हे प्रिय ते तव अरकता अगन्तृता(?) अस्तु भवतु। अस्मद् गृहात् कदाचिदपि मा गम इत्यर्थः।

मताश अभिमताश ममेष्टप्रवृत्तिकरेत्यर्थः। मया कृतायासा कृतप्रयत्ना कृशता प्राप्ता। कथञ्चिदेव जीवामि त्वद्विरहे इत्यर्थः। स्तुतेत स्तुतिप्राप्य अकरणं(ण) निष्प्रयोजनं[न]; यत्र भवान् गन्तुमिच्छति तत्र भवतो न प्रयोजनमित्यर्थः। अमर आयुष्मान् अस्मदगृहे चिरकालं वसत्वि[त्वमि]त्यर्थः।।

तत्र पादप्रतिलोमं दर्शयति–येति। अन्यत्र अपवाहितनिशं प्रातरागतं वल्लभं दयिता अत्र भर्त्सयति। अमताश–मदनिष्टे आशा यस्य, तस्य सम्बोधनम्; कृतायासा कृतक्लेशा; या कृशता कार्श्यं, सा मया याता प्राप्ता; स्तुतेत प्रशस्तचरित; अकरण कृतकृत्य; अमर देवभूतउपालम्भ एषः ; रमण वल्लभ, ते तव आरकता गन्तृता, अस्तु भवतु। यथेष्टदेशं गच्छ इति यावत्।।७४।।

नादिनोऽमदनाधीः स्वा नमे काचन कामिता।
तामिका न च कामेन स्वाधीना दमनोदिना॥७५॥

रत्नश्री

नादो नाम तत्त्वविशेषः शैवसमयप्रसिद्धः स विद्यतेऽस्येति नादिनो मे मम स्वा स्वकीया धीः। न विद्यते मदनः कामोऽस्यामिति अमदना ततश्च स्वाधीना सदृशवर्तिनी भवतु। एवं किमतः? ततश्च मे मम न काचन न काचित् कामिता विषयाभिलाषः। कामेन दमं नुदतीति तेन दमनोदिना प्रशमप्रत्यनीकेन हेतुना ते तदभावादेव तामिका न भवितुमर्हति। कामनिमित्तः सन्तापो नास्तीत्यर्थः। इदमर्धप्रतिलोमयमकम्। अत्रार्धान्तरमारभ्य प्रातिलोम्येन पाठे श्लोकनिष्पत्तिरिति॥

हृदयङ्गमा

श्लोकार्द्धविषयमुदाहरति, नादिन इति।—नादिनः नादरूपं ब्रह्म अस्यास्तीति तथोक्तस्य, नादब्रह्मानुध्यानरतस्य इत्यर्थः, मे मम, मदनाधी मदनश्च आधिश्च तौ कामः कामजनिता मानसी व्यथा चेत्यर्थः, तथा स्वा निजा, काचन काऽपि, कामिता विषयाभिलाषश्च, न, नादब्रह्मानुभवतो मे कामः तज्जनितमानसी व्यथा स्वार्थं विषयानुरागश्चैते न विद्यन्ते इत्यर्थः, तथा दमः वाह्येन्द्रियसंयमः, तं नुदति निरस्यतीति तथोक्तेन इन्द्रियसंयमध्वंसकारिणा, कामेन मदनेन हेतुना, स्वाधीना स्वः आत्मा, अधीनः आयत्ती यस्यास्तादृशी आत्मव्याकुलकारिणीत्यर्थः, तामिका च ग्लानिरपीत्यर्थः, (ताम्यति अनयेति तमधातोर्भावे णकप्रत्ययः स्त्रीत्वञ्च;) न नास्ति, ममेति शेषः। (नादोत्पत्तिश्च

प्राणायामाभ्यासजा, तथा चोक्तं सुरेश्वराचार्य्येण यथा, –"सरेचपूरैरनिलस्य कुम्भैः सर्वासु नाड़ीषु विशोधितासु। अनाहतादम्बुरुहादुदेति स्वात्मावगम्यः स्वयमेव नादः।।" इति। कस्यचित् योगिनो वचनमिदम्। अत्र श्लोकपूर्वार्द्धस्य प्रतिलोमावृत्त्या श्लोकार्द्धान्तरं तथा श्लोकोत्तरार्द्धस्य प्रतिलोमावृत्त्या च पूर्वार्द्धं निष्पन्नमिति प्रतिलोमयमकं श्लोकार्द्धविषयम्)।।७५।।

प्रभा

श्लोकार्धप्रतिलोमयमकमुदाहरति–**नादिन इति**। कश्चिद् योगी आत्मस्थितिं वर्णयति। नादः नादरूपं ब्रह्म तदस्यास्तीति नादी तस्य नादिनो नादब्रह्मध्यानानुरतस्य। मे मम। अमदना मदनविकारशून्या। स्वा स्वीया। धीः स्वाधीना स्वायत्तेन्द्रियतया आत्मवशा। अतः काचन कामिता विषयाभिलाषुकता। न नास्ति। तथा दमनोदिना दमं इन्द्रियनिग्रहं नोदितुमपनेतुं शीलमस्य तेन दमनोदिना। विषयेषु इन्द्रियप्रवर्तकेनेत्यर्थः। कामेन अभिलाषेण हेतुना। तामिका ग्लानिः। रोगाख्यायां ण्वुल् बहुलम् इति तमुधातोर्ण्वुल्। मम नास्ति। योगिनां नादोत्पत्तिश्च कथिता सुरेश्वराचार्यैः। यथा–

सरेचपूरैरनिलस्य कुम्भैः सर्वासु नाडीषु विशोधितासु।
अनाहतादम्बुरुहादुदेति स्वात्मावगम्यः स्वयमेव नादः।।

इति। अत्र अनुलोमपाठे मदनाधीः स्वा इत्यत्र विसर्गो विद्यते प्रतिलोमे तु स्वाधीना इत्यत्र नास्तीति सदोषता न कल्प्या। यतः–

यमकश्लेषचित्रेषु बवयोर्डलयोर्न भित्।
नानुस्वारविसर्गौ च चित्रभङ्गाय संमतौ।।

इति सकलालंकारिकैरभ्यनुज्ञातत्वात्। परे तु मदनाधी इति प्रथमाद्विवचनपाठं कल्पयन्ति। मदनश्च तज्जन्या आधिश्च मदनाधी। मे न मम न स्तः इत्यर्थं दर्शयन्ति। अस्मिन् पक्षे विसर्गदोषस्य प्रसक्तिरेव न।।७५।।

विवृति

उक्तं पादप्रतिलोम(म्। अर्धप्रतिलोम) मुदाहरति–

'नादिनो मदनाधी स्वा न मे काचन कामिता' इति श्लोकार्धम्। तदेव प्रातिलोम्येन पठ्यते। ततोऽपरमर्धमुपलभ्यते इत्यर्धप्रतिलोमम् अस्य विवरणम्। नादो ध्वनिः। अताल्वोष्ठपुटव्यापारजनितस्वसमयाहिता- तिशयसूचकः(?) तपःप्रत्यूह हेतुः (–तु) कामाद्युपद्रवविघातहेतुः तस्यैव सिद्धान्तोक्तं चिन्तावलम्बनं(नत्वं?) स विद्यते यस्य स नादी विभूतिप्राप्तो योगी तस्य नादिनः योगिनः कामः योषिदभिलाषविषयः स यस्या न विद्यते सा अमदना धीः बुद्धिः स्वा स्वकीया यतोऽतो न मे नैव काचन काचिदपि कामिता रागिता। तथा तामिका तमु कांक्षायां वर्तन्ते(ते)। तमनं तामिका भावे ण्वुच्। सा च नैव। कामेन हेतुभूतेन किंविशिष्टेन दमनोदिना दम उपशमः तं नुदत्यपनयति तेन मदनोदिना। किंविशिष्टा स्वाधीना स्वायत्ता तेना [अनन्या]यत्ता। तात्पर्यार्थः। योगिनो वीतरागस्य बुद्धिरकाम[ा]यतो [ऽतो] मम न काचन रागिताऽस्ति। न च कामेनोपशमनो[दनं] भवति। मनोभवविषया काचन न तृष्णास्ति; अहो(हं) योगी ततो ग(न)मे कामादिबाधाऽस्तीति कश्चिन्मुनिः चित्तप्रसाधननिमित्तं परिकर्म विरचयति। अथ च नादो ध्वनिः येषां विद्यते ते नादिनः। मदयतीति

मदनः। अमदना धीः बुद्धिः स्वा आत्मीया न परवशेति यावत्। परवशत्वाभावमेव द्रढयितुमाह न मे काचन कामितेति। मम न किञ्चित्कामित्वम्। निस्पृहे मयि कोऽयं अपकारयत्नो भवतामित्यभिप्रायः। अथापि स्यात् स न सिद्ध्यति भवतामिति दर्शयितुमाह कामिते[तामिके]त्यादि। दममुपशमन्नोदितुं अपहर्तुं शीलं यस्य स तथोक्तः। स्वाधीना धीः स्वायत्ता बुद्धिः दमनोदिना कामेन मन्मथेन हेतुभूतेन न च कामिताऽपि [ताभिका] प्रार्थिता[का] भवति। यत एवमतो गर्जद्भिः भवद्भिः न किञ्चिदपि [इति] अभिप्रायः। वियोगाद्विक्षिप्तचित्तः कश्चित् कामी गर्जतो मेघान् उद्वीक्ष्यैवमवोचदिति।।

अर्धप्रतिलोमं दर्शयति–**नादिन** इति। योगी स्वाम् अवस्थाम् अनुसन्धत्ते। योगाभ्यासबलात् अन्तर्हृदये नादो ध्वनिः उदेति; नादवतो मे मम स्वा स्वीया धीः दमना दमगुणयुक्ता, स्वाधीना च; न मे काचन कामिता, काचित् अर्थस्पृहाऽपि मम नास्ति; मदनोदिना मदवर्धनेन, कामेन स्मरेण, तामिका ग्लानिश्च नास्ति।।७५।।

यानमानयमाराविकशोनानजनासना।
यामुदारशताधीनामायामायमनादि सा।।७६।।

रत्नश्री

मानमवलेपं यातीति मानयः दृष्टः त्रैलोक्यं विजग्राह। मानयश्चासौ मारश्चेति मानयमारः। तमवितुं रक्षितुं साधनभावेन तत्सामर्थ्यानुग्रहात्, शीलं यस्या इति मानयमारावी। स चासौ कशा प्रतोदश्चेति मानयमाराविकशा या काचिद् भवेत् तस्या ऊना हीना असमाना या न भवति किं तु समानैव तद्वत् कामसाधनत्वात्। यदाह-आनेत्यादि। अन..........सत्यानाः कर्तर्यत् समर्था इन्द्रियजयादियोगात्। जनाः, तेषामसनं क्षेपोऽतितरां यत्रेति अनाजनासना। मुनीनामपि रागजननी अत एवोदाराणां महतां शते बहुत्वोपलक्षणम्। अधीना यस्मात् सेवनात् यामायाम जितवानस्मि। सा अनादि नदिता भणिता। नान्या। किम्? आयम् आगमनम्। आगच्छति, आहुतेति यावत्। कश्चिचदितिवृत्तमात्मनः कञ्चित् कथयति। आनुलोम्येन तावदयं श्लोकः।।

प्रातिलोम्येनायमेवावर्तते-

हृदयङ्गमा

श्लोकगोचरं प्रतिलोमं दर्शयति, यानमिति। -हे सखे! इति अध्याहार्य्यं, यानं वाहनम्, अश्वाद्यन्यतममित्यर्थः, आनय, त्वमिति शेषः। कथमित्याह, यामिति। -उदारशताधीनाम् उदाराणां महतां, धनिनामित्यर्थः, शतम् अधीनं वशीभूतं यस्यास्तादृशीम्, उदारशतस्य अधीनामिति वा, यां वेश्यामित्यर्थः, आयां

गतवानस्मि, अहम् इति शेषः, माराविकशा मारः काम एव, अविर्मेषः, तस्य कशा ताड़नी, कामिनां कामार्त्तिहन्त्रीत्यर्थः, तथा ऊनः हीनः, धनाभावादिति भावः, अनः प्राणः येषां ते ऊनानाः धनहीनतया मृतप्राया इत्यर्थः, ऊनाः हीनाः, धनविहीनाः सन्तोऽपीत्यर्थः, अनन्ति जीवन्तीति तादृशा इति वा, ते च ते जनाश्चेति ऊनानजनाः, तान् अस्यति निरस्यतीति ऊनानजनासना निर्धनान् वहिष्कुर्वतीत्यर्थः, सा वेश्या, आयम् आगमनम्, अनादि उक्ता, (अनादि इति कथनार्थस्य नद्धातोः कर्मणि लुङि रूपं, द्विकर्मत्वात् सा इति गौणकर्मणः उक्तत्वञ्च) मयेति शेषः, अद्य तव सन्निधावागमिष्यामीति अभिहिता इत्यर्थः।।७६।।

सा दिनामयमायामा नाधीता शरदामुया।
नासनाजनना शोकविरामाय न मानया।।७७।।

रत्नश्री

सा काचिदभिमता स्त्री दिनमेवामयो विकारोऽत्यन्तरुक्षत्वात् दिनामयम् अधीता अधीगता प्राप्ता न न भवति किं तु अधीतैवात्यन्तसौकुमार्यात्। अत एवायः आगतः अनुभाव्यः आमः पीडा ययेति आयामा। केन? अमुया प्रत्यक्षवर्तिन्या शरदा अतिदीप्रदिवाकरया हेतुना, अत एव च न जननमजननम्। आसनस्यावस्थानस्याजननमकरणं यया इति आसनाजनना सुखासिकामलभमाना शोकस्य त्वद्विरहसम्भवस्य विरामाय विनोदाय शोकाभिभवार्थं मानमहङ्कारं शोकमभिभवामि इत्येवं रूपं यातीति मानया भवति। त्वद्वियोगसम्भवं शोकमभिभवितुं न शन्कोति इत्यर्थः। श्लोकप्रतिलोमयमकम्।।

।। इति यमकचक्रम् ।।

हृदयङ्गमा

साऽपि मय्यनुरागिणीत्याह, सेति। —अमुया उपस्थितया इत्यर्थः, शरदा शरत्कालेन, उद्दीपन्या इति भावः, आधीता आधिं मनः पीडां, मद्विरहेणेति भावः, इता प्राप्ता, अत एव दिनामयमायामा, दिने दिवसे, आमयस्य रोगस्य, मायां छलम्, अमति गच्छति, प्रकाशयतीत्यर्थः, या सा तादृशी, दिवसे सखीनां समक्षं रोगच्छलेन विरहदुःखं गोपयन्तीत्यर्थः, किञ्च नासनाजनना नास्ति आसनाया उपवेशनस्य, स्थिरताया इत्यर्थः, जननं क्रिया

यस्याः तथोक्ता, अस्थिरत्वात् विरहदुःखेन नैकत्र उपविशन्तीत्यर्थः, तथा अयनमानया अयनस्य मद्गमनमार्गस्य, मानं ज्ञानं, दर्शनमित्यर्थः, यातीति तथोक्ता, मदीयगमनवर्त्म निरीक्षमाणा इत्यर्थः, सा वेश्या, शोकविरामा शोकस्य विरहदुःखस्य, विरामः अवसानं यस्याः तादृशी, न, भवतीति शेषः, सततं विरहदुःखमनुभवतीत्यर्थः। (अनुरागिण्यां वेश्यायामासक्तस्य कस्यचित् सखायं प्रति उक्तिरियम्। अत्र प्रथमश्लोकस्य प्रतिलोमेनावृत्त्या श्लोकान्तरपूरणात् श्लोकान्तरस्यापि तथैवावृत्त्या प्रथमश्लोकपूरणाच्च श्लोकगोचरं प्रतिलोमयमकम्)।।७७।।

प्रभा

समस्तश्लोकगोचरं प्रतिलोममुदाहरति–**यानेति सा दिनेति** च श्लोकद्वयेन। कश्चित् कामुको मित्रसविधे गणिकानायिकां स्तौति। तत्र तावत् पदच्छेदः–यानमानयमाराविकशा ऊनानजनाशना। याम् उदारशताधीनाम् आयाम् आयमनादिसा। सा दिनामयमा अयामा न अधीता शरदा अमुया। नाशनाजनना शोकविरामाय न मानया। अन्वयः–उदारशताधीनां याम् (अहम्) आयाम् (तथा या) अमुया शरदा अधीता सा यानमानयमाराविकशा ऊनानजनांशना आयमनादिसा दिनायामा अयामा नाशनाजनना मानया शोकविरामाय न (इति) न। अपि तु स्यादेवेति शेषः। अर्थः–उदाराणां दातृमहाशयानां शतानि अधीनानि स्वाधीनानि यस्यास्ताम्। अथवा उदारशतानां या आधयः मनोव्यथास्तेषां इना स्वामिनी। सौन्दर्यादिभिः स्वेच्छं तान् पीडयन्तीत्यर्थः। एतादृशी यां सौन्दर्यगुणशालिनीमहं आयाम् पूर्वं संगतवान् अस्मि। आङ्पूर्वकस्य याधातोर्लङ उत्तमपुरुषैकवचनम्। तथा या अमुया

सद्योवर्तमानया। शरदा शरदृतुना। अधीता आक्रान्ता। शरत्सौन्दर्येण सोत्सुका इत्यर्थः। सा नायिका। याने कामिसार्थविजयप्रयाणे यः मानः अभिमानस्तं यातीति यानमानयः। एतादृशो यो मारः मदनः स एव अविः मेषः तस्य कशा ताडिनी। कामिजनजयोत्सुकस्य मदनस्य स्वाधीनत्वविधायिकेत्यर्थः। तथा ऊनानजनाशना ऊनः न्यूनः अनः प्राणः। सामर्थ्यमिति यावत्। येषां ते ऊनानाः स्वल्पसामर्थ्यवन्तः। एतादृशा ये जनास्तान् अश्नाति सर्वस्वापहारेण उपभुङ्क्ते सा ऊनानजनाशना। अल्पसामर्थ्यानां सर्वतो विनाशिका। आयमनादिसा आयमनं आयमः इन्द्रियनिग्रहः। स आदिर्येषां तानि यमनियमादीनि समाधेरष्टाङ्गानि तानि स्यति नाशयति इति आयमनादिसा। षोन्तकर्मणि इत्यस्य पचाद्यचि टापि रूपम्। सौन्दर्येण योगिनामपि समाध्यादिसाधनविनाशिका। दिनामयमा दिनमामयं रोगमिव मिमीते जानातीति दिनामयमा। रात्रिविलासोत्सुकवाद्दिनं कष्टेन यापयतीत्यर्थः। अयामा अयं शुभावहविधिम् अमति गच्छतीति अयामा। सौभाग्यशलिनीत्यर्थः। नाशनं कामिजनानां विनाशमाजनयति इति नाशनाजनना। मानं सत्कारं यातीति मानया। एतादृशी सा शोकविरामाय शोकोच्छित्तये। न इति न। अपि तु स्यादेवेति भावः। तत्समागमेन शोको नश्यत्येवेति तात्पर्यम्। एतादृशी महामहिमशालिनी सा वर्तते। अत्रापि टीकाकारैः प्रदर्शिताः सन्ति विविधा अर्था अस्मद्भिन्नाः। तत्र युक्तायुक्तविचारे सहृदयाः प्रमाणमित्यलं प्रपञ्चितेन।।७६-७७।।

विवृति

श्लोकप्रतिलोममुदाहरति–

यानमानयेत्ययमेव श्लोकः प्रतिलोमेन पठ्यते। ततोऽपरो

भिन्नार्थश्लोको भवति [तीति] श्लोकप्रतिलोमम्। अस्या[स्य] व्याख्या। यानं ज्ञानं यदुक्तं 'हरेर्महायाननयानुयायिनः।' महाज्ञानानुसारिण इत्यर्थः। ततो याते[:] ज्ञानार्थे वृत्ति[:] मानोऽभिमानार्थः पूजार्थो वा। यानं च मानश्च यानमानौ। तौ यातीति यानमानयः। यद्वा पूज्याश्च मारयतीति मार(?) अवन्ति रक्षन्ति नियमयन्तीति माराविणः। जितेन्द्रियाः। यानमानयाश्च ते माराविणश्च यानमानयामाराविणः तेषामेवंविधानामपि यानमानयामाराविणां कशेव चर्मयष्टिरिव या कान्ता चित्तविरा[-कार]जन[क]त्वेन दुःखहेतुत्वात्। तथा ऊनानजनासना ऊनो हीनः आनः प्राणः सत्त्वं मनोबलं येषां ते ऊनानाः। ते च ते जनाश्च ऊनानजनाः तेषामासना आ समन्ततः अस्यति निरस्यति पावत [इति यावत्?] इति आसना। अस्यतेराङ्पूर्वस्य नन्द्यादिपाठात् कर्तरि ल्युः। कर्मणि षष्ठीसमासः। यामुदारशताधीनामायां अहमगमं; कां उदाराः प्रभवः तेषां शतानि तेषामाय़त्तां अधीनां स(ा)मया आयमागमनं अनादि नदिता अभिहिता आहूत[ा] इति यावत्। आयमनादिसेत्यनव(दतेः) ब्रुविगु(ग)णत्वान्न ते . ब्रुविशयासिगणे न च यत्सजते तदकीर्तितमाचरितं कविना इति कर्मकारकः(?)। ततः 'प्रधानकर्मण्यभिधेये (-ण्याख्येये) लादीनाहुर्द्विकर्मणि। अप्रधाने दुहादीना' मिति ब्रुविगु(ग)णत्वेन नदतेर्दुहादित्वात् अप्रधाने कर्मणि ल्युः सुब(लुङुत्प)त्तेः 'चिण् भावकर्मणो' रिति कर्मणश्चिण्यभिहितत्वात् कर्मणि द्वितीया न भवति। प्रातिपदिकार्थमात्रे प्रथमैव। प्रधाने तु कर्मणि आयमित्यत्र द्वितीया भवत्येव। तस्यानभिहितत्वात्। ततोऽयमर्थः। या कान्ता मानाभिमानयुक्तानां जितेन्द्रियाणां चित्तविकारहेतुत्वेन दुःखोत्पादिनी

या च मनोनुकूलविकलरजोगुणबहुलजनस्य नितरामशर्महेतुः यां च पूर्वमहमेकदा उदारप्रभुशतायत्तागमं सा मया मत्सकाशमागच्छेति आहूतेति। इत्यानुलोम्येन व्याख्याता। तां प्रातिलोम्येन व्याचक्ष्महे। सादिनाम(-य-)मायामा इति। या कान्ता आयामा सा दिनामयमायामा नाधि(धी)ता शरदाऽमुया नेति सम्बन्धः। दिनमेवामयो रोगः, तं दिनामयम्। अमुया शरदा अनेन शरत्समयेन हेतुभूतेन (न) नाधीता किं तु अधीतैव प्राप्तैव। किंविशिष्टा सेत्याह आयामा 'अय गतौ आभिमुख्येन अयते प्राप्यते इत्यर्थः। (......?) तथाप्यासनाजनना आसनमासना आसेर्धातोर्भावे युच्। आसनाऽवस्थानमागमनाभावः तां जनयति आसनाजनना नन्द्यादिपाठा कर्तरि ल्युः। यतप्त(स्त)व शोकविरामाय वियोगदुःस्वापनोदाय न भवति यतश्च मानया मानोऽ(-नम)भिमानमहङ्काराख्यं, यदुक्तमभिमानोऽहङ्कारः, तं यात्यनुसरतीति मानया मानिनी यतः अतो न शोकविरामायेति मानया इति विशेषणमपीदं हेतुत्वेन द्रष्टव्यम्। यथा गुरवो राजभाषा न भक्षणीया गुरुत्वादिति प्रतीयते यथा वा यत्कृतकं तदनित्यमितीद विशेषणमपि कृतकत्वादिति हेतुः तथा मानयेति मानित्वादिति द्रष्टव्यम्। न शोकविरामायेति साध्यनिर्देशत्वात्(इति?) अलमिति विस्तरेणोक्तोऽयमर्थः। समुदायार्थो व्याख्यायते। यामया मदन्तिकमागच्छेत्याहूता सा अनेन प्रसन्नसलिलाशयसमुत्फुल्लकमलकुवलयकल्हारहारिवारिणा सप्तच्छदरज पुञ्जपिञ्जरमञ्जुलझङ्कारिकनिरत्न(?)झङ्कारिणा व्याधेनेव सन्नद्धब णासनेन जिनपत्रिवचनेनेव प्रबोधितहव्यबन्धुजीवेन (?) गुणेन्दुनेव प्रसाधितदिगम्बरेण सत्यवाक्येनेवानन्दितविशुद्धपक्षेण शरत्समयेन दिनावि(भि)-

धानव्याधिमभिगतवते(त्ये)व, यतो निशि निद्रामुद्रितान्तर्बहिष्करणस्य तिरोहितचैतन्यस्य स्वस्वप्नोपलब्धप्रियजनसमागमसुखस्य न तथा विरहव्यथाऽनर्थहेतुः यथाऽह्नीति तथापीयमि(म)तिमनस्विनी प्रकृत्या प्रियतमा न मत्समीपमागमदतो न मे गुरुविरहबाधाविधुरं मनः सुखीभविष्यतीति कश्चिन्मन्मथमथितः सख्ये इदमभ्यधात्। [अथ च सा आदि विधिना ग्रस्ता या एवंभूता ऊना न हीना (न) अधिकेत्यर्थः।] किंविशिष्टेत्याह मानयमाराविकशा मानो गर्वः तं यातीति मानयः मारः कामः। मानयश्चासौ मारश्चेति मानयमारः, तं अवितुं रक्षितुं कशा चर्मयष्टिः। तुरगप्रहरणविशेषः सा मानयमाराविकशा। पुनरपि किंविशिष्टेत्याह आनजनासना अनन्ति प्राणन्तीत्यान(नाः) जना लोकाः आनाश्च (ते) जनाश्च आनजनाः युवजना इत्यर्थः। प्रकृष्टप्राणत्वात्तेषाम्। असना क्षेपिका उत तानस्यति निरस्यतीति असना धिक्कुर्वाणेत्यर्थ। यामेवंभूतां वयमायाम उ(नो)परमयन्नि(ती)त्ययमनः कर्तरि ल्युट्(:)। हे अयमन सा अधि(आदि) ग्रस्तेत्यर्थः। उदारशताधीना उदारा उत्कर्षाः तेषां शतेन शतमित्युपलक्षणम्। सहस्रप्रभृति तैरधीना स्वायत्ता ताम्। अयपातामयाम् (अथवा तामयाम्)। अहमगममिति। तदा आयमना आ समन्ततः उपरमणा इति। (यान)मानयमाराविकशा आनजनासना या स्त्री न ऊना न परिहीणा या मुदारशताधीनामुदारशतप्रतिबद्धां आयाम उपगताः स्मः। सा स्त्री आधि(आदि)ग्रस्ता विधिनेत्यर्थात् कश्चिदापद्रतायां बालायामेवमनुशोचते। कशयाऽभिप्रहरति पीडाकरी यतः (-कर्या। अत)एवेयं वनिताऽपि तरुणा (ण)जनबाधिनी कशात्वेन रूपिता।।

अस्यैव प्रातिलोम्येन पुनरावृत्तावयमर्थः। अ(आ)यते आगच्छतीत्यायः। आयः प्राप्तः अमः खेदः या सा आयामा। अस्यतीत्या(त्य) रामो(मः तस्मै) मानः कोपः तं यातीति मानया कोपवतीति यावत्। अयमर्थः। या स्त्री शोकविरामाय, (क)स्यचिन्ता(न्ना)सना न क्षेपिका, न जनना कस्यचिदत्यर्थात् सा स्त्री आयामा प्राप्तखेदा। मानया कोपवती। अमुया शरदा अनेन शरत्कालेन दिनामं दिवसव्याधिं न नाधीता न न गता गतैवेति यावत्। कश्चित् कामी देशान्तरस्थः प्रियासमीपोगममलभमानः शरदमायान्तीं दृष्ट्वा प्रियां संस्मरन्नेवमनुशोचते।।

अथ च यानं रथमानय प्रापय मा रावि, राविरा(?), मा विषीद इति यावत्। किमर्थामिति चेद्या काऽपि सेना मुदा हर्षेण आर आगता अमुयाऽनया शोकविरामाय दुःखविनाशनार्थं यानमानयेत्यर्थः। सा किं विशिष्टेत्याह–कशोना कशा चर्मयष्टिः। तया ऊना परिहीणा। अनेन तुरगबलरहितेति वक्ति। अस्मत्पक्षे तत्स्वयं (त्वाश्वीयं) भवति। तस्माच्च सा जेतुं शक्या। तथाप्या(आ)नज़नासना भीरुजनक्षेपिका आनजनाः प्राणजनाः प्राणरक्षणपरा इति यावत्। तेषां क्षेपिका। या मुदा हर्षेण सिंहनाद कुर्वत्यागता सा शताधीना बहुनायका तस्मादपि च जेतुं शक्या। अस्मत्सैन्ये नायकबहुत्वमपि न; राक्षसाधिपती रावण एव नायकः। अयं जनोऽपि तस्य भ्रूक्षेपवर्ती। अमाया माया नाम कपटव्यापारः। तेन रहिता। सा ह्यस्मास्वस्ति, तेनापि जेतुं शक्या। मा माम् आर प्रापेति। अयमना अनुपरमा पुनः पुनरप्यागच्छन्तीति अथवा अयमना यमनो दमनः तेन रहिता एतादृशी चपला नाम स्थे(से)ति तस्मादपि च जेतुं शक्या। सा एवंभूता आदि भक्षिता नष्टेत्यर्थः। पुनरपि किंविशिष्टेत्य(त्र) प्रतिलोमार्थो व्याख्यायते। सादिनां

पदानां [?] अयमायामा अदम्यमानबाहुल्या। तस्माद्यानमानयेति सम्बन्धः। [.... ....] एतादृश्यपि कश्चित् कपिसैन्ये छत्रभृङ्गारादिदानेन पूजितो नवेत्याह। न मानया मानं पूजा तां यातीति मानया न मानया न पूजा प्राप्ता तस्मादपि च जेतुं शक्या। कपिसेनया परिभूतं राक्षससैन्यं दृष्ट्वा मेघनादो ब्रवीति।।

श्लोकप्रतिलोमं श्लोकद्वयेन दर्शयति—**यानमिति।** यानम्, आनय, मा, रावि, कशा, ऊनानजना, आसना, याम्, उदार, शताधीनाम्, आयामायम, अनादि, सा। यानं रथम्; आनय उपस्थापय; मा रावि मा अभिधायि, माङि उपपदे रुशब्दे इत्यस्मात् कर्मणि लुङ्; कशा—कं सुखं श्यति तनूकरोतीति कशा सुखनाशिनी; ऊनानजना—अल्पप्रमाणो जनः यस्यां सा, दुर्बलजना इति यावत्; आसना एकासिका; यां प्रकृताम्; उदार दीर्घकालं प्राप्तवानस्मि, ऋ गतौ इत्यस्मात् उत्पूर्वात् लिटि उत्तमपुरुषैकवचनम्; शताधीनाम् अनेकहेत्वधीनाम्; आयामायम्—आयः अर्थायतिः, तस्य आमायं बाधकं, मी हिंसायाम् इत्यस्मात् कर्मण्यण्, क्रियाविशेषणमेतत्; अनादि अभ्यधायि, नदतेः कर्मणि लुङ् ; सा तच्छब्दः। विजिगीषुः सारथिं प्रत्याह—यानं आनथ, कशा ऊनानजना आसना मारावि, शताधीनां याम् उदार, सा आयामायम् अनादि। इति अनुलोमं दर्शितम्। प्रतिलोमं दर्शयति—**सादिनामिति।** सादिनाम्, अयमायामा, न, अधीता, शरदा, अमुया, न, आसना, जननाशोकविरामायनमानया। सादिनां तुरङ्गारोहिणाम्; अयमायामा—अयमः अनुपरमः, आयामः विस्तारः, यस्यां सा; नेति प्रतिषेधे; अधीता कथिता; शरदा शत्कालेन; अमुया अनया; नेति प्रतिषेधे; आसना—असु क्षेपणे इत्यस्मात् णिजन्तात् 'ण्यासश्रन्थो युच्' इति युचि, आसना

शत्रुक्षेपणा, समरः इति यावत्; जननाशोकविरामायनमानया–जनानां मार्गसञ्चारिजनानाम्, अशोकः अविषादः तदभावः नाशोकः शोक इति यावत्, तस्य जन(–ना–) शोकस्य विरामं अवसानकरं, अयनमानं मार्गप्रमाणं यस्याः तया, पङ्कशोषात् विस्तीर्णमार्गया इति यावत्। अस्यार्थः–जननाशोकविरामायनमानया अमुया शरदा सादिनाम् अयमायामा आसना न न अधीता; एवंभूता शरत् अस्मान् उद्ये जयति इति भावः।।७६–७७।।

वर्णानामेकरूपत्वं यद्येकान्तरमर्धयोः।
गोमूत्रिकेति तत् प्राहुर्दुष्करं तद्विदो यथा॥७८॥

रत्नश्री

अर्धयोः श्लोकसम्बन्धिनोरभिव्यक्त्यर्थः उपर्यधोभावेन लिखितयोः सम्बन्धिनां वर्णानां निरन्तराणामेकरूपत्वं सारूप्यं तेषामेव वर्णानां समुत्थानात्। एकैकमक्षरमन्तरं व्यवधानमस्मिन्नित्येकान्तरम् एकैकवर्ण- व्यवधानं यदि भवति निरन्तरपाठवदर्धयोरौत्तराधर्येण एकैकवर्णान्तरपाठे स एव श्लोको यदि [104a] निष्पद्यत इत्यर्थः। तदीदृशं दुष्करं गोमूत्रिकेति अभिधानेन प्राहुः व्यवहरन्ति तद्विदो गोमूत्रिकाबन्धवादिनः। यथेत्युदाहरति॥

हृदयङ्गमा

अथ चित्रालङ्कारान् कांश्चित् निरूपयिष्यन् प्रथमं गोमूत्रिकां निर्दिशति, वर्णानामिति। –(अत्रेदमवधेयं–चित्रालङ्कारभेदेषु वक्तव्येषु प्रथममेव किं नाम तल्लक्षणमित्यवश्यं वक्तव्यमपि प्रसिद्धतया ग्रन्थकृता नोक्तम्, अस्माभिस्तु शिष्याणां शिक्षासौकर्य्यार्थं किञ्चिदुच्यते– चित्रमालेख्यमिति, तदिव जीवितस्थानीयध्वनिरहितं चित्रमिति काश्मीरकाः। तदयुक्तं, ध्वनेः प्राधान्यानङ्गीकारात् प्रतीयमानभावस्य क्वचिदपि असम्भवाच्च तदा आकृतिविशेषयुक्तं चित्रमित्येव भवतु, तदपि न, अव्यापकत्वात्; तस्मात् वर्णादिनियमेन प्रवृत्तमाश्चर्य्यकारितया चित्रमिति चित्रशब्दोऽत्राश्चर्य्यार्थकः इति समाधानम्। तच्च षड्विधमिति केचित् आहुः ; तथा हि –वर्णचित्रं, स्थानचित्रं, स्वरचित्रम्,

आकारचित्रं, गतिचित्रं, बन्धचित्रञ्चेति; यदुक्तं, –"वर्णस्थानस्वराकारगतिबन्धान् प्रतीह यः। नियमस्तद्बुधैः षोढ़ा चित्रमित्यभिधीयते।।" इति। तत्र गतिचित्रं तावत् आदावेवानेन दर्शयित्वा वर्णस्वरस्थानचित्राणि प्रदर्शितानि। आकारबन्धौ तु नैव दर्शितौ। तत्र आकारः पद्माद्याकृतिमुद्रणं, बन्धः विविड़ितप्रभृतिः ; एतयोश्च परस्परभेदः दुरधिगमः उभयोरेव आकृतिगतत्वादिति)। अर्द्धयोः श्लोकस्य यथाक्रमं पूर्वार्द्धोत्तरार्द्धयोः, ऊर्द्ध्वाधःक्रमेण पङ्क्तिद्वयेन लिखितयोरिति भावः, वर्णानाम् अक्षराणाम्, एकान्तरम् एकाक्षरव्यवहितं, यत् एकरूपत्वम् अभिन्नाकारत्वम्, एकैकाक्षरव्यवधानेन यत् एकविधवर्णविन्यसनमित्यर्थः, तद्विदः चित्रालङ्कारज्ञाः, दुष्करं सहसा कर्त्तुमशक्यं, तत्तु तदेव, ("तत्" इत्यत्र "तम्" इति पाठे तम् अलङ्कारमित्यर्थः) गोमूत्रिकेति चलतो गोर्मूत्रधाराकारत्वेन श्लोकबन्धस्य घटितत्वात् गोमूत्रिकासंज्ञं, प्राहुः। (तदुक्तं यथा कण्ठाभरणे, –"गतिरुच्चावचा यत्र मार्गे मूत्रस्य गोरिव। गोमूत्रिकेति तत् प्राहुर्दुष्करं चित्रवेदिनः।।" इति। गोमूत्रिका च प्रधानतः त्रिविधा, पादगोमूत्रिका, श्लोकार्द्धगोमूत्रिका, श्लोकगोमूत्रिका च, अन्येऽपि अवान्तरभेदा अस्या विपरीतादयः सन्ति। इदन्तु, लक्षणम् उत्तरार्द्धवर्णानामेकान्तरितत्वेन तादृशपूर्वार्द्धवर्णैः ऐकरूप्यात् अर्द्धगोमूत्रिकायां इति वेदितव्यम्। पादगोमूत्रिका पुनः यत्र प्रथमद्वितयपादयोः तादृशाक्षराणामैकरूप्यं तृतीयचतुर्थयोरपि अन्यविधमैकरूप्यं तत्रैवावगन्तव्या; उदाहरणं यथा, –"काञ्चन् पुलोमतनयास्तनताड़ितानि वक्षः स्थलोच्छितरयाञ्चनपीड़ितानि। पायादपायभयतो नमुचिप्रहारी मायामपास्य भवतोऽम्बुमुचां प्रसारी।।" बन्धप्रकारो यथा–

पादगोमूत्रिकाबन्धः।

कां	नपु	म	न	स्त	ता	ता
क्ष	लो	त	या	न	ड़ि	नि
व	स्थ	छि	र	ञ्च	पो	ता
पा	द	य	य	न	चि	हा
या	पा	भ	तो	मु	प्र	री
मा	म	स्य	व	ऽम्बु	चां	सा

श्लोकगोमूत्रिकायां पुनः श्लोकद्वयम् ऊर्ध्वाधःक्रमेण स्थापनीयं, ततः प्रथमश्लोकस्य प्रथमपादीयैकान्तरितवर्णानां द्वितीयश्लोकस्य प्रथमपादीयैकान्तरितवर्णैः, तथा द्वितीयादिपादानामपि एकान्तरितवर्णानां द्वितीयादिपादीयैकान्तरितवर्णैः एकरूप्यमवगन्तव्यम्)। यथेति उदाहरणार्थम्।।७८।।

प्रभा

एवं दुष्कारान् यमकालंकारान् निरूप्य दुष्करान् चित्रालंकारान् विवूर्षुः प्रथमं अर्धगोमूत्रिकाबन्धं लक्षयति–**वर्णानामिति**। अर्धयोः पूर्वार्धोत्तरार्धयो रूर्ध्वाधः क्रमेण लिखितयोः। वर्णानाम् अक्षराणाम्। एकान्तरम्। एकवर्णव्यवहितम्। यद् एकरूपत्वम् समानाक्षरत्वेनाभिन्नत्वम्। तत् तादृशवर्णरचनम्। तद्विदः चित्रालंकारज्ञाः। गोमूत्रिका इति प्राहुः गोमूत्रिका इति संज्ञया व्याजहुरित्यर्थः। चलतो गोर्मूत्रस्य धारा भूमौ ऊर्ध्वाधः क्रमेण बहुकोणयुता यादृशी दृश्यते तादृशी लेखकृतिर्विरचिता चेत् तत्र पूर्वोत्तरार्धयोः समानाक्षराणां स्थितिः प्रतिकोणं दृश्यते। अतः

गोमूत्रिकेति संज्ञया व्यवहारः। अत्र तुशब्दः पूर्वप्रक्रान्तयमकालंकारभेदप्रदर्शनाय दुष्करं साधारणकविना निबद्धुमशक्यम् गोमूत्रिकायास्त्रैविध्यं वर्तते। पादगोमूत्रिका अर्धगोमूत्रिका श्लोकगोमूत्रिका चेति। तत्रेदं लक्षणमर्धगोमूत्रिकाया इति बोद्धव्यम्। यत्र तु चतुः पङ्क्तिषु चतुः पादान् विलिख्य अर्धगोमूत्रिकाप्रकारेणैव एकान्तरितं पूर्वोत्तरश्लोकयोरेकान्तरिताक्षरसाम्यं तत्र श्लोकगोमूत्रिका इति ज्ञेयम्।।७८।।

विवृति

इति यमकचक्रम्।।

गोमूत्रिकालक्षणमाह–

वर्णानामक्षराणामेकरूपत्वं यद्येकान्तर[रं] वर्णेन एकेन वर्णा[अ]न्तरितं व्यवहितं जायेत यदि स्यात् भवे। अर्धयोः श्लोकस्य पूर्वार्धपश्चिमार्धयोः तदा गोमूत्रिका सा इति। एवं तं[तद्]यमकमाह [हुः।] दुष्करं दुर्विरचं तद्विदो दुष्करविदस्सूरयः तदुदाहरन्ति। यथेत्युदाहरणदर्शने।।

एवं यमकमप्युपसंहृत्य दुष्करान्तराणि दर्शयिष्यन् गोमूत्रिकालक्षणं तावदाह–**वर्णानामिति**। अर्धयोरुभयोः एकान्तरिताः वर्णाः एकरूपाश्चेत् तदा गोमूत्रिका इति संज्ञा। गोमूत्रवत् गोमूत्रिका, इवार्थे कः। अस्य पूर्वार्धापरार्धयोः। पङ्क्तिद्वयेन लिखितयोः, अपरार्धप्रथमवर्णमारभ्य पूर्वार्धाद्वितीयवर्णे द्वितीयार्धतृतीयवर्णे पूर्वार्धचतुर्थवर्णे चेत्येवम् एकान्तरितं पठ्यमाने पूर्वार्धं द्रष्टव्यम्; एवं पूर्वार्धप्रथमवर्णमारभ्य अपरार्धद्वितीयवर्णादौ पठ्यमाने द्वितीयार्धं द्रष्टव्यम्।।७८।।

मदनो मदिराक्षीणामपाङ्गास्त्रो जयेदयम्।
मदेनो यदि तत् क्षीणमनङ्गायाञ्जलिं ददे॥७९॥

रत्नश्री

मदिराक्षीणां स्त्रीणाम्। अपाङ्गं कटाक्ष एवास्त्रमायु रागसाधनत्वाद् यस्येति अपाङ्गास्त्रः देवदत्तस्य गुरुकुलमिति यथा। मदनः कामः। अयं लोकविख्यातः। जयेद् जगद्वशीकुर्यात्। न क्वचित्प्रतिहतशक्तिर्य[दि] यस्मात् इष्टविषयप्रापणात्। मम एनः पापम् अर्थात् तत्प्राप्तिविघ्नभूतम्। क्षीणम् अस्तंगतम् ततः पूर्णमनोरथत्वात् अहमनङ्गाय तस्मै कृपाद्यपपत्तये। तादर्थ्ये क्रियासम्बन्धे वा चतुर्थी। अञ्जलिं प्रणामकरसम्पुटं दधेः रचयामि तमाराधयामीति कश्चित् कामी [काचित्] कामिनी वा ब्रवीति॥

हृदयङ्गमा

श्लोकार्द्धगोमूत्रिकामुदाहरति, मदन इति। –अयं मदनः कामः, मदिराक्षीणां मत्तखञ्जननयनानाम्, अपाङ्गमेव अस्त्रं यस्य तथाभूतः सन्, यदि जयेत् मां प्रहरेत् इत्यर्थः, तत् तदा, मदेनः मम पापं, क्षीणं, स्यादिति शेषः, तदा च अनङ्गाय मदनाय, अञ्जलिं ददे पुष्पाञ्जलिं ददामि इत्यर्थः, अहम् इति शेषः, यदि अहं कामिनीभिः सकटाक्षमीक्ष्ये तदा कृतार्थो भवामि इति भावः। (अत्र पूर्वार्द्धोत्तरार्द्धयोर्विषमवर्णाणि एकरूपाणि, समवर्णानि भिन्नरूपाणि इत्येकान्तरत्वेनैकरूप्यात् गोमूत्रिकाबन्धलक्षणसङ्गतिः। विषमवर्णैकरूप्ये बन्धलिखितश्लोकोत्तरार्द्धस्य प्रथमाक्षरमारभ्य पूर्वार्द्धस्य द्वितीयाक्षरं पठनीयं, पुनरपि परार्द्धतृतीयाक्षरं पठित्वा पूर्वार्द्धचतुर्थाक्षरमित्येवंक्रमेण पठने पूर्वार्द्धं निष्पन्नं स्यात्, ततः

पूर्वार्द्धप्रथमाक्षरमारभ्य उत्तरार्द्ध पठनीयम्। समवर्णानामैकरूप्यस्थले तु पूर्वार्द्धप्रथमाक्षरमारभ्य उत्तरार्द्धं निष्पन्नं स्यात्, ततः पूर्वार्द्धप्रथमाक्षरमारभ्यैव उत्तरार्द्धं पठनीयम्। समवर्णानामैकरूप्यस्थले तु पूर्वार्द्धप्रथमाक्षरमारभ्यैव पूर्वार्द्धम् उत्तरार्द्धप्रथमाक्षरमारभ्य च उत्तरार्द्धं पठनीयं। विषमवर्णानां पूर्वोक्तसमवर्णवत् पठनं, तेन च सम्पूर्णश्लोको निष्पद्यते इति अर्द्धगोमूत्रिकि। बन्धलिखनप्रकारो यथा, –एतद्विपरीतानि अपि सम्भवन्ति, दिङ्मात्रमेवात्र दर्शितमिति।

अर्द्धगोमूत्रिका बन्धः।

दम रा णा पा स्त्री ये यम

म नो दि क्षी म ङा ज द

देय तत् ण न यात्र् लिं दे

आकारचित्रबन्धचित्रयोस्तु बहवो भेदाः ; ते तु खड्गमुरजपद्ममुषलशक्तिहलप्रभृतयः अन्यैरुक्ता ज्ञेयाः। तत्र खड्गबन्धो यथा, –"मारारिशक्ररामेभमुखैरासाररंहसा। साराखधस्तवा नित्यं तदार्त्तिहरणक्षमा।।" "माता नतानां संघट्टः श्रियां बाधितसम्भ्रमा। मान्याऽथ सीमा रामाणां शं मे दिश्यादुमाऽद्रिजा।।" अनेन श्लोकद्वयेन खड्गबन्धः प्रस्तीर्य्यते। तत्र मुष्टेरुपर्य्यधः शाखाद्वयम्, उपरि शाखाचतुष्पथे प्राथमिक 'मा' कारं विन्यस्य तिर्य्यगधः क्रमेण 'रारि' इत्यादि 'ह' कारान्ताश्चतुर्दश वर्णान् न्यसेदित्येका धारा। ततः खड्गशिखायां श्लिष्टं 'सा' इति न्यसेत्, ततस्तिर्य्यगूर्द्ध्वक्रमेण 'रारब्ध' इत्यादिवर्णचतुर्दशकं विलिख्य अपरां धारां कुर्य्यात्, 'मा' कारः पूर्व 'मा' कारं प्रविष्टः;

एवमग्रेऽपि तत्रैव प्रविष्टं कल्पयित्वा दक्षिणशाखायां 'ता' इत्यादिवर्णसप्तकं विन्यस्य वामशाखायां तिर्य्यग्विलोमेन 'श्रि' कारादिवर्णसप्तकं लिखेत्; 'मा' कारचतुष्पथं प्राथमिक 'मा' कारं प्रविष्टः, ततस्तमेव 'मा' कारमारभ्य अधोऽधः 'न्याथसी' इति त्रयो वर्णा मुष्टौ लेख्याः। ततोऽधश्चतुष्पथमध्यं तदन्तिम 'मा' कारं विन्यस्य तद्दक्षिणशाखायां "रामाणां शं" इति चतुरो वर्णान् विन्यसेत्, ततो वामशाखायां विलोमेन 'मं दिश्यादु' इति चतुरो वर्णान् लिखेत्। 'मा' कारः अधश्चतुष्पथस्थ 'मा' कारं प्रविष्टः। ततो मुष्टेरधः त्सरुके 'द्रिजा' इति वर्णद्वयं लेख्यमिति खड्गनिष्पत्तिः।

मुरजबन्धो यथा, –"सा सेना गमनारम्भे रसेनासीदनारता। तारनादजना मत्तधीरनागमनामया।।" अत्र पङ्क्तिचतुष्टयेन लिखितस्य पादचतुष्टयस्याधःक्रमेण यथाक्रमं प्रथमद्वितीयतृतीयचतुर्थानूर्द्ध्वक्रमेण पञ्चमषष्ठसप्तमाष्टमान् वर्णान् गृहीत्वा प्रथमः पादः। द्वितीयात् प्रथमं प्रथमात् द्वितीयतृतीयौ द्वितीयात् चतुर्थपञ्चमी प्रथमात् षष्ठसप्तमौ द्वितीयादष्टमं गृहीत्वा द्वितीयः पादः। तृतीयात् प्रथमं तुर्य्यात् द्वितीयतृतीयो तृतीयात् तुर्य्यपञ्चमौ तुर्य्यात् षष्ठसप्तमौ तृतीयादष्टमं गृहीत्वा तृतीयः पादः। पादचतुष्टयस्योर्द्ध्वक्रमेण प्रथमद्वितीयतृतीयचतुर्थानधःक्रमेण पञ्चमषष्ठसप्तमाष्टमान् गृहीत्वा चतुर्थपादः पाठ्यः, एवं मुरजसिद्धिः। तत्र मुरजबन्धप्रकारो यथा,–

तथा पद्मबन्धो यथा, –"भासते प्रतिभासार! रसाभाता हताविभा। भावितात्मा शुभा वादे देवाभा वत ते सभा।।" अत्राष्टदिक्षु वितताष्टदलं पद्मं लेख्यं, तत्र कर्णिकायामाद्यः 'मा'

कारः लेख्यः, ततो दले निर्गमप्रवेशरीत्या द्वौ द्वौ वर्णौ लेख्यौ, किन्तु दिग्दलेषु निर्गमः प्रवेशश्च, तत्र च प्राच्यदले आदौ निगमः श्लोकान्तप्रवेश्च; दक्षिणोत्तरदलयोः निर्गत्यैव प्रवेशः, पश्चिमदले तु प्रविश्यैव निर्गमः। आग्नेयवायव्यदलयोः प्रवेश एव, नैर्ऋतेशानयोस्तु निर्गम एव इति अष्टदलपद्मबन्धः। तथा चोक्तं, "कर्णिकायां न्यसेदेकं द्वे द्वे दिक्षु विदिक्षु च। प्रवेशनिर्गमौ दिक्षु कुर्य्यादष्टदलाम्बुजे॥" इति। एवमन्येऽपि मुषलादयो वेदितव्या इति दिक्)॥७९॥

प्रभा

अर्धगोमूत्रिकामुदाहरति–**मदनो इति।** अयं मदनो मदिराक्षीणां मदिरेव उन्मादजनके आरक्ते वा अक्षिणी यासां तास्तासाम्। अपाङ्गः नेत्रप्रान्तः। नेत्रप्रान्तेन विलोकनमित्यर्थः। स एव अस्त्रं यस्य एतादृशः सन्। यदि जयेन् मामात्मवंश कुर्यात्। तत् तदा। मदेनः मम पातकम्। क्षीणं इति कल्पये। मदिराक्षीविलोकनेन मम पातकं नष्टं इति मन्ये इत्यर्थः। अतोनङ्गाय अञ्जलिं नमस्काराञ्जलिं ददे। प्रणमामीत्यर्थः। विलासिनीभिः कटाक्षेणाभिहतश्चेदहं कृतार्थो भवामीत्यर्थः। अत्र पूर्वार्धोत्तरार्धविषमवर्णानामेकरूपत्वम्। तत्र पठनप्रकारस्तु श्लोकोत्तरार्धस्थप्रथमाक्षरमारभ्य पूर्वार्धस्थद्वितीयाक्षरमुत्तरार्धस्थतृतीयाक्षरं पुनः पूर्वार्धस्थचतुर्थाक्षरम् एवमूर्ध्वाधःस्थकोणस्थिताक्षरे पठनेन पूर्वार्धसिद्धिः। तथैव पूर्वार्धप्रथमाक्षरमारभ्य पूर्वोक्तक्रमेणैव पठने उत्तरार्धसिद्धिः। अत्र विषमवर्णानामेक- रूपत्वम्। यत्र तु समवर्णानामेकरूपत्वं तत्र पूर्वार्धप्रथमाक्षरमारभ्यैव पूर्वक्रमेण पठने पूर्वार्धसिद्धिः। उत्तरार्धप्रथमाक्षरमारभ्य पूर्ववत् पाठे उत्तरार्धसिद्धिः। यथा–

अजरामशुभाचारबलिशीलविनोचिता।
भुजङ्गमनिभासारकलिकालजनोचिता।।

इति। अत्र द्वितीयादिसमवर्णानामेकरूपत्वम्। इयमर्धगोमूत्रिका। पादगोमूत्रिका यथा--

काङ्क्षन् पुलोमतनयास्तनताडितानि
वक्षः स्थलोत्त्थितरयाञ्चनपीडितानि
पायादपायभयतो नमुचिप्रहारी
मायामपास्य भवतोम्बुमुचां प्रसारी।।

इति। अत्र पङ्क्तिचतुष्टयेन श्लोको लेख्यः। तत्र प्रथमद्वितीयपादयोरर्धगोमूत्रिकावदक्षरपाठे द्वितीयप्रथमपादसिद्धिः। एवमेव उत्तरार्धेपि। श्लोकगोमूत्रिका यथा–

पायाद्वश्चन्द्रधारी सकलसुरशिरोलीढपादारविन्दो
देव्या रुद्धाङ्गभागः पुरदनुजदवस्त्यानसंविन्निधानम्।
कन्दर्पक्षोददक्षः सरससुरवधूमण्डलीगीतगर्वो
दैत्याधीशान्धकेनानतचरणनखः शंकरो भव्यभाव्यः।।

इति प्रथमश्लोकः। द्वितीयो यथा–

देयान्नश्चण्डधामा सलिलहरकरो रूढकन्दारविन्दो
देहे रुग्भङ्गरागः सुरमनुजदमं त्यागसंपन्निधानम्।
भन्दं दिक्क्षोभदश्रीः सदसदरवधूखण्डनागीरगम्यो-
दैत्यैधी बन्धहानावततरसनयः शंपरो दिव्यसेव्यः।।

इति। अस्या बहुविधः प्रपञ्चः सरस्वतीकण्ठाभरणादिषु द्रष्टव्यः।।७९।।

विवृति

अयं मदनः कामः मदिराक्षीणां विलोललोचनानां अपाङ्गास्त्रं अपाङ्गः कटाक्षनिरीक्षितमेव अस्त्र आयुधमिव अशेषकामुकजनवश्यतोपनयान्मारणात्मकत्वाद्वा यदि जयेत् जेतुं शक्नुयात् मदेनो पन्नात्[मत्पापं]प्राक्तनं क्षीणं गतमभवत्। [अपाङ्गास्त्रं जयन् दहेदिति पाठः। तदा अयं मदनः मदिराक्षीणामपाङ्गास्त्रं दहेत् भस्मीकुर्याद्यदि मदेनः क्षीणं स ह्यस्मिन् समर्थ एव। जयन्निति सर्वान् स्वीकुर्वन्तु[न्] इत्यर्थः। कुर्व [अ]स्वीकरणे अपाङ्गदहने का प्रतिपत्तिः] अथ वा मदेनः क्षीणं यद्ययं मदनः अपङ्गास्त्रं दहेदिति। किं चैवं यदि स्यात्तदाऽहमनङ्गाय कामाय अञ्जलिं प्रणामं दधे कुर्वे। ददे इति पाठः। तदा ददामीत्यर्थः। कश्चित् कामी कयाचिन्मानिन्या निराकृतः तां कामात् पराजितां कर्तुमिच्छन्निदमाह यदि काम[:] तस्याः कटाक्षनिरीक्षणं जयेत्। तामनुरक्तां वश्यां कुर्याः [त्] तदाहमेवविधायात्मद्विपक्षक्षयकारिण उपकारिणे मदनाय प्रक्षीणदौर्भाग्यदोषसञ्जातपरितोषो ललटतटघटि–करकमलमुकुलो नमस्कुर्वे।। –

गोमूत्रिकामुदाहरति–**मदन** इति। मदेनः मत्पापं क्षीणं यदि मदनः स्मरः मदिराक्षीणाम् अपाङ्गास्त्रं जयेत्–प्रार्थनायां लिङ्–इति अनङ्गाय अञ्जलिं दधे। मां यथा तासाम् अपाङ्गास्त्रं न पीडयेत्, तथा करोत्वित्यर्थः ; ताः मद्वशा भवन्तु इति भावः।।७९।।

आहुरर्धभ्रमं नाम श्लोकार्धभ्रमणं यदि।
तदिष्टं सर्वतोभद्रं भ्रमणं यदि सर्वतः॥८०॥

रत्नश्री

औत्तराधर्येण चतुर्षु पादेष्वभिव्यक्त्यर्थं लिखितेषु प्रथममक्षरमारभ्य औत्तराधर्येण द्विराद्यन्ततः क्रमेण पाठे अर्धं निष्पद्यतं, पुनस्तथैव परिशिष्टस्य पाठे अपरार्धनिष्पत्तिरिति श्लोकस्य द्वाभ्यां भ्रमणं श्लोकार्धभ्रमणं यदि भवेत् तादृशमर्धभ्रमं नाम दुष्करमाहुरामनन्ति तद्विदः।

सर्वतोऽनुलोमप्रतिलोमतः पूर्ववदौत्तराधर्येण च यदि भ्रमणं श्लोकस्य भवेत् तादृशं सर्वतोभद्रं नाम दुष्करमिष्टं तज्ज्ञैरिति॥

तदुभयमुदाहरति–

हृदयङ्गमा

तत्र पद्मबनधकारो यथा, –

अथ अर्द्धभ्रमं सर्वतोभद्रञ्च निरूपयति, प्राहुरिति। –यदि श्लोकार्द्धभ्रमणं श्लोकस्य श्लोकीयपादचतुष्टस्येत्यर्थः, अर्द्धेन अर्द्धमार्गेण, अनुलोमविलोमात्मकयोरुच्चारणमार्गयोर्मध्ये केवलमनुलोममार्गेणेति, भावः, भ्रमणं भ्रमणेन पादोपस्थितिरिति यावत्, तदा अर्द्धभ्रमं नाम चित्रं प्राहुः। यदि सर्वतः अनुलोमप्रतिलोमाभ्यां मार्गाभ्याम् इत्यर्थः, भ्रमणं, तत् तदा, सर्वतोभद्रं नाम चित्रम्, इष्टम्। (तथा हि, द्विविधमिदम् अष्टाक्षरवृत्तिघटितमेव प्रायशो दृश्यते, तत्र प्रथमं चतुःषष्टिकोष्ठानि अष्टपङ्क्तिधटितानि लेख्यानि, ततः आद्यपङ्क्तिचतुष्टये क्रमेण पादचतुष्टयवर्णा

निवेशनीयाः, ततश्च निम्नपङ्क्तिचतुष्टये चतुर्थतृतीयद्वितीय-प्रथमपादा वैपरीत्येन लेख्याः ; तत्र अर्द्धभ्रमे अधः पङ्क्तिचतुष्टये परावृत्त्या सर्वतोभद्रे तु परावृत्त्या समावृत्त्या च चतुर्थादिपादलेखनम इति भेदः। आवृत्तिक्रमस्तु अर्द्धभ्रमे चतुष्पादात्मिकायाम् ऊर्द्ध्वपङ्क्तौ वामात् दक्षिणतः, तथा पादचतुष्टयात्मिकायाम् अधःपङ्क्तौ दक्षिणात् वामतः, एवं वामस्योर्द्ध्वकोष्ठादधःक्रमेण दक्षिणस्य अधः कोष्ठात् ऊर्द्ध्वक्रमेण च अनुलोमावृत्त्या प्रथमादिपादोपस्थितिः। सर्वतोभद्रे तु दक्षिणात् वामतः वामाद्दक्षिणतश्च ऊर्द्ध्वादधःक्रमेण अधस्त ऊर्द्ध्वक्रमेण च अनुलोमप्रतिलोमाभ्यां सर्वत आवृत्त्या पादोपस्थितिरिति बोध्यम्। एवं पठितिभङ्गिविशेषात्मकस्य गतिचित्रस्यैव भेदस्वरूपौ अर्द्धभ्रमसर्वतोभद्रौ ग्रन्थकृता दर्शितौ, एतस्यैव गतिचित्रस्यान्येऽपि भेदा गतप्रत्यागतादयः ग्रन्थान्तरादवगन्तव्याः। तत्र दिङमात्रं यथा,–"वारणागगभीरा सा साराभीगगणाऽरवा। कारितारिबधा सेना नासेधा वरितारिका।।" इति। अत्र प्रथमतृतीयपादयोरानुलोम्येन वर्णावलीं गृहीत्वा तत्प्रतिलोमरूपौ द्वितीयचतुर्थपादौ गृह्येते, अतः पठितेर्वर्णाद्वर्णान्तरसञ्चारात् गतप्रत्यागताख्यं गतिचित्रम्। तथा श्लोकान्तरं यथा, –"वाहनाऽजनि मानासे साराजावनमा ततः। मत्तसारगराजेभे भारीहावज्ज्नध्वनि।।" अत्र प्रातिलोम्येन पठनादपरः श्लोको भवति, यथा, –"निध्वनज्जवहारीभा भेजे रागरसात्तमः। ततमानवजारासा सेना मानिजनाहवा।।" इत्यादि)।।८०।।

प्रभा

अथ अर्धभ्रमं सर्वतोभद्रं च निरूपयति–**प्राहुरिति।** यदि श्लोकार्धभ्रमणं श्लोकस्य श्लोकपादानामिति भावः। अर्धभ्रमणं

अर्धेन मार्गेण। अनुलोमेनेति भावः। भ्रमणं भ्रमणेन पादांपस्थितिस्तदा अर्धभ्रमं नाम चित्रम् आहुः। कवय इति शेषः। यदि सर्वतोनुलोमप्रतिलोमाभ्यां श्लोकपादानां भ्रमणं तदा तत् सर्वतोभद्रमिष्टम् अङ्गीकृतमित्यर्थः। अर्थात् कविभिः। अत्र विन्यासप्रकारः प्रेमचन्द्रादिभिर्दर्शितः स्फुट इति स एव निदर्श्यते। ते चाहुः बन्धद्वयमिदं प्रायेण अष्टाक्षरवृत्तविशेषविषयम्। तत्र संनिवेशप्रकारः। चतुष्षष्टिकोष्ठात्मकेस्मिन् बन्धे क्रमेणाद्यपङ्क्तिचतुष्टये पादचतुष्टयं लेख्यम्। अनन्तरं चाधःस्थपङ्क्तिचतुष्टये चतुर्थतृतीयद्वितीयप्रथमपादा लेख्याः। तत्रार्धभ्रमे अधःस्थपङ्क्तिचतुष्टये परावृत्त्या सर्वतोभद्रे परावृत्त्या समावृत्त्या वा चतुर्थादिपादलिखनमिति विशेषः। तत्रोद्धारक्रमस्तु अर्धभ्रमे ऊर्ध्वपङ्क्तौ वामाद्दक्षिणतः। अधः पङ्क्तौ दक्षिणाद्वामतः। एवं वामस्थोर्ध्वकोष्ठादधः क्रमेण दक्षिणस्थाधः कोष्ठादूर्ध्वक्रमेण च अनुलोमोच्चारणेन प्रथमादिपादोत्थानम्। सर्वतोभद्रे तु वामाद्दक्षिणतो दक्षिणाद्वामत ऊर्ध्वादधस्तः अधस्तादूर्ध्वतश्चानुलोम- विलोमाभ्यां सर्वत आवर्तनेन पादानामुत्थानमिति॥८०॥

विवृति

अर्धभ्रमकलक्षणमाह–

श्लोकस्य यद्यर्धेनैव भ्रमणं यदि श्लोकार्धं [श्लोकोर्धे] भ्रमति न सर्वतः तदा तमर्धभ्रमण[भ्रम]माहुराचार्याः॥

सर्वतोभद्रलक्षणमाह–

यदि सर्वतोऽनुलोमतः प्रतिलोमतस्तिर्यक् च श्लोकस्य भ्रमणं स्यात् तदा सर्वतोभद्रमिष्टं सूरिभिः॥

अर्धभ्रमकसर्वतोभद्रे लक्षयति–**आहुरिति।** चतुर्षु पादेषु अधोऽधापङ्क्तिभिः चतसृभिः लिखितेषु प्रथमवर्णमारभ्य प्रथमपादस्य चत्वारो वर्णाः अधोमुखं पठ्यन्ते। द्वितीयवर्णमारभ्य द्वितीयपादस्य, तृतीयवर्णमारभ्य तृतीयपादस्य, चतुर्थवर्णमारभ्य चतुर्थपादस्य च, चत्वारो वर्णाः अधोमुखं पठ्यन्ते। इत्यधोमुखं षोडश वर्णाः पठ्यन्ते। एवं अधस्तनपङ्क्तेः पञ्चमवर्णमारभ्य चतुर्थपादस्य पञ्चमाद्याः चत्वारो वर्णाः ऊर्ध्वं पठ्यन्ते। षष्ठवर्णमारभ्य तृतीयपादस्य पञ्चमाद्याः, सप्तमवर्णमारभ्य द्वितीयपादस्य पञ्चमाद्याः, अष्टमवर्णमारभ्य प्रथमपादस्य पञ्चमाद्याः वर्णाः ऊर्ध्वं पठ्यन्ते। इति ऊर्ध्वमुखं षोडश इत्यर्धभ्रमत्वम्। सर्वतोभ्रमणं यदि तत् सर्वतोभद्रम्। पूर्ववत् चतुर्षु पादेषु क्रमेण चतसृभिः पङ्क्तिभिः लिखितेषु, तेषामेव अधः एष्वेव पादेषु चतुर्षु व्युत्क्रमाल्लिखितेषु, अष्टौ पङ्क्तयः सम्पद्यन्ते। तासु प्रथमपादादयः चत्वारः पादाः यथा आनुलोम्येन पठ्यन्ते तथैव प्रातिलोम्येनापि। तथैव अधोमुखं पठ्यन्ते ऊर्ध्वमुखं चेति सर्वतोभद्रम्।।८०।।

मनोभव तवानीकं नोदयाय न मानिनी।
भयादमेयामा मा वा वयमेनोमया नत॥८१॥

रत्नश्री

हे मनोभव! अत एव सर्वेषां चित्ताधिष्ठानतया हे नत! प्रत्यासन्न! देवान्तरवद् यो [न] परोक्षः, मानिनी काचिदिष्टा तव अनीकं सेना जगद्विजयप्रयुक्तत्वात्। [अन्या] सेना कुतश्चित् सभयापि। इयं त्वकुतोभया काचित् सेना इत्याह–भयादित्यादि। [सा] अमः पीडा। अमेयोऽप्रमाणोऽमो यस्या इति अमेयामा [भवतु] मा वा [भूत्। कुतः?] भयात् [त्वदुत्थात्] कारणान्तरात् मा वा न भवति। सेयमीदृशीः तवोदयाय जगद्वि[जय]लक्षणाय न न भवति, किं तु भवत्येव। केचन वयमत्र एनोमयाः पापस्वभावाः। अनुदयभाजस्तिष्ठामः, तत्प्रसादाप्रतिलम्भात्, प्रत्युत निर्दयभावनात्। तदियं प्रसीदतु तव सेनेति अर्धभ्रमम्॥

हृदयङ्गमा

तत्रार्द्धभ्रममुदाहरति, मनोभवेति। –हे मनोभव! काम!, हे नत! कामिजन नमस्कृत!, तव अनीकं सैन्यरूपा, मानिनी इयं मानवती, उदयाय वृद्धये, विजयायेत्यर्थः, तवेति शेषः, न इति न, अपि तु उदयायैव। ननु विजयिनां सैन्यम् अपराधिदण्डकं, त्वन्तु नापराधी, तत् तव अत्र किमित्याह, भयादिति। –वयम् एनोमयाः पापिनः अपराधिन इत्यर्थः, मा वा न वा, किन्तु भयात् अमेयामाः अमेयः अपरिमेयः, आमः रोगः येषां तथोक्ताः, यदि च वयमनपराधिनः तथाऽपि भृशं भयार्त्ता जाताः स्मेत्यर्थः। (अस्योदाहरणान्तरं यथा,

–"ससत्वरतिदे नित्यं सदरामर्षनाशिनि। त्वराधिककसंनादे रमकत्वमकर्षति।।" इति)।।८१।।

प्रभा

अर्धभ्रममुदारहति--मनोभवेति। हे नत कामिजननमस्कृत। मनोभव मदन। तव अनीकं सैन्यभूता। मानिनी नायिका। उदयाय अभ्युदयाय। न इति न। अपि तु उदयायैव अस्तीति भावः। ननु विजयिनः सैन्यं सापराधस्य दण्डविधायकं किं त्वं सापराधोसि इति प्रश्नमुन्नीयाह–**भयादिति**। वयं एनोमया पापिनः। कृतापराधा इत्यर्थः। मा वा मैव। अत्र वा एवार्थे। वा समुच्चय एवार्थे उपमानविकल्पयोः। इति हेमचन्द्रः। वयं नैवापराधिनः। परं तु भयात् मानिनीसेनाभयात्। अमेयामाः अमेयः अपरिमितिः आमः पीडा येषाम्। तथा स्म इतिं भावः। इमां तव सेनाभूतां मानिनीं। मद्वशां कुरु। ततो निर्भीकोहं सुखेन स्थास्यामीति प्रार्थना।।८१।।

विवृति

तत्रार्धभ्रमणं तावदुदाहरति–

हे मनोभव चित्तजन्म(न्) मानिनी मानवती या स्त्री सा तवानीकं त्वदीयं सैन्यं सा तव उदयाय विजयाय न न स्यात् स्यादेव। सा च मानिनी त्वत्तो यद्भयं तस्मात् त्वद्भयात् अमेया मातुं शक्यो मेयः। न मेयः अमेयः आमो रोगो यस्याः सा अमेयामा। अपरिमितो मन्मथव्यथाभवतु वा माभूद्व[ा] [व]यं पुनरेनोमयाः पापमयाः कामार्ताः भवेभैव। नम्यते स्म इति नतः तस्यामम्त्रणम्। [अथ च मनोभव चित्तजन्मन् तव ते अनीकं सैन्यं शशिषट्पदसारसादि तत् न उदयाय न संपदे भवति। देव न मानिनी

सा मानवती न च संपदे भवति। भयात् त्वद्भयात् अमेयामा अपरिमितखेदा वयमाहोस्वित् माया [मा वा] खेदरहिता वयम्। तत्र किं तव। वयमेनोमयाः पापमयाः तथाऽपि ते न युक्तम्। दिवा दृष्टे श्वभ्रे रत्न (तत्र) कः पतति। नत [न ते] पुराऽपि मानभङ्गो युक्तः। एवमनुश्रूयते। एकदा [मनोभवः] कमपि तपस्यन्तं तपस्वीन[स्विनं प्रति] निजशरैः पीडामकृत। सोऽपि तं शशाप त्वमनङ्गो भवेति। पुनः पुरन्दरनियोगात् पार्वतीसक्तचित्तं भगवन्तं चिकीर्षु हिमवन्तमागतः तन्नयनाग्निना दग्धः। ततो रतिप्रार्थनया अनङ्ग एव लोकान् पीडयितुं समर्थ इति।।

अर्धभ्रममुदाहरति–**मनोभवेति**। नत निकृष्ट, मनोभव स्मर, तव अनीकं सेनाभूता मानिनी, न न उदयाय जयत्येव मत्पीडनात् एनोमया वयं तद्भयात् अमेयामामावाः–अमेयस्य आमस्य रोगस्य आमावः बन्धो येषां ते, मव बन्धने इत्यस्मात् आङ्पूर्वात् घञ्–भवामः इति शेषः। तां मद्वशां कुरु इत्यभिप्रायः।।८१।।

सामायामा माया मासा
मारानायायाना रामा।
यानावारारावानाया
मायारामा मारायामा॥८२॥

रत्नश्री

[104b] सा काचिदिष्टा रामा स्त्री मासा चन्द्रेण अमा सह माराय नाशार्थम् अस्माकमुपस्थितेति शेषः। कीदृशीति सा विशेष्यते। या रामा अमस्य पीडाया आयामो दीर्घता यस्य इत्यमायामा पीडावती मा न भवति। अदुःखनिमित्तं तप्यत इत्यर्थः। तदेव कुतः? मारस्य कामस्य आनायो जालं जगद्बन्धनं किमपि तत्। अयानमगमनमपतनं यस्या इति मारानायायाना। यतोऽस्याः सुमन्दो रागः, तस्माद् अस्मद् दुःखेन [न] तप्यत इत्यर्थः। सा कीदृशीति पुनर्विशिष्यते [यानं पादयुगम् आवृणोतीति यानावारः, तस्य आरावः शब्दो वर्तते यत्र सा] यानावारारावा, अत एव आनं प्राणमायातीति आनाया बलीयसी माया परव्यामोहो फलोपायश्च आरामः क्रीडाभूमिरस्या इति मायारामा या ईदृशी सा माराय अस्माकमिति [योज]नीयम्। इदं सर्वतोभद्रम्॥

स्वरस्थानवर्णप्रतिनियमलक्षणं दुष्करं दर्शयन्नाह–

हृदयङ्गमा

सर्वतोभद्रमुदाहरति, सेति। –(अत्रायं पदविभागः, –सा, अमायामामाया. मासा; मारानायायानारामा; यानावारारावा, अनाया;

माया, रामा, माराय, अमा इति) अमायामामाया अमायस्य अकपटस्य, अमस्य अपरिमितस्य, आमस्य रोगस्य, कामपीड़ाया इत्यर्थः, आयः आगमनं यया तथोक्ता, तथा मारानायायानारामा मारः काम एव, आनायः जालं, बन्धनहेतुत्वात् इति भावः, तस्य आयानेन आगमनेन, आरामः प्रीतिः यस्याः तादृशी, सततकामव्यापारवती इत्यर्थः, किञ्च यानावारारावा यानं विदेशगमनम्, आवारयति निषेधयतीति यानावारः विदेशगमनप्रतिषेधकः, आरावः, वचनं यस्याः तथाभूता, मधुरभाषणेन मम विदेशगमनं वारितवतीत्यर्थः, किञ्च अनाया नास्ति नायः नयः, नीतिरित्यर्थः, ("नयो नाये" इत्यमरः) यस्याः तादृशी, मम प्रवासाकरणे कार्य्यहानिः भवेन्न वेति विवेकरहिता इत्यर्थः, तथा माया मां लक्ष्मीं यातीति तथोक्ता, अतिसुन्दरीत्यर्थः, सा स्मृत्युपस्थिता इत्यर्थः, रामा रमणी, मत्प्रेयसीति शेषः, मासा चन्द्रेण, ("छायामृगधरो राजा माः" इति चन्द्रपर्य्याये त्रिकाण्डशेषः) अमा सह, ("अमा सह समीपे च" इत्यमरः) माराय मम विनाशाय, तस्याः स्मरणं चन्द्रोदयश्च सम्प्रति मां भृशं व्याकुलयतीत्यर्थः। (कान्तामनुस्मरतो विरहिणो विलापवचनमिदम्। उदाहरणान्तरं यथा, –"दे वा का नि नि का वा दे वा हि का स्व स्व का हि वा। का का रे भ भ रे का का नि स्व भ व्य व्य भ स्व नि।।" इति। अत्र पङ्क्तिचतुष्टयेन लिखनम्, अनुलोमविलोमाभ्यामुपर्य्यधःक्रमेण अधः उपरिक्रमेण च पाठः। किञ्च पादार्द्धमात्रं लिखित्वा प्रतिलोमेन पठनेऽपि सम्पूर्ण एव पादो निष्पद्यते इति सर्वत आवृत्त्या श्लोकनिष्पत्तेरयं सर्वतोभद्रबन्ध इत्यवगन्तव्यम्)।।८२।।

प्रभा

सर्वतोभद्रमुदाहरति–**सामायेति।** कश्चिद्विरही स्वविषमामवस्थां वर्णयति। अत्र पदच्छेदः। सा आमायामा मायाः मासा। मारानायायाना रामा। यानावारारावानाया। मायारामा माराय अमा। अन्वयार्थः–आमायामा आमयस्य विरहज्वरस्य आयामः दैर्घ्यं यस्याः सा आमायामा। प्रभूतविरहज्वरेण संतापिकेत्यर्थः। माया लक्ष्म्याः पञ्चम्यन्तमेतत्। रामा मनोहरा। मारानायायाना मारं मदनमानयति उत्पादयति इति मारानायं मदनोत्पादकम् आयानमागमनं यस्याः सा मारानायायाना। स्वागमनेन मदनवृद्धिकारिणी। यानावारारावानाया यात्यनेनेति यानं पादः तं आवृणोति वेष्टयति इति यानावारः नूपूरस्तस्य आरावः मञ्जुलध्वनिः एव आनायः कामिजनबन्धकं जालकं यस्याः सा यानावारारावानाया। मायारामा शाम्बरीवनिता। माया स्याच्छाम्बरीधियोः। इति विश्वः। अतिविचित्रमनोहररूपेत्यर्थः। एतादृशी सा रमणी मासा चन्द्रेण। मास्तु मासे निशाकरे। इति हेमचन्द्रः। अमा सह। माराय मे विनाशाय। अस्ति इति शेषः। एव खड्गपद्ममुरजमुसलबन्धादयः शब्दालंकारा मनोहराः सन्ति। परं ते नैतावन्तः क्लिष्टाः अतोत्र न निर्दिष्टाः। ते तु प्रबन्धान्तरतो ज्ञेयाः।।८२।।

विवृति

सर्वतोभद्रमुदाहरति–

सा रामा आमायामा[मा]। आमो व्याधिः आम इव आमः विरहदुःखं तस्या याऽऽयामो दैर्ध्यं महत्वमायामः

त[-म]मतिगच्छत्यनुभवतीति आमायामा [मा]। अम गत्यादिषु तस्य पचाद्यच् इत्यचि स्त्रियां टाप्। या मासा माश्चन्द्रः तेन मासा चन्द्रमसा मारः स्मरस्तस्यानाया आनायो जल, 'जालमानाय' इति निपातनात्। आनाय इमा (वा) नायः। लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येत्यानायशब्दःघञ्[ब्दस्य] 'घञन्त'इति पुंसि प्रसिद्धस्यापि स्त्रीलिङ्गत्वमुन्नेयम्। तेन मदनधीवरस्य कामुकजनमत्स्यस्य ब(-त्स्यब)न्धनोपायभूता इत्यर्थः। यानं गमनं वियोगः तदा (द् अ)रामः दुःखहेतुत्वात् अरमतीयं (अरतिमयं) यस्याः सा यानारामा यानावारा यानमायानमागमनं आ(अ)वारः आ(अ)वार्यः [अ]प्रतिषेधो यस्याः सा यानावारा अनिषेध्यागमना या; तदागमनस्य सुखहेतुत्वेन काभिभिरभीष्टत्वात्। या च आरावाना आरावः शब्दः स वानं [अनः] प्राणो यः स[यत्स-]म्बन्धी [शब्दः प्राणः] प्राणा न [प्राणिना] मित्यनेन या मधुर भाषिणीत्युक्तम्। अयः पुण्यं तदस्य अस्तीति अया। अर्शआदिपाठान्मत्वर्थीयोऽच्। पुण्यवतीत्यर्थः। अविद्यमाना[न] माया शाठ्यवर्जिता साध्वी या सा रामा कान्ता मरणं मारः तस्मै माराय मृतये अमा सह। उक्तोऽवयवार्थः समुदायार्थः कथ्यते। या विरहरोगदुःखदैर्घ्यमनुभवति या च मदनधीवरस्य कामुकस्य[-मत्स्य]बन्धजालं यस्याश्च गमनमरम्यं कामिनां, यद्विरहो दुःसह इत्यर्थः। यस्याश्चागमन[म]प्रतिषेध्यां [ध्य] यस्याश्च कोकिलाया इव कलमालपितं प्राणः प्राणिनां या च पुण्यपरमाणुनिचयरचिततनुः या च शाठ्यदोषेण न दूषिता न क्षीणा प्रकृत्या [सा] रामा चन्द्रमेकं सहायमवाप्य कामिनां मरणाय कल्पत इति।

[अथ च सा, या मायारामा अ[आ]र मासा अमा माराय भवतीति वाक्यार्थः। पदार्थो वर्ण्यते। आमायामा विरहपीडितेत्यर्थः। अमाय [या] न मायावस्तुरि[स्त्वि]ति बुद्धिमापन्ना। सा मायाप्यमायेति प्रतीतिगोचरा। केन सह माराय भवतीत्याशङ्क्य मासा चन्द्रमसा। मारानाया कामवागुरु[रा]भूता। यानारामा यानं गमनं आराममु[?]द्यानं या सा यानारामा जङ्गमोद्यानमित्यर्थः। रमणीयत्वाद् यानावा यानं गमन [नं] [आ]वात्यागच्छतीति यानावा। स्वयं कर्तृ रतिश्रान्तेत्यर्थः(?) आर प्राप। आरावाना आरावः शब्दः तेन सार्धमा(म)नः प्राणो यस्याः सा आरावाना सार्धं (सशब्द) निःश्वाससंयुक्तेत्यर्थः। रतिकालनिष्पन्नत्वा[द्]। या न एवंभूता एवंविशेषणविशिष्टा मायारामा स्वप्ने दृष्टा स्त्री सा माराय कामाय अमा सह भवतीत्यर्थात् कश्चित् प्रियावियुक्तः कामी स्वप्ने प्रियामुपलभ्य पुनर्बुध्वा एवमनुशोचते।

अपि च या आमायामा दीर्घखेदा मारानायायाना मन्मथवागुराभूतगमना यानावारा गमन[ना?]वारणा अरावा अवचना अनाया अविद्यमानागमना अ(?)माया रामा सा रामा सा स्त्री मासा चन्द्रेण सार्धं मम माराय मरणाय भवति।।

सर्वतोभद्रमुदाहरति–**सेति**। सा, अमायामा, मायाः, मासा, मारानायायाना, रामा, यानावारारावानाया, मायारामा, माराय, अमा। सा प्रकृता; अमायामा–अमम् अमितम्, आयम् अर्थम्, अमति प्राप्नोतीति, अमतेः पचाद्यच्; मायाः लक्ष्म्याः ; मासा चन्द्रेण; मारानायायाना–मारं स्मरम्; आनयतीति मारानायम्, मारानायम् आयानम् आगमनं यस्याः सा; रामा रमणीया;

यानावारारावानाया—यानं पादम् आवृणोतीति यानावारः नूपुरं, तस्य आरावः शब्दः, स एव आनायः जालकं यस्याः सा, हृदयहारिनूपुरशब्दा इति यावत्; मायारामा आश्चर्यरूपा स्त्री; माराय मरणाय; अमा सह। अमायामा, मायाः रामा, मारानायायाना, यानावारारावानाया सा मायारामा, मासा अमा माराय भवति; इति विरहिणो वचनम्। एतत् अनुष्टुभि प्रथमवृत्तं विद्युन्माला नाम।।८२।।

यः स्वरस्थानवर्णानां नियमो दुष्करेष्वसौ।
इष्टश्चतुः प्रभृत्येषु दर्श्यते सुकरः परः॥८३॥

रत्नश्री

स्वरः अकारादिः। स्थानं च यद्भवो वर्णः कण्ठादिः। वर्णश्च व्यञ्जनं ककारादिः [तेषां] स्वरस्थानवर्णानां नियमः व्यवस्था इयत्ता, योऽसौ नियमो दुष्करेषु वर्णेषु मध्ये इष्टस्तज्ज्ञैः सोऽपि दुष्कर इत्यर्थः। एष च नियमः चतुर्भ्यः प्रत्येकस्वरस्थानवर्णेभ्यः प्रभृति आरभ्य चतुर्षूपादाय [क्रमशो न्यूनतया] एकं स्वरं स्थानं वर्णं वा यावद् दर्श्यते उदाह्रियते। तादृशस्य दुष्करत्वात्। न पञ्चप्रभृति, तस्य सुकरत्वात्, यदाह परः,–पञ्चप्रभृतिनियमः स्वरस्थानवर्णकृतः सुकरमुखेन क्रियते। तस्मान्नासो निर्दिश्यते दुष्कर इति॥

हृदयङ्गमा

प्राचीनैश्चित्रालङ्कारत्वेनङ्गीकृतस्य स्वरादिनियमस्य बहुभेदस्यापि दुष्करं भेदचतुष्टयं प्रत्येकशो दर्शयन्नाह, य इति। –स्वरस्थानवर्णानां स्वरा अकारादयः, स्थानानि कण्ठादीनि, कण्ठ्यादिवर्णा इत्यर्थः, तथा वर्णाः कण्ठ्यतालव्याद्यविशेषेण व्यञ्जनमात्राणीत्यर्थः, तेषां योऽसौ नियमः चतुर्भिरेव स्वरैः त्रिभिरेव द्वाभ्यामेव एकेनैव वा स्वरेण तथा तादृशैः स्थानैः वर्णैः वा काव्यं रचयितव्यमित्याद्यवधारणमित्यर्थः, प्राचीनैरलङ्कारतया उक्त इति शेषः, दृष्करेषु आयासकरणीयेषु, एषु मध्ये, इष्टः दुष्टकरत्वेन अभिमतः, चतुरादिस्वरस्थानवर्णनियम एव आयासकरतया दर्शयितुमुचित इत्यर्थः, चतुःप्रभृति चत्वारः

चतुश्चतुःसङ्ख्यकाः स्वरस्थानवर्णाः, प्रभृतयः आदिभूता यत्र तद्यथा तथा, (क्रियाविशेषणमिदं, चतुरादित्वञ्च एकाद्यपेक्षया इति बोध्यम्) ततश्च चतुःस्वराद्यारभ्य एकस्वरादिपर्य्यन्तम् इत्यर्थः, नियमः इति शेषः, दर्श्यते, चतुस्त्रिद्व्येयकरूपत्वात् चत्वारो भेदा दर्श्यन्ते इत्यर्थः, परः अन्यः पञ्चादिः, सुकरः अनायासनिष्पाद्यः, अतस्तदुदाहरणं यथायथं मृग्यं, दुष्करसाधनार्थमेव प्रयासः, ग्रन्थबाहुल्यभिया सुकराणां प्रदर्शनं प्रत्याख्यातमिति भावः। (अत्रेदमवधेयं यत्, –षड्भेदेषु चित्रालङ्कारेषु मध्ये गतिचित्रं कियत् दर्शयित्वा स्वरचित्रं स्थानचित्रं वर्णचित्रमिति त्रिविधचित्रं तथा तेषाञ्च प्रत्येकशश्चतुर्भेदतया द्वादशविधत्वञ्च श्लोकेनानेन सूचितमिति)।।८३।।

प्रभा

अथ स्वरस्थानवर्णनियमेन वैचित्र्यमावहतः शब्दालंकारान् दिदर्शयिषुराह–**यः स्वरस्थानेति।** स्वराः अकारादयः स्थानानि कण्ठादीनि लक्षणया तद्भवा वर्णा ग्राह्याः। वर्णाश्च व्यञ्जनानि तेषाम् स्वरस्थानवर्णानाम्। यः नियमः अन्यनिवर्तनेनोपादानं चतुर्भिरेव स्वरादिभिर्ग्रथनमितिभावः। असौ एतत्स्वरूपोलंकारः। दुष्करेषु दुर्घटेषु मध्ये। इष्टः प्राचीनानामभिमतः। चित्रालंकारेषु प्राचीनैः स्वीकृत इत्यर्थः। एषः चतुः प्रभृति चतुरादि। अत्र प्रभृतिशब्दो न्यूनसंख्योन्मुख इति ज्ञेयम्। तेन चतुः स्वरः त्रिस्वरः द्विस्वरः एकस्वरः तथा चतुः स्थानः त्रिस्थानः द्विस्थानः एकस्थानः तथा चतुर्वर्णः त्रिवर्णः द्विवर्णः एकवर्णः इति प्रभेदा ग्राह्याः। एतादृशः दर्श्यते उदाहरणेन स्पष्टीक्रियते। परः पञ्चषडादिनियमस्तु सुकरः सुलभः। अतस्तद्दर्शनाय नैव प्रयस्यते इति भावः।।८३।।

विवृति

इति यमकलक्षणमभिधाय सम्प्रति स्वरस्थानवर्णनियममाह–

स्वरा अकारादय ओकारपर्यन्ताः ह्रस्वदीर्धप्लुतोदात्तानुदात्तस्वरित- सानुनासिकानमुनासिकभेदभिन्नाः स्थानान्युरः कण्ठशिरोजिह्वामूलता- लुदन्तोष्ठनासिकाभिधानानि। वर्णाः कादयो हकारपर्यन्ताः त्रयस्त्रिंशत्। यद्यपि स्वरा अपि वर्णाः तथाऽपि पृथक्स्वरशब्दोपादानादिह वर्णशब्दो गोबलीवर्दवत् ककारादिषु वर्तते। न पुनरकारादिष्विति। स्वराश्च स्थानानि च वर्णाश्चेति द्वन्द्वः। तेषां नियमोऽवधारणं दुष्करेषु य इष्टः अभिमतः स एव[ष] चतुष्प्रभृति चतुरवधि अवधि[प्रभृति]शब्दोऽयं मर्यादायां वर्तते। न चतुर्भ्यः स्वरस्थानवर्णेभ्यः प्रदर्श्यते उदाह्रियते अस्माभिः अतः परं पञ्चषडादि सुकरं ततो न प्रदर्श्यत इत्यर्थः॥

दुष्करान्तरलक्षणमाह–**य इति।** चतुष्प्रभृतीति शब्दः अधोमुखप्रवृत्तः। तेन, चतुस्वरः, त्रिस्वरः, द्विस्वरः, एकस्वरः ; इति स्वरनियमः ; चतुस्स्थानः, त्रिस्थानः, द्विस्थानः, एकस्थानः, इति स्थाननियमः ; चतुर्व्यञ्जनः, त्रिव्यञ्जनः, द्विव्यञ्जनः, एकव्यञ्जनः इति वर्णनियमः॥८३॥

आम्नायानामाहान्त्या वाग्
गीतीरीतीः प्रीताभींतीः।
भोगो रोगो मोदो मोहो
धे ये चेच्छे देशे क्षेमे॥८४॥

रत्नश्री

आम्नायानां वेदानाम्, अन्ते भवा अन्त्या वागुपनिषदिति यावत्। सा गीतीर्गानानि विलासिनां सुखाभिमता ईतीरुपद्रवान् मृगाणामिव दुःखानुबन्धित्वाद् आहोपादिशदिति। प्रीतीश्चं संसारे प्राकृतजनसुलभाः चित्तोद्धर्षात्। भीतीः त्रासाद् भयानुबन्धित्वाच्चाह। भोगश्च रूपादिविषयानुभवः। रोगो व्याधिर्विविधदुःखात्मकः [105a] संसाराक्षेपकत्वात्। [तत्र] च वधबन्धनादिव्यसनहेतुत्वात्। तत्रैवं रोगभूते विषयभोगे मोदः सुखितोऽहं सर्वथेति हर्षो मोहोऽज्ञानम् दुःखसुखविपर्यासप्रवृत्तत्वादित्यप्याह सा। यत एवं सर्वमुपद्रुतं संसारचक्रम्, तस्माद् देशे स्थाने क्षेमे सर्वोपद्रवरहिते शान्ते मोक्ष इति यावत्। धानं धा भिदादिदर्शनादाह [?] धारणे चित्तस्य इच्छा च छन्दश्च इच्छे[1] धे ये धातव्ये कार्ये। श्रेयोऽर्थिभिर्मोक्ष एवशरण्यतया चित्तेन धारयितव्यः। तत्रैव च छन्दोऽभिधातव्यः न संसार इत्यप्याह सा वागिति। आकारस्य ईकारस्य ओकारस्य एकारस्यैव च प्रयोगात् चतुःस्वरोऽयं श्लोक इति॥

हृदयङ्गमा

तत्र प्रथमं दीर्घचतुःस्वरमुदाहरति, आम्नायानामिति।–
आम्नायानां श्रुतीनाम्, अन्त्या चरमा, वाक् उपनिषदिति यावत्,

गीतीः गानानि, ईतीः अतिवृष्ट्याद्युपप्लवरूपाः, चित्तक्षोभजनकत्वादिति भावः, तथा प्रीतीः पुत्रदारादिषु प्रणयान्, भीतीः भयङ्करीरित्यर्थः, पुत्रादीनां वियोगादिना दुःखजननादिति भावः, आह ब्रवीति, अतः कारणात् भोगः सङ्गीतादिविषयोपभोगः, रोगः व्याधिस्वरूपः, तथा मोदः वैषयिकानन्दः, मोहः अज्ञानमेव इत्यप्याह इति शेषः, गीतीः ईतीः, प्रीतीः भीतीः केवलमेतदेव न आह, परं भोगः रोगः, मोदः मोहः इत्यप्याह तस्मात् एतत् सर्वं हेयमिति भावः ; तर्हि किं कर्त्तव्यमित्याह,–क्षेमे देशे पुण्यभूमौ, ध्येये परमात्मनि, धेच्छे धानमिति धाः धारणा, मनःसमाधानम् इत्यर्थः, इच्छा तत्प्राप्त्यभिलाषश्च ते, विधेये इति शेषः। (अत्र "धेच्छे" इत्यादौ "चेच्छेत् क्षेमे देशे" इति पाठान्तरे–ध्येये ध्यातव्ये, क्षेमे क्लेशरहिते, देशे विषये, मोक्षलक्षणे इत्यर्थः, इच्छेच्च इच्छां कुर्य्यात् इति। "धेच्छे" इत्यत्र "ध्येच्छे" इति पाठे–ध्या ध्यानमित्यर्थः। अत्र आ ई ओ ए इति चतुर्भिरेव दीर्घस्वरैः पद्यबन्धः। विद्युन्माला वृत्तमिदम्)।।८४।।

प्रभा

तत्र चतुःस्वरनियममुदाहरति–**आम्नायानेति**। कश्चित् तत्त्वज्ञः शिष्याननुशास्ति। आम्नायानां अन्त्या शिरस्कभूता। वाग् उपनिषद्रूपा वाणी। गीतीः गानानि। ईतीः–अतिवृष्टिरनावृष्टिः–इत्यादिरूपान् उपपल्वान्। आह। मोक्षमार्गे गीतानि ईतिवत् परिहार्याणि इति भावः। अथवा मोहकत्वाद् ईतिवन् मोक्षफलविघातकानि तानीत्यर्थः। प्रीतीः पुत्रदारगृहादिषु प्रीतीः प्रेमाणि। भीतीः भयस्वरूपाः। यथा क्षेत्रे सस्यानां वराहादयः श्वापदाः

भीतिस्वरूपास्तथात्र मोक्षफले प्रीतिर्भीतिस्वरूपा। संसारप्रीतेर्मोक्षो नश्यतीति भावः। भोगः विषयोपभोगांः। रोगः मोक्षफलस्य रोगः। विषयिणो मोक्षो दुर्घट इति भावः। अत्र इतिशब्दोध्याहार्यः। सा च इत्याह इति योजना। मोदो विषयानन्दः। मोहः मोक्षफलभ्रंशकचित्तवैक्लव्यम्। तस्मात् क्षेमे समाध्यनुकूले निरुपद्रवे। देशे पुण्यभूमौ। ध्येये ध्यातुं योग्ये श्रीहरिचरणे। इच्छेद् अभिलषेत्। एकान्ते पुण्यप्रदेशे अरविन्दनाभपादारविन्दयुगलं चिन्तयेदित्यर्थः। वाशब्दो एवार्थे। अथवा ध्येये ध्यातुं योग्ये परमेश्वरे परमेश्वरविषये इत्यर्थः। इच्छेत् इच्छां कुर्यात्। परमेश्वरं चिन्तयेदित्यर्थः।। अत्र आ-ई-ओ-ए-इति चत्वार एव स्वरा निबद्धाः। वृत्तं विद्युन्माला।।८४।।

विवृति

तत्र स्वरनियमे चतुर्थ(चतुः)स्वरमाह–

अम्नायानां ऋग्यजुःसामाथर्वणां वेदानामन्त्या वागुपनिषदाह ब्रवीति। किं तदित्याह ईतीः दैवीः पीडाः अग्न्युदकमरुव्द्यामाधि[-व्याधि] दुर्भिक्षमकरव्यालशलभ-मूषिकरक्षांसि तथा गीतीः गानं वेदान्तशास्त्राणि (?) भीतीः भयानि पशुमृगपक्षिसरीसृपस्थावरराजतस्करारातिभ्यः उत्पन्नानि। प्रीतिः [तीः]सुस्वौद्य[नि ऐ]कान्तिकात्यन्तिकक्षयातिशय-युक्ताः[नि] यद्वा [आम्नायानामन्त्या वाक्] गीतिस्तुतिरीतीरुपसदिवः [गीतीः स्तुतीः रीतीः उपसर्गान्] प्रीतिवि[तीर्वि]षयः[य]सुखानि सांसारिकाणीति भयानि संसारहेतुत्वादाह। तथा भोगो विषयानुभवः स्त्रीसङ्गादि[.] स रोगो व्याधिरित्याह। मोदो हर्षः संमोहो मदिराजनितो विकार इत्याह।

इच्छेत् ध्येये ध्यातव्ये क्षेमे देशे मोक्षे वा व[ा]शब्द एवकारोवधारणे वर्तते। इच्छे देवेति द्वे द्वे इति च पाठान्तरम्। तस्यायमर्थः इच्छेद्वे गीतिः प्रीतिरिति द्वे इच्छे ध्येये धारणीये। अपरे द्वे त्यान्ये(ज्ये) भीति(: ईति) रिति। वेदान्तवादी कश्चिदेवं शिष्याननुशास्ति।।

तत्र चतुस्स्वरमुदाहरति–आम्नायानामिति। आम्नायानामन्त्या वाक् वेदान्तभागः ; गीतीः ईतीः आह, प्रीतीः भीतीः आह; भोगो रोग इति मोदो मोह इति च आह; इतिरध्याहर्तव्यः ; अतः क्षेमे मोक्षहेतुभूते, ईदेशे–ई लक्ष्मीः, तस्याः देशे–श्रीनिवासे, इच्छा धेया निधेया; इव एवार्थे। गीत्यादयः संसारसुखहेतवो हेयाः ; अतो मोक्षप्रदे भगवति स्पृहा कर्तव्या इत्यर्थः।।८४।।

क्षितिविजितिस्थितिविहिति-
व्रतरतयः परगतयः।
उरु रुरुधुर्गुरु दुधुवु-
र्युधि कुरवः स्वमरिकुलम्॥८५॥

रत्नश्री

क्षितेः पृथिव्या विजितिर्विजययोगः, स्थितेश्च तद्व्यवस्थाया यथावत् परिपालनरूपायाः क्षेमस्य च विहितिर्विधानं सम्पादनम्। एतदुभयमवश्यकर्तव्यतया व्रतं नियमः, तत्र रतिस्तत्परता येषामिति क्षितिविजिति[स्थिति]विहितिव्रतरतयः। कुरव इति वक्ष्यति। एतञ्च प्रज्ञामन्तरेण न भवतीत्याह–परा शोभापरा गुणदोषविवेकसमर्था गतिः प्रज्ञा येषामिति परगतयः। एवं च शक्तिसम्पन्नरिपुविजयचतुरा इत्याचष्टे, कुरवो राजानो यथोक्तगुणा युधि समरे स्वमात्मीयम् अरीणां कुलम्। उरु भृशं क्रियाविशेषणम्। रुरुधुरावृतवन्तः........वशमानयन्। दुधुवुश्च अभिभवादकम्पयन्। गुरु बलवत्। इदमपि क्रियाविशेषणम्। गुरु वा अरिकुलं शक्तियोगात्। अयमिकाराकारोकारमात्रप्रयोगात् त्रिस्वरः श्लोक इति॥

हृदयङ्गमा

ह्रस्वत्रिस्वरमुदाहरति, क्षितीति। –क्षितेः पृथिव्याः, विजितिः विजयः, स्थितेर्मर्य्यादायाः, वर्णाश्रमलक्षणाया इति भावः, विहितिः विधानं, ते एव व्रते नियमौ, क्षितिविजितिस्थितिविहितिव्रते, तयोः रतिः अनुरागः येषां तथोक्ताः, तथा परा उत्तमा, गतिर्ज्ञानं, ("गतिः

स्त्री मार्गदशयोः ज्ञाने यात्राऽभ्युपाययोः'' इति मेदिनी) येषां तादृशाः, कुरवः कुरुवंशजा नृपाः, युधि युद्धे, स्वं निजम्, अरिकुलं शत्रुसमूहम्, उरु अत्यर्थं यथा तथा, रुरुधुः प्रतिरुद्धवन्तः, तथा गुरु अतिशयं यथा तथा, दुधुवुः कम्पितवन्तः। (अत्र इ अ उ इति त्रिभिरेव ह्रस्वस्वरैः पद्यबन्धः। त्वरितगतिर्वृत्तमिदम्)।।८५।।

प्रभा

त्रिस्वरनियममुदाहरति–**क्षितीति**। क्षितेर्विजितिः विजयः स्थितेः धर्ममर्यादाया विहितिः विधानम् एतदुभयरूपं यद् व्रतम् नियमानुष्ठेयं कृत्यं तत्र रतिः प्रेमा येषां ते क्षितिविजितिस्थितिविहितिव्रतरतयः। अत एव परा उत्कृष्टा मतिर्येषां ते परमतयः। परगतय इति पाठे परा गतिः ज्ञानं येषां ते। एतादृशाः। कुरवः पाण्डवाः। युधि समरे। उरु विशालम्। स्वं स्वीयम्। अरिकुलं दुर्योधनप्रभृतिरिपुकुलम्। रुरुधुः सर्वतो निरोधयामासुः। तथा गुरु यथा स्यात् तथा। सातिशयमित्यर्थः। दुधुवुः कम्पयामासुः। अत्र इ-अ-उ-इति त्रयः स्वरा निबद्धाः। त्वरितगतिवृत्तम्।।८५।।

विवृति

त्रिस्वरमुदाहरति–

क्षितिः मही तस्या विजितिः विजयः स्थितिरवस्थानं विहितिः विधानं क्षितिविजितिश्च स्थितिश्च विहितिश्चेति द्वन्द्वः। त एव व्रतमवश्यकर्तव्यत्वात् अपरिव्याज्यत्वाच्च। तत्र रतिरास्था येषां ते क्षितिविजितिस्थितिविहितिव्रतरतयः। परोत्कृष्टा गतिश्चेष्टा येषां ते

परगतयः कुरवो दुर्योधनादयः स्वमरिकुलं निजं रिपुसमूहं उरु महत् रुरुधुः रुवी(तीक्ष्ण?) ध(श) रासारवधेना(र्षेणा) वृतवन्तः। तथा गुरु यथा भवत्येवं दुधुवुः कम्पितवन्तः। युधि संग्रामे।।

त्रिस्वरोदाहरणमाह–क्षितीति। भूविजयस्थितिनिर्माणात्मकव्रतपराः परमतयः कुरवः स्वम् आत्मीयम् उरु अरिकुलं गुरु अरिकुलं गुरु रुरुधुः, गाढं रुद्धवन्तः ; दुधुवु कम्पितवन्तश्च।।८५।।

श्रीदीप्ती ह्रीकीर्ती धीनीती गीःप्रीती।
एधेते द्वे द्वे ते ये नेमे देवेशे॥८६॥

रत्नश्री

ये द्वे देवानामीशे देवेशे सुरपतावपि न स्त इमे ते द्वे द्वे च वस्तुनी एधेते वृद्धिं गच्छतः। के ते इति विशेषेण दर्शयति श्रीश्च विभूतिः दीप्तिश्च तद्भाविनी द्युतिराज्ञा वा श्रीदीप्ती। ह्रीश्च त्रपा [आकार]संकोचलक्षणा ततः कीर्तिश्च यशः सर्वत्र गुणख्यातिरूपा ह्रीकीर्ती। धीश्च प्रज्ञा हेयोपादेयविवेकस्वभावा तदनुसारिणी च नीतिः सम्यक्प्रयोगरूपा त्रिवर्गानुबन्धिनी धीनीती, गीश्च वाक् मधुरा लोक[105b]संग्राहिका प्रीतिश्च तदनुवृत्ता गीःप्रीती, इतीमे द्वे द्वे सम्बन्धिन्यौ एधेते। नान्ये ये केचित्। इतीकारस्यैकारस्य च प्रयुक्तेर्द्विस्वरोऽयं श्लोकः॥

हृदयङ्गमा

दीर्घद्विस्वरमुदाहरति, श्रीदीप्ती इति। –श्रीः लक्ष्मीः, दीप्तिः कान्तिश्च ते, ह्रीः लज्जा, कीर्त्तिः यशश्च ते, धीर्बुद्धिः, नीतिः नयश्च ते, गोः वाक्, वाग्मिता इति मधुरवाक् इति वा भावः, प्रीतिः सन्तोषश्च ते, द्वे द्वे एतत् द्वयं द्वयं, ते तव, एधेते वर्द्धेते, ये इमे द्वे द्वे, देवेशे देवानामीश्वरे, इन्द्रेऽपि इत्यर्थः, न, विद्येते इति शेषः। (अत्र ई ए इति द्वाभ्यामेव दीर्घस्वराभ्यां पद्यबन्धः। वाणीवृत्तमिदम्। ह्रस्वद्विस्वरोदाहरणं यथा,– "क्षितिस्थितिमिति-क्षिप्तिविधिविन्निधिसिद्धिलिट्! । मम त्र्यक्ष! नमद्दक्ष! हर! स्मरहर! स्मर॥" इति)॥८६॥

प्रभा

द्विस्वरं दर्शयति–**श्रीदीप्ती इति**। कश्चित् सत्पुरुषः स्तूयते। ये द्वे द्वे इमे श्रीदीप्त्यादी। देवेशे महेन्द्रे। अपि न विद्येते ते त्वयि एधेते वृद्धिं प्राप्नुतः। के ते श्रीः लक्ष्मीः दीप्तिः शोभा। ह्रीः लज्जा शालीनतेति यावत्। कीर्तिः यशः। धीः बुद्धिः नीतिः नयः। गीः वाणी। वाग्मित्वमिति भावः। प्रीतिः संतोषश्च। अत्र इ-ए-स्वरौ निबद्धौ। वृत्तं वाणी।।८६।।

विवृति

द्विस्वरमुदाहरति–

श्रीश्च दीप्तिश्च, ह्रीश्च कीर्तिश्च, धीश्च नेतिश्च, गश्चि प्रीतिश्चेति द्वन्द्वः। पदार्थस्तु प्रसिद्ध एव। एधेते इमे; द्वे द्वे इति वीप्सायां द्विर्वचनम्। ते तव। यस्तः त(यतः) इमे द्वे द्वे श्रीः कीर्तिरित्यादिके न (-ञ्) प्रतिषेधे। न विद्येते देवदानवानामीशो विष्णुः तस्मिन्नपि। तवैवैकस्य नान्यस्य नृपतेः तत इत्यर्थः।।

द्विस्वरमुदाहरति–**श्रीति**। श्रीदीप्त्यादयः गुणाः तव द्वे द्वे एधेते, ये इमे गुणाः देवेशे इन्द्रेऽपि न सन्ति। इदं गायत्रीच्छन्दसि प्रथमवृत्तम्।।८६।।

सामायामा माया मासा
मारानायायाना रामा।
यानावारारावानाया
मायारामामारायामा॥८७॥

रत्नश्री

सर्वतोभद्रं पूर्वोक्तमेकस्वरोदाहरणमपि कल्पते इति पुनरुदाहृतम्। एकस्वरोदाहरणमात्रमिह विवक्षितम्। तच्च पूर्वसिद्धमेव सम्भवतीति किमपूर्वेणेदृशेनाहोपुरुषिकामात्रणेति भावः। पूर्वत्र्याख्यात एवार्थोऽनुसर्तव्यः। एवं स्वरनियमश्चतुर्विधो दर्शितः।

स्थाननियमं दर्शयन्नाह–

हृदयङ्गमा

दीर्घैकस्वरमुदाहरति, सेति। –पद्यमिदं सर्वतोभद्रोदाहरणत्वेन पूर्वं लिखितं व्याख्यातञ्च। (अत्र आ इत्यनेनैकस्वरेण पद्यबन्धः। उदाहरणान्तरं यथा, –"वैधैरैनैरैशैरैन्द्रैरैजैरैलैजैनैः सैद्धैः। मैत्रैर्नैकैर्धैर्य्यैर्नैरैदैः स्वैः स्वैरैर्दैवैस्तैस्तैः॥" इति। ह्रस्वैकस्वरं यथा, –"उरुगुं द्युगुरु युत्सु चुक्रुशुस्तुष्टुवुः पुरु। लुलुभुः पुपुषुर्मुत्सु मुमुहुर्नु मुहुर्मुहुः॥" इति)। इत्थं स्वराणां चत्वारो भेदा दर्शिता इति बोध्यम्॥८७॥

प्रभा

एकस्वरमुदाहरति–**सामायेति**। अयं श्लोकः

सर्वतोभद्रोदाहरणत्वेन पूर्वत्रैव व्याख्यातः। अत्र आ–इति एक एव स्वरो निबद्धः।।८७।।

विवृति

एकस्वरस्योदाहरणं सर्वतोभद्रम्। तच्च व्याख्यातमेव।।

एकस्वरोदाहरणं दत्तमेवेत्याह–**सेति**।।८७।।

नयनानन्दजनने नक्षत्रगणशालिनि।
अघने गगने दृष्टिरङ्गने! दीयतां सकृत्॥८८॥

रत्नश्री

नक्षत्राणां गणैः शालिनि सम्बन्धिते विराजमाने वा नक्षत्रगणशालिनि, न विद्यन्ते [घना अ]स्मिन्नित्यघने मेघमलविकले अत एव नयनानामानन्दं प्रीतिं जनयतीति नयनानन्दजनने गगनेऽन्तरीक्षे दृष्टिर्दीयतां प्रयुज्यताम्। सकृत् एकवारमपि। तावतैव मदनपरवशायास्तस्याः प्राप्तेः। नाधिकं प्रार्थ्यते, सकृद् वा दर्शनेन गगनमनुगृह्यताम्। अन्यथा विफला अस्य शोभेति कश्चिच्चाटुकारः कामी कान्तामुपलालयति। अङ्गनेति प्रियामन्त्रणम्। कण्ट्यतालव्यदन्त्यमूर्धन्यमात्रप्रयोगात् चतुस्थानोऽयं श्लोक इति॥

हृदयङ्गमा

अथ स्थाननियमे दर्शयितव्ये प्रथमं निरौष्ठ्यं चतुःस्थानं दर्शयति, नयनेति। –हे नयनानन्दजनने! नेत्रोत्सवदायिनि!, अङ्गने! सुन्दरि!, अघने मेघरहिते, अत एव नक्षत्रगणशालिनि तारानिकरभूषिते, गगने आकाशे, सकृत् एकवारं, दृष्टिः नेत्रं, दीयतां निक्षिप्यताम्। (नयनानन्दजनने इति गगने इत्यस्यापि विशेषणं सङ्गच्छते। मानिनीं सान्त्वयतो नायकस्य तादृशगगने दृष्टिपातोक्तेः कामोद्दीपकत्वात् तादृशगगनस्य अनायासेनैव मानभङ्गः स्यादिति तात्पर्य्यम्। अत्र दन्त्यतालव्यकण्ठ्यमूर्द्धन्यैरेव वर्णैः पद्यनिबन्धनात् चतुः स्थानत्वमवगन्तव्यम्। मूर्द्धन्यविरहितं चतुःस्थानं यथा, –"शलभा इव धावन्तः सायकास्तस्य भूभुजः।

निपेतुः सायकच्छिन्नास्तेन संयुगसीमनि।।'' इति। निष्कण्ठ्यं यथा, –''भूरिभूतिं पृथुप्रीतिमुरुमूर्त्तिं पुरुस्थितिम्। विरिञ्चि सूचिरुचिधीः! शुचिभिर्नुतिभिर्धिनु।।'' इति। निस्तालव्यं यथा, –''स्फुरत्कुण्डलरत्नौघमघवद्धनुकर्बुरः। मेघानादोऽथ सङ्गामे प्रावृट्कालवदाबभौ।।'' इति। निर्दन्त्यं यथा, –''पाप्मापहारी रणकर्मशौण्डश्चण्डीशमिश्रो मम चक्रपाणिः। भूयाच्छ्रियापश्रमयेक्ष्यमाणो मोक्षाय मुख्यामरपूगपूज्यः।।'' इति)।।८८।।

प्रभा

अथ स्थाननियमे चतुः स्थानमुदाहरति–**नयनानन्देति।** अङ्गने सुन्दरि। नयनयोः आनन्दं जनयति तस्मिन् नयनानन्दजनने। दृष्टिमोहके इत्यर्थः। नक्षत्राणां गणैः सङ्घैः शलते शोभते तस्मिन् नक्षत्रगणशालिनि। अघने घनशून्ये। गगने वियति। सकृत् एकवारम्। दृष्टिः दीयताम् अवलोकयेत्यर्थः। अनया प्रार्थनया एतादृशगगनविलोकनेन सोत्सुका गलितमाना मामियमासेविष्यते इति नायकाभिप्रायः सूच्यते। अत्रौष्ठ्यभिन्नस्थानीयाः सर्वे वर्णा निवेशिता इति चतुः स्थाननियमितमिदं पद्यम्।।८८।।

विवृति

स्वरनियममुदाहृत्य स्थाननियममुदाहरति–

हे अङ्गने गगने दृष्टिर्दीयताम्। सकृदेकवारम्। किंविशिष्टे नयने (गगने) नयनयोरानन्दं प्रीतिं जनयतीति तन्नयनानन्दजननम्। तस्मिन् नयनानन्दजनने। नक्षत्राणां गणः तेन शालते विराजते एवंशाली नक्षत्रगणशाली। अविद्यमानो घनो यस्मिन् तदघनम् तस्मिन्।

कश्चित् शरत्समये निर्मलं नभस्स्थलमवलोकयितुं निशि कान्तां प्रेरयति। अकुहाः कण्ठ्या इति इचुयशास्तालव्या इति ऋटुरषा मूर्धन्या इति लृतुलसा दन्त्या इति चतुस्स्थानमेतत्। अतिरिक्तस्थानवर्णाभावात्।।

दन्त्यतालव्यकण्ठ्यमूर्धन्यैश्चतुस्स्थानोदाहरणमाह–**नयनेति**। शरदं वर्णयति। स्पष्टोऽर्थः।।८८।।

अलिनीलालकलतं कं न हन्ति घनस्तनि।
आननं नलिनच्छायनयनं शशिकान्ति ते॥८९॥

रत्नश्री

अलकः केशविन्यासविशेष एव चञ्चलत्वादिना लता। अलिवन्नीला अलकलता यस्मिन्निति अलिनीलालकलतम्। नलिनस्येव च्छाया शोभा अनयोरिति नलिनच्छाये सरोजतुल्ये नयने अस्मिन्निति नलिनच्छायनयनं शशिन इव कान्तिरस्येति तदीदृशमिति मनोहरं ते तवाननं कं न हन्ति कं नाम कामिनं दशमीं दशां न नयति? सर्वमेव रोगिणं हन्तीत्यर्थः। घनस्तनीति प्रियामन्त्रणम्। कण्ठ्यतालव्यदन्त्यमात्रप्रयोगात् त्रिस्थानोऽयं श्लोक इति॥

हृदयङ्गमा

त्रिस्थानं निरौष्ठ्यमूर्द्धन्यं दर्शयति, अलीति। –हे घनस्तनि! निविड़पयोधरे!, अलय इव भ्रमरा इव, नीलाः कृष्णवर्णाः, अलकलताः लतावद्विन्यस्ताश्चूर्णकुन्तला यत्र तत्, नलिनच्छाये पद्मसदृशे, नयने यत्र तादृशं, तथा शशिनः कान्तिरिव कान्तिर्यस्य तथाभूतं, ते तव, आननं वदनं, कं जनं, न हन्ति? नाकुलयति?, अपि तु सर्वमेवेत्यर्थः। (अत्र कण्ठ्यदन्त्यतालव्यैरेव वर्णैः पद्यबन्धः इति त्रीणि स्थानानि मर्द्धन्यौष्ठ्यवर्णरहितानीति ज्ञेयम्। एवं निरौष्ठ्यदन्त्यं त्रिस्थानं यथा, –"जीयाज्जगज्ज्येष्ठगरिष्ठचार-श्चक्रार्च्चिषा कृष्णकड़ारकायः। हरिर्हिरण्याक्षशरीरहारी खगेशगः श्रीश्रयणीयशय्यः॥" इति)॥८९॥

प्रभा

त्रिस्थानमाह—**अलिनीलेति।** हे घनस्तनि कठिनकुचे। अलिवद् भ्रमरवत् नीला ये अलका ते एव लता सर्वतो व्यापनेन लतासदृशा यत्र तत्। नलिनानि कमलानि तेषां छायेव च्छाया शोभा ययोरेतादृशे नयने यस्मिन तत्। शशिवत् कान्तिर्यस्य तत्। ते तव। आननं कं न हन्ति मदनपीडया व्याकुलयति। सर्वमपि पीडयतीत्यर्थः। अत्र कण्ठ्यदन्त्यतालव्यैर्निबन्धनम्।।८९।।

विवृति

त्रिस्थानमुदाहरति—

हे घनस्तनि तवाननं मुखं कं कामिनं न हन्ति न खेदयति। किंविशिष्टमाननं अलिनीलालकलतं अलिरिव नीलाऽलकलता धम्मिल्ल(वल्ल)री यस्मिन् तदलिनीलालकलतम्। नलिनं पद्मं तच्छाये पद्मसदृशे नयने यत्र नलिनच्छायं(य) नलि(य)नं शशिकान्ति शशिनश्चन्द्रमस इव कान्तिः यत्र तदिति कण्ठ्यतालव्यदन्त्यस्थानवर्णात्मकं तदपरस्थानाक्षराभावात्।।

कण्ठ्यदन्त्यतालव्यैः त्रिस्थानोदाहरणमाह— **अलीति।** दयितायाः चाटु करोति।।८९।।

अनङ्गलङ्घनालग्ननानातङ्का सदङ्गना।
सदानघ सदानन्द नताङ्गासङ्गसङ्गत॥९०॥

रत्नश्री

हे सदानघ! सर्वदा निष्पाप! अत एव विप्रतीसाराभावात् सन् विद्यमानः शोभनो वा आनन्दः प्रमोदोऽस्येति सदानन्द! नताङ्गानां स्त्रीणां सङ्गः संभोगलक्षणः, तेन सङ्गतः अन्यस्त्रीसंभोगप्रसक्तः। हे नताङ्गासङ्गसंगत! सती चासावङ्गना [106a] चेति सदङ्गना तवेत्यर्थात्। अनङ्गेन कामेन लङ्घनमभिभवः ततो लग्नः सक्तः उत्पन्नः नानानेकप्रकारः आतङ्कः पीडा यस्या इति अनङ्गलङ्घनालग्ननानातङ्का वर्तते। अनङ्गेन वा लङ्घनं तत आलग्नो नानातङ्को यस्याः सेयमनुकम्प्यतामिति कञ्चित् कामिनं विषयान्तरप्रसक्तं निजबधूनिमित्तं सानुनयं काचिदेवमाह। कश्चिद् वा। कण्ठ्यदन्त्यमात्रप्रयुक्तो द्विस्थानोऽयं श्लोक इति॥

हृदयङ्गमा

दनत्यकण्ठैयः द्विस्थानचित्रमुदाहरति, अनङ्गेति। –हे सदानघ! सदा अनघ! दुःखविवर्जित!, सर्वावस्थास्वेव व्यथारहित! इत्यर्थः, निश्चिन्त! इति भावः, ("अघन्तु व्यसने दुःखे दुरिते च नपुंसकम्" इति मेदिनी) तथा हे सदानन्दनताङ्ग। सदा आनन्देन गीतवादित्राद्यामोदेन, नतानि वशीकृतानि, व्यापृतानि इति यावत्, अङ्गानि अवयवा यस्य तत्सम्बुद्धौ, सदङ्गना साध्वी नारी, अपीति शेषः, असङ्गसङ्गतः नास्ति सङ्गो येषां ते असङ्गाः दुर्जनाः, तेषां सङ्गः सम्पर्कः तस्मात् दुर्जनसम्पर्कात् इत्यर्थः, अनङ्गलङ्घनया कामाक्रमणेन, लग्नाः संसृष्टाः, जाताः इत्यर्थः, नाना विविधाः,

आतङ्काः सन्तापाः शङ्काः वा ("आतङ्को रोगसन्तापशङ्कासु मुरजध्वनौ" इति मेदिनी) यस्यां तादृशी भवति, भर्त्तृविरहेण सती अपि दुर्जनासङ्गेन भ्रश्यतीति भावः। (तस्मात् भार्य्यां प्रतिचिन्तय केवलं वृथाऽऽमोदेनालमिति सखायं प्रति कस्यचिदुक्तिः। अत्र दन्त्यकण्ठैयरेव पद्यरचना इति द्विस्थानत्वम्। "नताङ्गासङ्गसङ्गतः" इत्यत्र "नताङ्गीमङ्गसङ्गत!" इत्यपि पाठः। तत्र हे सदानन्द! सदैव प्रियालाभेनानन्दयुक्त! इति पृथक् सम्बोधनम्; तथा हे नताङ्ग्याः कस्याश्चिदन्यस्या नायिकायाः सङ्गे सङ्गत! इति सम्बोधनान्तरं, तव सदङ्गना कामाक्रमणया नानारूपतया वर्त्तते, अतस्तामनुकम्पस्व इति सोपालम्भप्रार्थनमित्यर्थः। पाठोऽयन्तु न मनोरमः, ईकारस्य तालव्यत्वात् केवलं दन्त्यकण्ठात्वहानेरिति)।।९०।।

प्रभा

द्विस्थानमुदाहरति–**अनङ्गेति।** काचिद् दूती नायकं प्रियासंगमाय प्रार्थयते। हे सदा अनघ निर्दोष। सदाचरणशील इत्यर्थः। तथा सदानन्द सतां आनन्दो यस्मात् तादृश। हे सत्प्रियेत्यर्थः। नतानि प्रश्रयेण नम्राणि अङ्गानि यस्य तत्संबुद्धिः नताङ्ग। असङ्गाः विषयेष्वनासक्ता ये सत्पुरुषास्तेषु सङ्गत संसक्त। (सा) सदङ्गना सती चासौ अङ्गना च सुस्वरूपा सदाचरणशीला वा तव नायिका। अनङ्गस्य मदनस्य लङ्घनम् अतिक्रमणम्। अनुपसेवनमित्यर्थः। तेन लग्नाः संसक्ता नाना विविधा आतङ्का पीडा यस्याः सा। विविधमदनयातना अनुभवन्तीत्यर्थः। अस्ति। अतस्तया संगत्य तत्पीडामपनयेत्यर्थः। अत्र कण्ठ्यदन्त्यवर्णैरेव प्रबन्धनमस्ति।।९०।।

विवृति

द्विस्थानमाह–

अनङ्गः कामः तस्य लङ्घनमतिक्रमः। तेन आलग्नस्सम्बन्धो(-बद्धो) नानातङ्को व्याधिर्विरहज्वरो यस्याः सा अनङ्गलङ्घनालग्ननानातङ्का सती शोभना वा (चा)सावङ्गना सदङ्गना। सदा अनघा(घ) निष्पापा(प) सदानन्द(सदा) आनन्दं(दः) सुखं यस्य। नतमङ्गं येषां ते नघाङ्ग(ताङ्गाः) अस्तब्धाऽपि न ताः (अस्तब्धा विनताः) तैरासङ्गस्सख्यं यस्यासौ नताङ्गासङ्गस्तस्यामन्त्रणम्। हे सदानन्दिन् नताङ्गासङ्गसङ्गत सखे सा सदङ्गना अनङ्गलङ्घनालग्ननानातङ्का वर्तते। इति कञ्चन युवानं प्रियायामेवानति (ती)कर्तुं सखी काचिदेवमुक्तवती। कण्ठ्यदन्त्यस्थानद्वयवर्णातिरिक्तवर्णाभावात् द्विस्थानमेतदिति।।

कण्ठ्यदन्त्याभ्यां द्विस्थानमुदाहरति अनङ्गेति। सदा अनघ सुकृतिन्, सतः आनन्दयतीति सदानन्दः तस्य सम्बोधनम्–सदानन्द, नताङ्ग प्रश्रयनम्र, असङ्गसङ्गत अस्खलितसौहार्द, सदङ्गना तरुणे अनङ्गलङ्घनालग्ननानातङ्का स्मराभिभवसञ्जातबहुलसन्तापा भवति।।९०।।

अगागाङ्गाङ्गकाकाकगाहकाघककाकहा।
अहाहाङ्गखगाङ्कागकङ्कागखगकाककः॥९१॥

रत्नश्री

अकति कुटिलं गच्छतीत्यकम्। कर्तर्यच्। अक कुटिलायां गताविति धातुः। आ समन्तात् कायति शब्दायते इति आकम्। आतः प्रादिभ्य इति कः। अकं च तदाकं चेति अकाकम्। गङ्गाया इदं गाङ्गम्। गाङ्गं च तत् कमुदकं च गाङ्गकम्। गाङ्गकं च तत् अकाकं चेति गाङ्गकाकाकम्। तत्र तस्य वा गाहकः प्रवेष्टा हे गाङ्गकाकाकगाहक! अत एव अघान्येवाघकानि कुत्सितत्वात् तानि मलिनत्वादिना काकाः तान् हन्तीति अघककाकहा कृतगङ्गास्नानत्वात् निष्पापस्त्वम्। ततश्च गां स्वर्गम् अगाः प्राप्तवानसि न सन्देहः। एवंविधस्य स्वर्गगमनमवश्यम्भावीति भविष्यत्यपि भूतमुपचर्य अगास्त्वमिति भूतप्रयोगः कृतः, यथा अजितेऽपि बले जयकारणसाकल्यात् जितव्यपदेशः जितमिदं मया बलम्। कियदेतदिति प्रतिपत्तव्यम्। एवं पुण्यमयस्य तव शोकोऽपि न संभवति इत्यामन्त्रणद्वारेण सूचयति हाहेत्येवंरूपः प्रलापः शोकसंभवः। हाहा तमङ्गति.......यातीति हाहाङ्गः। अगि गत्यर्थो धातुः। न हाहाङ्गोऽहाहाङ्गः। हेऽहाहाङ्गविशीक! एवं गुणयोगात् आ स्वर्गं प्रसिद्धस्त्वमिति संबोधनमुखेनाभिधत्ते। खग आदित्यः। सोऽङ्कश्चिह्नं तत्र गतेरस्येति खगाङ्कः स चासावगः पर्वतश्चेति खगाङ्कागः सुमेरुरिति यावत्, स च स्वर्ग एव, देवानां [तत्र] अवस्थानात्। तं कङ्कति कीर्तिद्वारेण गच्छति इति व्याप्यादण्[1]। हे खगाङ्कागकङ्क! एवं कल्याणाशयत्वात् दुर्जनससर्गोऽपि [106b]·

तव नास्तीति कथयति अगन्ति कुटिलं गच्छन्ति अदान्तत्वादिति अगानि। कर्तर्यच्। अगानि च तानि खानि इन्द्रियाणि च इत्यगखानि तानि गच्छन्ति इति अगखगाः अदान्तेन्द्रियाः खला इति यावत्। त एव कुत्सितत्वादगखगकाः। तेषु अककः अलोलः अलुब्धः निरपेक्षः, तत्संसर्गद्वेषात्। हे अगखगकाकाक इति कश्चित् पुरुषः स्तुतः। कण्ठ्यमात्रप्रयोगादेकस्थानोऽयं श्लोकः।।९१।।

एवं स्थाननियमश्चतुर्धा दर्शितः। संप्रति वर्णनियमं दर्शयन्नाह–

हृदयङ्गमा

कण्ठावर्णैरेकस्थानचित्रमुदाहरति, अगा इति। –(पदविभागो यथा, –अगाः, गां, गाङ्गकाकाकगाहक, अघककाकहा; अहाहाङ्ग, खगाङ्कागकङ्क, अगखगकाकक इति) हे गाङ्गकाकाकगाहक! गङ्गाया इदं गाङ्गं, यत् कं जलं, तस्य आकाकः सशब्दवक्रगतिः, (आङ्पूर्वात् "कै शब्दे" इत्यस्मात् भावे क्विपि आकाः, "अक कुटिलगतौ" इत्यस्मात् भावे ङप्रत्यये अकः) आका सह अकः आकाकः तरङ्ग इत्यर्थः, तं गाहते इति तथोक्तः, तत्सम्बुद्धौ, हे गङ्गाजलतरङ्गावगाहिन्! इत्यर्थः, तथा हे अहाहाङ्ग! हाहां दीनतासूचकध्वनिविशेषम्, अङ्गति गच्छतीति हाहाङ्गः, न हाहाङ्गः अहाहाङ्गः तत्सम्बुद्धौ, हे सदानन्द! इत्यर्थः, किञ्च हे खगाङ्कागकङ्क! खं गगनं गच्छन्तीति खगाः सूर्य्यादयः, ते अङ्काश्चिह्नानि यस्य स खगाङ्कः, स च असौ अगः पर्वतश्चेति खगाङ्कागः सुमेरुरित्यर्थः, तं कङ्कते गच्छतीति तथोक्तः, ("ककि गतौ" इत्यस्मात् अणप्रत्ययः) तत्सम्बुद्धौ, पुण्यबलेन सुमेरुपर्वतपर्य्यन्तममनार्हं! इत्यर्थः, पुनश्च हे अगखगकाकक!

अगति गच्छति इति अगं नश्वरमित्यर्थः, खानि इन्द्रियाणि गच्छतीति खगम् इन्द्रियविषयं, ततश्च अगं खगञ्च यत् कं सुखं, तदर्थं न ककते न इच्छति, न अभिलषतीत्यर्थः, इति अगखगकाकक: तत्सम्बुद्धौ, ("कक् गर्वेच्छालौल्येषु" इत्यस्य रूपम्) इन्द्रियसुखेषु अनासक्त इत्यर्थः, ("अहाहाङ्गखगाङ्कागकङ्कागखगकाकक!" इति समस्तपाठे तु, –हानं हाः, न हाः अहाः, तां जिहीते प्राप्नोतीति अहाहं, तादृशमङ्गं यस्य सः अक्षयशरीर इत्यर्थः, यः खगः गरुड़ः सूर्य्यो वा, स अङ्कः चिह्नभूतो यस्य तादृशः, अगः पर्वतः, सुमेरुरित्यर्थः, तत्र ये कङ्काः तदाख्याः, अगखगाः वृक्षवासिनः पक्षिणः, तेऽपि काककाः गमनस्पृहयालवो यस्य तत्सम्बुद्धो पतत्रिभिरप्यभिनन्दितगमन इत्यर्थः) त्वम् अघककाकहा अघकानि कुत्सितानि पापानि एव, काकाः वायसाः, अनर्थहेतुत्वादिति भावः, तान् हन्तीति तथोक्तः अपापः, सन्, गां पृथिवीम्, अगाः गतवानसि, प्रदक्षिणीचकर्थेत्यर्थः। यद्वा, –गा स्वर्गं, ("स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणि- भूजले। लक्ष्यदृष्ट्या स्त्रियां पुंसि गौः" इत्यमरः) अगाः याया इत्यर्थः। (आशंसायां भूतप्रत्ययः। कस्यचिद्देशपर्य्याटकस्य स्तुतिरियम्। अत्र कण्ठैयरेव वर्णैः पद्यरचना)।।९१।।

प्रभा

एकस्थानमुदाहरति–**अगा इति**। अत्र पदच्छेदः-अगाः गाम् गाङ्गकाकाकगाहक अघककाकहा। अहाहाङ्क (ङ्ग) खगाङ्कागकङ्क अगखगकाकक। अन्वयार्थः-हे गाङ्गकाकाकगाहक। गङ्गाया इदं गाङ्गं गाङ्गं च तत् कं चलं गाङ्गकम्। आकायति शब्दं करोतीत्याकाः। कै गै शब्दे इत्यस्मात् आङ्पूर्वकात् कर्तरि क्विप्।

तथा अकति कुटिलं गच्छतीति अकः। पचाद्यच्। आकश्चासौ अकश्च आकाकः। सशब्दतिर्यग्गामी। गाङ्गकस्य गङ्गाजलप्रवाहस्य आकाकः सशब्दतिर्यक्प्रवाहो गाङ्गकाकाकः तस्य गाहक गङ्गाप्रवाहस्नायिन्नित्यर्थः। तत्संबोधनं गाङ्गकाकाकगाहक। तथा अहाहाङ्क हा हा इति दुःखसूचकः शब्दः अङ्कः चिह्नं यस्य स हाहाङ्कः। संसारतापत्रस्तः इत्यर्थः। तथा न भवति इति अहाहाङ्कः। तत्संबुद्धिः अहाहाङ्क। संसारतापशून्य। अहाहाङ्ग इति पाठे हानं हाः क्विप्। न हाः विनाशः अहाः। तं अविनाशं जिहीते गच्छति इति अहाहा अविनश्वरमित्यर्थः। तादृशमङ्गं यस्य तत्संबुद्धिः अहाहाङ्ग। अविनाशिस्वरूप इत्यर्थः। स्वे गच्छति इति खगः सूर्यः। स अङ्कः चिह्नं यस्य स खगाङ्कः। खगाङ्कश्चासौ अगः पर्वतः मेरुपर्वतः उदयाचलो वा। तत्र कङ्कति गच्छति इति खगाङ्कागकङ्कः। मेरुपर्वते उदयाचले वा गमनसमर्थ। ककि वकि श्वकि इत्यादयो गत्यर्थाः तस्मात् पचाद्यच्। पुनः अगखगकाकक अगन्ति कुटिलं गच्छन्तीति अगानि तानि च खानि इन्द्रियाणि। अक अग कुटिलायां गतौ-इत्यस्मात् पचाद्यच्। तानि गच्छन्ति इति अगखगाः कुटिलेंद्रियपरवशाः। कुत्सिताः अगखगाः अगखगकाः। कुत्सार्थे कन्। कको लोलः। कक लौल्ये इत्यस्माद् अच्। न ककः अककः अलोल इत्यर्थः। अगखगकेषु अककः अगखगकाककः तत्संबुद्धिः अगखगकाकक। कुत्सितेन्द्रियपरवशाननुरक्त। त्वं अघककाकहा कुत्सितं अघं अघकं तदेव काकस्तं जहातीति अघककाकहा। एतादृशः सन् गां स्वर्गम् अगाः गमिष्यसि। इणो लुङि रूपम्। इणो गा लुङि इति गादेशः। आशंसायां भूतवच्च इति भविष्यति लुङ्। अत्र कण्ठ्यैरेव वर्णैर्बन्धरचना।।९१।।

विवृति

एकस्थानमुदाहरति–

v ङ्गं (अगाः) गतवानसि त्वं स्वर्गम्। गङ्गाया इदं गाङ्गं तच्च तत् कं च गाङ्गमुदकं तस्याकः कौटिल्यं तमकतीत्याकः गाङ्गकाकस्याकश्च कुटिलगतिः प्रवाहः तस्या(स्य) गाहको विलोडकः तस्यामन्त्रणं गाङ्गकाका(क)गाहक। अघं पापं अघमेवाघकं तदेव काको गृहबलिभुक् तं हतवान् अघककाकहा। शिष्टप्रयोगदर्शनादिह क्विप्। [हा] हानं हान(निः) हानिर्नास्तीत्याह (त्यहा) तां जिहीते गच्छतीत्यहाहा(हं) अहाहानि (यानि) तान्यङ्गानि येषां ते अहाहाङ्गाः ते च ते स्वगाश्च अहाहाङ्गखगाः सौवर्णा ये(?) ते अङ्को लाञ्छनं येषां ते अहाहाङ्गखगाङ्काः। ते च ते अगाश्च मेर्वादयः पर्वतास्तेषु अहाहाङ्गखगाङ्कागेषु मेर्वादिदेवगिरिषु कङ्काश्च ते अगखगाश्च पर्वतपक्षिणः कुरराः काकक:.....शब्दो यस्यासावहाहाङ्गखगाङ्कागकंकागखगकाकक। हे गाङ्गजलकुटिलप्रवाहास्व (व)गाहक पापवायसध्वंसक सौवर्णेय(?) पक्षिपरिक्षिप्तमेरुगिरिगुहान्तपर्यन्तविश्रान्तानन्त-कीर्तिप्रसभे [र हे]महाप्रभाव त्वं स्वर्गं गतवानसीति कश्चिच्छ्लोकं भावयति।

वयं पुनरित्थं व्याचक्ष्महे–

गङ्गाया इदं गाङ्गम्। तच्च तत् कं च तदक्ति(-कति) प्रविशतीति गाङ्गकक(काका)। पचाद्यच्। यमुना तस्याः अकः प्रवाहः तस्या गाहको विलोडकः कैटभारिः। स किल मातुलकंसासुरादेशात् काल(?) कालियदमनार्थं मधुरायां

कालिन्दीजलं बाहुभ्यां आलोडितवान्। तस्यामन्त्रणं हे गाङ्गकाकाकगाहक। अघं पापं तदस्यास्तीति अधः अघ एव अघकः। स चासौ काकश्च वायसदानवः। तं हतवानित्यघककाकहा स किल बालभावभुद्वहन् कंसासुरप्रेषितं काकदानवमुत्पाटितचञ्चूपूटं झटिति हतवानिति। अहाहाङ्गखगो गरुडः अङ्कः चिह्नं यस्यासौ अहाहाङ्गखगाङ्को गरुडध्वजः। अग इव अगो गिरि(रि)वाप्रकम्प्यधैर्यगुणसम्पन्नः कमुदकं अङ्को येषां ते काङ्के (ङ्काः) जलनिधयः। नन्वकःसवर्णे दीर्घत्वं कस्मान्न भवति। शकन्ध्वादिषु पाठात् पररूपम्। अगाः पर्वताः मेरुगिर्यादयः। खमाकाशंका[क]ङ्काश्चागाश्च खं चेति द्वन्द्वः। तानि गच्छन्तीति का[क] ागखगाः। काककश्शब्दो या सा अस्ति (शब्दाः यशांसि) यस्यासौ कां[कं]कागखगकाकक। असाधारणविशेषणोपादानादेव हरिरुच्यते। हे कालिन्दीजलप्रवाहावगाहक काकदानवविध्वंसक गरुडध्बज मेरुपर्वतवदप्रकम्प्य जलनिधिकुलाचलनमस्थल-व्यापियशः प्रसर हे हरे स्वर्गं गतोऽसि इति केनापि विशोच्यते।

अथ च कमुदकं रस्यति ककः [?]। कुटिलता आककः। ईषदाककक: काककः गङ्गाया अयं गाङ्गः गाङ्गश्चासौ काकश्च गाङ्गकाककः। तस्य गाहकः गाङ्गकाकगाहकः। अघमेव अघकः। कुत्सायां कन् तदेव काकः अघककाकः। तं हन्तीत्यघककाकहा ओहाङ् गतौ हा (गतिः) तां गातीति(न जहातीति) अहाहं भ्रमत् अङ्गं रथाङ्गं यस्य स तथोक्तः। खगा आदित्यः। अहाहाङ्गश्चासौ खगश्च अहाहाङ्गखगः। सोऽङ्कश्चिह्नं यस्य स तथोक्तः। अहाहाङ्गखगाङ्कश्चासौ अगश्च अहाहाङ्गखगाङ्कागः मेरुरिति यावत्। कङ्को नाम कश्चित्। तत्रागे

स्थितः कङ्कः। अहाहाङ्गखगाङ्कागकङ्कः ; पर्वतः तस्या(अगस्य पर्वतस्या)यमागः। आगश्चासौ खगश्चागखगः। पर्वतः तथा (पर्वतस्थः) पक्षीति यावत्। तस्मिन् काकं लौल्यं यस्य तथोक्तः। 'शेषाद्विभाषे'ति कप्रत्ययः। अयमर्थः। हे गाङ्ग काकाकगाहक अघककाकहा अहहाङ्गखगाङ्कागकंकागखगकाकक त्वं गामगा वचनं अबुद्धाः। गाङ्गकाकाकगाह यं वल्लभा क (गाहक हे वल्लभ) इत्यनेन गङ्गास्नायित्वमुक्तम्। अघककाकहा इत्यनेन पुण्यक्रियारतिरुक्ता। अहाहाङ्गेत्यादिना तादवस्थ्यं कथितम्। काचिदप्सरा एवं स्वाभिप्रायं वल्लभं निवेदयितुं वक्ति।

अथ च हे काकक वायसापशद गां स्वर्गं अगा गतवानसि। कथमिति गङ्गाया इदं गाङ्गं कं जलं गाङ्गकं तस्याकाकमापात्तिन्त(-मावर्तस्त) स्मिन् गाहको विलोडकस्तस्य आमन्त्रणं गाङ्गकाकाकगाहकेति। त्वं प्रतिपक्षवायसमहत्वान्मृ (-त्वा मृ-)तोऽहमिति माशुचः। त्वमघककाकहा अघं पापं अघ एवाघकः अघकाख्यं काकं वायसं हतवानसि अघककाकहा पापवायसनाशकः तथा चेदहमेवाशोच्यः बन्धुभिः शोचितुमर्हामीति चेन्न। अहहाङ्ग हाहाङ्गरहित धिक् धिगित्यङ्गरहित कथं तदिति खगाङ्कागकङ्कागखग खगाः पक्षिणो हंसाः, खगशब्दः पक्षिसामान्यवाच्यपि हंसे वर्तते। कथमिति तथा चोक्त–'सामान्यवाचिनः शब्दा भवन्ति श्रेष्ठगामिनः। वैद्यपङ्कजसामान्ये भिषक्पद्मपरिग्रहा'दिति। खगाः अङ्कश्चिह्नं येषां ते खगाङ्काः हंसयुक्ताः इत्यर्थः। अगा वृक्षाः पारिजातादयः तत्रापि पूर्ववदगशब्दो मुख्ये वर्तते। कङ्का नाम केचित् कनकमया भूषणविशेषाः मुकुलोन्मीलकाख्याः ता गच्छन्तीति

अह(ग)कङ्कागाः खगाः विमानानि खगाङ्का(अ)गकङ्कागखगा यस्य स खगाङ्कागकङ्कागखगः तस्यामन्त्रणम्। अयमर्थः। गङ्गाजलावर्तगाहक पापवायसध्वंसक केनाप्यशोच्यहंसवाह्यमान-पारिजातादिविचित्रभूषणसंयुक्तविमानयान वायसापशद त्वं स्वर्गं गतवानसि। कश्चिन्मांसपिण्डार्थं जातवैरयोः वायसयोः गगनस्थितयोः कलहायमानयोस्तयोः कश्चित्(?) गङ्गाजले पतित्वा मृतः। तामवस्थां दृष्ट्वा गङ्गामाहात्म्यं वक्ति। इदमेकस्थानाक्षरवर्ण(-स्थानाकारहकारकवर्ग) विसर्जनीयैरिय(?) न्निष्पन्नत्वादकुहविसर्जनीयाः कण्ठ्या इति (एकस्थानम्)।।

कण्ठ्यैकस्थानमुदाहरति-**अगाः** इति। अगाः गमिष्यसि, 'इणो गा लुङि' इति गादेशः, 'आशंसायां भूतवच्च' इति भविष्यति लुङ्; गां स्वर्गं गाङ्गकाकाकगाहक-कस्य जलस्य आकः प्रवाहः, अक कुटिलायां गतौ इत्यस्मात् घञ्, का ईषदर्थे, ईशद्धूतो जलप्रवाहः काकाकः, गङ्गासम्बन्धिनः काकाकस्य गाहक, गङ्गास्नायिन् इति यावत्; अघककाकहाअघकं कुत्सितं अघं, तदेव मालिन्यात् काकतया रूपितम्, तं हतवान् अघककाकहा; अहाहाङ्गखगाङ्कागकङ्कागखगकाकक:- हाः गतिः, तं जहाति त्यजतीति हाहं, तदन्यत् अहाहम्, 'आतोऽनुपसर्गे कः', अहाहाङ्गः गतिशीलः, खगः सूर्यः अङ्के पार्श्वे यस्य गिरेः, तस्मिन् अगे मेरौ, कङ्कानां चलानां-ककि लौल्ये, पचाद्यच्-अगानां वृक्षाणां सम्बन्धिनः, ये खगाः पक्षिणः, तेषां काकक: चालयिता-कक लौल्ये इत्यस्मात् ण्वुल्; हे गङ्गास्नायिन् हतपाप, स्वर्गगमनमार्गस्थितमेरुवृक्षपक्षिचलनकारः अगाः स्वर्गं गमिष्यसि इत्यर्थः।।९१।।

रे रे रोरुरुरूरोरुगागोगोऽगाङ्गगोऽगगुः।
किं केकाकाकुकः काको मामा गामा ममामम॥९२॥

रत्नश्री

रे रे इत्यनादरे भर्त्सने वा। त्रासा[दिपर]वशतया भृशमभीक्ष्णं वा रौतीति रोरुः। रौतेर्यङन्तात् क्विपि रूपम्, रोरुश्चासौ रुरुश्च मृगविशेषः रोरुरुरुः। तस्य ऊरुः क्रोडदेशः तस्य रुग् विदारणमेवागः पापं तद् गच्छतीति रोरुरुरूगागोगः। पर्वतदेशवर्तनात् तरुमूलगतगोपनघातुकेन केनचित् गोपेन दुरितमिदमाचरितमिति सविशेषं दर्शयति-अगस्य पर्वतस्याङ्गमेकदेशः। तद्गतः तत्रावस्थानात् अगाङ्गगः। अगेषु तरुषु व्यवस्थिता गावोऽस्य इत्यगगुः। त्वमेवं प्रत्यक्षपापः। मा मा सावेगे वारणे आम्रेडितप्रयोगः। मागाः मा आगच्छ। [मम मादृशस्य पुण्यात्मनः सविध इति शेषः।] नेदृशः पापीजनोऽस्मदन्तिकमागन्तुमर्हति। अममो निष्परिग्रहः। मा अमम परिग्रहक्लेशोपहत इति तस्यामन्त्रणम्। अनेन मृगवधपातकनिमित्तं सूचितम्, परिग्रहोपहतानामेवेदृशदुश्चरितसम्भवात्। निष्परिग्रहाणां तु निष्पापत्वात्। यदि नाम एवं तथापि किं न युष्मत्समीपमुपगच्छेयमित्याशङ्क्य तदसम्भवं प्रतिवस्तुना दर्शयति। केका मयूरध्वनिर्मधुरः। तस्य सैव वा काकुः भङ्गः। तत्रैव सहजतया प्रतिनियमात्। तया कायति शब्दायत इति केकाकाकुकः। काको वायसः किं सम्भवति? नैव। तद्वत् त्वद्विधपापजनसंसर्गोऽस्मद्विधानां श्रेयोऽर्थिनां न सम्भवतीति कश्चिन्मुनिः कृतमृगवधपातकं गोपालकमरण्यचरमात्मसमीप-

सर्पन्तमित्थमभिधत्ते। [107a] रेफगकारककारमकारमात्रप्रयोगात् चतुर्वर्णोऽयं श्लोक इति।।

हृदयङ्गमा

अथ चित्रालङ्कारभेदे वर्णनियमे दर्शयितव्ये स्वरस्य पृथक् निर्देशात् वर्णपदेन व्यञ्जनरूपवर्णस्यैव ग्रहणमिति व्यञ्जनात्मकं चतुर्वर्णमुदाहरति, रे रे इति। –(रे रे इति नीचसम्बोधनसूचकमव्ययम्) रे रे मामम! मायां लक्ष्म्यां, मम (इत्यव्ययं) ममता इत्यर्थः, यस्य सः तत्सम्बुद्धौ, कृपण इत्यर्थः, ("मायाम् अमम अममत्वं यस्य सः लक्ष्मीशून्यः" इति केचित्) मां मा मा न न, (इति निषेधवाचकं, सम्भ्रमाद्यतिरेके द्विरुक्तिरिति) अम गच्छ, मत्समीपं मा गच्छेत्यर्थः, त्वमिति शेषः, यतः काकः वायसः, किं केकाकाकुकः केका मयूरध्वनिः, तस्याः काकुः मदजनितविकारः, तं कायति शब्दायते, शब्देन प्रकाशयतीत्यर्थः, ("कै शब्दे" इत्यस्मात् डप्रत्ययः) तादृशः, भवति? इति शेषः, अपि तु नैवेत्यर्थः, काको यथा मयूरकेकाभिलाषे व्यर्थमनोरथ एव भवति तथा मत्प्राप्त्यभिलाषे त्वमपीति भावः ; किञ्च रोरूरुरूरोरुगागोगः रोरूयते भयेन पुनः पुनरतिशयेन वा रौतीति रोरूः, (रौतेर्यङ्लुगन्तात् क्विप्) स च असौ रुरुर्मृगविशेषश्चेति रोरूरुरुः, तस्य उरसः वक्षसः, या रुक् शरवेधजनिता व्यथा, सा एव आगः अपराधः, पापमित्यर्थः, तत् गच्छति प्राप्नोतीति तथाभूतः, निरीहजीवहिंसकत्वात् प्रापीयानित्यर्थः, नीचकार्य्यकारितया त्वं न मे योग्य इति भावः ; पुनश्च त्वम् अगाङ्गगः अगस्य पर्वतस्य, अङ्गम् एकदेशं, गच्छति अधिवसतीत्यर्थः, तथोक्तः पार्वत्य इत्यर्थः, निकृष्टदेशवासित्वाच्च

त्वं न मे योग्य इति भावः ; तथा अगगुः न गच्छति न सङ्गच्छते इति अगा असम्बद्धा इत्यर्थः, गौः वाक् (''स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले। लक्ष्यदृष्ट्या स्त्रियां पुंसि गौः'' इत्यमरः) यस्य तादृशः, असम्बद्धभाषीत्यर्थः, अतोऽपि त्वं न मे योग्य इति भावः। (वाराङ्गनामभिलषन्तं कञ्चित् व्याधं प्रति तस्याः प्रत्याख्यानोक्तिरियम्। अत्र ''र-ग-क-म'' इति चतुर्भिरेव व्यञ्जनवर्णैः पद्यबन्धः। वर्णपदेन च पद्यपूरकवर्णानां ग्रहणं, तेन अङ्गेति ङकारयोगेऽपि न चातुर्वर्ण्यव्याघातः, तस्य पद्यपूरकत्वाभावात्। ङकारयोगादिदमुदाहरणं केषाञ्चिदशुद्धत्वेनाभिमतं चेत् शुद्धोदाहरणं यथा, –''जजौजोजाजिजिज्जाजी तं ततोऽतिततातितुत्। भाभाऽभोभाभिभूभाभूराराररिररी ररः।।'' इति)।।९२।।

प्रभा

अय वर्णनियमे चतुर्वर्णं दर्शयति–**रे रे इति**। तत्र तावत् पदच्छेदः- रे रे रोरूरुरूरोरुगागोगः अगाङ्गगागगुः। किं केकाकाकुकः काकः मा मां आम अममामम। अन्वयार्थः–कश्चिद्व्याधं निन्दन् तत्संसर्गं परिहरति। रे रे इत्यनादरे। रोषावेशाद् द्विरुक्तिः। अममामम नास्ति मम ममत्वं येषां ते अममाः। मम इति भावप्रधानो निर्देशः। ममत्वशून्याः सर्वत्र समबुद्धयः साधव इत्यर्थः। तेंषां आमं निर्घृणाचरणेन खेदं मयते प्रणिददाति इति तत्संबुद्धिः अममामम। निर्घृणाचरणेन सत्पुरुषदुःखद। मेङ् प्रणिदाने इत्यस्माद् आतोनुपसर्गे कः इति कः। रोरूरुरूरोरुगागोगः रोरूयते इति रोरूः यङन्तात् क्विप्। रोरूश्चासौ रुरुश्च चित्रमृगः रोरूरुरुः पुनः पुनः शब्दकारी चित्रमृगः तस्य उरसः वक्षसः रुक्

पीडा। शरवेधजनितेत्यर्थः। सा एव आगः अपराधः ते गच्छतीति रोरूरुरूरोरुगागोगः। मृगहत्याविधायक इत्यर्थः। अगाङ्गागगुः अगस्य पर्वतस्य अङ्गं अधित्यकां गच्छन्ति इति अगाङ्गगाः। पर्वतोपरि वर्तमाना इत्यर्थः। ते च ते अगाः वृक्षाः अगाङ्गगागाः तेषु गावो यस्य स अगाङ्गगोगगुः। पर्वतो परिप्रदेशस्थवृक्षाधः स्थितधेनुक इत्यर्थः। अगाङ्गगोगगुः इति पाठे पदद्वयं अगाङ्गगः अगगुः इति। अगा वृक्षाः तस्य अङ्गानि अवयवास्त्वक्पुष्पफलादय–स्तानि गच्छति सेवनार्थमिति अगाङ्गगः वृक्षत्वक्पुष्पफलोपभोगीत्यर्थः। तथा अगगुः अगे पर्वते गौः दृष्टिः यस्य सः। मृगयार्थं नगासक्तदृष्टिरित्यर्थः। ईदृशस्त्वं मां मा आम मा आगच्छ। त्वसंपर्कं मा विधेहि इत्यर्थः। दृष्टान्तेनामुमर्थं विशदयति। किमिति प्रश्ने। काकः वायसः। केकाकाकुकः केका मयूरवाणी काकुः मदसूचकध्वनिविशेषः यस्य सः केकाकाकुकः। शेषाद्विभाषा इति कप्। भवतीति शेषः। यथा काको मदेन आरावं कुर्वन्नपि केकासौभाग्यं न लभते तथा भवान् महता परिश्रमेणापि अस्माकं सङ्गं न लभत इति भावः। अत्रापि विविधा अर्थाष्टीकाकृद्भिः प्रदर्शितास्ते तत एव द्रष्टव्याः। चतुर्भिः र–ग–क–म इति वर्णैः निबन्धनाच्चतुर्वर्णनियमितचित्रम्। वर्णपदं च वृत्तपूरकवर्णपरम्। तेन अङ्गेत्यत्र ङकाराधिक्येपि न दोषः। तस्य वृत्तपूरकत्वाभावात्॥९२॥

विवृति

तदेवं स्थाननियममभिधाय वर्णनियममुदाहरति–

रे रे रोरुरुरूरोरुगागोग इत्याधिक्षेपे सम्बोधनम्, अत्यर्थं रौतीति रोरुः स चासौ रुरुश्च मृगस्तस्योरो हृदयं रुक् पीडा सैवागः

अपराधः तं गच्छतीति रोरुरुरूरोरुगागोगः तस्यामन्त्रणम्। अगाः तरवः तेषामङ्गानि पत्रपुष्पफलवल्कलानि तानि (गच्छतीत्यगाङ्गगः)। (न) गच्छन्तीगङ्गागाः (त्यगाः। अगाः) गावो धेनवोऽनड्वाहश्च यस्यासावगमुः। गोपालकः। किमित्येतत् क्षेपे। केका काकुः केकाशब्दो यस्यासौ केकाकाकुकः मयूरः स किं काको वायसोऽपि तु न भवति। किं तु केकाका(?)काकुकः काको ननु(?) मामा इत्यधिके निषेधे। वयममाम पादागमां मामन् (अवागमाम। आमं) मनःखेदमामयते प्रतिददाति यः तस्य सम्बोधनम्। हे रुरुमृगहृदयहननापराधभाक् तरुवल्कनधारिन् तत्फलपुष्पाशिन् गोपालक मयूर(:) केकापराधी (प्रणादी)। स किं काक इति। सम्भवात् (न भवान्) काकमयूरयोः विशेषं वेद। अत एव न वयमेवंविधं सम्बन्धं कदाऽप्यमामावधारयाम (-यपि अमाम अवाधारयाम)म(म)दुःखकारिन् असम्बन्धाभिधायक इति कश्चित् गोपालकः केनापि मयूरं कामं(कं) अभिदधानो निषिद्ध्यते।

(अथ कल्पनानन्तरम्)। रे रे इत्यधिक्षेपे। तस्य किं करणमित्यत्रोच्यते रोरुरुरूरोरुगागोगेति। रोरुश्च रुरुश्चेति द्वन्द्वः(?)रोरुः रोरूयमाणःव्यापनक्रियां कुर्वाण इत्यर्थः। रुरुः मृगः तस्योरोरु(क्. उ)रो प(व)क्षः तस्य रुक् पीडा मरणमिति यावत्। स एव आगः पापं तं गच्छतीति रोरुरुरूरोरुगागोग मरणमिति यावत्। स एव आगः पापं तं गच्छतीति रोरुरुरूरोरुगागोग मृगमिथुनहननपापग इत्युक्त्वा शापं ददाति अगाङ्ग गमनरहिताङ्ग गमनमिति मैथुनं तेन वियुक्तावयव भवान् स्त्रियं गच्छति चेत् मृतो भवत्वित्यर्थः। एतत्तवायुक्तम्। कथं गोगगुः गौरिति दिक्। तां गच्छतीति गोगः गौश्शब्दः कीर्तिर्यस्य स गोगगुः तस्मात्तवायुक्तमेव

तत्। अथ वा एतत्सर्वत्रेदानीं व्याप्तमित्यवगन्तव्यम्। मया स्वल्वज्ञानेन त्वेतत्कृतमित्युक्ते पुनः सकोपो ब्रवीति। किमिति क्षेपे। केका मयूरध्वनिः तस्याः काकुको निन्दकः। काको वायसः भवान् धर्ममनुशास्तीत्यर्थः। मामेत्यन्तं प्रतिषेधे। मा मामित्यर्थः। अम निःश्रीक। अयं पापविशेषः। पुनरपि शपति अमम ममत्वरहितो भवेत्यर्थः। तदेव न आममदुःखभाक् च भवेत्यर्थः। पाण्डामृयङ्गवे (पाण्डुना मृगयां गतेन) मृगाकारमुनिमिथुनेत्य(अ)ज्ञानतो भग्ने सति कुपितो मुनिराह॥

चतुर्व्यञ्जनमुदाहरति–रेरे इति। कश्चित् व्याधः स्वमनाहूय मृगयाक्रीडां कृतवन्तं सखायं गर्हति। रे रे, रोरूरुरूरोरुक्, आगोगः, अगाङ्गगः, अगगुः, किं, केकाकाकुकः, काकः, अमा, माम्, आमाम, मा, मम। रे रे सम्बोधनम्; रोरुरुरूरोरुक्; रोरुवः भृशं शब्दायमानस्य रु शब्दे इत्यस्मात् यङ्लुकि रोरुः, 'अन्येभ्योऽपि दृश्यते' इति क्विप्, रुरोः हरिणस्य उरः वक्षः रुजतीति रोरुरुरूरोरुक्; आगोगः अपराधगामी, गाङ् गतौ इत्यस्मात् 'आतोऽनुपसर्गे कः' ; अगाङ्गगः–अगस्य पर्वतस्य अङ्गं सानुं गच्छतीति अगाङ्गगः ; अगगुः–अगा अप्राप्ता गौः वाणी यस्य सः ; किं क्षेपे; केकाकाकुकः केकाप्रकारशब्दः ; काकः ; अमा समीपे। मां मा; आमाम–आमं खेदम् अमति गच्छति यः, तस्य सम्बोधनम्; मा प्रतिषेधे; मम मे। रे रे अःगगुः अगाङ्गगः रोरूरुरूरोरूक् मम आंगोगोऽसि; काकः किं केकाकाकुकः? आमाम माम् अमा मा; भवेति वाक्यशेषः॥९२॥

देवानां नन्दनो देवो नोदनो वेदनिन्दिनः।
दिवं दुदाव नादेन दाने दानवनन्दिनः॥९३॥

रत्नश्री

देवानां नन्दनः प्रीतिकरः तद्योगक्षेमाचरणपरत्वात्। वेदनिन्दिनः धर्माधिक्षेपकस्य लोकस्य नोदनो निषेद्धा [त्रयी]प्रवर्तनात्। देवो विष्णुः। तस्यैव तादृशत्वात्, वक्ष्यमाणविशेषयोगाच्च। दानवानसुरान् नन्दयति वर्धयति तद्योगक्षेमाचरणादिति दानवनन्दिनोऽसुरेश्वरस्य हिरण्यकशिपोः, अन्यस्य वा कैटभादेः दानेऽवखण्डने विदारणे नादेन दर्पोन्मुक्तेन सिंहनादेन [स्तम्भ]भङ्गसम्भवेन वा नादेन शब्देन तुमुलेन हेतुना दिवं स्वर्गलोकं दुदाव। किमिदमित्युपजातशङ्कमकरोदित्यर्थः। दकारवकारनकारमात्रात्मत्वात् त्रिवर्णोऽयं श्लोकः॥

हृदयङ्गमा

वर्णचित्रेषु त्रिव्यञ्जनमुदाहरति, देवानामिति। —देवानाम् इन्द्रादीनां, नन्दनो दैत्यदमनात् प्रीतिजननः, तथा वेदनिन्दिनो वेदनिन्दकस्य, नास्तिकजनस्य इत्यर्थः, (''वेदनिन्दिनः'' इत्यत्र ''वेदनिन्दिनाम्'' इति पाठान्तरम्) नोदनः निरासकः, देवः नृसिंहरूपी भगवान्, दानवान् नन्दयति त्रिभुवनविजयेन सन्तोषयतीति तथोक्तस्य दानवनन्दिनः हिरण्यकशिपोः, दाने वक्षोविदारणे, (''दो अवखण्डने'' इत्यस्मात् अनट्प्रत्ययः) नादेन सिंहनादेन, दिवम् अन्तरीक्षं, दुदाव तापितवान्। (अत्र ''द-व-न'' इति त्रिभिरेव व्यञ्जनैः पद्यबन्धः)॥९३॥

प्रभा

त्रिवर्णमुदाहरति–**देवानामिति।** भगवतो नरसिंहस्य स्तुतिरियम्। देवानां इन्द्रादिदेवानां नन्दनः आह्लादकः। तथा वेदनिन्दिनाम् वेदान् निन्दन्ति कुतर्कैर्दूषयन्ति ते वेदनिन्दिनः असुरादयस्तेषाम्। नोदनः निवारकः। देवो नरसिंहः। दानवः हिरण्यकशिपुः स एव दन्ती गजस्तस्य। नन्दिन इति पाठे दानवान् नन्दति आनन्दयतीति दानवनन्दी हिरण्यकशिपुः। तस्य दाने अवखण्डने। नादेन सिंहनादेन। दिवं आकाशम्। दुदाव तापयति स्म। टुदु उपतापे इत्यस्य लिटो रूपम्। अत्र द-व-न इति त्रिभिर्वर्णैरुपनिबन्धनम् इति त्रिवर्णता।।९३।।

विवृति

त्रिवर्णमुदाहरति–

देवानामिन्द्रादीनां नन्दनः समृद्धिजननः देवानामिति कर्मणि षष्ठी नन्दन इति कर्तरि ल्युः। देवो दामोदरः नोदनो निरसनः। वेदं निन्दयतः तस्य वेदनिन्दिनो वेदविद्वेषिणः दिवं गगनं दुदाव। उद्वेजितवान्। नादेन सिंहगर्जितेन। कदा। दादे(ने) विदारणे। त(क)स्य दानवनन्दिनः दानवान् नन्दयतीति दानवनन्दी तस्य दैत्याधिपतेः हिरण्यकशिपोरिति। एवमनुश्रूयते। पुरा किल सर्वं विष्णुमयं जगदिति हिरण्यकशिपुनन्दनेन सन्ध्याघनानन्द(वन्दन)-वेलायामभिहित(तो) हरिस्तवामर्षितो दैत्याधिपतिः पार्श्वस्थस्तम्भं भुजेनाजघान। ततः स्तम्भत् सिंहरूपमुद्वहन् हरिराविर्बभूव सन्ध्यासमय एव जानुनोरुपरि दितिसुतमुपनिधाय खरतरनखरप्रकरविदारितोरः स्स्थलमभितः परिकीर्णान्त्रयन्त्रं

विदारयांचकार। सिंहनादपरित्रस्त(स्तां) सुरासुरसमितिं चकोरति।

(अथ वा दानवनन्दिनो महाबलेः दाने। शेषं समानम्)

त्रिव्यञ्जनमुदाहरति–**देवानामिति।** देवानां नन्दनः आह्लादकः, देवनिन्दिनाम् असुराणां, नोदनः घातकः, देवो नरसिंहः, दानवनन्दिनः हिरण्यस्य, दाने खण्डने, नादेन अट्टहासेन, दिवं दुदाव तापयति स्म॥९३॥

सूरिः सुरासुरासारिसारः सारसिसारसाः।
ससार सरसीः सीरी ससूरूः स सुरारसी॥९४॥

रत्नश्री

स प्रसिद्धः सीरी बलभद्रः सूरिः सर्वविद्याकोविदः सुराश्चासुराश्च तानासर्तुं व्याप्तमप्रतिहतत्वात् शीलमस्येति सुरासुरासारी। [तादृशः] सारः सामर्थ्यमस्येति सुरासुरासारिसारः। नयसम्पन्नो विक्रमसम्पन्नश्चेत्युक्तं भवति। शोभनाभ्यामूरुभ्यां वर्तत इति ससूरूः। सौरूप्यमनेनोपलक्षितम्। सुरारसी मदिरास्वादी। तथा [च बलभद्रः] प्रसिद्धः। सरसीः क्रीडादीर्घिकाः ससार वारिविहारयोगेन निर्विवेश। किंविशिष्टाः? आरसिभिर्मुखरैः सारसैः पक्षिविशेषैः सह वर्तत इति सारसिसारसाः। अनेन विलासित्वमस्योद्भावितम्। रेफसकारमात्रस्वभावतया द्विवर्णोऽयं श्लोकः॥

हृदयङ्गमा

द्विव्यञ्जनात्मकं वर्णचित्रमुदाहरति, सूरिरिति। –सूरिः विद्वान्, तथा सुरासुरासारिसारः सुरान् असुरांश्च आसरति आस्कन्दति इति तथोक्तः, सारो बलं यस्य तादृशः, किञ्च ससूरुः सु शोभनौ, ऊरू सूरू, ताभ्यां सहितः वामोरुरित्यर्थः, पुनश्च सुरारसी सुरायां मधुपाने, रसः आस्वादः, अनुराग इत्यर्थः, विद्यते अस्येति सुरारसो, स प्रसिद्धः, सीरी सीरं लाङ्गलमस्यास्तीति तथोक्तः बलदेवः, सारससारसाः आरसेन उच्चैः शब्देन सह वर्त्तमानाः सारसाः उच्चैः शब्दं कुर्वाणाः, सरसि भवाः सारसाः पक्षिविशेषाः यासु ताः,

सरसोः तड़ागान्, ससार जलक्रीड़ार्थं गतवान्। (बलदेवस्य जलक्रीड़ाप्रकरणोक्तं पद्यमिदम्। अत्र द्वाभ्यामेव ''स-र'' इति वर्णाभ्यां पद्यबन्धः। यथा वा, –''भूरिभिर्भारिभिर्भीरौर्भूभारैरभिरेभिरे। भेरीरेभिभिरभ्राभैरभीरुभिरिभैरिभाः।।'' इति)।।९४।।

प्रभा

द्विवर्णमुदाहरति–**सूरिरिति।** बलदेवस्य सरोत्वगाहनवर्णनमिदम्। सः त्रिभुवनप्रथितः। सीरी बलदेवः। सूरिः पण्डितः। तथा सुरेषु असुरेषु च आसारी प्रसरणशीलं सारः बलं यस्य सः। देवदानवेषु अप्रतिहतप्रभाव इत्यर्थः। सुष्ठु ऊरू यस्याः सा सूरूः रेवती तया सहितः ससूरूः। तथा सुरारसी सुरायां मद्ये रसः प्रीतिरस्यास्तीति सुरारसी। सारससारसाः आरसेन शब्देन सहिताः सारसाः सशब्दाः सारसा जलपक्षिणो यत्र ताः सारससारसाः। सरसीः ससार विहाराय जगाम। अत्र सकाररेफाभ्यां द्वाभ्यां वर्णाभ्यां निबन्धनमिति द्विवर्णता।।९४।।

विवृति

द्विवर्णमुदाहरति–

सूरिः प्रभुर्विद्वान् सुराश्चासुराश्च सुरासुराः तान् सरति गच्छति सार उत्कृष्टभावो यस्य स सुरासुरसारिसारः। कर्मण्यण् (?)। सीरी हलायुधः। सरसी (सीः) पद्मिनी(नीः) ससार जगाम किंविशिष्टाः सारससारसा(ः) (आ) रसां (स) आरास(ः) शब्दः सहारासेन वर्तत इति सारसाः सारसाः पक्षिविशेषाः जलचरा यासु ताः। किंविशिष्टः स बलदेवः सूरू शोभने ऊरू सूरू सह ताभ्यां वर्तत

इति ससूरूः पीवरजङ्घायुगलः। सुरायाः मद्यविशेषस्य रसः आस्वादः सोऽस्यास्ति सुरारसी॥

द्विव्यञ्जनमुदाहरति–**सूरिरिति।** सूरिः पण्डितः, सुरासुरासारिसारः देवासुराक्रामितबलः, सारासससारसाः–आरासः शब्दः, तेन सहिताः सारासाः, सारासा सारसाः पक्षिणः यासु ताः ; ससार अवगाढवान्। सरसीः सरांसि; सीरी बलभद्रः ; ससूरुः शोभनोरुसहितः ; सः प्रस्तुतः। सुरारसी पीतमधुः। एवम्भूतः सीरी सरसीः ससार॥९४॥

नूनं नुन्नानि नानेन नाननेनाननानि नः।
नानेना ननु नानूनेनैनेनानानिनो निनीः॥९५॥

रत्नश्री

नूनं निश्चितमेतत्। किं तत्? नोऽस्माकमाननानि मुखानि न [न] नुन्नानि किं तु नुन्नान्यभिभूतान्येव। केन? अनेन पुरुषेण, येन सार्धं योद्धव्यम्। केन? अनेनात्मीयेन मुखेन मार्तण्डमण्डलेनेव तेजस्विना मुखेन। आस्तां तावद् युद्धम्, मुखमप्यस्यावलोकयितुमस्मन्मुखानि न शन्कुवन्ति। कोऽप्ययमतिमानुषः पुरुषः। तादृशेन सह [यो] योद्धुमस्मान् नियुङ्क्तेऽसौ प्रभुरपरीक्षकोऽस्माकमिति कथयति। एतेन पूर्वोक्तेनानूनेनापि [107b] केना[प्य]तिबलीयसा योद्धुमित्यर्थात्। निनीः......... नियोक्तुमिच्छुः। अनान् प्राणिनः प्राणोऽनुजीविनोऽस्मान् नयतेः सन्नन्तात् क्विपि रूपम्। इनोऽस्माकं प्रभुः। ना पुरुषोऽयं नानेनाः एनः पापं न विद्यतेऽस्येत्यनेनाः न भवतीति किं तु सपाप एव। ननु वितर्के निश्चये वा, यदेनेनातिमानुषप्रभावेणास्मान् धातयितुमिच्छति। स्वयमप्यत्र योद्धुं प्राप्तः। इति केनचित् अतिबलीयसा योद्धुं नियुक्ताः प्रभुना अनुजीविनो वितर्कयन्ति। अयं नकारमात्रनिबन्धत्वादेकवर्णः श्लोकः॥

दुष्करमार्गमुपसंहरति–

इति दुष्करमार्गोऽपि किञ्चिदादर्शितक्रमः।

इत्युक्तेन विधिना दुष्करमार्गो दुष्करोऽपि काव्यप्रकारः। न केवलं सुकर इत्यपि शब्दः। किञ्चिद् ईषत् संक्षेपतः, तथा

प्रतिज्ञानात्। क्रियाविशेषणमेतत्। आदर्शित उक्तः क्रमः स्वभावोऽस्येत्यादर्शितक्रमः प्रतिपादित इति दुष्करमार्गेऽपि कश्चिदादर्शितः क्रम इत्यपि पाठः। तत्र दुष्करमार्ग विषयेऽपि क्रमः प्रकारः कश्चित् कोऽपि सक्षिप्तः आदर्शित इति योज्यम्।

।। इति चित्रचक्रम् ।।

प्रहेलिका अनुबध्नन्नाह–

हृदयङ्गमा

चित्रालङ्कारभेदमेकव्यञ्जनमुदाहरति, नूनमिति।– अननेन प्रबलेन, अनेन पुरतो दृश्यमानेनेत्यर्थः, एनेन एतेन, [“द्वितीयाटौस्स्वेनः” (२/४/३४ पा०) इति इदमः एतदो वा एनादेशः] रिपुणा इति भावः, यद्वा, –इनः प्रभुः, अ इनः एनः अप्रभुः, तेन प्रभुप्रतिपक्षेण, शत्रुणा इत्यर्थः, आननेन मुखैनैव करणेन, भ्रूकुटिमतेति भावः, नः अस्माकम्, अननानि प्राणाः, नूनं निश्चितं, नुन्नानि अपनीतानि, न इति न, अपि तु नुन्नान्येव, अस्य भ्रूभङ्गिं दृष्ट्वेव वयं मृतप्रायाः, का कथा सम्प्रहारस्य इति भावः ; परन्तु ननु भोः।, इनः प्रभुः, ना पुरुषः, अस्माकं प्रभुरित्यर्थः, अनान् प्राणान्, निनीः रक्षितुमिच्छुः सन्नित्यर्थः, (नेतुमिच्छतीति नीधातोः सनन्तात् क्विपि प्रथमैकवचनम्) न अनेनाः न अपापः, भवति इति शेषः, शत्रुविजितस्य युद्धे मरणं जीवितादपि वरम् अतोऽनेन यथाशक्ति युद्धं कर्त्तव्यमिति भावः। (रिपुपराजितस्य कस्यचित् नृपस्य सैन्यानां दैन्योक्तिरियम्। अत्र नकाररूपवर्णैरेव पद्यबन्धः। एवं क्रमस्थ सर्वव्यञ्जनवर्णैरपि बन्धे वैचित्र्यातिशयात् तदप्यत्र केचित् अङ्गीकुर्वन्ति; तदुदाहरणं यथा, –“कः खगौघाङचिच्छौजा झाञ्ञाटोठीडडंढणः। तथोदधीन

पफर्वाभीर्मयो- रिल्वाशिषां सहः।।’’ इति। तथा म्यरस्तजभनगलान्ता ये दशवर्णाश्छन्दो- लक्षणसिद्धये निर्णीताः, तैर्निबद्धं छन्दोऽक्षरव्यञ्जनरूपमप्युक्तं, यथा, –‘‘सरत्सुराराति-भयाय जाग्रतो जगत्यलं स्तोतृजनस्य जायताम्। स्मितं स्मरारेर्गिरिजास्यनीरजे समेतनेत्रत्रितयस्य भूतये।।’’ इति। तथा ‘‘सरिगामपधानिश्च वर्णाः सप्त स्वरादयः। षड्जादिकृतसङ्केता दृष्टा गान्धर्ववेदिभिः।।’’ इत्युक्तलक्षणमात्रव्यञ्जनमयं षड्जादिव्यञ्जनं यथा, –‘‘सा ममारिधमनीनिधानिनी सामधामधनिधामसाधिनी। मानिनी सगरिमाऽपपापपा सापगा समसमागमाऽसमा।।’’ इति। एवमन्येऽपि भेदा ज्ञेयाः)।।९५।।

प्रभा

एकवर्णमुदाहरति–**नूनमिति**। तत्र तावत् पदानि–नूनं नुन्नानि न अनेन न अननेन अननानि नः। न अनेनाः ननु ना अनूनेन एनेन अनान् इनः निनीः।। अन्वयार्थः–कश्चित् शूरः प्रतिभटैः स्तूयते। अनेन प्रत्यक्षीभूतानुपमशौर्येण एतेन वीरेण कर्त्रा। अननेन स्वसामर्थ्येन हेतुभूतेन। नः अननानि सामर्थ्यानि। न नुन्नानि परिक्षिप्तानि इति न। तर्हि नूनं नुन्नान्येव। अनेन वयं सर्वे सामर्थ्यशून्या विहिता इति भावः। अतः अनूनेन अधिकबलवता। एनेन वीरेण। अनान् बलवतः स्वीयपुरुषान्। निनीः नेतुमिच्छुः। सन्नन्तात् क्विप्। इनः स्वामी। ना पुरुषः। अस्माकं प्रभुः इत्यर्थः। अनेनाः निष्पापः निरपराधो वा न। अपि तु सापराध एव। एतादृशवीरस्य पुरतः केवलं स्वविनाशायैव पुरुषान् प्रणिनीषुः सापराध एवेति भावः। ननु इति निश्चये। अत्र केवलनकारेणैव रचना इति एकवर्णनियमः।।९५।।

विवृति

एकाक्षरमुदाहरति–

नूनं निश्चितं नुन्नानि खेदितानि। आननानि वदनानि नोऽस्माक–मनेनामुना पुरुषेण अननं बलं तेन अ(न)नेन बलेन ननेति प्रतिषेधद्वयं विधिं गमयति। तेन आ(अ)ननेन बलेन न न ननु नुन्नानि म्लानीकृतानि, अ(नु)न्नान्येव आननानि अस्माकमनेन तेनेत्यर्थः। तथा नायमनेनानपवाहितः नन्विति वितर्के। एनस्तु(?) पापमेकमेव(-युक्त एव) तथा ना पुरुषश्च न नेति। पुरुष एवांय न भवति। कोऽसावित्याह इनः स्वामी। अनूनेन अधिकबलेन एतेन बैरिणा हेतुभूतेन। 'द्वितीयाटौस्वेन' इति एतद एनादेशः। आनान् प्राणान् (नि)नीः नेतुमिच्छुः। निनीषतेः क्विप्य(क्विपो) लोपे निनीरिति भवति। कश्चिन्मनस्वी भृत्यः स्वामिनमरातिनाऽधिकबलेन पराजीयमानमुपलभ्य एवमाह.... दिनमनेनाननेनास्मन्मुखानि न परं पाल्यमानेन मलिनीकृतानि। तथायं पापं च (पश्च) न केवलं भवति। पुरुषश्च न भवति। योऽमुनाऽविकबलेनारातिनाऽस्मदसून् ग्राहयतीति।।

एकव्यञ्जनमुदाहरति–**नूनमिति।** नूनं, नुन्नानि, न, अनेन न, अननेन, अननानि, नः, नाः, अनेना, ननु, न, अनूनेन, एनेन, अननिनां, निनीः। कश्चित् भटः समरे प्रतिभटशौर्यं वर्णयति। नूनं निश्चये; नून्नानि ध्वस्तानि; नेति प्रतिषेधे; अनेन एतेन; न प्रतिषेधे; अननेन बलेन; अननानि बलानि; नः अस्माकम्; ना पुमान्; अनेनाः अपीड; ; ननु अवधारणे; न प्रतिषेधे; अनूनेन अधिकेन एनेन एतेन; अननिनां बलवताम्; निनीः नेता। अयमर्थः–अनेन चक्षुर्गोचरशौर्येण अननेन नः अननानि नूनं न न नुन्नानि, नुन्नान्येव। अननिनां निनीः यो ना सोऽपि अनूनेन एनेन अनेनाः न ननु।।९५।।

प्रहेलिकाप्रकाराणां पुनरुद्दिश्यते गतिः।।९६।।

रत्नश्री

पुनः अथ प्रहेलिकानां तद्रूपाणां वा प्रकाराणां विकल्पानां गतिः स्वरूपं लक्षणं लक्ष्यं च, उद्दिश्यते प्रतिपाद्यते।।

क्व पुनस्तदुपयोग इति चेदाह–

हृदयङ्गमा

चित्रालङ्कारस्य दुष्करतया ग्रन्थबाहुल्यतया च कियन्तं दर्शयित्वा तमुपसंहरन् प्रहेलिकां निर्दिशति, इतीति। –इति उक्तप्रकारेण, दुष्करमार्गेऽपि चतुस्त्रिद्व्येकरूपत्वात् कृच्छ्रसाध्य-नियमेऽपि, कश्चित् अल्पमात्र इत्यर्थः, क्रमः नियमः, आदर्शितः उदाहृतः, (एतावता अन्येऽपि दुष्कराश्चित्रालङ्काराः पद्मबन्धःदयः प्राचीनोक्ताः सन्ति, ग्रन्थविस्तारभयेन ते नात्रोक्ताः, ग्रन्थान्तरतः ज्ञातव्या इति ज्ञापितम्)। पुनः इदानीं, प्रहेलिकायाः प्रकाराणां विशेषाणां, गतिः नियमः, उद्दिश्यते निरूप्यते। (तल्लक्षणन्तु सामान्यत उक्तम्; यथा, –"प्रहेलिका तु सा ज्ञेया वचः संवृतिकारि यत्" इति। ततश्च स्वाभिलषितार्थस्य कथञ्चित् संवरणात्मकवचनविन्यासः प्रहेलिकेति लक्षणमवगन्तव्यम्)।।९६।।

प्रभा

इदानीं दुष्करक्रममुपसंहरन् प्रहेलिकां प्रस्तौति-**इतीति**। इति एवंप्रकारेण। दुष्करमार्गे स्वरस्थानवर्णनियमरूपे। कश्चित् स्वल्पः। क्रमः प्रकारः। आदर्शितः। अन्ये क्रमस्थसर्वव्यञ्जनं

छन्दोक्षरव्यञ्जनं मुरजाक्षरव्यञ्जनं दीर्घैकस्वरम् इत्यादयस्तथा पद्ममुसलबन्धादयश्च रचनाविशेषा विस्तरभिया कविना नोल्लिखिताः सरस्वतीकण्ठाभरणादिग्रन्थेभ्योवगन्तव्याः। प्रहेलिकाया ये प्रकारास्तेषाम्। गतिः लक्षणम्। उद्दिश्यते उद्देशपूर्वकं निवेद्यते। "प्रहेलिका तु सा ज्ञेया वचः संवृतिकारि यत्।" इति प्रहेलिकासामान्यलक्षणम्। अस्या विशेषप्रभेदानां लक्षणानि अग्रे स्फुटीकृतानि ग्रन्थकृता।।९६।।

विवृति

इति चित्रचक्रम्।।

इतीति प्रकृतमुपसंहरति–

इत्यनन्तरोक्तक्रमेण न केवलं सुकरमार्गः परिच्छेदद्वयेनोक्तः। तथा अव्यपेतव्यपेतोभयसङ्कीर्णादिमध्यान्तमध्याद्याद्यन्तसर्वपादार्थ-श्लोकाभ्याससमुद्गप्रतिलोमगोमूत्रिकार्धभ्रमसर्वतोभद्रमहायमक-स्वरस्थानवर्णनियम कथनेन दुष्करमार्गोऽपि कश्चिन्मनागादर्शितः क्रमः कथितः प्रकारः अपिशब्देनानुजाल(?)यमकमुरजबन्धचक्र-प्रभृतयोऽपि सन्तीत्याह।।

इदानीं प्रहेलिकाप्रकाराणां भेदानां पुनरुद्दिश्यते गतिर्मागः।

दुष्करमुपसंहरन् प्रहेलिकामुपक्रमते–**इतीति**। वञ्चितार्थं वाक्यं प्रहेलिका।।९६।।

क्रीडागोष्ठीविनोदेषु तज्ज्ञैराकीर्णमन्त्रणे।
परव्यामोहने चापि सोपयोगाः प्रहेलिकाः॥९७॥

रत्नश्री

गोष्ठीनामनेकविधत्वात् क्रीडारूपाः प्रीतिस्वभावा रसवत्यो या गोष्ठ्यः समवायाः काव्यालापरूपा विदग्धानां ता एव सुखेन कालप्रेरणारूपत्वाद् विनोदाः तेषु क्रीडागोष्ठीविनोदेषु। तज्ज्ञैः प्रहेलिकावेदिभिः सह आकीर्णे जनसंबाधे स्थाने क्वचिन्मन्त्रणे गुप्तभाषणे तद्विदामेव तत्र गूढार्थानां प्रहेलिकानां रहस्यभूतार्थप्रतिपत्तिः। इतरेषां तत्र सन्निहितानामपि किमिदमुच्यत इति तदनवगमात् आकीर्णेऽपि मन्त्रणं प्रहेलिकाभिः साध्यते। [सामर्थ्यं चेद्] ज्ञायतां किमस्माभिरुच्यत इति व्यामोहने तत्त्वानिश्चयादाकुलीकरणे, नर्मरूपे वापि विषये। चैवेत्यपि पाठः। सहोपयोगेन प्रयोजनेन वर्तत इति सोपयोगा उपकारिण्यः। ततस्ता अप्यलङ्कारवत् [108a] काव्यलक्षणे चिन्तनीयाः। ततश्च यदुक्तं भामहेन—

नानाधात्वर्थगम्भीरा यमकव्यपदेशिनी।
प्रहेलिका सा ह्युदिता रामशर्माच्युतोत्तरे॥
काव्यान्यपि यदीमानिव्याख्यागम्यानि शास्त्रवत्।
उत्सवः सुधियामेव हन्त दुर्मेधसो हताः॥
[काव्यालङ्कारे २. २९-२०]

इति तदपहस्तितम्। उपयोगवत्तया अवश्यवक्तव्यत्वात् प्रहेलिकानामलङ्कारवदिति॥

लक्षणं तासां कुर्वन्नाह–

हृदयङ्गमा

"रसस्य परिपन्थित्वात् नालङ्कारः प्रहेलिका" इत्युक्त्या यदि च प्रहेलिकाया यमकादिवत् शब्दार्थोपस्कारकत्वेन रसानगुण्याभावात् नालङ्कारत्वं, तथाऽपि अस्या उपयोगित्वमाह, क्रीड़ति। –क्रीड़ागोष्ठीषु विहारसभासु, ये विनोदाः प्रमोदाः, यद्वा,–क्रीड़ा परस्परवाक्चातुर्य्यरूपकौतुकं, गोष्ठी विदग्धानामासनबन्धः, विनोदः काव्यसमालोचनेन कालयापनं तेषु, तथा तज्ज्ञैः प्रहेलिकाभिज्ञैः सह, आकीर्णे जनसङ्कुले देशे, यत् मन्त्रणं गुप्तभाषणं, परस्परसंलापः इत्यर्थः, तस्मिन्, तथा परस्य बोद्धव्यव्यतिरिक्तस्य जनस्य, व्यामोहने विशेषरूपेणअर्थाबोधवशेन मनसः व्याकुलतायाम्, अथवा अवबोधनिराकरणे विषये, प्रहेलिकाः सोपयोगाः सप्रयोजनाः, उपकारिण्य इत्यर्थः। (तस्मात् अस्या क्रीड़ागोष्ठ्याद्युपयोगित्वे अलङ्कारत्वम् अन्यत्र दोषावहत्वमिति बोध्यम्)।।९७।।

प्रभा

"रसस्य परिपन्थित्वान्नालंकारः प्रहेलिका"। इति रसपरिपन्थिभूतत्वात् प्रहेलिकाया नालंकारत्वं तर्हि तन्निरूपणं किमर्थमिति चेत् तस्या उपयोगं दर्शयति–**क्रीडेति।** क्रीडार्थं या गोष्ठी सभा तत्र ये विनोदा विचित्रवाग्व्यवहारैः प्रमोदास्तेषु। तथा तज्ज्ञैः प्रहेलिकाभिज्ञैः। आकीर्णे व्याप्ते समाजे यन्मन्त्रणं गुप्तभाषणं तस्मिन्। तथा परस्य बोद्धव्यपुरुषभिन्नस्य व्यामोहने अभिप्रेतार्थानवगमे च। प्रहेलिकाः सोपयोगाः उपयुक्ताः। सन्तीति

भावः। यद्यपि शब्दालंकारादिरूपेणेयं न काव्योपयुक्ता तथापि विदुषां क्रीडागोष्ठीविनोदादिषूपयुक्तेति भावः॥९७॥

विवृति

प्रहेलिकानां सोपयोगत्वमाह–'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तत' इति।

क्रीडागोष्ठीविनोदेष्विति विदग्धक्रीडात्र्थं तज्ज्ञैः प्रहेलिकाभिज्ञैः विदग्धैः आकीर्णमन्त्रणे विदग्धजनपरिषत्सम्भाषणे तथा परस्य दर्पाध्मातस्य व्यामोहने सम्मोहजनने च प्रहेलिकाः प्रयोजनवत्यः। उपयोगिन्य इति ता अपि दुष्करमार्गप्रदर्शनावसर एवाभिधीयन्त इति।

प्रहेलिकाप्रयोजनमाह–**क्रीडेति।** प्रहेलिका न अलङ्कारादिरूपेण काव्योपयोगिनी, विदुषां क्रीडागोष्ठी-विनोदनाद्यर्था॥९७॥

आहुः समागतां नाम गूढार्थां पदसन्धिना।
वञ्चितान्यत्र रूढेन यत्र शब्देन वञ्चना॥९८॥

रत्नश्री

पदयोः सुप्तिङन्तयोः सन्धिना पदघटनेन तादृशेन हेतुना गूढो दुर्बोधः [कृच्छ्रगम्यो]ऽर्थो विवक्षितमभिधेयं यस्या इति गूढार्थप्रहेलिकां समागतामाहुस्तद्विदः। गोपितार्थसमागतपद-प्रधानत्वात् समागतेति तादृशी व्यवह्रियते यत्र प्रहेलिकायाम् अन्यत्र वा अर्थान्तरे॥

रूढेन प्रसिद्धेनार्थन्तरप्रयुक्तेन शब्देन वाचकेन वञ्चना वञ्चनं वा। विवक्षिताद् अर्थादन्यत्र बुद्ध्युत्पादात् विप्रलम्भो जायते यत्र सा तत्परंत्वाद् वञ्चिता नाम विज्ञायते॥

हृदयङ्गमा

अस्याः सलक्षणनामानि क्रमेणाह, आहुरिति। –पदसन्धिना पदयोः सुप्तिङन्तादिरूपयोः, सन्धिना सान्निध्यजनितसन्धिकार्य्येण, गूढ़ः दुर्बोधः अर्थो यस्यास्तादृशीं, प्रहेलिकां समागतां नाम आहुः। वञ्जितेति। –अन्यत्र विवक्षितार्थभिन्ने, यत्र यस्मिन् स्थले रूढ़ेन प्रसिद्धेन, शब्देन या वञ्चना प्रतारणा, सा वञ्चिता वञ्चिताख्या प्रहेलिकेत्यर्थः॥९८॥

प्रभा

अस्याः प्रभेदानुद्दिशति–**आहुरिति**। पदसंधिना पदानां संधिः अतिशयसंनिधिस्तन्निमित्तकेन कार्येण पदसंधिना हेतुना। गूढार्था

दुर्बोधार्थां समागतां समागतसंज्ञकप्रहेलिकाम्। आहुः कथयन्ति। नामेति प्रसिद्धौ। तथा अन्यत्र विवक्षितार्थादन्यत्र रूढेन प्रसिद्धेन शब्देन यत्र वञ्चना प्रतारणा सा वञ्चिताख्या प्रहेलिका। यत्र योगेन प्रकृतार्थोपस्थितिः परं रूढार्थेन वञ्चना योगार्थनिगूहनेन अन्यार्थावभासः सा वञ्चितेत्यर्थः।।९८।।

विवृति

आहुरिति। ब्रू(ब्रुव)ते। समागतां नामेति। कीदृशीमिति। गूढार्थां गुप्तार्थाम्। पदसन्धिना पदयोः सन्धिः संहिता तेन पदसन्धिना। वञ्चिता नाम सा यस्या(म)र्थान्तरे अन्यत्र रूढेन शब्देन प्रकृतस्यार्थस्य वञ्चना फलम्।।९८।।

व्युत्क्रान्तातिव्यवहितप्रयोगान्मोहकारिणी।
सा स्यात् प्रमुषिता यस्यां दुर्बोधार्था पदावली॥९९॥

रत्नश्री

अतिव्यवहितानामत्यन्तविप्रकृष्टानाम्। यथा मोहो जायते। पदानां प्रयोगोऽभिधानमतिव्यवहितो वा। अतिव्यवहितः प्रयोगतः स्यात्। अत्यन्तव्यवहितपदयोजनाहेतोर्मोहः। सोऽर्थानिश्चयं विपरीतार्थप्रतिपत्तिं [च] करोति जनयतीति मोहकारिणी या सा व्यवहितपदप्रधानत्वाद् व्युत्क्रान्ता नाम प्रहेलिका वेदितव्या॥

यस्याः प्रहेलिकायाः सम्बन्धिनी पदानामावली समुदायः दुर्बोधः कृच्छ्रगम्यः अर्थोऽभिधेयं यस्या इति दुर्बोधार्था सा प्रहेलिका अपहृतार्थत्वात् प्रमुषिता नाम स्यात्॥

हृदयङ्गमा

व्युत्क्रान्तेति। –अतिव्यवहितानाम् अतिशयेन दूरवर्त्तिपदानां, प्रयोगात् विन्यासात्, मोहकारिणी अर्थावबोधवैधुर्य्यविधायिनो, प्रहेलिकेति शेषः, व्युत्क्रान्ता नाम। सेति। –यस्याञ्च प्रहेलिकायां, पदावली पदसमूहः, दुर्बोधः अप्रसिद्धपदप्रयोगात् दुर्ग्राह्यः, अर्थो यस्यास्तादृशी, सा प्रहेलिका, प्रमुषिता नाम स्यात्, प्रकर्षेण बुद्धेर्मुषितत्वादित्यर्थः। (वञ्चितायाम् एकं पदं दुर्बोधार्थमिह तु पदानि, किञ्च वञ्चितायां नानार्थस्य पदस्य अप्रसिद्धार्थे प्रयोगः इह तु एकार्थानामपि पदानामित्यतोऽपि अनयोर्भेदः)॥९९॥

प्रभा

व्युत्क्रान्तेति। अति अत्यन्तं व्यवहितानाम् असंबन्धिपदैर्व्यवहितानां संबन्धिपदानां प्रयोगान् मोहकारिणी अर्थावबोधक्लेशकारिणी। या सा व्युत्क्रान्ता प्रहेलिका। यस्यां पदावली दुर्बोधार्था प्रसिद्धिराहित्येन केवलयौगिकार्थबलेन अर्थस्योन्नयनाद् दुर्बोधा दुःखेन बोध्या अर्था यस्याः सा। एतादृशी सा प्रमुषिता नाम प्रहेलिका। बुद्धेः प्रकर्षेण मोषणात् प्रमुषिता। वञ्चितायामेकं पदं दुर्बोधम् अत्र तु पदावलिस्तथा वञ्चितायां नानार्थकपदस्य अप्रसिद्धेर्थे प्रयोगः, अत्र तु एकार्थानेकाप्रसिद्धानि पदानि इत्युभयोः प्रभेदः।।९९।।

विवृति

व्युत्क्रान्ता नाम सा, या अतिव्यवहितप्रयोगात् अतिव्यवहितक्रियाकारकविशेषणविशेष्यभावात् भ्रान्तिकारिणी। सा प्रमुषिता यस्यां पदावली दुःखबोधा साध्यार्था।।९९।।

समानरूपा गौणार्थारोपितैर्ग्रथिता पदैः।
परुषा लक्षणास्तित्वमात्रव्युत्पादितश्रुतिः॥१००॥

रत्नश्री

या गौणार्था मुख्यादभिधेयादन्यस्मिन्नभिधेये आरोपितैरव्याप्तैः पदैः शब्दैः ग्रथिता विरचिता सा तादृशार्थान्तरप्रतिपादनपरत्वात् समानरूपा नाम स्मर्यते॥

लक्षणस्य शब्दानुशासनस्यास्तित्वं सद्भावमात्रं प्रयोगप्रभृति-व्यवच्छेदात्। तेन व्युत्पादिताः संस्कृताः श्रुतयः पदानि अप्रहताः यस्यां सा प्रयोगप्रतीती रसविरहात् परुषा नाम स्यात्॥

हृदयङ्गमा

समानरूपेति।–गौणार्थेन लाक्षणिकार्थेन आरोपितैः उपचरितैः, पदैः ग्रथिता विरचिता, प्रहेलिकेति शेषः, समानरूपा नाम शक्यार्थलक्ष्यार्थयोः द्वयोः सादृश्यनिबन्धनत्वादिति भावः। परुषेति।–लक्षणस्य सूत्रस्य, अस्तित्वमात्रेण केवलं लक्षणमस्तीति हेतोः, न तु शक्ताशक्तविवेचनया इति भावः, व्युत्पादिता श्रुतिः प्रसिद्धिः शब्दः वा यत्र तादृशी, प्रहेलिका परुषा नाम, अशक्तिनिबन्धनत्वेन श्रोत्रयोः पारुष्यावबोधादिति भावः॥१००॥

प्रभा

समानरूपेति। गौणार्थैः आरोपितैः उपचारितैः। पदैः ग्रथिता गुम्फिता। समानरूपा सादृश्यनिबन्धनत्वादिति भावः। लक्षणस्य शास्त्रस्य अस्तित्वमात्रेण केवलशास्त्रसिद्धत्वेनेत्यर्थः। तत्रार्थे

रूढिरस्ति वा न वेत्यविचार्य केवलशास्त्रमर्यादया अयमर्थो निष्पन्नो भवतीति कृत्वा व्युत्पादिता श्रुतिः शब्दो यत्र। तादृशी वाक् परुषा प्रहेलिका। पारुष्येणावबोधकत्वादिति भावः।।१००।।

विवृति

समानरूपा उच्यते। या गौणार्थारोपितैः पदैः ग्रथिता रचिता गौणार्थ आरोपितो यैस्तानि गौणार्थारोपितानि तैः। आहिताग्नित्वादारोपितशब्दस्य परनिपातः। तेन आरोपित-गौणार्थैरिति। परुषा नाम सा यस्यां लक्षणास्तित्वमात्रेण लक्ष्यानुसारेण(?) श्रुतिः शब्दो व्युत्पादितः।।१००।।

संख्याता नाम संख्यानं यत्र व्यामोहकारणम्।
अन्यथा भासते यत्र वाक्यार्थः सा प्रकल्पिता॥१०१॥

रत्नश्री

यत्र प्रहेलिकायां संख्यानमेकत्वादिकम्। व्यामोहस्यार्थतत्त्वाप्रतिपत्तेः [108b] कारणं साक्षादनुक्तस्य विवक्षितस्यार्थस्य संख्यामुखेन समुन्नयनात्, संख्याता नाम सा भवेत्।।

यत्र प्रहेलिकायां वाच्यस्य पदसमुदायस्यार्थोऽभिधेयमन्यथा अवस्थितः, अन्यथा तद्विपर्ययेणावभासते प्रतिभाति सा प्रहेलिका प्रकल्पिता नाम, अन्यथार्थकल्पनपरत्वादिति।।

हृदयङ्गमा

सङ्ख्यातेति।–यत्र सङ्ख्यानं वर्णगणना सङ्ख्यावाचकशब्दः वा, व्यामोहस्य विशेषेण अर्थावबोधवैधुर्य्यस्य, कारणं हेतुः, सा सङ्ख्याता नाम प्रहेलिका, सङ्ख्याघटितत्वादिति भावः। अन्यथेति।–यत्र वाक्यार्थः अन्यथा भासते आपाततः प्रतीयमानादर्थात् अन्यरूपः प्रतीयते, सा प्रहेलिका, प्रकल्पिता नाम, अर्थान्तरप्रकल्पनादिति भावः।।१०१।।

प्रभा

संख्यातेति। यत्र संख्यानं वर्णगणना संख्यावाचकः शब्दो वा। व्यामोहकारणं अर्थबोधविषये विशेषमोहकारणम्। तत् संख्याता नाम प्रहेलिका। यत्र वाक्यार्थो अन्यथा भासते आपाततः

प्रतीयमानादर्थादन्यरूपः पर्यवसाने प्रतीयते सा प्रकल्पिता प्रहेलिका॥१०१॥

विवृति

(यत्र संख्यानं संख्या एकत्वादिका। मोहस्य भ्रान्तेः निमित्तं सा (संख्याता नाम।) प्रकल्पिता नाम यस्यां विवक्षितो वाक्यार्थोऽन्यथा अन्वेन रूपेणावभासते॥१०१॥

सा नामान्तरिता यस्या नाम्नि नानार्थकल्पना।
निभृता निभृतान्यार्था तुल्यधर्मस्पृशा गिरा॥१०२॥

रत्नश्री

यस्याः प्रहेलिकायाः सम्बन्धिनो नानार्थस्यानेकस्याभिधेयस्य कल्पना उद्भावनं भवति। कुत्र? नाम्नि क्वचित् संज्ञायां विषये [सा] प्रहेलिका नाम्ना व्यवहितार्थत्वात् नामान्तरिता नाम स्यात्॥

या दर्शितान्यार्था। [निभृतो निगूढः] निभृतो व्यवस्थितो वान्यार्थोऽभिधेयं यस्यामिति निभृतान्यार्था अभिधेयान्तरात्। कथम्? तुल्यं समानमुभयत्र वृत्तेः, धर्ममर्थरूपं तन्निमित्तीकृत्य प्रवृत्तेः, स्पृशतीति तुल्यधर्मस्पृक। तुल्यो वा विवक्षितेनार्थेन सदृशो धर्मो गुणोऽस्येति तुल्यधर्माणमर्थं स्पृशतीति तुल्यधर्मस्पृक्। तया तुल्यधर्मस्पृशा गिरा शब्देन हेतुना तादृशी गीः प्रयुज्यते या विवक्षितसदृशमर्थान्तरमभिदधाना। तत्रैव विवक्षितेऽर्थे निष्ठा अस्येति। यद्वा तुल्यधर्मस्पृशा गिरा कारणेन निभृतः अप्रकटोऽन्यो गृहीतार्थापेक्षया अर्थोऽभिधेयं यस्यामिति योज्यम्। सा तादृशी प्रहेलिका निभृता आख्यायते॥

हृदयङ्गमा

सेति। -यस्यां प्रहेलिकायां, नाम्नि संज्ञाविषये, नानार्थकल्पना नानार्थानां शब्दस्य विविधर्थकत्वात् बहूनामर्थानां, कल्पना विकल्पः, जायते इति शेषः, सा नामान्तरिता नाम, नामान्तरेणान्तरितार्थकत्वादिति भावः। निभृतेति। -यस्याञ्च तुल्यधर्मस्पृशा प्रस्तुताप्रस्तुतयोः साधारणधर्मं स्पृशन्त्या, गिरावाचा,

निभृतः गोपितः, अन्यः अपरः, प्रकृत इत्यर्थः, अर्थो यत्र सा निभृता नाम। (अस्याश्च साधारणधर्म्मबलेन विषयस्य सूचनात् समासोक्तिमूलता बोध्येति)।।१०२।।

प्रभा

सेति। यस्यां प्रहेलिकायाम्। नाम्नि संज्ञायाम्। नानार्थकल्पना नानार्थानां कल्पना विकल्पनम्। शब्दस्यानेकार्थत्वादिति भावः। सा नामान्तरेण अन्तरितार्थत्वान्नामान्तरिताख्या। तुल्यः समानः धर्मस्तं स्पृशतीति तुल्यधर्मस्पृक् तया तुल्यधर्मस्पृशा गिरा प्रकृताप्रकृतयोः साधारणधर्मप्रतिपादकया गिरेत्यर्थः। निभृतः निह्नुतः अन्यार्थः प्रकृतार्थः यया सा निभृताख्या।।१०२।।

विवृति

सा नामान्तरिता नाम यस्या(म)भिधित्सिते नाम्नि नानार्थस्य विवक्षितादर्थादन्यस्य कल्पना। निभृता नाम निभृतो गोपितोऽन्योऽर्थोऽवभासमानादर्थ(न्यो) विवक्षितो यस्याम्। तुल्यधर्मं स्पृशति या तदा(या) गिरा वाचा।।१०२।।

समानशब्दोपन्यस्तशब्दपर्यायसाधिता।
संमूढा नाम या साक्षान्निर्दिष्टार्थापि मूढये॥१०३॥

रत्नश्री

अपन्यस्तेन तदर्थानुसारेण कल्पितेन शब्दस्य विवक्षितत्वावाचकत्वेन प्रसिद्धस्य तदर्थप्रकाशनात् पर्यायेण शब्दान्तरेण साधिता उपन्यस्तशब्दपर्यायसाधिता। उपन्यस्तपर्यायार्थप्रसाधितेत्यपि पाठः। तत्र उपन्यस्तार्थानुगमकल्पितस्य तदर्थप्रकाशनात् पर्यायस्य शब्दान्तरस्यार्थे प्रसाधिता उपन्यस्तपर्यायार्थप्रसाधिता इति व्याख्येयम्। सा तादृशी समानशब्दा नाम प्रहेलिका।

साक्षात् वाचकव्यापारेण अर्थो निर्दिष्टः प्रतिपादितोऽस्याम् इति निर्दिष्टार्थापि। अतिशये अपिशब्दः। मूढये तत्त्वार्थाप्रतिपत्तये स्यात्। साध्यसंमोहकरत्वात् संमूढा नाम प्रहेलिका ज्ञेया॥

हृदयङ्गमा

समानशब्देति। –उपन्यस्तेन उक्तेन, शब्दानां प्रकृतार्थावबोधकपदानां, पर्य्यायेण नामान्तरेण, साधिता विरचिता, प्रहेलिका समानशब्दा नाम। (अत्र च शब्दपर्य्यायत्वं लक्षणया एकार्थबोधकत्वं, न त्वभिधया एकार्थशक्यत्वं, तथात्वे अर्थस्य संवरणीयत्वाभावेन प्रकृतानुपयोगित्वात् प्रहेलिकैव न भवेदिति ध्येयम्)। सम्मूढ़ेति। –या वाक्, साक्षात् अभिधायकशब्देन, निर्दिष्टः निरूपितः, अर्थो यत्र तादृशी अपि, वाचकशब्देन कथितार्थाऽपि इत्यर्थः, मूढ़ये आपाततो व्यामोहाय, भवतीति शेषः, सा सम्मूढ़ा नाम॥१०३॥

प्रभा

समानेति। उपन्यस्तानां श्लोके प्रयुक्तानां शब्दानां पर्यायो योजनाविशेषस्तेन साधिता निष्पन्ना समानशब्दा प्रहेलिका। तैरेव शब्दैर्योजनाविशेषेण अर्थाविर्भावात् सा समानशब्दाख्या प्रहेलिकेत्यर्थः। साक्षाद् वाचकशब्देन निर्दिष्टार्थापि उक्तार्थापि या मूढये आपाततो मोहाय भवति सा संमूढाख्या प्रहेलिका।।१०३।।

विवृति

सा समानशब्दा नाम यस्यामुपन्यस्तो यः शब्दः तस्य यः पर्यायः तेन साधितः सम्पादितोऽर्थः। सम्मूढा नाम सा या (यस्यां) साक्षाद्वाचको वि(ऽपि) मूढये भ्रान्त्यै स्यात्।।१०३।।

योगमालात्मकं नाम यस्याः सा पारिहारिकी।
एकच्छन्नाश्रितं व्यज्य यस्यामाश्रयगोपनम्॥१०४॥

रत्नश्री

योगानां सम्बन्धानां माला बाहुल्यं सा आत्मा तन्निमित्तत्वाद् यस्य तद् योगमालात्मकं नाम संज्ञानं प्रसिद्धं यस्याः [109a] सम्बन्धि तत्समयत्वात् सा प्रहेलिका प्रसिद्धनामपरिहारयोगात् पारिहारिकी नाम स्यात्।

यस्या[माश्रित]माधेयं व्यज्य प्रकाश्य साक्षादभिधानात् आश्रयस्य आधारस्य गोपनं निगूहनं तद्वाचकस्य प्रयोगात् सा भवेदेकच्छन्ना नाम प्रहेलिका, एकस्याश्रितस्यैव छन्नत्वात्॥

हृदयङ्गमा

योगमालेति। –या प्रहेलिका, योगानां यौगिकपदानां, माला समूहः, आत्मा स्वरूपं यस्यां तादृशी, सा यौगिकपदमालया रूढ़पदप्रतिपाद्यानामेकैकानामर्थानां बोधिका सा प्रहेलिकेत्यर्थः, परिहारिका नाम स्यात्। (परिहरति झटित्यर्थबोधं वारयतीति व्युत्पत्त्या तथा व्यपदेशः, शक्तिलभ्यार्थात् यौगिकार्थस्य नानाकष्टकल्पनामूलत्वेन सहसाऽवबोधविरहादिति भावः)। एकच्छन्नेति। –यस्याम् आश्रितम् आधेयं, व्यक्तं स्फुटम्, आश्रयस्य आधारस्य तु, गोपनं, सा एकच्छन्ना नाम एकः आश्रयः, छन्नः निगूढ़ः यत्र सा इति व्युत्पत्त्या तदाख्या॥१०४॥

प्रभा

योगेति। योगानां यौगिकशब्दानां या माला परंपरा सैव आत्मा स्वरूपं यस्याः सा यौगिकशब्दपरंपराभिरेकैकरूढशब्दार्थ-प्रतिपादिका इत्यर्थः। एतादृशी या रचना सा परिहारिका प्रहेलिका। हारो मुक्तामाला तां परिगता यौगिकपरंपरया इति परिहारिका। अथवा झटिति प्रकृतार्थबोधं परिहरति निवारयति इति परिहारिका। तथा यस्यां आश्रितं आधेयम् एव व्यक्तम्। आश्रयस्य च गोपनम्। सा एकच्छन्ना एकः आश्रयः छन्नः गुप्तो यस्याम् इति एकच्छन्नाख्या प्रहेलिका॥१०४॥

विवृति

योगमालात्मकमित्ति यस्य नाम अभिधानं सा पारिहारिकी नाम योगमालात्मकं नाम परम्परात्मकमित्यर्थः। एकच्छन्ना नाम सा यस्यामाश्रिता(तं) नाम(आधे)यं (व्यज्य)धर्म(र्मं) द्रव्यं(व्य)-गुणकर्मलक्षणमभिव्यज्य प्रकाश्य तद्धर्मं धर्मा (तद्धर्मा)धारस्य आश्रयस्य धर्मिणो गोपनम्॥१०४॥

सा भवेदुभयच्छन्ना यस्यामुभयगोपनम्।
संकीर्णा नाम सा यस्यां नानालक्षणसंकरः॥१०५॥

रत्नश्री

यस्यामुभयस्याश्रितस्य [आश्रयस्य] च गोपनमावरणम्, उभयच्छन्ना नाम सा प्रहेलिका स्यात्।

यस्यां नानालक्षणस्य समागतादिरूपस्यानेकस्य संकरः संभेदः स्यात्, सा सङ्कीर्णा नाम प्रहेलिका भवेत्॥

हृदयङ्गमा

सेति।—यस्याम् उभयस्य आधेयस्य आधारस्य च, गोपनं सा उभयच्छन्ना नाम, भवेत्, आधेयाधारयोः उभयोरपि निभृतत्वात् इति निष्कर्षः। सङ्कीर्णेति। —यस्यां नानालक्षणानाम् उक्तानां प्रहेलिकाभेदानां मध्ये द्वित्र्यादिलक्षणानां, सङ्करः साहित्येनावस्थितिः, सा सङ्कीर्णा नाम॥१०५॥

प्रभा

सा भवेदिति। यस्यां उभयगोपनम् आश्रिताश्रययोर्गोपनं निगूहनम् भवेत् सा उभयच्छन्ना उभययोः आश्रिताश्रययोर्गोपनं यत्रेति व्युत्पत्त्या उभयच्छन्नसंज्ञकेत्यर्थः। यस्यां नानालक्षणानां

समागतादिपञ्चदशप्रभेदानां संकरः साहित्येनावस्थानं सा संकीर्णा ज्ञेया॥१०५॥

विवृति

सा भवेदिति। उभयच्छन्ना नाम आश्रयाश्रयिगोपनं भवति यत्र सा। सङ्कीर्णा नाम सा यस्यां नानालक्षणस्य समागतादेरुक्तस्य पञ्चदशभेदभिन्नस्य सङ्करः संसृष्टिः॥१०५॥

एताः षोडश निर्दिष्टाः पूर्वाचार्यैः प्रहेलिकाः।
दुष्टप्रहेलिकाश्चान्यास्तैरधीताश्चतुर्दश॥१०६॥

रत्नश्री

एता यथोक्तलक्षणाः षोडश प्रहेलिका निर्दिष्टा उक्ताः पूर्वैराचार्यै रामशर्मादिभिः। तल्लक्षणविरोधात् दुष्टाः हेयाश्च ताः प्रहेलिकाश्चेति दुष्टप्रहेलिकाः। न केवलमदुष्टाः। अत एव समागतादिविलक्षणत्वाद् अन्याश्चतुर्दश तैः पूर्वाचार्यैरधीता निर्दिष्टा इति॥

ताः किमिह नोच्यन्त इति चेदाह–

हृदयङ्गमा

एता इति। –एताः समागताप्रभृतयः, षोड़श प्रहेलिकाः पूर्वाचार्य्यैः निर्दिष्टाः अदुष्टत्वेन कथिता इत्यर्थः। दुष्टेति। –तैः पूर्वाचार्य्यैरेव, अन्याः अपराः, चतुर्दश दुष्टाः प्रहेलिकाश्च च्युतदत्ताक्षरादिरूपाः अपि इत्यर्थः, अधीताः पठिताः, सदोषत्वेन कीर्त्तिता इत्यर्थः। (तत्र प्रथमं च्युताक्षरादीनां षड्भेदा अन्यैरुक्ताः यथा, –"प्रहेलिका सकृत् प्रश्नः साऽपि षोढ़ा च्युताक्षरा। दत्ताक्षरोभयं मुष्टिर्विन्दुमत्यर्थवत्यपि॥" इति। तासु च्युताक्षरा यथा, –"पयोधरभराक्रान्ता संनमन्ती पदे पदे। पदमेकं न का याति यदि हारेण वर्ज्जिता॥" अत्र विहङ्गिका काहारेण वर्ज्जिता न यातीति वक्तव्ये हारेण वर्जिता इत्युक्तत्वात् का इत्यक्षरस्य च्युतिरिति च्युताक्षरा। दत्ताक्षरा यथा, –"कान्तयानुगतः कोऽयं पीनस्कन्धो मदोद्धतः। मृगााणां पृष्ठतो याति शंवरो रूढ़योवनः॥" अत्र शवर

इति वक्तव्ये शंवर इत्युक्तेरनुस्वारो दत्त इति दत्ताक्षरा। च्युतदत्ताक्षरा यथा, –"विदग्धः सरसो रागी नितम्बोपरि संस्थितः। तन्वङ्ग्यालिङ्गितः कण्ठे कलं कूजति को विट?"।। अत्र विट इत्यस्मिन् पदे विकारे च्युते घकारे च दत्ते घटः कूजति इत्यायातमिति च्युतदत्ताक्षरा। अक्षरमुष्टिर्यया, –"अतिः अतिः अन्म अलं प्रीद्य रद्य जद्य फद्य। मेला मेला मेलं मेलं फस फस फस फस।।" इयञ्च अक्षराणां मुष्टिरूपत्वात् अक्षरमुष्टिका। अत्र पादशश्चतुष्पङ्क्तौ लिखितायां चतुर्भिर्मुरजबन्धैः श्लोकः उपतिष्ठति, यथा, –"अद्य मे सफला प्रीतिरद्य मे सफला रतिः। अद्य मे सफलं जन्म अद्य मे सफलं फलम्।।" इति। विन्दुमती यथा, –"तवाववादः प्रत्यब्धि पताकाः प्रतिमङ्गरम्। फलं प्रत्यद्धुतोपायं यशांमि न नु न क्वचित्।।" इत्यनेन श्लोकेनोक्तार्थस्य यथास्थितस्वरानुस्वारविसर्ज्जनीयसंयोगस्य श्लोकान्तरस्य विन्दुभिरेव सूचनाक्रम इति विन्दुमती। यथा,–

◌ु ◌ ◌ा ◌ु ◌ ◌ा ◌ा ◌ा ◌ं ◌ ◌े ◌ं ◌ु ◌े ◌ ◌ः।

◌ा ◌ ◌े ◌ा ◌ ◌े ि◌ ि◌ः ◌ ◌ʻ ◌ ◌ ◌ ◌ी ◌ʻ ◌ः।।

एतैर्विन्दुभिरयं श्लोकः, –"उदधावुदधावाज्ञा संयुगे संयुगे जयः। साहसे साहसे सिद्धिः सर्वत्र तव कीर्त्तयः।।" इति। अर्थवती यथा, –"उत्तप्तकाञ्चनाभासं सन्दष्टदशनच्छदम्। सरसं चुम्बयते हृष्टैर्वृद्धैरपि किमुज्ज्वलम्?"।। अत्र एवं प्रश्ने यक्काम्रफलमित्युत्तरं, तस्य च द्व्यर्थपदप्रयोगेणानवगतेरियमर्थप्रहेलिका इति। पुनः षड्विधमाह, –"क्रियाकारकसम्बन्धैः पादाभिप्रायवस्तुभिः। गोपितैः षड्विधं प्राहुर्गूढं गूढार्थवेदिनः।।" इति।

क्रियाकारकसम्बन्धगुप्तादीनामुदाहरणं, तथा अन्तःप्रश्नवहिःप्रश्नादिभेदेनास्याः प्रभूततमं भेदञ्च ग्रन्थबाहुल्यभिया नात्र प्रदर्शितं, भोजादौ तु तानि दृष्टव्यानि)।।१०६।।

प्रभा

एता इति। एताः पूर्वोक्ताः। पूर्वाचार्यैः षोडश प्रहेलिकाः निर्दिष्टाः। शुद्धसंकीर्णभेदेन षोडशत्वं बोध्यम्। शुद्धानां पञ्चदशत्वात्। तैरेव आचार्यै-रन्या एताभ्याः शुद्धाभ्यो भिन्नाश्चतुर्दश दुष्टाः सदोषाः। च्युताक्षरादयः अधीताः कथिताः।।१०६।।

विवृति

इमास्ताः षोडश निर्दिष्टाः लक्षण(-वि-)भक्ताः पूर्वाचार्यैः प्रहेलिकाः। न केवलमेता एव। तथाऽन्याश्चतुर्दश दुष्टप्रहेलिकाः तैरेवाधीताः पठिताः।।१०६।।

दोषानपरिसंख्येयान् मन्यमाना वयं पुनः।
साध्वीरेवाभिधास्यामस्ता दुष्टा यास्त्वलक्षणाः॥१०७॥

रत्नश्री

वयं पुनः। विशेषविवक्षायां पुनः शब्दः। दोषाः प्रहेलिकासम्भविनः हेयाः प्रहेलिका[श्च] अपरिसंख्येयाः। न लक्षणतो न लक्ष्यतश्च गुणवदादरेणाप्रतिपाद्यान् मन्यमानाः पश्यन्तः साध्वीरेव प्रहेलिका अभिधास्यामः।

नन्वेवमपार्थादयोऽपि दोषा अपरिसंख्येयाः स्युः, विशेषहेत्वभावात्? नैतदेवम्। अपार्थादयो हि दोषाः क्वचिद् गुणा अपि। यद्वक्ष्यति–

तन्मत्तोन्मत्तबालानामुक्तेरन्यत्र दुष्यति।

[३.१२८]

इत्यादि। ततस्ते चिन्तनीयाः। प्रहेलिकादोषास्तु न क्वचिद् गुणा अपि, यतोऽपार्थादिवन्निरूपणीयाः स्युः। अतश्च अपार्थादयो वक्तव्या यतः सर्वकाव्यसम्भविनस्ते दोषाः। प्रहेलिकादोषास्तु प्रादेशिका इत्याशयवता उक्तम्–दोषानित्यादि। यद्वा, प्रहेलिकादोषा अपरापरदोषसम्भवेन चतुर्दशेति इयत्तया अपरिसंख्येयाः। ततश्चातिप्रसङ्गान्नोच्यन्ते इत्यभिप्रायेणोक्तम्– दोषानित्यादि। अपार्थादयस्तु सर्वकाव्यदोषाः परिसंख्या[ताः]। तथैव न तद्वचनेऽतिप्रसङ्ग इति चाकूतम्। अत एवाभिधास्यति–

दोषा दशैव [३.१२६]

इति। कथं तर्हि दुष्टप्रहेलिका ज्ञायन्ते यथा [109b] वर्ज्येरन्। न हि दुष्टतया अज्ञातानां परिहारः संभवतीत्याशङ्क्य तत्प्रत्युपायमाह- याः प्रहेलिकाः। तुशब्दः अर्थान्तरविवक्षायाम्। यथोक्तलक्षणविरहात् न विद्यते लक्षणमासामित्यलक्षणाः, ताः स्वयमेव दुष्टा ज्ञायन्ते। प्रतिनियतलक्षणव्युत्पत्तेः, अतल्लक्षणानां तदाभासताप्रतिपत्तेः। किं तासां प्रपञ्चप्रयासेनेति?

हृदयङ्गमा

यदि च दुष्टाः प्रहेलिकाः पूर्वाचार्य्यैरुक्तास्तथाऽप्यस्माकं न तास्वभिरुचिरित्याह, दोषानिति।–वयं पुनः दोषान् शाब्दबोधप्रतिबन्धकत्वरूपानित्यर्थः, अपरिसङ्ख्येयान् बहून्, मन्यमानाः जानन्तः सन्तः, साध्वीरेव उत्कृष्टा एव, दोषाधिक्याभावात् अलङ्कारत्वं प्राप्ताः समागताप्रभृतीः षोड़श एव निर्दोषाः प्रहेलिकाः इत्यर्थः, अभिधास्यामः उदाहरिष्यामः ; ननु साध्वीः प्रहेलिका एव अभिधास्यन्ति चेत् भवन्तः कथं शिष्याणां दुष्टप्रहेलिकाज्ञानं भवेत् इत्याशयेनाह, ता इति।– यास्तु अलक्षणाः पूर्वोक्तलक्षणानन्तर्भूताः, ताः दुष्टाः सदोषाः, तासामुदाहरणे न मम प्रयास इति भावः।।१०७।।

प्रभा

दोषान् इति। वयं दोषान् अत्यन्तशाब्दबोधप्रतिबन्धकरूपान् प्रहेलिकादोषान्। असंख्येयान् संख्यातुमशक्यान्। मन्यमानाः न तान् दर्शयामः। केवलं साध्वीरेव दोषबाहुल्याभावेन चमत्कृतिपोषकत्वेन चालंकारतामापन्नाः। प्रहेलिकाः समागताद्याः षोडश। अभिधास्यामः उदाहरिष्यामः। तर्हि दुष्टाः कथ छात्रा जानीयुरिति चेत् तेषां

सामान्यलक्षणमाह। यास्त्वलक्षणाः समागतादिषोडशप्रहेलिकालक्षणशून्याः ताः दुष्टा बोद्धव्याः।।१०७।।

विवृति

स्वमतं दर्शयति वयं पुनः साध्वीरेव लक्षणवतीरेव षोडशाभिधास्यामः। न दुष्टाश्चतुर्दश। यतस्ताः दुष्टा उच्यन्ते यास्त्वलक्षणाः लक्षणवर्जिताः। कुतः। दोषानपरिसंख्येयान् मन्यमानाः दोषाणामानन्त्यादनेका अपि सम्भवन्तीति चतुर्दशैवेति नियमाभावात्।।

समाहितादयः षोडश प्रहेलिकाः। तासां प्रत्येकं लक्षणमाह—आहुरित्यादिभिः।।१०७।।

न मयागोरसाभिज्ञं चेतः कस्मात् प्रकुप्यसि।
अस्थानरुदितैरेतैरलमालोहितेक्षणे॥१०८॥

रत्नश्री

हे मम चेतः, आगसोऽपराधस्य व्यलीकस्य रसं स्वादमाचरणरूपम् अभिजानातीत्यागोरसाभिज्ञं कृतदोषं न भवति। ततो निरागसे मह्यं कस्मात् कारणात् प्रकुप्यसि? न किञ्चित् कारणम्। ततश्चायमकारणः कोपो न कार्य इति वारयति। व्यलीकलक्षणकोपस्थानाभावादस्थाने अकाण्डे रुदितैरश्रुपातै कोपमयैः एतैरिति प्रत्यक्षनिर्देशः। अलं वारणे। मा रोदीरित्यर्थः। आलोहितेक्षणे इति प्रियामन्त्रणम्। मे आगोरसाभिज्ञमित्यनयोः पादयोः मयागोरसाभिज्ञमिति अयादेशेन सन्धिना विवक्षितार्थस्य गूढार्थत्वात् समागतेयमुदाहृतेति॥

हृदयङ्गमा

तत्र समागतामुदाहरति, नेति। –हे आलोहितेक्षणे! आरक्तनयने!, कोपादिति भावः, मया ममेत्यर्थः, (षष्ठ्यर्थेतृतीया) चेतः गोरसस्य दुग्धादेः, अभिज्ञं रसज्ञं, न, दुग्धादिकं मया न हृतमित्यर्थः, यद्वा, –गोरसाभिज्ञं चेतो मया न, धार्य्यते इति अध्याहृतेन क्रियापदेनान्वयः ; कस्मात् प्रकुप्यसि? एभिः ईदृशैः, अस्थानरुदितैः अकारणरोदनैः, अलम्, इति सहजोऽर्थः संवृतिकारकः, संवरणकारित्वप्रयोज्ञनन्तु अनेनास्या दुग्धाद्यपचयः क्वत इति बोधात् कुपिताऽसौ दुःखेन रोदिति इत्येवं साधारणा जानन्त्विति। गूढ़ार्थस्तु–मे चेतः आगसः अपराधस्य,

नायिकान्तरसङ्गरूपस्य इत्यर्थः, (“आगोऽपराधो मन्तुश्च” इत्यमरः) रसस्य आस्वादस्य, अभिज्ञं न, नाहं त्वहते अन्यां कामये कथं तवेहशो मानः? इति। (अत्र “मे आगोरसाभिज्ञम्” इति पदच्छेदे सन्धिसूत्रेण एकारस्य अयादेशेन मयागोरसाभिज्ञमिति निष्पन्नत्वात् प्रकृतार्थस्य संवरणं, ततश्च सन्धिना प्रकृतार्थगूढरूपा समागता नाम्नो प्रहेलिकेयम्। काञ्चित् मानिनीं गोपीं प्रति श्रीकृष्णस्य जनसमाजे उक्तिरियम्)।।१०८।।

प्रभा

समागतामुदाहरति–**न मयेति।** अन्यत्र स्निग्धमात्मानं मत्वा रुदतीं गोपीं जनसमाजे कृष्णः सान्त्वयति। मया कृष्णेन गोरसाभिज्ञं गोरसः पयः तत्र अभिज्ञं ज्ञातास्वादम्। पयः अपहृत्य तत्पानाभिज्ञमित्यर्थः। चेतः न कृतमिति उत्तानार्थयोजनार्थमध्याहार्यम्। तथा च त्वं कस्मात् प्रकुप्यसि। हे आलोहितेक्षणे कोपारक्तनयने। एभिरस्थानरुदितैः अकारणरोदनैः। अलम्। मया पयोऽपहारः कृत इति कल्पयित्वा मा रुदिहीत्यर्थः। इति आपाततोर्थः। अमुमेवार्थं स्वीकृत्योदासीनाः कृष्णेन दुग्धस्तेयं कृतं तदर्थं चैषा रोदिति इति मन्यन्तामिति प्रकृतार्थस्य संवरणकारिता। प्रकृतार्थस्तु मे मम। आगः अपराधः परवनितासंगरूपस्तस्य रसे आस्वादे अभिज्ञं मार्मिकं एतादशं चेतो न नास्ति। मां अन्यत्र बद्धरतिं मत्वा मा कोपकलुषिता भवेत्यर्थः। अत्र मे आगोरसाभिज्ञम् इति पदच्छेदः। अत्र संधिकार्येणायादेशेन मयागोरसेति प्रयोगो निष्पन्नः। तेनैव च प्रकृतार्थस्य संवरणम् इति समागता प्रहेलिकेयम्।।१०८।।

विवृति

समाहितामुदाहरति–

आगोऽपराधः तस्य रसः अनुभवः तदभिज्ञं तज्ज्ञानसहितं मम चेतः (न) कस्मान्निमित्तान्मम कुप्यसि। अतोऽस्थानरुदितैः अविषयरोदनैरोभिरलामिति प्रतिषेधे। आलोहितेक्षणे अत्यन्तपिङ्गनयने पिङ्गनयनत्वं तत्कालविशेषणम्। आग इत्ययादेशेन [सन्धिना] गोपितोऽर्थः।।

समाहितामुदाहरति–**नेति।** मे चेतः आगोरसाभिज्ञं अपराधास्वादाभिज्ञं न भवति; अतः कस्मात् प्रकुप्यसि। न मयेति सन्धिना षष्ठ्यर्थो विवक्षितो गूढः।।१०८।।

कुब्जामासेवमानस्य यथा ते वर्धते रतिः।
नैवं निर्विशतो नारीरमरस्त्रीविडम्बिनीः॥१०९॥

रत्नश्री

कुब्जा स्त्रियमासेवमानस्य निर्विशतः ते तव रतिः प्रमोदो वर्द्धते। यथा एवं तथा अमरस्त्रीविडम्बिनीर्दिव्याङ्गनासमाना नारीनिर्विशतः सेवमानस्य रतिर्न वर्धते। तत्रैव तवाधिकारादित्यर्थः। अत्र कुब्जा [इत्यनेन] कन्याकुब्जा विवक्षिता यथा सत्यभामा भामेति। तद्रतिस्तद्रतौ वा। पुरुषः कुब्जाशब्देन भग्नपृष्ठदेशायां योषिति रूढेन तत्र प्रतीतिजननात् वञ्च्यत इति वञ्चितेयं निदर्शिता॥

हृदयङ्गमा

वञ्चितामुदाहरति, कुब्जामिति। –कुब्जां भुग्नपृष्ठां कामपि नारीम्, आसेवमानस्य उपभुञ्जानस्य, ते तव, यथा रतिः सन्तोषः, वद्धते, अमरस्त्रीविड़म्बिनीः ते तव, यथा रतिः सन्तोषः, वद्धते, अमरस्त्रीविड़म्बिनीः सुरकामिनीसदृशीः, नारीः अन्याः स्त्रीः, निर्विशतः उपभुञ्जानस्य, ते इति शेषः, एवं तथा रतिः, न, वर्द्धते इति शेषः, इति सहजोऽर्थः। गूढ़ाथस्तु–कुब्जां कान्यकुब्जनगरीं तत्रत्यनारीं वेत्यादिः। (अत्र कुब्जाशब्दो भुग्नपृष्ठनार्य्यामेव प्रसिद्धः, अन्यत्र तु न इति प्रसिद्धशब्देनाप्रसिद्धार्थप्रतिपादनरूपेयं वञ्चिताख्या प्रहेलिका। कान्यकुब्जनगरीं वा तत्रत्यनारीं प्रति अनुरक्तजने कस्यचिदुक्तिरियम्) ॥१०९॥

प्रभा

वञ्चितामुदाहरति–**कुब्जामिति।** कुब्जां भग्नपृष्ठां नारीम् आसेवमानस्य उपभुञ्जानस्य यथा ते रतिः अनुरागो वर्धते एवं अमरस्त्रीविडम्बिनीः सुराङ्गनासदृशीर्नारीर्निर्विशतः आस्वादयतो न रतिः रतिर्न वर्धते। इति आपाततोर्थः। संवृतार्थस्तु कुब्जां कान्यकुब्जानगरीं तत्रस्थनारीं वा इति। अत्र कुब्जाशब्दो भग्नपृष्ठनार्यामेव रूढो विवक्षितायां नगर्यां तत्रत्यनार्यां वा न तथा उपक्रमं विना प्रतीतिकर इति प्रकृतार्थस्य निपुणमतिबोध्यतया अत्र संवरणम्। इति वञ्चिता प्रहेलिका।।१०९।।

विवृति

वञ्चितामुदाहरति–

प्रीतिः नैवं निर्विशतोऽनुभवतो नारीः स्त्रीरमस्त्रीविडम्बिनीः सुरसुन्दरीप्रतिस्पर्धिनी(रि)त्यत्र कुब्जाशब्दोऽन्यत्र ह्स्वाङ्गायां दीर्घजिह्वायां (जङ्घायां-पा) योषिति प्रसिद्धः। तेन कान्यकुब्जनगरी वञ्च्यते गोप्यते तेन कुब्जां कन्यां (कुब्जाशब्दः) कुब्जां नगरीमासेवमान इत्येवमर्थेऽपि (एवमर्थे)विवक्षितः।।

वञ्चितामुदाहरति–**कुब्जामिति।** कन्याकुब्जा महोदया इति काचिन्नगरी। कुब्जां नगरीं आसेवमानस्य तत्र निवसतः यथा रतिः प्रीतिः वर्धत इह अमरस्त्रीसदृशीः नारीः निर्विशतोऽपि ते नैवं प्रीतिः। कुब्जाशब्दः रूपहीनायां स्त्रियां रूढः नगरे प्रयुक्तः, इति वञ्चिः।।१०९।।

दण्डे चुम्बति पद्मिन्या हंसः कर्कशकण्टके।
मुखं वल्गुरवं कुर्वंस्तुण्डेनाङ्गानि घट्टयन्॥११०॥

रत्नश्री

अत्र पद्मिन्या मुखं कमलरूपं तुण्डेन चञ्च्वा चुम्बति हंसः, वल्गु मनोहरं यथा भवति तथा रवं रुतं कुर्वन् कर्कशः कण्टकोऽस्मिन्निति कर्कशकण्टके पद्मिन्या दण्डे नाले अङ्गानि अवयवान् घट्टयन् कण्डूयमान इत्ययमत्रार्थो विवक्षितः। तत्र च दण्डे चुम्बतीत्यादिव्यवहितपदप्रयोगान्मोहो जायत इति व्युत्क्रान्ता इयमुदाहृता॥

हृदयङ्गमा

व्युत्क्रान्तामुदाहरति, दण्डे इति।—हंसः कर्कशकण्टके परुषकण्टकान्विते, पद्मिन्या दण्डे नाले, अङ्गानि घट्टयन् घर्षयन्, तथा वल्गुरवं मनोज्ञं नादं, कुर्वन् तुण्डेन मुखेन, पद्मिन्या मुखं चुम्बतीत्यन्वयः। (अत्रान्वयबोधघटकपदानामतिव्यवधानसन्निवेश-वशात् आसत्तेर्व्यतिक्रमः इति व्युत्क्रान्ता प्रहेलिका)॥११०॥

प्रभा

व्युत्क्रान्तामुदाहरति— **दण्डे इति।** कर्कशकण्टके तीक्ष्णकण्टकावृते दण्डे पद्मिन्या नाले अङ्गानि घट्टयन् घर्षयन् वल्गुरवं मधुररवम् कुर्वन् हंसस्तुण्डेन स्वमुखेन पद्मिन्याः मुखं कमलरूपम् चुम्बति। अत्रान्वयबोधकारणस्य नामासत्तेर्विशेषेण अतिक्रान्तत्वाद् व्युत्क्रान्ता॥११०॥

विवृति

व्युत्क्रान्तामुदाहरति–

हंसः पद्मिन्या मुखं पद्मं चुम्बति तुण्डेन स्वकीयेन चञ्चूपुटेन। किं कुर्वन् घट्टयन् कन्यङ्गानि क्व दण्डे नाले किंविशिष्टे कर्कशकण्टके कस्या दण्डे पद्मिन्या एव। वल्गु मधुरं यथा भवत्येवं रवं कुर्वन्।।

व्युत्क्रान्तामुदाहरति–**दण्ड** इति। कर्कशकण्टके दण्डे नाले अङ्गानि घट्टयन् वल्गुरवं कुर्वन् स हंसः पद्मिन्या मुखं कमलं तुण्डेन मुखेन चुम्बतीति अन्वयस्य व्युत्क्रमात् व्युत्क्रान्ता।।११०।।

खातयः कनि काले ते स्फातयः स्फीतवल्गवः।
चन्द्रे साक्षाद्भवन्त्यत्र वायवो मम चारिणः॥१११॥

रत्नश्री

हे कनि कन्ये! ते तव काले पादे चन्द्रे मनोज्ञे चन्द्रे वा हे कमनीये प्रिया[110a]मन्त्रणमेतत्। खातयः किङ्किणिकाः नूपुरादिरूपा स्फातयः स्फीताः पर्याप्तशोभाः स्फीतवल्गवः मधुरघनारसाः साक्षाद्भवन्ति। प्रत्यक्षतामुपयान्ति। तन्निनदग्रहणादाकर्णान्तचक्षुषा वा गृह्यन्त इत्यर्थः। अत्रेदृशमनोज्ञवस्तुसाक्षात्करणे मम वायवः प्राणाः। रागाभिभवात् चारिणोऽनवस्थायिनः। यान्तीत्यर्थः। एवं दुर्बोधार्थपदप्रयोगात् प्रमुषितेयं लक्षितेति॥

हृदयङ्गमा

प्रमुषितां दर्शयति, खातय इति। –हे कनि! कुमारि! ("कन्या कनी कुमारी च" इति हेमचन्द्रः) ते तव, काल्यते क्षिप्यते इति कालः पादः तस्मिन्, ("कल प्रेरणे" इत्यस्य घङन्तस्य रूपम्) स्फातयः स्फायनं स्फाः वृद्धिरित्यर्थः, तस्य अतिः गतिः यत्र ते, स्फीता इत्यर्थः, बहव इति यावत्, ("अत् सातत्यगतौ" इत्यस्य इन्प्रत्ययान्तस्य रूपम्) खातयः खम् आकाशं, तस्यायं गुणः खः शब्द इत्यर्थः, (खशब्दादिदमर्थेष्णः) खस्य शब्दस्य, अतिर्गतिः येषु ते, शब्दायमाननूपुरादयोऽलङ्काराः इत्यर्थः, स्फार्हवल्गवः स्फां स्फीतताम् अर्हन्तीति स्फार्हाः प्रभूताः, वल्गवः वल्गनात् चलनात जाताः ध्वनय इत्यर्थः, ततश्च स्फार्हा वल्गवः येषां तथोक्ताः, भवन्तीति शेषः, तव पादभूषणनूपुरादयः गमनकाले अतिशयं

शिञ्जन्तीत्यर्थः, चन्दति आह्लादयति इति तस्मिन् चन्द्रे आह्लादके, अत्र सशिञ्जितनूपुराद्यलङ्कृते तव पादे इत्यर्थः, साक्षात् प्रत्यक्षीकृते सति इत्यर्थः, मम वायवः प्राणाः, धारिणः अवस्थिताः, सुस्थिराः इत्यर्थः, ("धृ ङ अवस्थाने" इत्यस्य रूपम्) भवन्ति। (अत्र अप्रसिद्धैः बहुभिः पदैः प्रकृतार्थस्य संवरणात् प्रमोषणम् इति प्रमुषिता)।।१११।।

प्रभा

प्रमुषितां दर्शयति—**खातय इति**। हे कनि कुमारि। कन्या कनी कुमारी च इति हेमचन्द्रः। ते तव। काल्यते क्षिप्यते यः सः कालः पादस्तस्मिन्। कल विक्षेपे इति चौरादिकात् कर्मणि घञ्। स्फातयः। स्फायनं स्फाः वृद्धिः। तस्या अतिर्गमनं यत्र ते। स्फीता इत्यर्थः। प्रभूता इति यावत्। एतादृशाः खातयः खं आकाशम्। तस्यायं खः शब्दः। तस्येदम् इत्यण्। अतनं अतिः। भावे क्तिन्। खस्य अतिः गमनं येषु ते। शब्दकारिनूपुराद्यलंकारा इत्यर्थः। क्षुद्रघण्टिका इत्यन्ये। ते अलंकाराः स्फार्हवल्गवः स्फां स्फीतताम् अर्हन्ति ते स्फार्हाः प्रभूताः। वल्गनात् भूचलनात् जातः वल्गवः ध्वनयः। स्फार्हाः प्रभूताः वल्गवः चलनध्वनयो येषां ते स्फार्हवल्गवः। साक्षाद् भवन्ति इति शेषः। श्रोत्रेण प्रत्यक्षीक्रियन्ते इति भावः। कीदृशे तव पादे। चन्दति आह्लादयति चन्द्रस्तस्मिन् चन्द्रे आह्लादके। ततश्च मम वायवः प्राणाः। धारिणः रुद्धचेष्टाः। धृङ् अवस्थाने तुदादिः तस्मात् णिनिः। भवन्ति। केचित्तु धृङ् अनवस्थाने इति धातुपाठं मन्वानाः धारिणः अनवस्थायिन इत्यर्थं दर्शयन्ति। अत्र अप्रसिद्धपदैः प्रकृतार्थस्य संवरणात् प्रमुषिता।।१११।।

विवृति

प्रमुषितामुदाहरति–

घातयो घर्घरिका(?)दे(हे) रु(क)नि कन्ये काले वर्षासमये स्फातया (यः) शोभनः (नाः)स्फार्हो मधुरः वल्गुः शब्दो यासां ताः ते तव चन्द्रो वाहे(?) साक्षाद्भवत्यापि भवत्यत्र(?)। ता व(वा) यवः प्राणे (णा) मम धारिणो जिगमिषवः।।

प्रमुषितामुदाहरति–**खातय इति।** कनि कन्ये, काले पादे, चन्द्रे मनोहरे, ते तव, स्फातयः मनोहराः, स्फार्हवल्गवः स्फीतशब्दाः, खातयः क्षुद्रघण्टिकाः, साक्षाद्भवन्ति प्रत्यक्ष्यन्ते; अत्र स्वातिषु मम तायवः प्राणा धारिणः ध्रियन्ते। अत्र पदावल्या दुर्बोधार्थत्वात् प्रमुषिता।।१११।।

अत्रोद्याने मया दृष्टा वल्लरी पञ्चपल्लवा।
पल्लवे पल्लवे चार्द्रा यस्याः कुसुममञ्जरी।।११२।।

रत्नश्री

वल्लरीति स्त्रीत्वसाधर्म्येण काचिद् योषिद् विवक्षिता। पल्लवशब्देन च तत्सौम्यादङ्गुलयः कुसुममञ्जरीति च तत्सादृश्यात् नखाः। शेषं सुगमम्। एवं गौणार्थप्रयुक्तैर्वल्लरीत्यादि शब्दैः साधितेयं समानरूपा निरूपितेति।।

हृदयङ्गमा

समानरूपां दर्शयति, अत्रेति। –अत्र उद्याने मया पञ्चपल्लवा शाखापञ्चकविशिष्टा, वल्लरी लता, दृष्टा, यस्यां लतायां, पल्लवे पल्लवे प्रतिपल्लवमित्यर्थः, ताम्रा आरक्ता, कुसुममञ्जरी पुष्पवल्लरीः, शोभते इति शेषः। (अत्र नायिका काचित् उद्यानत्वेन अध्यारोपिता, तस्या बाहुः वल्लरीत्वेन, अङ्गुलयःपल्लवत्वेन, नखाश्च कुसुममञ्जरीत्वेन, तेषाञ्च ताम्रत्वं रक्ताङ्गुलिप्रभयेति बोध्यम्। इह उद्यानादिपदानां नायिकाद्यर्थाभिधाने गौणीलक्षणया अध्यास एव हेतुरिति समानरूपा प्रहेलिका)।।११२।।

प्रभा

समानरूपां दर्शयति–**अत्रेति।** अत्र उद्याने मया पञ्चपल्लवा वल्लरी लता दृष्टा। यस्यां वल्लर्याम्। पल्लवे पल्लवे ताम्रा कुसुममञ्जरी दृष्टा। अत्र नायिकायां उद्यानस्य बाह्वोः वल्लर्याः अङ्गुलिषु पल्लवानां नखेषु कुसुममञ्जरीणां चारोपः। तेन समानरूपेयं प्रहेलिकेति ज्ञेयम्।।११२।।

विवृति

समानरूपामुदाहरति–

अत्रोद्याने मया दृष्टा वल्लरी लता। पञ्च पल्लवाः किसलयानि यस्याः सा पञ्चपल्लवा। पल्लवे (पल्लवे) यस्या वल्लर्या आर्द्रा(?) प्रत्यग्रा अम्लाना कुसुममञ्जरीति मुख्योऽर्थः। गौणस्तु वल्लरीव वल्लरी नारी पाणिपादोष्ठश्वे (पाणी पादौ ओष्ठश्चेति) पञ्च पल्लवा इव पल्लवाः कुसुममञ्जरी हस्तयोः पादयोश्च सनखरुचयोऽङ्गुलयः दशनच्छदेन (–दे तु) दन्तदीप्तय इति मुख्येन समानो गौणोऽर्थः॥

समानरूपामुदाहरति–**अत्रेति।** अत्रोद्याने पञ्चपल्लवा मञ्जरी किसलयमञ्जरी दृष्टा; यस्याः पल्लवे पल्लवे च आर्द्रा नवा कुसुममञ्जरी। पञ्चाङ्गुलौ कस्याश्चित् हस्ते पञ्चपल्लवमञ्जरीत्वमारोपितम्; अङ्गुलीनां प्रभासु कुसुममञ्जरीत्वमारोपितम्। इति गौणार्थारोपितैः पदैः ग्रथिता इति समानरूपा॥११२॥

सुराः सुरालये स्वैरं भ्रमन्ति दशनार्चिषा।
मज्जन्त इव मत्तास्ते सौरे सरसि संप्रति॥११३॥

रत्नश्री

सुरां कुर्वन्तीति तत्करोति तदाचष्ट इति णिजन्तात् सुरयतीति कर्तर्यचि विहिते सुराः शौण्डिकाः। मत्तास्ते केचित् विवक्षिताः। सुराया आलये मदिरामन्दिरे सम्प्रति स्वैरं यथेष्टं भ्रमन्ति। दशनार्चिषा दन्तप्रभया परितः स्फुरन्त्या लक्षिताः। सुराया इदं सौरे मद्यसरसि ह्रदे मज्जन्त इव लक्ष्यमाणाः। सुरा इत्यस्य शौण्डिकेषु सुरासम्बन्धिनि च सौर इत्यस्याप्रसिद्धेः। लक्षणस्य च तादृशस्य सम्भवात् परुषेयम् आविष्कृतेति॥

हृदयङ्गमा

परुषां दर्शयति, सुर इति। –ते प्रसिद्धाः, सुरां मद्यं कुर्वन्ति इति सुराः, (नामण्डिङन्तात् सुराशब्दात् ङप्रत्यये रूपं) यद्वा, –सुराः एषां सन्तीति सुराः शौण्डिका इत्यर्थः, (अर्श आदित्वादच्प्रत्ययः) यद्वा –सुराः सु अतिशयेन, राः शब्दः, ध्वनिरित्यर्थः, येषां ते, उच्चैः चीत्कुर्वन्तः इत्यर्थः, ("रै शब्दे" इत्यस्य क्विबन्तस्य रूपम्) अस्मिन् पक्षे सुरापा इति कर्त्तृपदमूह्यम्; दशनार्च्चिषा हास्येन विवृतास्यतया दन्तकिरणेनोपलक्षताः सन्तः, सम्प्रति सुराया इदं तस्मिन् सौरे सुरामये, सरसि मज्जन्तः निमग्नीभवन्त इव, मत्ताः सन्तः, सुरालये मद्यागारे, स्वैरं स्वच्छन्दं, भ्रमन्ति। (अत्र सुरा इति पदं देवतावाचकमेव अनुशासनबलात् शौण्डिके सुरापे उच्चैश्चीत्कुर्वति वा प्रयुक्तम् इति प्रयोक्तुः पारुष्यप्रकाशनात् परुषा नाम प्रहेलिका)॥११३॥

प्रभा

परुषामुदाहरति—**सुरा इति।** सुराः शौण्डिकाः। सुरां मद्यं कुर्वन्ति ते सुराः। सुरांशब्दात् तत् करोति इति णिचि पश्चात् पचाद्यच्। अथवा सुरा अस्ति एषां इति सुराः। अर्शआदित्वादच्। दशनार्चिषा विकटहास्येन प्रकटितदशनकान्त्या। उपलक्षिता इत्यर्थः। सौरे सुराया इदं सौरं तस्मिन् सुरामये इत्यर्थः। सरसि सरोवरे। मज्जन्त इव निमज्जन्त इव। मत्ताः प्रमत्ताः सन्तः। सुरालये गञ्जायाम् स्वैरं भ्रमन्ति। अत्र सुरा इति शब्दो देवतासमूहे एव प्रसिद्धः। योगेन तु शौण्डिकेपि विद्यते। तथापि सुरशब्दो देवतार्थमेव प्रथमतः प्रकटयति। तेन देवाः स्वर्गे मत्ता हृष्टाः सन्तः सौरे सरसि मानससरोवरे मज्जन्ति भ्रमन्ति इति अर्थस्य प्रथमतो भानम्। तेन चोपरिनिर्दिष्टस्य प्रकृतार्थस्य निगूहनम्। प्रकृतार्थस्तु रूढ्या संप्रदायेन वा अप्रतीतमपि केवलं अनुशासनप्रमाणेनैव परिकल्प्य दर्शित इति प्रयोक्तुः पारुष्यप्रकाशनात् परुषा।।११३।।

विवृति

परुषामुदाहरति—

सुरा देवाः सुरालये स्वर्गे दशनार्चिषा दन्तदीप्त्या प्रकाशितदिग्भागाः स्वैरं भ्रमन्ति पर्यटन्ति। सुराणामिदं सौरं तत्र सौरे नन्दनोद्याने वर्तिनि सरसि मज्जन्त इव जलक्रीडां कुर्वन्तः मत्ता इव हृष्टाः सम्प्रतीति प्रसिद्धार्थः। इयमेव च लक्षणास्तित्वम(ा)त्रव्युत्पादितश्रुतिः परुषा भवति। सुरा मदिरा। तां कुर्वन्तीति चुरादेर्णिच् सुरयतीति पचाद्यच्। सुरा मद्यपत्न्या (ण्या) वणिजः सुरालये सुराया आलयः तत्र मदिरागारे स्वैरं यथेष्टं

भ्रमन्ति। मत्ताः क्षीबाः सुराया इदं सौरं तच्च(त्र)सरसि सर इव सरः मद्यावपनमुष्टिकोच्यत इति। न लक्ष्ये क्वापि सुरा मद्यविक्रयिंणोभिधीयन्ते। न च सुरालयो मदिरागारं न च मत्तो हृष्ट उच्यते। न च सौरं सरो मद्यावपनमिति लक्ष्ये प्रसिद्धमिति पारुष्यम्। अस्ति च व्युत्पादकं लक्षणमिति।।

परुषामुदाहरति– **सुरा इति।** सुराः देवाः, सुरालये स्वर्गे, मत्ताः हृष्टाः, स्वैरं यथेष्टं, दशनार्चिषा उपलक्षिताः, सौरे सुरसम्बन्धिनी, सरसि मानससरसि, मज्जन्त इव गाहमाना इव, भ्रमन्ति सञ्चरन्ति। अत्र सुरालयसौरसरोमत्तभ्रमन्तिशब्दाः. श्रुतिपरुषार्थप्रतीतिं जनयन्तीति परुषात्वम्।।११३।।

नासिक्यमध्या परितश्चातुर्वर्ण्यविभूषिता।
अस्ति काचित् पुरी यस्यामष्टवर्णाह्वया नृपाः॥११४॥

रत्नश्री

नासिक्यो वर्णो ञकारोऽत्र विवक्षितः। मध्ये मध्यो वा यस्याः सा नासिक्यमध्या। परित आद्यन्ततः। चतुर्भिर्वर्णैः विभूषिता अस्ति वर्तते पुरी काचित्। यस्यां पुर्यामष्टौ वर्णा आह्वयः संज्ञा येषामित्यष्टवर्णाह्वया नृपा राजानः सन्ति। अत्र काञ्ची पुरी पल्लवाश्च तस्यां नृपा इति परमार्थः। चतुरादिसंख्योपादानं तु तद्विवक्षितार्थव्यामोहकरमिति संख्यातेयमाख्यातेति॥

हृदयङ्गमा

सङ्ख्यातामुदाहरति, नासिक्यमध्येति। –नासिक्यः नासिकायां भवः, ञकार इत्यर्थः, स मध्ये यस्याः सा मध्यस्थञकारा इत्यर्थः, तथा परितः उभयतः, चतुर्भिः वर्णैः अक्षरचतुष्टयैः, विभूषिता विरचिता, आदौ ''क-आ'' इति द्वौ वर्णौ अन्ते ''च-ई'' इति द्वौ, मध्ये च ञकारः एवंरूपा इति यावत्, काचित् पुरी नगरी, काञ्चीत्यर्थः, (नामनामिनोरभेदोपचारात् नासिक्येत्यादिविशेषण-वाक्यद्वयं काञ्चीबोधकमपि पूर्य्यां योजनीयम्) अस्ति, यस्यां पूर्य्यां, नृपाः राजान्ः, अष्टवर्णाह्वयाः अष्टाभिर्वर्णैः अक्षराष्टकैः निबद्धः, आह्वयः आख्या येषां तादृशाः, आसन् इति शेषः। (एतेन पुण्ड्रकाख्या इत्यायातम्; पुण्ड्रकवंशीया राजानः काञ्चीं पुरा अशासन् इति प्रसिद्धिः। पुण्ड्रकशब्दश्च प-उ-ण-ड-र-अ-क-अ इत्यष्टभिर्वर्णैर्निबद्ध इति चतुरष्टभिर्वर्णैः सङ्ख्यावाचकैर्वा मोहनम् इति सङ्ख्याता प्रहेलिका)॥११४॥

प्रभा

संख्यातामुदाहरति-**नासिक्यमध्येति।** नासिकायां भवः नासिक्यः ञकारः सः मध्ये नामाक्षरमध्ये यस्याः सा। तया परितः ञकारं अभितः। चतुर्भिः वर्णैः अक्षरैर्विभूषिता। चत्वारो वर्णास्तु क-आ-च-ई-इति बोद्धव्याः। एतादृशाङ्गराभिधाना काचित् पुरी काञ्ची इति नगरी अस्ति। यस्यां नगर्याम्। अष्टौ वर्णा यत्र तादृशः आह्वयः संज्ञा येषां ते। नृपाः पल्लवा नाम राजानः सन्ति। पल्लवा इत्यत्र पकारअकारलकारद्वयअकारवकारआकारविसर्गश्चेति अष्टौ वर्णाः सन्ति। सर्वे प्राचीनटीकाकारा अष्टवर्णाह्वयनृपत्वेन पल्लवान् एव स्वीकुर्वन्ति। अर्वाचीनास्तु पुण्ड्रकान् कल्पयन्ति। अपरे पुनः शूद्रकान्। तत्र पल्लवा इत्यत्र वर्णगणनायां विसर्जनीयस्यायोगवाहत्वेन गणनमनुचितमिति तेषामभिप्रायः स्यात्। परमत्र वस्तुस्थितिरेव निर्णयप्रमाणिका इति जोषंभावमाश्रयामः। अत्र चतुरष्टेति वर्णसंख्यानेन प्रकृतार्थगूहनादियं संख्याता।।११४।।

विवृति

संख्यामुदाहरति-

नासिक्यमध्या नासिक्यो नाम गोदावरीतीरोपान्तवर्तिदेश-विशेषः। तस्य मध्या मध्यवर्तिनी। परितः समन्ततः चतुर्भिः वर्णैः ब्रह्मणादिभिः विभूषिता अलंकृता अस्ति काचित् पुरी। यस्यामष्टवर्णाह्वया नृपाः अष्टवर्णाभिधाना राजान इति व्यामोहहेतुरर्थः। नासिकायां भवो वर्णो नासिक्योऽनुस्वारः (स मध्यो नामधेयमध्यवर्ती यस्याः सा नासिक्यमध्या। परित

उभयतश्चतुर्भिर्वर्णैः ककाराकारर(च)कारा(रे)कारैः अलंकृता पुरी काञ्चीति संख्यानं व्यामोहहेतुः।।

संख्यातामुदाहरति– **नासिक्येति।** नासिक्यः अनुनासिको ञकारः मध्ये यस्याः सा, परितः चातुर्वर्ण्यविभूषिता ककाराकाराभ्यां चकारेकाराभ्यां चतुर्भिः वर्णैः विभूषिता परीता, काचित् पुरी अस्ति, काञ्ची इति यावत्। तस्यां पुर्यां, शब्दार्थयोरभेदोपचारात्, यथा देवपूर्वं गिरिमित्यादि; अष्टवर्णाह्वयाः पल्लवाः नाम राजानः ; पकाराकारलकारद्वयाकार–वकाराकारविसर्जनीयैः अष्टवर्णाह्वयत्वम्। काञ्चीनगर्यां पल्लवाः नाम क्षितिपतयः सन्तीति विवक्षितस्य अर्थस्य चतुरष्टवर्णशब्दाभ्यां संख्यावाचिभ्यां व्यामोहकरत्वात् संख्यातात्वम्।।११४।।

गिरा स्खलन्त्या नम्रेण शिरसा दीनया दृशा।
तिष्ठन्तमपि सोत्कम्पं वृद्धे! मां नानुकम्पसे॥११५॥

रत्नश्री

स्खलन्त्या दौर्गत्योपहतस्येश्वरेषु प्रतिभाक्षयगृहीतस्य व्याकुलवचनत्वाद्, रागादेशाञ्चेति द्वैधम्। नम्रेण शिरसा दुर्विधस्य पराराधनपरत्वात् रागरसाञ्चेति अपरं द्वैधम्। दीनया दृशा दरिद्रेण निरानन्दत्वात् [110b] अभिमतरागविषयासिद्धेश्चेत्यपरं द्वैधम्। सोत्कम्पमत्यन्तं क्षीणत्वात् कामावेशाच्चेति इदमपि द्विधा। वृद्धा शब्दस्य जरतीवाचिनः संबोधने वृद्धे इति। [तथैव] वृद्धाशब्दस्य लक्ष्मीवचनस्य इत्यपरं द्वैधम्। एवं तिष्ठन्तमनुकम्पाभाजनमपि किं मां नानुकम्पसे? अत्र कश्चिद् दरिद्रो लक्ष्मीं लभताम् इति विवक्षितो वाक्यार्थः। वृद्धां काञ्चित् योषितमाभाषते कश्चित् कामीति अन्यस्त्वर्थः प्रतिभाति। तदियं प्रकल्पिता निदर्शितेति॥

हृदयङ्गमा

प्रकल्पितां दर्शयति, गिरेति। –वृद्धे! हे स्थविरे!, स्खालन्त्या भ्रश्यन्त्या, वार्द्धकेनास्पष्टया इत्यर्थः, गिरा वाचा, नम्रेण वार्द्धकवशादेव अवनतेन, शिरसा, दीनया कातरया, हीनशक्तिकया इत्यर्थः, दृशा चक्षुषा च, उपलक्षितापि त्वं (विशेषणे तृतीया) सोत्कम्पं सवेपथुं, भयवशादिति भावः, तिष्ठन्तमपि मां नानुकम्पसे? न दयसे? इति सहजोऽर्थः। गूढ़ार्थस्तु–हे वृद्धें! हे लक्ष्मि! ("ऋद्धिः सिद्धिलक्ष्मयौ वृद्धेरप्याह्वया इमे" इत्यमरः)

धनाभावेन स्खलद्गिरा, अवनतशिरसा दीनचक्षुषा च उपलक्षितं तथा सोत्कम्पं मां नानुकम्पसे? इति। (अत्र प्रथमं प्रतीयमानादर्थात् प्रस्तुतत्वेन अपरार्थकल्पनादियं प्रकल्पिता प्रहेलिका)।।११५।।

प्रभा

प्रकल्पितामुदाहरति–**गिरेति।** हे वृद्धे जरठे। स्खलन्त्या स्खलनशीलया गिरा वाचा तथा नम्रेण उन्नयनसामर्थ्याभावेन अधोभूतेन शिरसा तथा दीनया दृशा। उपलक्षिता त्वं सोत्कम्पं सभयम् तिष्ठन्तं त्वां प्रतीक्षमाणम् मां नानुकम्पसे मयि अनुग्रहं न करोषि। जरठाकामुकस्योक्तिरियम्। अयमापाततोर्थः। अभिप्रेतार्थस्तु हे वृद्धे हे लक्ष्मीः वृद्धिशब्दस्य संबोधनैकवचनम्। अत्र समृद्ध्यर्थकवृद्धिशब्देन लक्षणया लक्ष्मीः स्वीक्रियते। प्रेमचन्द्रमहाशयैस्तु योग्यमृद्धिः सिद्धिलक्ष्म्यौ वृद्धेरप्याह्वया इमे। इति अमरमुदाहृत्य ऋद्धिशब्दो लक्ष्मीवाचक इति स्थिरीकृतम्। परं स शब्द ओषधिविशेषवाचको वनौषधिवर्गस्थितत्वात् पूर्वप्रक्रमानुरोधाच्चेति तैः कथं नालोचितमिति न जानीमः। दारिद्र्येण हेतुना स्खलद्गीर्धर्मादिभिरुपलक्षितं मां कथं नानुकम्पसे इति प्रकृतार्थः। अत्र प्रथमं प्रतीयमानादर्थात् परार्थकल्पना इति प्रकल्पिता।।११५।।

विवृति

प्रकल्पितामुदाहरति–

गिरा स्खलन्त्या नम्रेण नतेन शिरसा दीनया दृशा तिष्ठन्तमपि माभेवंविधं हे वृद्धे किं नानुकम्पसे। वृद्धा लक्ष्मीस्तद्विषयो

वाक्यार्थो वक्तुमिष्टः केनाप्युद्विग्नेन दरिद्रेण। वृद्धस्त्रीविषयश्चावभासत इति।।

प्रकल्पितामुदाहरति-**गिरेति।** वृद्धे इति वृद्धिशब्दस्य लक्ष्मीवाचिनः सम्बोधनम्। कस्यचित् लक्ष्मीं प्रति दरिद्रं मामनुकम्पस्व इति वचनम्। कश्चित् जरतीं प्रति स्वानुरागं प्रतिभासयतीति प्रकल्पितात्वम्।।११५।।

आदौ राजेत्यधीराक्षि! पार्थिवः कोऽपि गीयते।
सनातनश्च नैवासौ राजा नैव सनातनः॥११६॥

रत्नश्री

हे अधीराक्षि! कोऽपि कश्चिदनिर्धारितरूपविशेषः पार्थिवः पृथिवीपतिः वृक्षश्च इति श्लिष्टम्। आदौ प्रथमतो राजेत्येवं गीयते कीर्त्यते। सनातनश्च गीयते। सनातनश्च शाश्वतः, विष्णुर्वा। न विद्यतेऽतनः शब्दोऽस्मिन्निति अतनः स पार्थिवः। आदौ राजेति यो गीयते, न अतनः किं तु तनः शब्दसहित एवेति त्रैविध्यम्। यद्वा न तन अतनः। न तथा नातनः। सह तेन वर्तत इति सनातनश्च कोऽपि पार्थिवो गीयते। स एवार्थः। व्युत्पत्तिमात्रेण भिद्यते। असौ पूर्वोक्तः। आदौ राजा सनातनश्च नैव राजा महीपतिराद्यः। नापि सनातनः शाश्वतो विष्णुर्वा भवति। राजातन इति वृक्षविशेषस्य नाम, यस्य क्षीरीति प्रसिद्धिः। तत्रेयं नानार्थकल्पनेति नामान्तरितेयमुदीरिता॥

हृदयङ्गमा

नामान्तरितां दर्शयति, आदाविति।—हे अधीराक्षि! चञ्चलनेत्रे!, कोऽपि पार्थिवः पार्थिवशब्दप्रतिपाद्यः, आदौ प्रथमं, राजा, तथा सनातनः नित्यश्च, इति नाम्ना गीयते कीर्त्यते, किन्तु असौ पार्थिवः, वस्तुतो नैव राजा भूपतिः, नापि सनातनः नित्यः, अत एव कोऽसौ? इति प्रश्नार्थः सहजः। उत्तरार्थस्तु राजातनवृक्षरूपः गूढः। तथा हि कोऽपि पार्थिवः पृथिवीविकारजातः, वृक्षविशेषः इत्यर्थः, आदौ तद्वाचकनाम्नः प्रथमांशे, राजा इति राजा इति शब्दः, गीयते वर्त्तते इत्यर्थः, तथा, स नातनश्च अतनः तनशब्दरहितश्च न भवतीति नातनः, राजा इति

पदानन्तरं तनशब्दोऽप्यस्तीत्यर्थः ; ततश्च राजातनवृक्षः इत्युत्तरभूतोऽर्थः। (राजातनशब्देन पियालवृक्ष उच्यते। यथा, –"राजातनं पियालः स्यात्" इत्यमरः। राजातनं राजादनमिति च नामद्वयम्। अत्र राजातनेति नाम्नि वक्तव्ये नानार्थकल्पनम् इति नामान्तरिता प्रहेलिका। लक्षणे नामपदं वस्तुमात्रपरत्वेन विवक्षितं, तेन "तरुण्यालिङ्गितः कण्ठे नितम्बस्थलमाश्रितः। गुरूणां सन्निधानेऽपि कः कूजति मुहुर्मुहुः?॥" इत्यत्र सजलकुम्भरूपवस्तुनि प्रतिपाद्ये नानार्थकल्पनान्नामान्तरिता इति बोध्यम्)॥११६॥

प्रभा

नामान्तरितामुदाहरति–**आदाविति**। हे अधीराक्षि चञ्चलनयने। कोपि पार्थिवः पृथिव्यां विदितः। तत्र विदित इति च इत्यनेन अण्। आदौ प्रथमम्। राजा इति गीयते। ततः सनातन इत्यपि गीयते। इति अप्रस्तुतार्थः। तन्निवारणेन प्रस्तुतार्थोद्भावनाय आह–असौ राजा भूपतिः। नैव। नापि सनातनः। अनेन निषेधेन तर्हि कोसौ कथ्यतामिति प्रश्नो गम्यो भवति। तदुत्तरं तु पार्थिवः पृथिव्यां भवः उत्पन्नः कोपि वृक्षः। स च आदौ पूर्वार्धे। राजा इति गीयते तन्नाम्नः पूर्वभागो राजा इत्यस्ति। तथा स सनातनश्चास्ति। सनातनो नाम नातनशब्देन सहितः। न तनः अतनः न अतनः नातनः। द्वौ नञर्थौ प्रकृतार्थं गमयत इति नातनशब्देन तनशब्द एव संपन्नः। तेन सहितः सनातनः। तनशब्दान्त इत्यर्थः। अथवा स नातनः तनशब्दशून्यो न। अन्यत्पूर्ववत्। तथा च राजाशब्दपूर्वस्तनशब्दान्तश्च शब्दो राजातनो वृक्ष इति निष्पन्नम्। स च प्रियालवृक्ष इति प्रेमचन्द्रशर्माणः। अपरे तु प्रियालवृक्षपर्याये राजदनशब्दोस्ति न तु राजातन इति। परं उभावपि

एकार्थौ एव इति शब्दमालातोवगम्यते। स च वृक्षो न राजा न वा सनातन इति प्रकृतोर्थः। स च नाम्नि नानार्थकल्पनया निगूहितः। अतः इयं नामान्तरिता ज्ञेया। अत्राहुः प्रेमचन्द्रशर्माणः। लक्षणे नामपदं च वस्तुपरं न तु संज्ञामात्रपरं बोध्यम्। तेन–

तरुण्यालिङ्गितः कण्ठे नितम्बस्थलमाश्रितः।
गुरूणां संनिधानेपि कः कूजति मुहुर्मुहुः।।

अत्र सजलकलशरूपवस्तुनि वक्तव्ये प्रथमं नानार्थकल्पनान्नामान्तरिता। एवं–

य एवादौ स एवान्ते मध्ये भवति मध्यमः।
अस्यार्थं यो न जानाति तन्मुखे तं ददाम्यहम्।।

इत्यादावपि। अत्र यवसः प्रतिपाद्य इति।।११६।।

विवृति

नामान्तरित(ा)मुदाहरति–

आदौ युगादौ राज्येत्यधीराक्षि हे चपलेक्षणे पृथिव्यामीश्वरः पार्थिवः कोऽपि गीयते। स्नात(सनातन)श्च कृतवर्णाश्रमव्यवस्थितश्च किं च (त्व)सौ न राजा न नृपतिः सनातनः (तन–)शब्दरहितश्च न भवति (इति) व्यामोहहेतुरर्थः। कस्तर्ह्यसाविति। उच्यते। स पार्थिवः पृथिव्यां भवः पार्थिवो वृक्षः राजाऽपि स्तनस्तनोक्त(?) राजातनाभिधानस्तरुरिति निश्चयार्थः।

अत्र राजातन इति यन्नाम तस्मिन्नानार्थस्य नृपतरुलक्षणस्य कलनात्तदनन्तरितमिति नामान्तरितोच्यते।।

नामान्तरितामुदाहरति–**आदाविति।** पार्थिवः आदौ राजेति गीयते सनातनश्चेति; असौ नैव राजा नापि सनातनः, इति विरुद्धम्। कस्यचित् भूरुहस्य राजातन इति नाम; सः आदौ राजेति कथ्यते, अन्ते तन इति च सदा कथ्यते असौ भूरुहः राजा नित्यश्च न भवति, इत्यर्थः। राजातन इति नाम्नि नानार्थकल्पनात् नामान्तरितात्वम्।।११६।।

हृतद्रव्यं जनं त्यक्त्वा धनवन्तं व्रजन्ति काः।
नानाभङ्गिशताकृष्टलोका वेश्या न दुर्धराः॥११७॥

रत्नश्री

हृतं द्रव्यमस्मादिति हृतद्रव्यं निर्धनं नरं त्यक्त्वा धनवन्तं नरं का व्रजन्ति? नाना अनेकप्रकाराणां भङ्गीनां श्रृङ्गारचेष्टालक्षणानां शतैः। बहुत्वोपलक्षणमे[तत्]। आकृष्टा वशीकृता लोकाः पुरुषा याभिरिति नानाभङ्गि[शता]कृष्टलोकाः दुर्धरा दुर्वारा अनाय[त्त]त्वात्। वेश्या गणिका एवंविधा भवेयुरिति उत्तरमाशङ्क्य निषेधतिएवंविधाः सत्योऽपि न वेश्याः किं तु श्रिय इत्यत्रोत्तरम्। अतो नानाभङ्गिशताकृष्टलोका इत्यादेः तुल्यधर्मस्पृशो गिरः श्रिय इत्यस्मिन्नर्थे निभृतत्वाद् व्यवस्थानात् तया वा श्रिय इत्यस्यार्थस्य निभृतत्वान्निगूढत्वात् निभृतेयमुदाहृता॥

हृदयङ्गमा

निभृतामुदाहरति, हृतद्रव्यमिति।– नानाभाङ्गिभिः बहुविधविलासचेष्टितैः, समाकृष्टाः आयत्तीकृताः, लोकाः याभिः तथोक्ताः, तथा दुर्द्धराः दुःखेन ध्रियमाणाः, कथञ्चिदपि अवश्याः इत्यर्थः, काः हृतानि विनष्टानि, द्रव्याणि धनानि यस्य तादृशं, नरं त्यक्तवा धनवन्तं धनिनं, व्रजन्ति? ईदृशलक्षणवत्यश्च वेश्या एव भवितुमर्हन्तीति तद्वारयितुमाह, –वेश्या न, एतादृशलक्षणा वेश्या मम प्रश्नविषया नेत्यर्थः, अतस्ताः काः? इति प्रश्नः सहजार्थकः। उत्तरभूतः संवरणीयार्थस्तु–पर्वतोत्पन्ना नद्य इति। तथा हि, नाना विविधाः, भङ्गास्तरङ्गाः सन्त्यस्मिन्निति नानाभङ्गि जलं, तेन

समाकृष्टाः समीपमानीताः, लोका अवतरणोत्सका जना याभिस्ताः, दुर्द्धराः धरात् पर्वतात्, दुः दुःखेन गताः, कष्टेन निर्गता इत्यर्थः, नद्य इति भावः, हृतानि स्रोतोवेगेन ध्वंसितानि, द्रव्याणि पार्वतीयानि वस्तूनि, द्रूणां वृक्षाणामिमानि द्रव्याणि शाखापल्लवादीनि इत्यर्थो वा, यस्य तं, नरं नरसदृशम् आश्रयभूतं, पर्वतमित्यर्थादायातं, त्यक्त्वा धनवन्तं रत्नाकरं, समुद्रमित्यर्थः, व्रजन्ति। (अत्र विशेषणसाधारण्यात् एकतरनिषेधे अन्यतरप्रतीतिर्युक्तेति नद्य इति प्रश्नविषयोऽर्थः। अस्य च तुल्यविशेषणप्रतीतौ अपि वाचकशब्दानुपादानात् निभृतात्वमित्यपि बोध्यम्)।।११७।।

प्रभा

निभृतामुदाहरति–**हृतद्रव्येति।** नाना विविधा या भङ्ग्यः शृङ्गारचेष्टाप्रकारास्ताभिः समाकृष्टो वशीकृतो लोकः याभिस्ताः। तथा दुःखेन ध्रियमाणाः दुर्धराः। काः हृतद्रव्यं अपहृतधनं नरं परित्यज्य धनवन्तं व्रजन्ति। अस्य प्रश्नस्य उत्तरं वर्णनमहिम्ना वेश्या भवेयुः। अतस्तां निषेधति। वेश्याः गणिका न। ता उद्दिश्य नायं मम प्रश्न इत्यर्थः। अतस्तद्भिन्नाः का इति उच्यतामुत्तरम्। अत्रोत्तरत्वेनाभिप्रेतः संवृतार्थस्तु नानाभङ्गाः तरङ्गाः सन्ति यस्मिस्तन् नानाभङ्गि नदीजलं तेन समाकृष्टाः स्नानावतीर्णा लोका याभिस्ताः। नदीनां जलवीचिभिर्जनानां प्रवाहे आकर्षणं सुप्रसिद्धमेव। दुर्धराः धरात् पर्वतात् दुर्गताः कष्टप्रदगमनाः। इति प्रेमचन्द्रादयः। दुःखेन धर्तुं निरोद्धुं योग्याः। वेगवत्तरप्रवाहेण निरोद्धुमशक्या इत्यर्थः। इति परे। हृतानि द्रव्याणि द्रुविकारभूतानि पत्रपुष्पादीनि यस्य तम्। अथवा द्रव्याणि पर्वते विद्यमानानि

गैरिकादिधातुविशेषभूतानि यस्य तम्। नरं नरसदृशं आश्रयीभूतं पर्वतम्। त्यक्त्वा धनवन्तं रत्नाकरं व्रजन्ति। एतादृश्यो नद्य इति उत्तरम्। केचित् तु अस्योत्तरं श्रिय इति ददति। तच्च संपत् संपदमनुबन्धाति इति नियमानुरोधेन हृतद्रव्यं परित्यज्य धनवन्तं व्रजन्ति इति श्रियो वर्णनं संभवति। अतस्तदपि उपपन्नमेव। अत्र विशेषणानां साधारण्याद् एकतरार्थप्रतिषेधेन्यार्थ- प्रतीतिर्युज्यते। एवं तत्प्रतीतौ च वाचकशब्दानुपात्तत्वान्निभृतत्वम्। अतो निभृता प्रहेलिकेयम्।।११७।।

विवृति

निवृत्ता(भृता)मुदाहरति–

हृतमाच्छिन्नं द्रव्यं यस्यासौ हृतद्रव्यो निर्धनः। तं हृतद्रव्यं नरं पुरुषं त्यक्त्वा विहाय धनवन्तं धनाढ्यं नानाभङ्गिशतैराकृष्ट(:) लोक(:) यतिकादि (याभि)स्ताः। काः व्रजन्ति। दुखेन ध्रियन्त इति दुर्धराः। तर्हि वेश्यास्ता भवेयुरित्यापा(ह) न वेश्या इति व्यामोहहेतुः। कास्तर्हि ताः। उच्यते। श्रिय इह वेश्या[:] समान[-धर्म-]स्पर्शा [स्पृशा] गिरा श्रिय इति योऽर्थोऽभिधित्सितः स निभृतो गोपितः।।

निभृतामुदाहरति–**हृतेति**। एवंभूताः श्रिय इत्यस्य अर्थस्य वेश्यासाधारणैः विशेषणैः गुप्तत्वात् निभृतात्वम्।।११७।।

जितप्रकृष्टकेशाख्यो यस्तवाभूमिसाह्वयः।
असौ मामुत्कमधिकं करोति कलभाषिणि॥११८॥

रत्नश्री

कलभाषिणी! जितस्तदुपमितः प्रकृष्टस्य [111a] केशस्याख्या संज्ञा यस्य स प्रकृष्टकेशाख्यः प्रवालः येनेति जितप्रकृष्टकेशाख्यः प्रवालोपम [इत्यर्थः]। न विद्यते भूमिरस्येति अभूमिः। तेन अर्थतः समानः आह्वयः संज्ञा यस्या असौ अभूमिसाह्वयः अधरः तव यः। असौ अयं मामुत्कमुन्मनसमधिकमत्यर्थं करोति। एवं कल्पितप्रसिद्धशब्द-पर्यायसाधितेयं समानशब्दा निदर्शितेति॥

हृदयङ्गमा

समानशब्दां दर्शयति, जितेति। –हे कलभाषिणि! मधुरभाषिणि!, प्रकृष्टस्य अत्युत्कृष्टस्य, केशस्य आख्या तत्पर्य्यायकं नाम, प्रबालः इत्यर्थः, यद्वा,–प्रकृष्टो यः केशस्तस्य आख्या तत्पर्य्यायनाम इव नाम यस्य स इति विग्रहः ; जिताः तिरष्कृताः, प्रकृष्टकेशाख्याः प्रबालाः येन सः, तव यः अभूमिसाह्वयः भूमिर्धरा, नास्ति भूमिर्यत्र सः अभूमिः अधरः इत्यर्थः, तत्साह्वयः तस्य समाननामा, ओष्ठ इत्यर्थः, सः अद्य मां प्रभूतोत्कम् अत्युत्सुकं, करोति प्रबालसदृशस्तवाधरो मां व्यथयतीत्यर्थः। (अत्र प्रकृष्टकेशाख्यः अभूमिशब्दश्च लक्षितलक्षणया प्रबालाधरौ बोधयतः, तथा हि प्रकृष्टकेशपदस्य प्रबालशब्दे अभूमिपदस्य च अधरशब्दे लक्षणा, तयोश्च लक्षितयोः

शक्तिग्रहेण तादृशार्थोपस्थितिः इति प्रकृतस्य समानशब्देनार्थोपस्थितेः समानशब्देयं प्रहेलिका)।।११८।।

प्रभा

समानशब्दामुदाहरति–**जित इति**। हे कलभाषिणि मञ्जुवचने। प्रकृष्टकेशस्य आख्या नाम यस्य स प्रकृष्टकेशाख्यः प्रवालः। प्रकृष्टः वालः केशः प्रवाल इति प्रकृष्टकेशाख्यः प्रवालः। जिता प्रकृष्टकेशाख्या येन सः जितप्रकृष्टकेशाख्यः। तथा अभूमिसाह्वयः। नास्ति भूमिः धरा यत्र स अभूमिः अधरः तया साह्वयः सनामा। तव त्वदीयः। ईदृशो यः स मां अद्य प्रभूतोत्कं अत्युत्सुकम् करोति। प्रवालतुल्यस्तेधरो मां पानेच्छया व्याकुलयतीत्यर्थः। अत्र प्रकृष्टकेशाख्याभूमिसाह्वयशब्दौ लक्षितलक्षणया प्रवालरत्नाधरोष्ठवाचकौ इति प्रकृतस्य समानशब्देनोपस्थापनाल्लक्षणया लक्षितेन सदृशशब्देन प्रकृतार्थस्योपस्थितेः समानशब्दा।।११८।।

विवृति

समानशब्दामुदाहरति–

प्रकृष्टाश्च ते केशाश्च ते प्रकृष्टकेशाः। तेषामाख्या नाम येषां ते प्रकृष्टकेशाख्याः। प्रवालयो (प्रवालाः) विद्रुमापरनामानः। जिताः प्रकृष्टकेशाख्यः येनासौ जितप्रकृष्टकेशाख्यः। पराजितप्रवालमणिरागः। अतिरक्त इत्यर्थः। यस्तव न विद्यते भूमिर्धराऽस्येत्यभूमिकः (मिः तेन)समा(-म आ-)ह्वयोऽभिधानं यस्यसावभूमिका(सा)ह्वयः अधरः कस्याद्य(सोऽद्य) मां सुष्ठु अतिशयेन भूतो जात उत्कः उत्कण्ठा यस्य तं सुभूतोत्कं सुष्ठु

जातौत्सुक्यं करोति हे कलभाषिणि। इहोपन्यस्तशब्दः प्रकृष्टकेशाख्य इति यः तस्य पर्यायः प्रवाल इति यश्चा भूमिका(समा)ह्वय इति तस्य पर्यायोऽधर इति सुभूतोत्कमित्यस्य पर्यायः सञ्जातौत्सुक्यमित्येतैः पर्यायैः सावितः प्रतिपादितोऽर्थ इति समानशब्दोच्यते।।

समानशब्दामुदाहरति–**जितेति।** वालः केशः, प्रवालः प्रकृष्टकेशः, स आख्या यस्य सः प्रवालः पल्लवः, जितप्रकृष्टकेशाख्यः जितप्रवालः इति यावत्; यः ; ते तव; अभूमिसमाह्वयः–धरा भूमिः, तद्रहितः अभूमिः, तत्समाह्वयः तत्पर्यायः अधरः ; भूः रसा, सुभूः सुरसः, सुभूता सुरसता, तया उत्कं साभिलाषं करोति; कलभाषिणि। जितप्रकृष्टकेशाख्यः अभूमिसमाह्वयः यस्ते अवयवः, सः अद्य मां सुभूतोत्कं करोति। इति विवक्षितार्थस्य वाचकपर्यायान्तरेण कथितत्वात् समानशब्दात्वम्।।११८।।

शयनीये परावृत्य शयितौ कामिनौ रुषा।
तथैव शयितौ रागात् स्वैरं मुखमचुम्बताम्॥११९॥

रत्नश्री

कामी च कामिनी च कामिनौ स्त्रीपुंसौ रुषा प्रणयकलहेन हेतुना परावृत्य पराङ्मुखीभूः[य] शयनीये तल्पे शयितौ। तथैव परावृत्त्यैव मुखमन्योन्यस्य स्वैरं यथेष्टं रागादचुम्बताम् चुम्बितवन्तौ इति मोहो जायते। कथं नाम परावृत्य शयितौ स्वैरं मुखं चुम्बत इति? यथा पूर्वं संमुखं शयितौ तथैव पुनः संविष्टौ रागपरवशतया स्वैरं मुखमचुम्बतामिति तु परमार्थः। इयमेव साक्षान्निर्दिष्टार्थापि संमोहकारिणीति संमूढा दर्शिता॥

हृदयङ्गमा

सम्मूढ़ां दर्शयति, शयनीये इति। –कामिनौ क्रुधा कोपेन, शयनीये शय्यायां, परावृत्य विमुखीभूय, शयितौ, तथैव शयितौ परावृत्य शयितावपि इत्यर्थः, रागात् अनुरागात्, स्वैरं स्वच्छन्दं, मुखम् अचुम्बताम्। (अत्र क्रुधा परावृत्य शयितयोः स्वैरं मुखचुम्बनस्य दुर्घटत्वादापाततो मोहः, पर्य्यवसाने तु प्रथमं प्रणयकोपेन परावृत्य शयितौ, पश्चात् अनुरागात् तथैव शयितौ पुनः परावृत्य शयितौ इति परावृत्तयोः पुनः परावर्त्तनात् पार्श्वान्तरेण शयितयोः सम्मुखीनत्वात् मुखचुम्बनं सुघटमेवेति आपातत एव श्रोतृणां व्यामोहनात् सम्मूढ़ेयम्)॥११९॥

प्रभा

संमूढामुदाहरति–**शयनीय इति**। शयनीये शय्यायाम्। कामिनौ क्रुधा परावृत्य पराङ्मुखीभूय शयितौ। रागात् तथैव शयितौ सन्तौ

स्वैरं यथेच्छं मुखं अचुम्बताम्। पराङ्मुखीभूय शयितयो रेतद्दुर्घटं इति आपाततो मोहः। पर्यवसितार्थस्तु आदौ क्रुधा परावृत्त्य पराडमुखीभूय शयितौ। पश्चाद्रागात् तथैव परावृत्त्य पुनः परावृत्त्य नाम संमुखीभूय शयितौ इति। शयने संमुखीभूय शयनस्योपपन्नत्वान्न मुखचुम्बनानुपपत्तिः। आपाततो मोहजननात् श्रोतॄणां इयं संमूढा प्रहेलिका।।११९।।

विवृति

सम्मूढामुदाहरति–

शयनीये परावृत्य पराङ्मुखीभू(य)शयितौ कामीव(च) कामीनी(-च) कामिनौ रुषा कोपेन तथैव तेन प्रकारेण पराङ्मुखीभूतावेव शयितौ सुप्तौ रागादनुरागात् स्वैरं यथेष्टं मुखमाननं न चुम्बित (अचुम्बता)मित्यनुपपद्यमानोऽर्थः। न खलु पराङ्मुखीभूय कोपेन शयानयोरधरचुम्बनमुपपद्यत इति। समाधानं तु तथैव शयनीयेनैव (?)प्रकारेण परावृत्य, परावृत्तयोः पुनः परावृत्तिः। (ते)न सम्मुखीभवनम्। अत एव रोषाभावात् रागादित्युपपन्नम्। सम्मुखयोश्चाधरचुम्बनं स्वैरमुपपद्यत एवेति कथितार्थापीयं व्यामोहहेतुरिति सम्मूढोच्यते।।

मूढामुदाहरति–**शयनीय** इति। रुषा प्रणयकलहेन शयनीये परावृत्य शयितौ कामिनौ, रागात् पुनः तथैव परावृत्य शयितौ आभिमुख्येन. शयितौ इति यावत्, तौ स्वैरं मुखमचुम्बताम्। अत्र विवक्षितार्थमोहनाय तथैवेति निर्दिष्टत्वात् मूढात्वम्।।११९।।

विजितान्नभवद्वेषिगुरुपादहतो जनः।
हिमापहामित्रधरैर्व्याप्तं व्योमाभिनन्दति॥१२०॥

रत्नश्री

विना पक्षिणा गरुडेन। सामर्थ्यात् तेन किल देवराजमभिभूय कदाचिद-मृतमाहृतम् [जितम्] विजितम् आत्मसात् कृतम् [अन्नमाहारो] यस्य स विजितान्नः अभृतभोजी। स चार्थादिन्द्रः। भवत्यस्मादिति भवः। विजितान्नो भवो जन्महेतुर्जनकः। यस्य यस्माद् वा भवो भवनं जन्म यस्य स विजितान्नभव अर्जुनः तं द्वेष्टी[ति] विजितान्नभवद्वेषी कर्णः। तस्य गुरुरादित्यः। तस्य पादैः किरणैः हतस्तप्तः। तादृशो जनो व्योम गगनमभिनन्दति। प्रीतिनिर्भरेणान्तः करणेन गृह्णाति। किंविशिष्टम्? हिममपहन्तीति हिमापहः अग्निः। तस्यामित्रम् उदकम्। तद् धारयन्तीति हिमापहामित्रधरा मेघाः। तैर्व्याप्तम्। अत्र विजयसम्बन्धाद् विजितमित्यमृतस्य भानं निवृत्तम्। तत्सम्बन्धाच्च विजितान्न इतीन्द्रस्य। तस्माद् जन्मयोगाद् विजितान्नभव इत्यर्जुनस्य। तद्वैरयोगाच्च विजितान्नभवद्वेषीति कर्णस्य। तज्जन्मयोगाच्च विजितान्नभवद्वेषिगुरुरित्या- [दित्य]स्य। ¹111b] हिमोपघातयोगेन हिमापह इत्यग्नेः। तदमित्रता- योगाच्च हिमापहामित्रमित्युदकस्य। तद्धारणसम्बन्धाच्च हिमापहामित्रधरा इति मेघानाम्। एवं सम्बन्धपारिहारिकीयमुदाहृता॥

हृदयङ्गमा

परिहारिकां दर्शयति, विजितेति। –विना पक्षिणा, गरुड़ेनेत्यर्थः, जितः अमृताहरणकाले पराभूतः, इन्द्र इत्यर्थः, (पुरा

किल मातुर्दासीत्वनिष्क्रयं नागादिष्टममृतमाहर्त्तुं सुरलोकं गतेन गरुड़ेन सुरपतेः प्रबलं सङ्ग्राममभवत्, तत्र च गरुड़ः निजपराक्रमेण सुरनाथं विजित्य अमृतं गृहीत्वा प्रातिष्ठत इति वार्त्ता) तस्य आत्मभवः पुत्रः, अर्जुन इत्यर्थः, तस्य द्वेषी शत्रुः, कर्ण इत्यर्थः, तस्य गुरुः पिता, सूर्य्य इत्यर्थः, तस्य पादैः किरणैः, हतः सन्तप्तः, जनः हिमं शैत्यम्, अपहन्तीति हिमापहः अग्निः, तस्य अमित्राः शत्रवः, जलानि इत्यर्थः, तेषां धराः अम्भोधराः मेघाः, तैः व्याप्तम् आवृतं, व्योम आकाशम्, अभिनन्दति समादरति इत्यर्थः। (अत्र यौगिकशब्दैः झटिति प्रकृतार्थबोधस्य हरणात् परिहारिका)॥१२०॥

प्रभा

परिहारिकामुदाहरति-**विजितेति**। विना पक्षिणा गरुडेन जितः अमृतहरणे विजित इन्द्रस्तस्यात्मभवः पुत्रः अर्जुनस्तस्य द्वेषी द्वेष्टा कर्णः तस्य गुरुः पिता सूर्यस्तस्य पादैः किरणैर्हतः संतप्तो जनो हिमं शीतं अपहन्ति इति हिमापहः अग्निः तस्य अमित्रः शत्रुर्जलं तस्य धरा जलधराः। मेघा इत्यर्थः तैर्व्याप्तं आच्छन्नं व्योम आकाशम् अभिनन्दति प्रशंसति। अत्र यौगिकशब्दपरंपरया प्रकृतार्थस्योद्भवनाद् योगमालात्मिका प्रहेलिका॥१२०॥

विवृति

पारिहारिकामुदाहरति-

विः गरुडः तेन जितः शक्रः तस्यात्मभवः तनुजोऽर्जुनः तस्य द्वेषी कर्णः तस्य गुरुरादित्यः पिता तस्य पादाः कराः तैर्हतः सन्तप्तो जनः व्योमाकाशः किंविशिष्टं व्याप्तं कैः हिमापहामि(त्रधरैः)

हिमं शीतं तद(प)हन्ति निवारयति हिमापहोऽग्निः तस्यामित्रस्तोयं तद्धरन्तीति हिमापहामित्रधराः तैः। अपेः क्लेशतमसोरुपपदयोर्विहितोऽपि हन्तेरन्योपपादविशिष्टप्रयोगाप्रे(.....गेऽपि डप्रत्ययो)भवति। तेन दर्शन(दंश)मशकापहं हिमापहमित्यादि सिद्धं भवति।।

पारिहारिकीमुदाहरति–**वीति**। विः पक्षी गरुडः, तेन जितम् अन्नम् अमृतं यस्मात् सः इन्द्रः, मातुः दास्यात् मोचनाय गरुडो दिवं गत्वा इन्द्रेण रक्षितममृतं बलात् अपहृत्य भूमौ आनीतवान्, विजितान्नात् भवः जातः अर्जुनः, तस्य द्वेषी कर्णः, तस्य गुरुः जनकः आदित्यः, तस्य पादैः किरणेः, हतः सन्तापितः जनः, हिममपहन्तीति हिमापहः वह्निः, तस्य अमित्रः, जलं, तस्य धराः जलधराः, तैः व्याप्तं व्योम अभिनन्दति। अत्र नाम्नो योगपरम्परात्मकत्वात् पारिहारिकीयम्।।१२०।।

न स्पृशत्यायुधं जातु न स्त्रीणां स्तनमण्डलम्।
अमनुष्यस्य कस्यापि हस्तोऽयं न किलाफलः॥१२१॥

रत्नश्री

अमनुष्यस्य कस्याप्यनिर्धारितरूपविशेषस्य हस्तः जातु कदाचिदपि आयुधं न स्पृशति गृह्णाति। न च स्त्रीणां स्तनमण्डलं पयोधरभारं स्पृशति। अयमेवं फलभूतकर्मरहितो हस्तो नाफलः सफलः किल। नान्यादृशं साफल्यमस्यास्मभ्यं रोचत इति किलशब्देन सूचयति। अत्राश्रितो हस्तः अभिव्यक्तो वाचकप्रयोगात्। आश्रयस्तु गोपितुः, गन्धर्वहस्त इति साक्षादनभिधानात्। गन्धर्वहस्त इति चाभिधानमेरण्डस्य। तदियमेकच्छन्ना दर्शितेति॥

हृदयङ्गमा

एकच्छन्नां दर्शयति, नेति। –कस्यापि अमनुष्यस्य पुरुषतया अगण्यस्य इत्यर्थः, हस्तः जातु कदाचिदपि, आयुधम् अस्त्रं, न स्पृशति, स्त्रीणां स्तनमण्डलञ्च न स्पृशति, तथाऽपि अयं हस्तः, न अफलः न व्यर्थः, किल अपि तु सफल एव, इति आपाततः प्रतीयते, परन्तु आयुधस्त्रीस्तनस्पर्शाभावेन नायं वीरः न वा विलासीत्यतः कथमस्य हस्तस्य फलवत्त्वमिति विरुद्धवदवभासनात् अमनुष्यशब्देन गन्धर्वो लक्ष्यते, तस्य हस्तः गन्धर्वहस्तः एरण्डवृक्ष इत्यर्थः। (उक्तञ्च हारावल्याम्, –"अमण्डपञ्चाङ्गुलवर्द्धमाना गन्धर्वहस्तस्त्रिपुटीफलञ्च" इति तस्य फलं विद्यत एवेति, आश्रितस्य फलस्य स्फुटत्वं न तु आश्रयस्य वृक्षस्येति एकच्छन्नेयम्)॥१२१॥

प्रभा

एकच्छन्नामुदाहरति–**न स्पृशतीति।** कस्यापि अमनुष्यस्य मनुष्यत्वानर्हस्य। हस्तो जातु कदाचिदपि आयुधं न स्पृशति। तथा स्त्रीणां युवतीनां स्तनमण्डलं च न स्पृशति। तथापि अयं हस्तः अफलः फलशून्यो न। किलेति निश्चये। अयं अर्थ आपाततः प्रतीयते। विचारे तु आयुधस्य कुचमण्डलस्य च स्पर्शाभावेन नास्मिन् पौरुषत्वं रसिकत्वं वा तत् कथमस्य हस्तः सफलः स्वक्रियाकरणासमर्थत्वाद् इति विरोधः। तत्परिहाराय अमनुष्यशब्देन गन्धर्वशब्दो लक्ष्यते। तथा च अमनुष्यस्य गन्धर्वस्य हस्तः गन्धर्वहस्तः एरण्डवृक्षः। तथाच हारावली–अमण्डपञ्चांगुलवर्धमाना गन्धर्वहस्तस्त्रिपुटीफलश्च इति। स च आयुधं न स्पृशति। तत्खण्डने आयुधस्य मालिन्यं जायते। तथा स्त्रीस्तनमण्डलं न स्पृशति। तस्य कण्डूकरत्वात्। स च अफलो न भवति फलवत्त्वात्। अत्र च आश्रितं फलं व्यक्तं न तु आश्रयो वृक्षो व्यक्त इति एकच्छन्ना प्रहेलिकेयम्।।१२१।।

विवृति

एकच्छन्नामुदाहरति–

न स्पृष्टमायुधं न शस्त्रं सन्धृतं न च स्त्रीणां स्तनमण्डलं स्पृष्टं जातु कदाचित् अमनुष्यस्यापुरुषस्य कस्यापि हस्तोऽयं न किलाफलः फलवर्जितं[तः] किल नभवति। आश्रितं धर्मं हस्तमभिव्यज्य तेनाश्रयस्य धर्मिणो गोपनमिति व्यामोहहेतुः। अर्थस्तु एरण्डस्तोयमतोयं(-हस्तोऽयं)न निष्फलः। सन्ति ह्येरण्डहस्तस्य फलानि। हस्ताकृतित्वाच्च हसत इव हस्त उच्यते।

अमनुष्यश्च एरण्डः। न चार्थ स्त्रीकुचमण्डलं स्पृशत्यायुधं वा दधातीति।।

एकच्छन्नामुदाहरति—**नेति।** एरण्डदलखण्डने आयुधस्य मालिन्यं जायते, स्त्रीणां स्तनमण्डलं न स्पृशति कण्डूकरत्वात्; कस्यचित् हस्तस्य आयुधस्तनयोः स्पर्शाभावे वीरश्रृङ्गाररराहित्यात् निष्फलत्वेऽपि गन्धर्वहस्ताख्यस्य एरण्डस्य सफलत्वात् निष्फलत्वाभावः। अत्र आश्रितहस्तस्य व्यक्तत्वेऽपि आश्रयस्य गन्धर्वस्य कस्यापि अमनुष्यस्येति छन्नत्वात् एकच्छन्नेयम्।।१२१।।

केन कः सह सम्भूय सर्वकार्येषु सन्निधिम्।
लब्ध्वा भोजनकाले तु यदि दृष्टो निरस्यते॥१२२॥

रत्नश्री

केन शिरसा सह सम्भूय संगत्य सर्वेषु कार्यादिषु स्नाना[धि]वासनादिषु सन्निधिमुपस्थानं लब्ध्वा प्राप्य भोजनकाले अन्नगतो यदि कथञ्चिद् दृष्टः स्यात्, तदा कः तादृशो नि[र]स्यते? केशः। तस्य तादृशत्वात्। अत्र केन क इति सामान्यपदप्रयोगादाश्रयः शिरोलक्षणः आश्रितश्च केशः। तौ च्छन्नौ इत्युभयच्छन्नेयमुदाहृता। केनेश इति [पाठे] केन ककारेण ईशशब्दः सम्भूय, शेषं पूर्ववत्। केन ब्रह्मणा ईशः शङ्कर इति चार्थान्तरं वाच्यम्। तन्महाप्रयोगादुभय[गो]पनं प्रागिवेति व्याख्येयम्॥

हृदयङ्गमा

उभयच्छन्नां दर्शयति, केनेति। –कः पदार्थः, केन पदार्थेन सह, सम्भूय मिलित्वा, सर्वकार्य्येषु सन्निधिं सामीप्यं, लब्ध्वा प्राप्य च, भोजनकाले तु (तुशब्दोऽवधारणे) भोजनकाले एव, यदि दृष्टः, भवति इति शेषः, तदा निरस्यते निराक्रियते? उत्तरमिदं यथा, –कस्य अयं कः केशः, (कशब्दादिदमर्थेष्णप्रत्ययः) केन मस्तकेन सह, सम्भूय तथा सर्वकार्य्येषु सन्निधिं समादरं, लब्धवा, भोजनकाले एव दृष्टो निरस्यते इति। (अत्र आश्रयाश्रयिणोर्मस्तककेशयोरुयोरेव छन्नतेति उभयच्छन्ना)॥१२२॥

प्रभा

उभयच्छन्नामुदाहरति–**केनेति।** कः पदार्थः केन पदार्थेन सह संभूय समुत्पद्य सर्वकार्येषु संनिधिं सांनिध्यम् लब्ध्वा च भोजनकाले यदि दृष्टः स्यात् तर्हि निरस्यते दूरीक्रियत इति प्रश्नः। उत्तरं तु कः कस्य मस्तकस्य अयं कः केशः। इदमर्थेण्। केन सह मस्तकेन सह। संभूय समुत्पद्य। सर्वकार्येषु चूडामणिमाला-विधारणकार्येषु। संनिधिं लब्ध्वा भोजनकाले दृष्टः। पात्रे इति शेषः। निरस्यते अशुचित्वाद्दूरीक्रियते। अत्र आश्रयाश्रयिणोर्मस्तककेश-योरुभयोश्छन्नत्वादुभयच्छन्ना इयं प्रहेलिका ।।१२२।।

विवृति

उभयच्छन्नामुदाहरति–

केन वस्तुना सह कः पदार्थः सम्भूय संयुज्य सर्वेषु कार्येषु सन्निधिं उपयोगं लब्ध्वा प्राप्नोति (प्राप्य, यदि) पाना(अन्ना)दिभोजनकाले दृष्टः स्यात्तदा निरस्यते इत्युभयोत्थं(रपि) धर्मधर्मिणोः गोपनमित्युभय(छन्ना) आश्रयाश्रयिणोरप्रतिपादनादिति व्यामोहहेतुः। अर्थस्तु केशाख्यः पदार्थः केन मस्तकेन सह संयुज्य सर्वकार्येषु स्नानतैलाभ्यङ्गपुष्पबन्धनादिषु सन्निधिमुपयोगं प्राप्नोति। स च भोजनभाजने उपलब्धो यदि स्यात्तदा तनेता (ततो)निरस्यत इति।।

उभयच्छन्नामुदाहरति–**केनेति।** कः केन सह सम्भूय सर्वकार्येषु सन्निधिं लब्ध्वा भोजनकाले यदि दृष्टो निरस्यते। कः

केन इति आश्रिताश्रययोः छन्नत्वात् एषा उभयच्छन्ना। कशब्देन शिरोवाचकेन तद्भवः केशो लक्ष्यते। कः केशः केन शिरसा सह सम्भूय, सर्वकार्येषु सर्वेषु कार्येषु प्राप्तेषु चूडामणिस्रगादिषु सन्निधिं लब्ध्वा, भोजनकाले भोज्ये यदि दृष्टः अशुचित्वात् निरस्यते।।१२२।।

सहया सगजा सेना सभटेयं न चेज्जिता।
अमातृकोऽयं मूढः स्यादक्षरज्ञस्तु नः सुतः॥१२३॥

रत्नश्री

सह हयैरश्वै सह गजैर्भटैश्च सह [112a] वर्तत इति सहया सगजा सभटेयं चेद् या न जिता नाक्रान्ता तदा नोऽस्माकं सुतः अमातृकः अजननीकः। अ[न]क्षरज्ञश्च मूढः स्यादिति [आपाततो]ऽयमर्थः। तत्त्वार्थस्तु हश्च यश्च ताभ्यां वर्णाभ्यां सह वर्तत इति। सह यो गश्च जश्च वर्णः, ताभ्यां सह सगजा। इश्च नश्च वर्णः। ताभ्यां युक्ता सेना, भकारटकाराभ्यां योगात् सभटा। एवंविधा च सिद्धा मातृका सा इयं चेन्न जिता सम्यगध्ययनयोगेन यदि न वशीकृता स्यात्, तदा अयं नः सुतः। न विद्यते मातृका वर्णसमाम्नायः। अनधीतत्वादस्येति अमातृकः अत एव शास्त्रापरिज्ञानात् मूढो मूर्खः हेयोपादेयज्ञानविकलः स्यात्। न क्षरति न नश्यतीत्यक्षरं वेदं जानातीत्यक्षरज्ञस्तु वेदमात्रपाठकस्तु स्यात्। न मातृकाध्ययनेनापि वेदपाठसम्भवात्। अक्षरज्ञश्चेत्यपि पाठः। तत्र मूर्खतया नश्वरपदार्थस्वभावापरिज्ञानादक्षरं सर्वं नित्यं जानीयादित्यक्षरज्ञश्च नित्यग्रहगुप्तश्च भवेत्॥

कतरोऽयं संकर इति दर्शयति–

हृदयङ्गमा

सङ्कीर्णां दर्शयति, सहयेति। –सहया साश्वा, सगजा सहस्तिका, सभटा भटैः योद्धृभिः सह वर्त्तमाना, इयं सेना शात्रवी चमूरित्यर्थः, न जिता चेत् पराभूता न यदि, तदा नः अस्माकम,

अयं सुतः अमात्रिकः मात्रं स्वार्थः, तत् वेत्तीति मात्रिकः स्वार्थाभिज्ञः, तादृशो न भवतीति अमात्रिकः स्वार्थचिन्तापराङ्मख इत्यर्थः, यद्वा–मात्रा द्रव्यं, धनमित्यर्थः, विषय इति यावत्, ("मात्रं त्ववधृतौ स्वार्थे कात्स्न्ये मात्रा परिच्छदे। अक्षरावयवे द्रव्ये मानेऽल्पे कर्णभूषणे।। काले वृत्ते च" इति हैमः) तामर्हतीति मात्रिकः न मात्रिकः अमात्रिकः धनमर्य्यादानभिज्ञः, विषयज्ञानवर्जितः इत्यर्थः, अतः अक्षरज्ञश्च अक्षरं ब्रह्म तज्ज्ञोऽपीत्यर्थः, मूढः मूर्खः, स्यात्, स्वार्थज्ञानाभावात् वैषयिकबुद्ध्यभावात् वा ब्रह्मविदपि मूर्खत्वेनैव गण्यः इति सहजोऽर्थः। गूढार्थस्तु–हकारयकाराभ्यां गकार–जकाराभ्यां भकार–टकाराभ्याञ्च सहिता इयं सेना इनः प्रभुः, अधिष्ठाता इत्यर्थः, अक्षरस्रष्टा ब्रह्मा इति यावत्, (यदुक्तं, –"धात्राऽक्षराणि सृष्टानि पत्रारूढान्यतः पुरा" इति) तेन सहिता साधिष्ठातृका वर्णमाला इत्यर्थः, वर्णमाला कीदृशी, का वा तासां अधिष्ठात्री देवता इत्यादिरूपा इति भावः, न जिता अनभ्यस्ता चेत्, न ज्ञाता चेदित्यर्थः, तदा अमात्रिकः मात्रा स्वरादिवर्णानामुच्चारणकालः, तां वेत्तीति मात्रिकः, न मात्रिकः अमात्रिकः वर्णज्ञानरहित इत्यर्थः, अतः अक्षरं वेदं जानातीति अक्षरज्ञः अभ्यस्तवेदः अपि, मूढः मूर्ख इत्यर्थः, यद्वा, –न जिता लेखितुं न शिक्षिता इत्यर्थः, तदा अमात्रिकः, मात्रा अक्षरावयवः, तां न वेत्तीति अमात्रिकः, कः अक्षरः कीदृशेन आकारेण लेखनार्हः इत्यादिज्ञानरहित इत्यर्थः, अयम् अक्षरज्ञः वर्णज्ञोऽपि, मूर्ख एवेति सङ्कीर्णेति।।१२३।।

प्रभा

संकीर्णामुदाहरति–**सहयेति**। सहया हयैरश्वैः सहिता सहया।

तथा सगजा गजैः करिभिः सहिता सगजा। तथा सभटा भटैः योधैः सहिता सभटा। एताट्टशी सेना न चेज्जिता न पराभूता चेत्। अयं नः अस्माकम्। सुतः अक्षरज्ञः परमार्थतत्त्वविदपि। अमातृकः माति परापरसामर्थ्यं परिमाति इति माता न माता अमाता परापरबलानवच्छेत्ता। पश्चात् स्वार्थे कः। एतादृशो मूढ एव स्यात्। इति उत्तानार्थः। गूढार्थस्तु सहया हकारेण यकारेण च सहिता सहया। अत्र हकारेण सर्वे ऊष्माणः शषसहा गृह्यन्ते यकारेण च अन्तस्था यरलवाः। तथा सगजा गकारेण जकारेण च सहिता। अत्र गकारेण सर्वः कवर्गः जकारेण चवर्गश्च ज्ञेयः। तथैव सभटा पवर्गटवर्गसहिता। तथा सेना इकारेण नकारेण च सहिता। इकारेण अचां नकारेण तवर्गस्य च संग्रहः। एवंभूता अक्षराणां पङ्क्तिरिति शेषः। न जिता चेत् सम्यगुच्चारणेन लेखनेन वा स्वायत्ता न कृता चेत् अयं न सुतः अक्षरज्ञः न क्षरन्ति इति अक्षराः वेदास्तद्विदपि। अमातृकः मातृकाः वर्णाः न सन्ति सम्यग् लेखनेनोच्चारणेन वा यस्य सः। वर्णलेखनोच्चारणनभिज्ञः मूढः स्यात्। वर्णव्यवहारानभिज्ञत्वात्। अमात्रिक इति पाठे प्रथमार्थे मात्रा विषयास्ते न सन्ति यस्य विषयपराङ्मुख इत्यर्थः। द्वितीयार्थे मात्रा ह्रस्वदीर्घप्लुतोच्चारकालविशेषः स नास्ति यस्य तत्रानभिज्ञ इत्यर्थः॥१२३॥

सा नामान्तरितामिश्रवञ्चितारूपयोगिनी।
एवमेवेतरासामप्युन्नेयः संकरक्रमः।।१२४।।

रत्नश्री

सेयं प्रक्रान्ता प्रहेलिका तल्लक्षणयोगान्नामान्तरितया मिश्रेण संसृष्टेन वञ्चिताया रूपेण योगः सम्बन्धोऽस्यास्तीति नामान्तरितामिश्रवञ्चितारूपयोगिनी। मातृकेत्यस्मिन्नाम्नि सहयेत्यादिनानेकार्थकल्पनादमातृकाशब्देनाजननी, मूढेनानधीतसिद्धमातृकाप्रतीतिविप्रलम्भात्, अक्षरज्ञशब्देन च वर्णज्ञप्रसिद्धेन वेदवेदिन्यविनश्वरज्ञेवानिश्चयवञ्चनात्।

संकरशेषमतिदिशन् प्रस्तावमिमं निगमयति-एवमेव यथोक्तसंकरानुसारेण इतरासामपि [112b] नामान्तरितावञ्चिताव्यतिरिक्तानां च। न केवलमनयोः। संकरस्य संसर्गस्य क्रमः प्रकार उन्नेयोऽभ्यूह्यः। स चैव मुन्नीयताम्-

सुराप्रयोगेप्रसृता विप्राः शूद्रान्नभोजिनः।
आम्नायाध्ययनं त्यक्त्वायुध्यन्तः पाप[माश्रिताः]।।
समागता [व्युत्क्रान्तयोः] संकरः।।
विशालेऽत्र गिरौ दृष्टो गिरिर्न सक्तनिर्झरः।
यश्चार्क[पिशितासा]ख्यो दोलायेत प्रतिक्षणम्।।
समानरूपासमानशब्दयोरयं संकरः।।
लक्ष्मीधरपतेः कान्तं गता गङ्गाधराङ्गना।

चन्द्रा[धारे] परीतापः कुतोयं मे तवोदये।।

पारिहारिकीप्रकल्पितयोः संकरः।।

।। इति प्रहेलिकाचक्रम् ।।

एवं शब्दालङ्कारस्वभावाः काव्यगुणा यथावत् प्रतिपादि[ताः]। दोषा अपि केचिदसाधारणवैदर्भमार्गसम्भविनः श्लेषादयः। संप्रति सर्वमार्गसाधारणानुपदर्शयन्नाह–

हृदयङ्गमा

अत्र सङ्कीर्णतां घटयति, सेति। –सा पूर्वोक्ता इयं सङ्कीर्णाख्या प्रहेलिका, अत्र नामान्तरितामिश्रा हयादिशब्दानां नानार्थकल्पनात् नामान्तरितानामप्रहेलिकालक्षणसंयुक्ता, तथा वञ्चितारूपयोगिणी सेनाशब्दस्य चमूरूपार्थस्य प्रसिद्धस्य अर्थान्तरकल्पनया वञ्चनात् वञ्चितायाः प्रहेलिकायाः, रूपयोगिणी लक्षणसमन्विता च, तन्मिलिता इत्यर्थः। (अतः उल्लिखिते पद्ये प्रहेलिकायाः सङ्कीर्णतेति ज्ञेयम्)। एवमेव अनेनैव प्रकारेण, इतरासाम् अन्यासामपि प्रहेलिकानां, सङ्करक्रमः परस्परमिश्रणप्रकारः, उन्नेयः स्वयमेव अवगन्तव्य इत्यर्थः।।१२४।।

प्रभा

अत्र संकीर्णतां विशदयति–**सेति**। सा अधुना दर्शितेयम्। संकीर्णा। यतो नामान्तरितमिश्रा हयादिशब्दानां विविधार्थकल्पनान्नामान्तरिताख्यया प्रहेलिकया मिश्रा ज्ञेया। तथा

वञ्चितारूपयोगिनी वञ्चिताख्या या प्रहेलिका तद्रूपेण योगः संबन्धोस्ति अस्या एतादृशी अपि अस्ति। सेनाशब्दस्य प्रसिद्धस्य अत्र अविवक्षितत्वाद् वञ्चिताख्या प्रहेलिकापि विद्यते इति भावः। एवमेव इतरासां प्रहेलिकानां अपि संकरक्रम उन्नेयो ज्ञेयः। अत्र द्वयोः सांकर्यं दर्शितम्। अनयैव दिशा त्रिचतुः प्रभृतीनां सांकर्यमुन्नेयमिति भावः॥१२४॥

अपार्थं व्यर्थमेकार्थं ससंशयमपक्रमम्।
शब्दहीनं यतिभ्रष्टं भिन्नवृत्तं विसन्धिकम्॥१२५॥

प्रभा

एतावत्पर्यन्तं द्वितीयपरिच्छेदारम्भे-काव्यशोभाकरान् धर्मान् अलंकारान् प्रचक्षते (२.१) इति उद्दिष्टान् काव्यशोभाकरत्वेनोपादेयधर्मान् अर्थालंकारान् शब्दालंकारांश्च निरूप्य-तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथंचन (१.१) इति हेयधर्मान् दोषान् व्याचिख्यासुर्भरतादिभिः संगृहीतानां दशसंख्याकानामेव विवरणं संप्रदायानुगृहीतं तथा अन्यैरधिकतया संगृहीतानां केषांचित् तेष्वन्तर्भावं केषांचिदनुपयुक्ततां मन्यमानः श्लोकद्वयेन तानुद्दिशति॥१२५॥

विवृति

सङ्कीर्णामुदाहरति-

सहया सगजा सभटा सेना वाहिनीयं न चेज्जिता पराजिता स्यादनेन तदायत्त(अस्म)त्पुत्रो मूढो विकल्पशून्यः, अथ च नायं मूढो म(ऽस्म)त्पुत्रो यतोऽक्षरत(ज्ञ) इति व्यामोहहेतुरर्थः। हश्च यश्च हयौ, गश्च जश्च गजौ, भश्च टश्च भटौ, इश्च नश्च इनौ, सह ताभ्यां वर्तत इति सहया सगजा सभटा सेना मातृका सिद्धा[?]मातृका अकारादिक्षकारपर्यन्ता जिता ज्ञानेनै(ज्ञातै)वानेन अतो नायममातृकोऽस्मत्पुत्रः, च इति मूढश्च न भवत्यक्षरज्ञो विधानिनीयं (विद्वानितीयं नामान्तरितामिश्रा। सा)नामान्तरिता यस्यां नाम्नि नानार्थकल्पनेत्युक्तम्। अमातृक इति यन्नाम तत्र

नानार्थइस्य(ष्टः) जननी सिद्धमात्व(तृका) इति च नानार्थकल्पना। तथा वञ्चितारूपयोगिनीयम्। 'वञ्चिताऽन्यत्व रूढेन यत्व शब्देन वञ्चन'मित्युक्तम्। अन्यत्र रूढः शब्दो हय इत्यधे गज इति वारणे भट इति पत्तौ सेना इति वाहिन्याम्। तेन वञ्च्यते(न्ते) हयगजभटेकारनकारा वर्ण(र्णा)इति उभयप्रहेलिकालक्षणं (ण) ससंर्गा(त्) सङ्कीर्णोच्यते। तदेवमेकां सङ्कीर्णां लक्ष्यलक्षणतः प्रतिपाद्य शेषाणामतिदेशं करोति एवमेव इतरासामनेनैव प्रकारेणेतरासामपराधिति(–मपि निभृता)व्युत्क्रान्तादिमिश्राणामपि सङ्करक्रमः साङ्कर्यप्रकारः उन्नेय ऊह्य इति।।

सङ्कीर्णामुदाहरति–**सहयेति।** सहया हकारयकारसहिता, हकारेण ऊष्माक्षराणि यकारेण अन्तस्थाश्च संगृह्णाति; सगजा गकारजकारसहिता, गकोरण कवर्गं जकारेण चवर्गं च संगृह्णति; सेना इकारनकारसहिता, इकारेण स्वरान् नकारेण तवर्गं च संगृह्णति; सभटा भकारटकारसहिता, भकारेण पवर्गं टकारेण टवर्गं च संगृह्णाति; एवंभूता मातृका न चेत् जिता शिक्षिता, अमातृकः मातृकारहितः मूढः स्यात्। अयं नः सुतः अमातृकोऽपि अक्षरज्ञ एव; मातृरहितः अक्षरज्ञ इति विवक्षितम्। तत्र मातृकारहितः इति प्रतीत्या विरोधध्वनिः। मातृकाशब्दः अक्षरावल्यां निरूढः मातरि निगूढः इति वञ्चिता; मातृकायाम् अक्षरावल्यात्मिकायां नाम्नि हयगजादिशब्दैः व्यामोहात् नामान्तरिता; इति सङ्कीर्णेयम्।।

प्रहेलिकामुपसंहरति–**सा नामान्तरितेति**[?]।।१२३–१२५।।

देशकालकलालोकन्यायागमविरोधि च।
इति दोषा दशैवैते वर्ज्याः काव्येषु सूरिभिः॥१२६॥

रत्नश्री

अपगतोऽर्थः अभिधेयो वाक्यसम्बन्धि यत इत्यपार्थम्। विरुद्धः पूर्वापराहतः अर्थोऽभिधेयो यस्मिन्निति व्यर्थम्। एकः स एव प्रतिपादितोऽर्थोऽभिधेयः पुनर्यस्मिन् प्रतिपाद्यते तदेकार्थम्। संशयोऽर्थविषयः, किमयमर्थोऽयं वेत्युभयार्थावलम्बी प्रत्ययः, तेन [स]ह वर्तते तज्जनकत्वादिति ससंशयम्। अपगतः क्रमो यथोद्देशं प्रत्याम्नायत इत्यपक्रमम्। शब्देन शब्दविद्याप्रसिद्धेन पदेन हीनं रहितं तद्विपक्षयोगादिति शब्दहीनम्। यतेः छन्दःशास्त्रविहितात् विगमात् भ्रष्टमपगतमिति यतिभ्रष्टम्। भिन्नं छन्दोविचितिविद्यारूढं वृत्तं पद्यं जातेरपि विरोधसम्भवात् यस्मिन्निति भिन्नवृत्तम्। विगतः सन्धिः शब्दशास्त्रप्रसिद्धो यणादेशादिर्यस्मिन्निति विसन्धिकम्।।

देशः पर्वतादिः। कालो दिवसादिः। कला नृत्यगीतादिविद्याः। लोकश्च सत्त्वलोको भाजनलोको वा चित्रप्रचारः। न्यायश्चान्वीक्षिकी। आगमश्च वेदादिः। देशकालकलालोकन्यायागमाः। तैर्विरोधो बाधा विद्यतेऽस्मिन्निति देशकालकलालोकन्यायागमविरोधि च तत्तद्व्यवस्थातिक्रमात्। विरोधीत्येतद्देशादिभिः प्रत्येकं सम्बन्धनीयम्। चकार उक्तसमुच्चये। इत्येते अनन्तरोद्दिष्टा दशैव। अन्यूनानतिरिक्ता दोषा गुणविपक्षत्वाद् वर्ज्याः शास्त्रचक्षुषा दृष्ट्वा परिहर्तव्याः। सूरिभिः प्रतिपत्तृभिः। कुत्र? काव्येषु पूर्वोक्तरूपेषु। काव्यविशेषदोषाणामपि क्वचित् केषाञ्चित् प्रतिनियमात्। तत्सम्भवित्वात् काव्यदोषास्ते, यथा

हेतुसम्भ[वि]नो[113a]ऽसिद्धादयो हेतुदोषाः। यथा चाराञ्जिकादयो धान्यसम्भविनो धान्यदोषा उच्यन्ते लोके। अत्रापार्थादयो यदा भावप्रधानाः, तदा अपार्थत्वादयो दूषणानीति भावसाधनेन दोषाः। दूषयन्ति वा काव्यव्यपदेशमात्रेण क्वचिद् वा अपवादविषये काव्यमेवेति तत्त्वात् अन्यत्रेति दोषाः। यद्वक्षति–

तन्मत्तोन्मत्तबालानामुक्तेरन्यत्र दुष्यति।

[३.१२८]

इत्यादि। तद्योगात् काव्यं दुष्टमिति ज्ञेयम्। यदा तु धर्मप्रधानाः, तदा अपार्थादयो दुष्यन्ति हेया भवन्तीति दोषाः। तदाभासत्वाच्च काव्येषु दोषाः। यथा दृष्टान्ताभासा दृष्टान्तेषु, शब्दाभासाः शब्देष्विति सर्वथा काव्यदोषास्ते वर्जनीया स्मृतिमतेति।।

अथ

प्रतिज्ञाहेतुदृष्टान्तहीनं दुष्टं च वर्ण्यते।
समासेन यथान्यायं तन्मात्रार्थप्रतीतये।।

[काव्यालङ्कारे ५.१]

इत्यादिना विस्तरेण प्रतिज्ञाहान्यादयो दोषाः काव्यलक्षणान्तरे दर्शिताः। ते किमिह नोच्यन्त इति चेदाह–

हृदयङ्गमा

इत्थं काव्यशोभाकरान् धर्मान् गुणालङ्कारान् निरूप्य काव्यस्य हेयत्वप्रतिपादकानां धर्माणां बहूनां दोषाणां सविस्तरवर्णने ग्रन्थबाहुल्यभिया प्राधान्येन नितान्तत्याज्यान् दश दोषानुद्दिशति,

अपार्थमित्यादि। –अपार्थं निरर्थकं, व्यर्थं विरुद्धार्थम्, एकार्थम् अभिन्नार्थं, ससंशयं सन्दिग्धम्, अपक्रमं यथाक्रमरहितं, शब्दहीनम् ऊहादिना पूर्य्यं, यतिभ्रष्टं विच्छेदरहितं, भिन्नवृत्तम् असमवृत्तं, विसन्धिकम् अकृतसन्धि, देशादिविरोधि च इति, इतिशब्दः वाक्यसमाप्तौ, ईदृशं वाक्यं दुष्टमित्यर्थः, एते अपार्थतादयः, दश एव दोषाः काव्यापकर्षकधर्माः, सूरिभिः विद्वद्भिः, काव्येषु वर्ज्याः त्याज्याः, शाब्दबोधप्रतिकूलतया प्रयोक्तुरज्ञताप्रकटनात् इति भावः। [उक्तञ्च, –दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति'' इति। एवकारेण किञ्चिद्वैरस्यप्रतिपादकानां श्रुतिकटुप्रभृतीनां व्यवच्छेदः, तेषाम् अन्वयबोधाप्रातिकूल्येन नात्यन्तं हेयत्वप्रतिपादकत्वात् इति निष्कर्षः। अत्रेदमवधातव्यम्; –सामान्यलक्षणाभिधानानन्तरमेव विशेषाणामभिधानस्यौचित्येऽपि गुणानां काव्यशरीरस्योत्कर्षाधायकत्वेन सलक्षणोदाहरणप्रदर्शनात् तदवगतेश्च तद्विपर्य्ययात्मानो दोषाः इति तु सामर्थ्यादेव सामान्यलक्षणावगमात् तदप्रदर्श्यैव विशेषाः दर्शिता इति। एवमेव चोक्तं वामनेनापि, –"गुणविपर्य्ययात्मानो दोषाः'' (२य अधि० १अ० १सू०) "अर्थतस्तदवगमः'' (२अधि० १अ० २सू०) इति। "किमर्थं ते पृथक् प्रपञ्च्यन्ते? इत्याह, –"सौकुमार्य्याय प्रपञ्चः'' (२अधि० १अ० ३सू०) इति च। एतेन काव्ये गुणानामुपादेयधर्म्मतया तत्राभिमतप्रतीतिव्यवधायकत्वेन ये हेयतामापादयन्ति ते दोषा इति लक्षणमायातम्; तदुक्तं सरस्वतीकण्ठाभरणे, –"दोषाः पदानां वाक्यानां वाक्यार्थानाञ्च षोड़श। हेयाः काव्ये कवीन्द्रैर्ये तानेवादौ प्रचक्ष्महे।।'' इति। यद्वा, –दुष्यति विकृतं भवति काव्यमनेन इति दोषः इति व्युत्पत्तिबलादेव लक्षणावगतिः। प्रकाशकृताऽपि, –"मुख्यार्थहतिः दोषः'' इति लक्षणं कृतं, तेनास्य

भावसाधनान्तता सूचिता; ततश्च काव्यस्यापकर्षो दोष इति, तच्च हेयत्वञ्चापकृष्टत्वम्, अपकर्षश्च शब्दानामर्थानां वाक्यानां वाक्यार्थानां व्यङ्ग्यरसादेश्च सम्भवति इति बहुविधतया कार्त्स्न्येन वक्तुमशक्यमिति दश एवात्र दर्शिताः)॥१२५॥१२६॥

प्रभा

अपार्थमिति देशकालेति च। दोषाणां पूर्वं सामान्यलक्षणं विधेयमनन्तरं भेदा इत्ययं शास्त्रीयः पन्थाः। तदनुरोधेन दोषसामान्यलक्षणं वर्ज्या इति ज्ञेयम्। तथा च काव्येषु सूरिभिर्ये अभिमतप्रतीतित्वयवधायकतया विघ्नभूताः सन्तः शश्वत् काव्यस्य हेयतामापादयन्ति इति वर्जितास्ते दोषा इति दोषसामान्यलक्षणं ज्ञेयम्। वामनो गुणविपर्ययात्मनो दोषा इत्याह। प्रकाशकृत्–मुख्यार्थहतिर्दोश इति। केचित्तु दुष्यति काव्यं अनेनेति करणे घञा दोषशब्दं निष्पाद्य तदेव लक्षणमाहुः। सर्वेषां संग्रह उपर्युक्तलक्षणे भवतीति सुधीभिराकलनीयम्। यस्य विशेषाः। अपार्थं अर्थशून्यम्। व्यर्थं विरुद्धार्थम्। एकार्थं अभिन्नार्थम्। ससंशयं संदिग्धम्। अपक्रमं क्रमविरहितम्। शब्दहीनं अपेक्षितशब्दन्यूनम्। यतिभ्रष्टं विश्रान्तिविच्छेदशून्यम्। भिन्नवृत्तम् वृत्तनियमच्युतम्। विसंधिकं संधिशून्यम्। देशकालकलालोकन्यायागमानां विरोधि विरुद्धार्थं च काव्यं दुष्टमिति शेषः। इति एते सूरिभिः काव्येषु वर्ज्या दोषा दश सन्तीति शेषः। उक्तं हि भरतेन–

गूढार्थमर्थान्तरमर्थहीनं भिन्नार्थमेकार्थमभिप्लुतार्थम्।
न्यायादपेतं विषमं विसंधि शब्दच्युतं वै दश काव्यदोषाः॥
(१६.८४)

इति। प्रकाशकारैः-रसश्च मुख्यस्तदाश्रयाद्वाच्यः (७.१.) इत्यादिप्रबन्धेन रसप्राधान्यतया यद् रस-अर्थ-शब्दगतत्वेन दोषाणां त्रैविध्यं परिकल्पितं तन्नेष्टं आचार्यदण्डिनः। यतः-शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली (१.१०) इत्येतावदेव काव्यलक्षणं तस्याभिप्रेतम्। तदनुरोधेनैव अत्र शब्दार्थानां दोषाणां परिगणनं तेन कृतमिति बोद्धव्यम्॥१२६॥

विवृति

इदानीमपार्थ इत्यादिना दश काव्यदोषानाह–

गुणदोषस्वरूपानभिज्ञस्य दोषपरिहारेण काव्यकरेण गुणदोषपरीक्षायां चानधिकारात्। तदुक्तम्–

गुणदोषानशास्त्रज्ञः कथं विभजते जनः।

तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन॥इति।

अतः काव्यदोषान् कथयति॥

अथ काव्यदोषानाह। काव्यं येन दुष्यति स दोष इति करणे घञा दोषसामान्यलक्षणं मत्वा तद्विशेषानुद्दिशति– **अपार्थमिति**॥१२६॥

प्रतिज्ञाहेतुदृष्टान्तहानिर्दोषो न वेत्यसौ।
विचारः कर्कशप्रायस्तेनालीढेन किं फलम्॥१२७॥

रत्नश्री

प्रतिज्ञा साध्यनिर्देशः, विधिरूपो निषेधलक्षणो वा। साध्यस्य सर्वस्य सदसत्त्वाभ्यां व्याप्तेः। स च प्रमाणान्तराव्याहतः। प्रमाणान्तरनिरस्तस्याहेतुगोचरत्वात्। यथोक्तम्–

सन्दिग्धे हेतुवचनाद् व्यस्तो हेतुरनाश्रयः।

[प्रमाणवार्तिके ४.९१]

इति। तथा

हेतुभिस्त्राणमुपेतं नैव यो हतः।

इत्यादिः। अन्यत्र तद्विस्तरः। हेतुः, तस्या एवंरूपायाः प्रतिज्ञाया साधनभूतोऽर्थः त्रिरूपोऽन्यो वा। तस्यापि तल्लक्षणशास्त्रे विस्तरः। दृष्टान्तः साध्यसाधनयोः सम्बन्धप्रतिपत्तिविषयभूतोऽर्थः कश्चित। स च साधर्म्यदृष्टान्तो वैधर्म्यदृष्टान्तश्चेत्यादिना अन्यत्र निर्णीतः। तेषां त्रयाणां हानिर्यथा[क्रमं] प्रतिज्ञाहेतुदृष्टान्तहानिः। [द्वन्द्वात् परं श्रूयमाणस्य] प्रत्येकमभिसम्बन्धात् प्रतिज्ञाहानिः हेतुहानिः दृष्टान्तहानिश्चेति त्रिविधो भवति। तत्र प्रतिज्ञाहानिः– तयैव प्रतिज्ञया हेतुना सिद्धान्तेन सर्वागमैः प्रसिद्धधर्मतया प्रत्यक्षेण च बाधेत्यनेकधा। यथोक्तं भामहेन–

तदर्थहेतुसिद्धान्तसर्वागमविरोधिनी।

[113b] प्रसिद्धधर्मा प्रत्यक्षबाधिनी चेति दुष्यति॥

[काव्यालङ्कारे ५.१३]

इति। हेतुहानिरसिद्धत्वादिलक्षणः। यथोक्तम्–

हेतुस्त्रिलक्षणो ज्ञेयो हेत्वाभासो विपर्ययात्।

[काव्यालङ्कारे ५.२१]

इति। तस्यान्यत्र विस्तरः। दृष्टान्तहानिः साध्यधर्मविरहादिरूपात्। तदुक्तम्–

साध्यसाधनधर्माभ्यां सिद्धो दृष्टान्त उच्यते।
तद्विपर्ययतो वापि तदाभस्तदवृत्तितः।।

[काव्यालङ्कारे ५.२६]

इति। तद्विस्तरोऽप्यन्यत्रैव। सेयं त्रिविधा हानिः प्रत्येकमनेकशो नाना काव्येषु दोषः। वैगुण्यं वा दोषो वेति सदसत्पक्षविकल्पनम्। विचारोऽयं [वि]गृह्य परीक्षा[या] इह कथञ्चित् प्रस्तुतत्वेऽपि [मुख्यतस्तस्याः] तर्कशास्त्र[गोचर]त्वात् कर्कशप्रायः कर्कशभागः अतिगम्भीरत्वादिहानधिकाराच्च. प्रायो भूयान् यस्मिन्निति कृत्वा। तेन वा प्रायो बहुलः। प्रायेण भूम्ना वा कर्कशः कर्कशप्रायः। राजदन्तादिषु दर्शनात् पूर्वनिपातः। कर्कशप्रायः कठिनभूयिष्ठः अरञ्जक इति यावत्। इह च कोमलप्रायः काव्यप्रतिनियतः गुणदोषविषयो विचारोऽधिकृतः। तस्मात् तेन कर्कशप्रायेण विचारेण आलीढेन अनुष्ठानमुखेनादृतेन किं फलम्? काव्यप्रतिनियतगुणदोषनिर्णयरूपं प्रयोजनं किमस्ति? नैवेत्याशय। तथा चाह–

काव्यलक्षणे काव्यप्रतिनियता दोषा गुणाश्च विचार्यन्ते। न शास्त्रान्तरसाधारणा अपि, सर्वशास्त्रसमुच्चयप्रसङ्गात्। ततश्च अत्रैव सर्वगुणदोषव्युत्पत्तौ शास्त्रान्तराणि व्यर्थानि स्युः, तावन्मात्रफलत्वाद् विद्यास्थानानाम्। तत्रैतत्प्रतिनियतव्युत्पत्तेरन्यतः सिद्धेरिदमपि व्यर्थं स्यात्, सर्वत्र प्रतिनियमाभावात्। न चैवम्, गुणदोषव्युत्पत्तीनां प्रतिशास्त्रं नियमदर्शनात्। अथ काव्याङ्गत्वात् प्रतिज्ञाभेदादिकं विद्यान्तरमपि संक्षिप्तमिहाभिधानीयम्। तत् किं छन्दोविचित्यादिकं तत्र नाभिमतम्? तस्यापि काव्याङ्गत्वेन निमित्तस्य समानत्वात्। न च यत्किञ्चिदिह दर्शितम् इत्येतावता शास्त्रान्तरे सम्यग्ज्ञानं सम्पद्यते, पुनस्तच्छास्नादेव यथावदवगमव्यपेक्षणात् ज्ञानानां [च] प्रतिशास्त्रं नियतत्वात्। ततस्तत एव तत्तज्ज्ञानमपेक्षणीयम्। यत् पुनः काव्यलक्षणस्यास्य प्रमाणलक्षणीकरणम्, तदाहोपुरुषिकामात्रमिति सूक्तमिदं तेनालीढेन किं फलमिति॥

[114a] एषां यथोद्देशं सनिर्देशं सापवादं [विवरणं] कर्तुं प्रक्रमते–

हृदयङ्गमा

ननु दशैवेति अवधारणमनुचितं प्रतिज्ञाहान्यादेरपि विवक्षितार्थाप्रतिपत्त्या दोषत्वकीर्त्तनात्। उक्तञ्च भगवता गौतमेन, –"प्रतिदृष्टान्तधर्मा- भ्यनुज्ञास्वदृष्टान्ते प्रतिज्ञाहानिः" इति। अत एव "प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः" इत्यादिसूत्रेण प्रतिज्ञाहान्यादीनां निग्रहस्थानत्वं तेनोक्तम्। उदाहृतञ्च यथा भोजराजेन, –"यावज्जीवमहं मौनी ब्रह्मचारी पिता मम। माता च

मम बन्ध्याऽऽसीदपुत्रश्च पितामहः॥'' इति। भामहादयस्तु तस्य दोषत्वं नाङ्गीकुर्व्वन्ति। यथा, –''प्रतिज्ञाहेतुदृष्टान्तहीनं दुष्टञ्च नेष्यते'' इति। तदेतं संशयमपाकर्त्तुं स्वमतमाह, प्रतिज्ञेति। –प्रतिज्ञा साध्यनिर्देशः, हेतुः साध्यसाधनं, दृष्टान्तः प्रसिद्धोदाहरणविन्यासः, तेषां हानिः विरोधः अभावश्च, दोषः काव्यस्य हेयत्वप्रतिपादकः, न वा इति संशये, असौ एतत्प्रश्नविषयकः, विचारः निश्चयः, एकपक्षावधारणमित्यर्थः, प्रायः कर्कशः न्यायशास्त्रीयत्वात् कठिनः, कर्कशः नीरस इत्यर्थः वा, तस्मात् तेन विचारेण, आलीढ़ेन आस्वादितेन, ज्ञातेन इत्यर्थः, किं फलम्? न किमपि फलमस्ति इत्यर्थः। (तथा हि काव्यस्य वैरस्यजनकधर्मतया दोषाणामवबोधः बोद्धृणां स्वत एव भवति, न च तदर्थं ग्रन्थबाहुल्यीकरणं युक्तं केवलम् अत्यन्तपरिहार्य्या एव कतिपये काव्यदोषा अत्र दर्श्यन्ते, प्रतिज्ञादिहानेश्च नात्यन्तपरिहार्य्यता, अप्रतिज्ञातानाम् अपि प्रसङ्गसङ्गत्या कविभिर्वर्णितत्वं दृश्यते। हेतोरभावश्च प्रसिद्धसाध्ये न वैरस्यमावहति, दृष्टान्तश्च अलङ्कारस्वरूप एव, तदभावेन न काव्स्यात्यन्तवैरस्यम्, अनलङ्काराणाम् अपि काव्यत्वस्य सर्वैरेवाङ्गीकृतत्वात्; अतो न्यायसूत्रवृत्तिकृताऽप्युक्तं, –''दृष्टान्तस्य सामयिकत्वेनासार्वत्रिकत्वेऽपि न क्षतिः'' इति। ततश्च रसापकर्षजनकत्वमेव दूषकतावीजमित्यवधेयम्) ॥१२७॥

प्रभा

इदानीं भामहेन-प्रतिज्ञाहेतुदृष्टान्तहीनं दुष्टं च नेष्यते इति आधिक्येन गणितान् दोषान् निराकरिष्णुराह-**प्रतिज्ञेति**। तत्र

साध्यनिर्देशः प्रतिज्ञा। साध्यसाधनं हेतुः। प्रसिद्धोदाहरणोपन्यासः दृष्टान्तः। एषां हानिर्वैकल्यम्। दोषोभिमतप्रतीतिव्याघातकतया वर्ज्यत्वेन दोषः। न वेति असौ पर्यनुयुज्यमानो विचार एकतरावधारणेन निश्चयः। प्रायः कर्कशः केवलशास्त्रीयसरण्यवगाहित्वाद् रूक्षः। अतः सरसेस्मिन् साहित्यप्रबन्धे आलीढेन आस्वादितेन ज्ञातेनेत्यर्थः। तेन दोषादोषत्वविचारेण किं फलम् न कोप्युपयोगोस्ति। यथा शास्त्रीया अपि अभिधालक्षणाव्यञ्जनादयः पदार्था उपयुक्ता इति तत्तदलंकारे विवेचिता यथा शास्त्रीय उद्देशविधेयभावविचार उत्प्रेक्षालंकारे सप्रपञ्चं निरूपितो न तथायं विषय इति न तद्विचारः क्रियते। तथा अभिमतप्रतीतिव्याघातकरं दुष्टं तच्च न सर्वत्र प्रतिज्ञादिहानौ वर्तते। अप्रतिज्ञातानां प्रासङ्गिकसाध्यानामपि कविभिर्वर्णितत्वात्। निर्हेतुता च प्रसिद्धसाध्ये नैव वैरस्यमावहति। दृष्टान्तोपन्यासस्त्वलंकार एव। तद्धानिरपि नात्यन्तवैरस्यजनिका। अलंकारशून्यत्वेपि काव्यत्वानपायात्। तस्मान्न केवलं प्रतिज्ञादिहानिर्दोशस्वरूपा किंतु यत्र सा अभिमतप्रतीतिव्याघातकारिणी तत्र दोषो नान्यत्र इति अनित्यदोषविचारो नायमस्माभिर्वितन्यते इति भावः।।१२७।।

विवृति

अपरे भामहादयः अपार्थादिवत् प्रतिज्ञ हानिदोषोऽपि काव्ये परिहर्तव्य इति तल्लक्षणमपि प्रणीतवन्तः। तदनिच्छन् स्वमतं दर्शयति–

प्रतिज्ञादिहानिर्दोषः साध्यनिर्देशः प्रतिज्ञा। साध्यं (ध्य) साधनं हेतुः। लौकिकपरीक्षकयोः यत्र बुद्धिसाम्यं स दृष्टान्तः। तेषां हानिः

स दोषो न चा(वा)सौ दोष (इति विचारः कर्कशप्रायः। तेन चिन्तितेन न किमपि प्रयोजनम्। अतो न निरूप्यत इति)॥

दशैवेत्यधारणं न युक्तम्, भामहेनोक्तानां प्रतिज्ञाहान्यादीनामपि विद्यमानत्वात्; इति चेत्, आह–**प्रतिज्ञेति**। प्रतिज्ञाहानिहेतुहानिदृष्टान्तहान्यादयः अनुमानदोषाः, काव्ये न दोषाय कल्पंन्ते; इति विचारोऽपि अयुक्तः॥१२७॥

समुदायार्थशून्यं यत् तदपार्थमितीष्यते।
तन्मत्तोन्मत्तबालानामुक्तेरन्यत्र दुष्यति॥१२८॥

रत्नश्री

[१]समुदायस्य प्रकरणात् पदसम्बन्धिनो वाक्यस्य अर्थोऽभिधेयम् अङ्गाङ्गिभूतक्रियाकारकसम्बन्धविशेषलक्षणं सांव्यवहारिकम्। तेन शून्यं रहितम्। न पदार्थ मात्रेण, तस्य क्वचिदप्यव्यभिचारात्। दशदाडिमानि षडपूपा इत्यादावपि पदार्थप्रत्ययोदयात्। यत् इत्यनूद्य तत् समुदायार्थशून्यम् अपार्थम्। इह दोषप्रस्तावे। अपार्थमिति वा अपार्थं नाम इष्यते स्मर्यत इति विधिः। तदपार्थं दुष्यति काव्यदोषो भवति इत्युत्सर्गः। तस्यापवादमाह–मत्तेत्यादि। मत्ता मदिरामदादियोगात्। उन्मत्ता वायुक्षोभादिचित्तविक्षेपात्। बालाः हेयोपादेयज्ञानविकलाः अव्युत्पन्नाः तथा बालकल्पाः शक्तिविकला वृद्धा असंबद्धभाषिणः। तेषां तथाविधाया एवोक्तेरुचित्वात्। सैव तेषां सूक्तिरिति। [अतः] तेषामुक्तेरन्यत्र सुभाषितविषये [तदिदमपार्थं] दुष्यति दुष्टं जायते॥

तदुदाहरति–

हृदयङ्गमा

क्रमेण दोषप्रभेदान् लक्षयन् प्रथमम् अपार्थं निरूपयति, समुदायेति। –समुदायस्य वाक्यघटकपदसमूहस्य महावाक्यघाटक-वाक्यसमूहस्य च, यः अर्थः शाब्दबोधेन एकतामापन्नः प्रतिपाद्यः, तेन शून्यं यत वाक्यं, तत् अपार्थम् अपार्थनामदोषान्वितम्, इति इष्यते कथ्यते इत्यर्थः, वाक्यार्थानां पदार्थानां वा

योग्यताकाङ्क्षासत्तिविरहेण यत्र शाब्दबोधः बाधितो भवति तत् अपार्थवत् वाक्यमिति निष्कर्षः, तच्च उन्मत्तानाम् उन्मादग्रस्तानां, मत्तानां सुरापानेन विकृतानां, तथा बालानां शिशूनाम्, उक्तेः वचनात्, अन्यत्र दुष्यति, उन्मत्तादिवचने तु अपार्थत्वादेः न द्रोषत्वम् इत्यर्थः॥१२८॥

प्रभा

उद्देशक्रमानुरोधेनादावपार्थं लक्षयति-**समुदायेति।** समुदायस्य वाक्यघटकपदसमूहस्य महावाक्यघटवाक्यसमूहस्य वा योर्थो विशेषणविशेष्यभावेन संबद्धतया एकतया प्रतीयमानः प्रतिपाद्यस्तेन शून्यम्। यद्वाक्यं महावाक्यं वा। तद् अपार्थम् अपार्थसंज्ञकदोषदुष्टम् इष्यते कविभिरिति शेषः। यत्र योग्यताकाङ्क्षाऽऽसत्त्यभावेन न पदानां वाक्यानां वार्थावगतिर्भवति तद् अपार्थम् इति भावः। तच्च अपार्थं वाक्यं उन्मत्ता उन्मादरोगाभिभूता मत्ता मद्यादिना मूढा बालाः शिशवस्तेषां उन्मत्तमत्तबालानाम्। उक्तेः भाषणाद् अन्यत्र दुष्यति। अनुन्मत्तादीनामुक्तौ तद्वाक्यं दुष्टम्। उन्मत्तौक्तौ न दुष्टम्। इति ज्ञेयमिति भावः॥१२८॥

विवृति

(समुदायार्थ)शून्यं वाक्यार्थशून्यं यत्तदपार्थकमितीष्यते। अस्यापवादमाह। तन्मत्तोन्मत्तबालानां या उक्तिः तस्या अन्यत्र दुष्यति मत्ताद्युक्तो(क्तौ)प(न) दोषोऽपार्था(र्थम्। अ)पार्थान्यद्य-(न्येव हि तद) भिधानानीत्यर्थः॥

अपार्थं लक्षयति-**समुदायेति।** प्रत्येकं वाक्यानाम् अन्वितार्थत्वेपि समुदायार्थशून्यं यत् तत् अपार्थम्। तस्य क्वचित् गुणत्वं कथयति-**तन्मत्तेति**॥१२८॥

समुद्रः पीयते देवैरहमस्मि जरातुरः।
अमी गर्जन्ति जीमूता हरेरैरावणः प्रियः॥१२९॥

रत्नश्री

न ह्यत्र समुद्रः पीयत इत्यादेः पदसमुदायस्य कश्चिदेकोऽर्थो गृह्यते यः काव्यार्थः स्यात्। अवयवार्था एवान[न्विताः] शलाकाकल्पाः प्रतिभान्ति। तदीदृशमपार्थं विज्ञेयम्॥

उत्सर्ग[त]स्त्वसम्भवमिदमिति अपवादमुखेन निगमयन्नाह–

हृदयङ्गमा

अपार्थत्वं दर्शयति, समुद्र इति। –देवैः सुरैः मेघैर्वा, समुद्रः पीयते, ("देवैः" इत्यत्र "सोऽयम्" इति पाठश्च दृश्यते) अहं जरातुरः जराक्रान्तः, अस्मि, अमी जीमूता मेघाः, गर्जन्ति, ऐरावणः ऐरावतनामा हस्ती, हरेरिन्द्रस्य, प्रियः। (अत्र वाक्यचतुष्टयस्य परस्पराकाङ्क्षाभावेन अङ्गाङ्गित्वाभावात् एकवाक्यताया अभाव इत्यतः समुदायस्यार्थो नास्ति। उक्तञ्च, –"स्वार्थबोधसमाप्तानाम् अङ्गाङ्गित्वव्यपेक्षया। वाक्यानाम् एकवाक्यत्वं पुनः संहत्य जायते॥" इति। ततश्चायं वाक्यार्थगत एव दोषः। कण्ठाभरणेऽपि तदेवोक्तं यथा, –"उक्ता वाक्यार्थजा दोषास्तेषां वक्ष्यामि लक्षणम्। समुदायार्थशून्यं यत्तदपार्थं वचः स्मृतम्॥" इति। उदाहरणान्तरं यथा, –"जरद्गवः कम्बलपादुकाभ्यां द्वारि स्थितो गायति मङ्गलानि। तं ब्राह्मणी पृच्छति पुत्रकामा राजन्! रुमायां लशुनस्य कोऽर्धः?"॥ इति। इदञ्च बहुवाक्यगतम् अपार्थत्वं ज्ञातव्यम्। एवं

बहुपदगतमपि तत् दृश्यते, यथा, –वह्निना सिञ्चतीत्यादौ योग्यताद्यभावेन समुदायार्थशून्यत्वम् इति बोध्यम्)।।१२९।।

प्रभा

अपार्थमुदाहरति–**समुद्रः पीयते इति।** देवैः समुद्रः पीयते। अत्र योग्यताया अभावात् पदसमुदायार्थशून्यत्वम्। अहं जरातुरोस्मि। अमी जीमूताः मेघा गर्जन्ति। हरेः इन्द्रस्य। ऐरावणः ऐरावतः। प्रियः। इति त्रीणि वाक्यानि स्वार्थबोधसमर्थान्यपि परस्परानाकाङ्क्षत्वात् तेषामङ्गाङ्गित्वविरहेण एकवाक्यत्वाभावः। ततश्च न समुदायार्थप्रतीतिः। न वा केवलं स्वार्थसंपादनेन विश्रान्तौ विशेषार्थावगतिः। अतोपार्थमेतत्। महावाक्ये अवान्तरवाक्यानामङ्गाङ्गित्वेनैवार्थबोधो भवति। तथाचोक्तम्–

स्वार्थबोधसमर्थानामङ्गाङ्गित्वव्यपेक्षया।
वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते।।

इति।।१२९।।

विवृति

अपार्थमुदाहरति–

समुद्रः पीयते देवैरित्यादि। इदं दशरथादिवा(दशदाडिमा)दिना व्याख्यातम्।।

अपार्थमुदाहरति–**समुद्र** इति।।१२९।।

इदमस्वस्थचित्तानामभिधानमनिन्दितम्।
इतरत्र कविः को वा प्रयुञ्जीतैवमादिकम्॥१३०॥

रत्नश्री

इदमनन्तरोक्तमपार्थमभिधानं वचनम् अस्वस्थं चित्तमन्तः[करणं] येषामित्यस्वस्थचित्तानां मत्तोन्मत्तादीनां [अभिधानमनिन्दितं] स्यात्। अन्यत्र तु निन्दितम्। अथवा इतर[त्र] स्वस्थेषु विषये तत्कर्तृत्वकल्पनात्। एवमिदमनन्तरोक्तमपार्थमादिर्यस्य दशदाडिमादेस्तदेवमादिकमसम्बद्धं [वाक्यजातं] को नाम कविरकुशलोऽपि, प्रागेव निपुणः। प्रयुञ्जीत रचयेत्? नैव [कश्चित् प्रयुङ्क्ते]। मूलहानेरतिस्थूलत्वाच्च नात्र भ्रान्तिः सम्भाव्य[त] इति भावः। वाक्यविकारत्वात् तु इदमपि कथञ्चित् काव्ये सम्भवेदिति सम्भवमात्रकल्पनया स्वस्थेष्वपि दर्शितमिति॥

हृदयङ्गमा

इदमिति। –अस्वस्थचित्तानाम् उन्मंत्तादीनाम्, इदं पूर्वोक्तम्, अभिधानं समुद्रः पीयते इत्यादि वचनम्, अनिन्दितम् अदुष्टत्वेन परिगृहीतं, भवतीति शेषः, इतरत्र अन्यत्र, अस्वस्थचित्तादिभ्य इति शेषः, उन्मत्तादीन् विना इत्यर्थः, को वा कविः एवमादिकं प्रयुञ्जीत? न कोऽपि कविः प्रयुञ्जीतेत्यर्थः। (तदुक्तं कण्ठाभरणेऽपि भोजेन, –"अथ वाक्यार्थदोषाणामदोषः कथ्यतेऽधुना। समुदायार्थशून्यं यत् तदपार्थं प्रचक्षते॥ तन्मत्तोन्मत्तबालानामुक्तेरन्यत्र दुष्यति॥ यथा, –क्वाकार्य्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि दृश्येत सा, दोषाणामुपशान्तये श्रुतमहो! कोपेऽपि कान्तं मुखम्। किं वक्ष्यन्त्यपकल्मषाः कृतधियो

रेखैव साऽन्यादृशी, चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं धास्यति?''।। इति। अस्य समुदायार्थशून्यतया अपार्थस्यापि उन्मत्तवचनत्वाद्गुणत्वमित्यवधेयम्) ।।१३०।।

प्रभा

अपार्थदोषस्य गुरुत्वमपवादपरिहारपूर्वकं कथयति–**इदमिति।** अस्वस्थचित्तानां उन्मादादिभिरभिभूतमनसाम्। इदं पूर्वदर्शितम्। अभिधानं कथनम्। अनिन्दितं निर्दोषम् स्यात्। प्रयोक्तुरनवधानतया शिष्टास्तद्वाक्यं सदोषं नैव जानीयुरिति भावः। इतरत्र उन्मत्तादिभिन्नप्रयोक्तृषु मध्ये। को वा कविः पण्डित एवमादिकं योग्यताकाङ्क्षादिभिर्विरहितं वाक्यं प्रयुञ्जीत न कोपि प्रयुञ्जीत इत्यर्थः।।१३०।।

विवृति

इदमेवंविधमपार्थमपि अस्वस्थचित्तानां मदिरात्रिणुरस्तुत (मदिरादिविलुप्त)विवेकानां पाकादिग्रहादिकामादिचाराद्युपप्लुत-चित्तानाम- भिधानमनिन्दितम्। तेभ्योऽन्यत्र स्वस्थः कविः को वा प्रयुञ्जीत एवमादिकमिति।।

तस्य दोषगुणत्वे विभजते–इदमिति।।१३०।।

एकवाक्ये प्रबन्धे वा पूर्वापरपराहतम्।
विरुद्धार्थतया व्यर्थमिति दोषेषु पठ्यते॥१३१॥

रत्नश्री

एकं च तद् वाक्यं च इत्येकं वाक्यं पद्यात्मकं गद्य[मयं] वा [तत्र] प्रबन्धे वा सर्गबन्धादिके यत्र क्वचिदादौ मध्ये अन्ते वा पूर्वापराभ्यां पराहतं पूर्वापरविरुद्धं वचनं व्यर्थमिति व्यर्थं नाम पठ्यते ज्ञायते अत्र दोषेषु प्रकरणात् काव्यसम्बद्धेशु मध्ये। अयमपि काव्यदोष इति यावत्। कुतः? विरुद्धः प्रतिषिद्धः अर्थोऽभिधेयम् यस्मिन् तस्य भावः। तया हेतुभूतया। न तु विगतार्थतया, अपार्थमित्येव तस्य संग्रहादिति॥

हृदयङ्गमा

व्यर्थं निरूपयति, एकवाक्ये इति। –एकवाक्ये एकस्मिन् वाक्ये, वा प्रबन्धे महावाक्ये, विरुद्धार्थतया विपरीतार्थत्वेन, यत् पूर्वापरपराहतं पूर्वापरयोः आद्यन्तभागयोः, पराहतं सङ्गतिरहितं, तत् वाक्यं, व्यर्थं व्यर्थाख्यदोषान्वितम्, इति दोषेषु मध्ये पठ्यते गण्यते। (परस्परविरुद्धार्थत्वेन पूर्वापरयोरसङ्गत्या यत् कस्यचिद्व्यर्थता-प्रत्यायनं तत् व्यर्थत्वमिति लक्षणम्। भोजराजस्तु विगतोऽर्थः प्रयोजनमस्येति व्यर्थमिति व्युत्पत्त्या विशब्दः विगतार्थक इत्याहः उक्तञ्च, –"व्यर्थमाहुर्गतार्थं यत् यच्च स्यान्निष्प्रयोजनम्" इति। उदाहरणं यथा, –"आहिंषातां रघुव्याघ्रौ शरभङ्गाश्रमं ततः। स्वामहौषीत्तनुं वह्नौ दृष्टवा तौ रामलक्ष्मणौ॥" इति। अर्थविरोधश्च शाब्दबोधानन्तरं पर्य्यालोचनया प्रतीयते, अपार्थे तु आकाङ्क्षादीनाम् अभावेन शाब्दबोध एव नास्तीत्यनयोर्भेदः। अत्र हि

विरुद्धमतिकारित्वप्रकाशितविरुद्धत्वामत- परार्थत्वपरिपन्थिर-साङ्गादयो दोषा अन्यैरुक्ता अन्तर्भवितुमर्हन्तीति सुधीभिर्विभाव्यम्)।।१३१।।

प्रभा

व्यर्थं लक्षयति–**एकेति**। एकवाक्ये एकस्मिन् वाक्ये। तथा प्रबन्धे वाक्यसंघाते वा। पूर्वापरपराहतं पूर्वापरविरुद्धार्थम्। वस्तु अस्ति चेत् तद् व्यर्थतया विरुद्धार्थतया व्यर्थम्। इति व्यर्थसंज्ञककदोषेषु पट्यते गण्यते। अनेन व्यर्थमित्यत्र विरिति उपसर्गो विरुद्धार्थको न तु अभावार्थक इति सूचितम्। अर्थविरोधश्चात्र शाब्दबोधानन्तरं पर्यालोचनया प्रतीयते। अपार्थे तु आकाङ्क्षादिविरहात् शाब्दबोध एव न भवति। एकवाक्ये प्रबन्धे च इत्यनेन वाक्यप्रबन्धपर्यालोचनया विरोधप्रतिभानं अस्या विषयः प्रकरणादिपर्यालोचनाया विरोधप्रतिभासस्तु वक्ष्यमाणदेशकालादि-विरोधविषय इति विवेकः। अस्मिन् एव दोषे अन्यैरुक्ता विरुद्धमतिकारित्व-प्रकाशितविरुद्धत्व-अमतपरार्थत्व-परिपन्थिरसाङ्ग-परिग्रहादयो दोषा अन्तर्भवन्तीति ज्ञेयम्।।१३१।।

विवृति

व्यर्थलक्षणमाह–

एकवाक्ये प्रबन्धे वा पूर्वापरपराहतं विरुद्धार्थतया विरुद्धोऽर्थोऽस्येति विरुद्धार्थं व्यर्थं न पुनर्विगतार्थं तस्यापार्थमित्यनेनैव गतत्वाच्च (त्) दोषेषु पठ्यते।।

व्यर्थं लक्षयति–**एकेति**।।१३१।।

जहि शत्रुकुलं कृत्स्नं जय विश्वम्भरामिमाम्।
न हि ते कोऽपि विद्वेष्टा सर्वभूतानुकम्पिनः॥१३२॥

रत्नश्री

शत्रूणां कुलं कृत्स्नं सर्वं जहि नाशय राजन्! ततो निःसपत्नं विश्वम्भरां महीमिमां जय आत्मसात् कुरु। ते तव कोऽपि कश्चिद् विद्वेष्टा शत्रुर्न विद्यते। कुतः सर्वभूतानुकम्पिनः सर्वभूतहितैषित्वात्। अन्तर्भावितहेत्वर्थं विशेषणमिदम्। अत्र शत्रुः पूर्वं विहित एव प्रश्चात् तत्पर्यायेण निषिद्धः। पूर्वापराहतमीदृशं व्यर्थमेकवाक्यविषयमवगन्तव्यम्। प्रबन्धविषयं तु तत्र संभवेदिति॥

अस्यापवादं दर्शयन्नाह–

हृदयङ्गमा

व्यर्थतां दर्शयति, जहीति। –कृत्स्नं समग्रं, शत्रुबलं रिपुसैन्यं, जहि नाशय, इमां विश्वम्भरां पृथिवीं, जय, सर्वभूतानुकम्पिनः सर्वभूतेषु दयावतः, तव एकोऽपि विद्वेष्टा शत्रुः, न, अस्तीति शेषः। (अत्र विद्वेष्टृमात्रशून्यस्य समग्रशत्रुहननं सर्वभूतानुकम्पिनश्च पृथिवीजियः पर्य्यालोचनया विरुद्धतया प्रतीयते, ततश्च पूर्वापरविरुद्धतया परार्द्धवाक्यार्थानां व्यर्थताप्रत्यायनमिति व्यर्थतादोषः)॥१३२॥

प्रभा

प्रबन्धगतव्यर्थत्वमुदाहरति–**जहीति**। कृत्स्नं शत्रुबलं जहि विनाशय। इमां विश्वंभरां जय स्वायत्तां कुरु। सर्वभूतानुकम्पिनः

प्राणिमात्रेषु दयां कुर्वतस्तव एकोपि विद्वेष्टा शत्रुर्नास्ति। अत्र शत्रुशून्यस्य सकलशत्रुबलहननं तथा सर्वभूतानुकम्पिनः पृथ्वीजयश्च पर्यालोचनया नोपपद्यते।।१३२।।

विवृति

तदुदाहरति–

जहि मारय शत्नुकुलमरातिसमाजं अशेषम्। जय विश्वम्भरामिमामिति शत्नुवधो महीविजयस्य(श्च) पूर्वार्धेनोक्तः। न च ते कोऽपि विद्वेश्ष्टा न च तवास्ति कश्चिचदित्युत्तरार्धेन विरोधः। भवाभावयोः परस्परविरोधादिति।।

तदुदाहरति–**जहीति**। शत्नुकुलं कृत्स्नं जहीति वाक्यं, न ते कोऽपि विद्वेष्टा भवतीति वाक्येन विरुद्धम्।।१३२।।

अस्ति काचिदवस्था सा साभिषङ्गस्य चेतसः।
यस्यां भवेदभिमता विरुद्धार्थापि भारती॥१३३॥

रत्नश्री

यस्यामवस्थायां वक्तुः सम्बन्धिन्यां विषये। विरुद्धोऽर्थो यस्यामिति विरुद्धार्था पूर्वापराहताभिधेया अपि, न केवलमितरा। भारती वचनम् अभिमता अदुष्टा। तदा तथोचितत्वात्। चेतसः तादृशी क्वचित् समवस्था दशा अस्ति विद्यते। कस्य? सहाभिषङ्गेण [आसक्त्या] क्वचिद् विषये स्त्र्यादौ वर्तते इति साभिषङ्गस्य अतिरक्तचेतसः सम्बन्धिनी कुतश्चित् मनोवस्थाविशेषाद् व्यर्थमप्यनिन्द्यमित्यर्थः॥

तदुदाहरति–

हृदयङ्गमा

कदाचित् व्यर्थताया गुणत्वमपीत्याह, अस्तीति।–साभिषङ्गस्य वियोगादिदुर्घटनाभिभूतस्य, ("शापे त्वभिषङ्गः पराभवे" इत्यमरः) चेतसः काचित् अनिर्वचनीया, इष्टानिष्टशुभाशुभादिविचाराक्षमा इत्यर्थः, अवस्था दशा, अस्ति भवति, यस्यां सा विरुद्धार्थाऽपि असङ्गताऽपि, विरुद्धार्थतया व्यर्थाऽपि इत्यर्थः, भारती वाणी, अभिमता समादृता, भवेत्। (अभिमता इत्यनेन अवस्थावशात् अस्य गुणत्वमपि जायते इति सूचितम्)॥१३३॥

प्रभा

विरुद्धार्थता क्वचिद् गुणो भवतीति कथयति–**अस्तीति।** साभिषङ्गस्य दुःखादिना अभिभूतस्य। अभिषङ्गः पुल्लिङ्गः पराभवाक्रोशशपथेषु इति मेदिनी। चेतसः काचित् सा अवस्था विवेकशून्या स्थितिरस्ति। यस्यां अवस्थायाम्। वक्तुर्विरुद्धार्थापि भारती अभिमता भवेत् शिष्टैर्न केवलं निर्दोषत्वेन अनुमता किंतु गुणवत्तया अङ्गीकृता भवेत्।।१३३।।

विवृति

अस्यापवादमाह–

अस्त्यसौ काचिदवस्था यस्यां विरुद्धा(र्था-)ऽपि पूर्वापरपराहताधि(पि)हा(भा)रस्या(त्य)भिमता। कस्य सावस्थेत्याह– साभित्याह–साभिषङ्गस्य चेतसः कामादिपरवशस्य मनसः।।

विरुद्धार्थस्य वाक्यस्य कस्यांचिदतिसक्तचेतसि क्वापि यूनि वक्तरि गुणवत्त्वमित्याह–अस्तीति।।१३३।।

परदाराभिलाषो मे कथमार्यस्य युज्यते।
पिबामि तरलं तस्याः कदा नु दशनच्छदम्॥१३४॥

रत्नश्री

परस्य दारेषु कलत्रे। अभिलाषः सङ्गमेच्छा। लोकशा[स्त्रविरुद्धो]ऽयं [115a] मे ममार्यस्य न्यायव्य[व]हारिणः सतः कथं नाम युज्यते संगच्छते? नैवायं मम युज्यत इत्यर्थः। इत्थं कथञ्चित् प्रतिसंख्यानात् लब्धस्य विवेकस्य विपर्ययः पुनरभिषङ्गपरवशोऽनुपतितः। तस्याः परयोषितः कस्या[श्]चिदिष्टाया दशनच्छदमधरं तरलमुज्ज्वलं कदा नु पिबामि? कतरत् तादृशं पुण्यदिनं भवेत्! नु प्रार्थनायाम्। ईदृशं पूर्वापराहतमपि अत्यासक्त्याद्यवस्थानुगृहीतं न दुष्यति, तादृशस्यैव तदोचितत्वादिति॥

हृदयङ्गमा

अस्या गुणत्वं दर्शयति, परेति। –आर्य्यस्य साधोः, मे मम, परदाराभिलाषः परस्त्रीषु अभिरतिः. कथं युज्यते? तस्याः परनार्य्या, परकीयाया इति भावः, तरलं लज्जाभयजनितसम्भ्रमात् सकम्पं, दशनच्छदम् अधरं, कदा नु पिबामि?। (अत्र पूर्वार्द्धे शान्तभावः उत्तरार्द्धे तु पुनः परदारौत्सुक्यमिति विरोधादुत्तरार्द्धवाक्यं व्यर्थमेव, तच्च प्रयोक्तुर्वियोगाभिभूततया गुणत्वेन सङ्गच्छते। एवं वि-शब्दस्य विगतार्थकत्वे उदाहरणं यथा, –"हृत्कण्ठवक्त्रश्रोत्रेषु कस्य नावस्थितं तव। श्रीखण्डहारकर्पूरदन्तपत्रप्रभं यशः?"॥ अत्रापि एकेनैव उपमानेन शौक्ल्यप्रतीतौ शेषोपमानपदानां व्यर्थत्वेऽपि यशसः स्मर्य्यमाणत्वगीयमानत्व स्तूयमानत्व-

श्रूयमाणत्वैः हृदयादिषु श्रीखण्डादिवदवस्थानस्य प्रतीयमानत्वात् गुणत्वम्। नव्यास्तु विरुद्धानां बाध्यत्वेनोक्तौ गुणतामङ्गीकुर्वन्ति, यदाह, –"सञ्चार्य्यादेर्विरुद्धस्य बाध्यत्वेन वचो गुणः" इति। तदत्र दोषस्य गुणत्वसम्पादनं सर्वसम्मतम् इति बोध्यम्)।।१३४।।

प्रभा

व्यर्थस्य गुणत्वमुदाहरति-**परेति**। आर्यस्य अभिजनवतो मे परदाराभिलाषः पराङ्गनाभिरतिः कथं युज्यते। तस्याः पराङ्गनायास्तरलं लज्जाभयजनितसंभ्रमात् चञ्चलं दशनच्छदं अधरोष्ठं कदा नु पिबामि। अत्र पूर्वार्धोक्तस्य आर्यस्य परदाराविमुखत्वस्य तस्या रदनच्छदं पिबामि इति उत्तरार्धोक्तं विरुद्धम्। तच्च कामाभिभूतस्य न दोषावहं प्रत्युत गुणावहम्। तथा च नेदं वाक्यं व्यर्थदोषवत्। अत्राहुः प्रेमचन्द्रशर्माणः। अत्र पूर्वार्धे व्यङ्ग्यस्य शान्तव्यभिचारिणो रत्याख्यभावस्य उत्तरार्धव्यङ्ग्येन श्रृङ्गारव्यभिचारिणौत्सुक्येन सह सन्नपि विरोधः प्रयोक्तुर्वियोगाभिभूतत्व- व्यञ्जकतया श्रृङ्गारपोषकत्वात् कमपि चमत्कारमावहतीति गुण एव। अत्र द्वयोर्विरोधः। एवं एकत्र बहूनां विरोधे चमत्कारविशेषः। यथा–

क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोपि दृश्येत सा
दोषाणां प्रशमाय मे श्रुतमहो कोपेपि कान्तं मुखम्।

किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेपि सा दुर्लभा
चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योधरं पास्यति।।

इति। अत्र शान्ताङ्गानां वितर्कमतिशङ्काधृतीनां विप्रलम्भाङ्गैरौत्सुक्यस्मृतिदैन्यचिन्ताभिः सह सन्नपि विरोधः

प्रयोक्तुर्विरहा- भिभूतत्वव्यञ्जनात् श्रृङ्गारप्रकर्षमाविर्भावयति। नव्यास्त्वेवंविधस्थले विरुद्धानां बाध्यत्वेनोक्तत्वाद् गुणत्वमित्याहुः। यथा-संचार्यादेर्विरुद्धस्य बाध्यत्वेन वचोगुणः। इति।।१३४।।

विवृति

तदुदाहरति-

परदाराभिलाषो मे कथमार्यस्य युज्यत इति पूर्वार्धेन परस्त्रीगमनप्रतिषेधोऽभिहितः। पिबामि तरलं तस्याः कदा सीतायाः दशनच्छदमधरमिति उत्तरेण पूर्वोक्तस्य व्याघातेऽपि न दोषः। यत उक्तमन्यैरपि 'कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु' इति।।

तदुदाहरति-**परदारेति**।।१३४।।

अविशेषेण पूर्वोक्तं यदि भूयोऽपि कीर्त्यते।
अर्थतः शब्दतो वापि तदेकार्थं मतं यथा॥१३५॥

रत्नश्री

पूर्वोक्तं प्रथमं प्रयुक्तं शब्दार्थरूपं किञ्चित् भूयः पुनरपि यदि कथञ्चित् प्रमादात् कीर्त्यते प्रयुज्यते। कथम्? अविशेषेण पूर्वोक्तमप्यर्थविशेषमनपेक्ष्य तावत्येवार्थे। यदि तु विशेषापेक्षा स्यात्, तदा नैकार्थमिति भावः। तदीदृशमेकार्थम्। अतः एकः पूर्वापरकालभाव्यर्थः अविशिष्टः अस्मिन्निति कृत्वा। कथम्? अर्थतः अभिधेयेन पूर्वप्रतिपादितस्यैवार्थस्य अविशेषेण पुनः प्रतिपादनात्। शब्दतो वाचकेन वा हेतुना तावत्येव चार्थे पुनः शब्दप्रयोगात्। न पुनरर्थपौनरुक्त्यमनपेक्ष्य शब्दपौनरुक्त्यं स्वतन्त्रं दर्शयितुं शक्यम्, अर्थ[तो भिन्नस्य] एव शब्दस्य यमकादौ अपुनरुक्तेः। यत्र त्वर्थाभेदः तत्र तद्द्वारकं शब्दपौनरुक्त्यम्। अपीत्युभयथा दर्शितम्। यथेत्युदाहरति॥

हृदयङ्गमा

एकार्थं समर्थयितुमाह, अविशेषेणेति। –यदि पूर्वोक्तं प्रागभिहितम्, अर्थतः शब्दतो वाऽपि अर्थः शब्दश्चेत्यर्थः, (पूर्वोक्तमिति सामान्यत्वान्नपुंसकलिङ्गम्। अर्थतः शब्दतः इति प्रथमान्तं ज्ञेयम्) अविशेषेण अभिन्नतया, भूयोऽपि पुनरपि, कीर्त्त्यते, तत् एकार्थम् एकार्थाख्यदोषयुक्तं, मतम्। (एवञ्च दोषोऽयम् अर्थगतः एकार्थकशब्दगतश्चेति, तथा च अर्थस्य एकार्थकशब्दस्य वा पुनरुक्तत्वम् एकार्थत्वमिति बोध्यम्। तेन च पुनरुक्ताख्यार्थदोषस्य कथितपदत्वाख्यशब्दोदोषस्य चान्यैरुक्तस्य

एकार्थसंज्ञया सङ्ग्रहः। शब्दत इत्यत्र शब्दपदं तदर्थकशब्दपरं, ततश्च भिन्नार्थकशब्दपौनरुक्त्यस्य तादृशवैरस्याजनकत्वेन न दोषत्वम् इत्यभिप्रायः सूचितः। तद्यथा, –"सुरा विप्रैः सुरा नीचैः" इत्यादौ सुरा देवाः सुरा मद्यानीति भिन्नार्थत्वान्न दोषः)। यथेति उदाहरणप्रदर्शनार्थम्।।१३५।।

प्रभा

क्रमप्राप्तं एकार्थं लक्षयति–**अविशेषेणेति**। यदि पूर्वोक्तं वचः अर्थतः शब्दतो वा अविशेषेण विशेषशून्येन अभिन्नेनेत्यर्थः। भूयोपि पुनरपि। कीर्त्यते तद् एकार्थं मतम्। अत्र अविशेषेणेत्यनेन विशेषविवक्षयोक्तार्थस्य पुनः कीर्तनं न दोषाय इति बोद्धव्यम्। एतदेव अनुकम्पाद्यतिशयः (३.१३७) इत्यनेन ग्रन्थकर्त्रा स्फुटीक्रियते। केचित्तु अविशेषेण एकरूपेण इत्यर्थं दर्शयन्ति। अयं च दोष एकार्थ एकार्थगत एकाकारशब्दगतश्चेति ज्ञेयम्। तेन च भिन्नार्थक एकाकारशब्दप्रयोगे नायं दोषः। अन्यथा सर्वस्यापि यमकस्यैकार्थदोषग्रस्तत्वापत्तिः। अत एव शब्दपौनरुक्त्येर्थस्यापि अङ्गत्वादेकार्थ इति संज्ञा समुपपन्ना। अन्यथा गुणदोषालंकारसंज्ञानां प्रायो योगबलादेव प्रवृत्तिरिति सर्वालंकारिकसंमतत्वाद् भिन्नार्थकैकाकारशब्दावृत्तौ एकार्थ इति संज्ञा अनुपपन्ना स्यात्। एवं च–सुरा विप्रैः सुरा नीचैः सेव्यन्ते भक्तिभावतः। इति देवमद्यवाच्यैकाकारस्य सुराशब्दस्यावृत्तौ नायं दोषः। यत्र शब्दभेदस्तत्र केवलं अर्थस्य पौनरुक्त्यम्। यत्र तु शब्दाभेदस्तत्र शब्दार्थयोः पौनरुक्त्यमिति ज्ञेयम्। अर्थतः शब्दतो वा इत्यनेन अर्वाचीनैरुक्तस्य पौनरुक्त्याख्यार्थदोषस्य कथितपदत्वाख्य-शब्ददोषस्य चोभयोरत्र संग्रह इति सूचितम्।।१३५।।

विवृति

एकार्थलक्षणमाह–

अविशेषेण पूर्वोक्तं यदि मूयः पुनरपि कीर्त्यते। तच्च शब्देनार्थेन वा इति द्वैविध्यमाह। शब्दपुनरुक्तमर्थपुनरुक्तं च। यतो (था) नित्यः शब्दो नित्यः शब्द , इति शब्दपुनरुक्तम्। अर्थपुनरुक्तमनित्यः शब्दो वि(नि)रोधधर्मात्मको ध्वान इति।।

एकार्थं लक्षयति–**अविशेषेणेति**। एकार्थं पुनरुक्तम् इति पर्यायः।।१३५।।

उत्कामुन्मनयन्त्येते बालां तदलकत्विषः।
अम्भोधरास्तडित्वन्तो गम्भीराः स्तनयित्नवः॥१३६॥

रत्नश्री

बालां स्त्रियं काञ्चित्। उत्काम् उत्कण्ठिताम्। उन्मनयन्ति उत्कण्ठयन्ति। उत्कण्ठतामात्रापेक्षायाम् इदमेकार्थम्, विशेषापेक्षा [राहित्ये]- नेति द्रष्टव्यम्। एते प्रत्यक्षवातनः। तस्या बालाया अलकानामिव त्विट् प्रभा येषामिति तदलकत्विषः। अम्भोधरास्तडित्वन्त इति अन्यतरेण मेघमात्रप्रतिपादनादेकार्थम्। रूपविशेषविवक्षायां तु अनेकार्थत्वं स्यात्। यथाह भारविः-

बिभ्राणमानीलरुचं पिशङ्गी-

र्जटास्तडित्त्वन्तमिवाम्बुवाहम्।

[किरातार्जुनीये ३.१]

इति। गम्भीराः स्तनयित्नव इत्येकेनैव स्तननयोग्यस्य प्रतिपादनादुभयमेवार्थमविशेषविवक्षायामिति॥

अत्राप्यपवादं व्युत्पादयन्नाह-

हृदयङ्गमा

एकार्थं दर्शयति, उत्कामिति। –तस्याः बालायाः, अलकानामिव केशानामिव, त्विषः कान्तयः येषां तादृशाः, स्तनयित्नवः गर्जनशीलाः, तड़ित्वन्तः सौदामनीसहिताः, गम्भीराः प्रगाढ़ा इत्यर्थः, एते अम्भोधराः मेघाः, उत्कां विरहेणोत्कण्ठितां, बालाम् उन्मनयन्ति उन्मनसं कुर्वन्ति, उद्दीपकत्वादिति भावः।

(अत्र उत्कोन्मन शब्दौ अम्भोधरास्तडित्वन्तः स्तनयित्नवः इत्येते शब्दाश्च स्वरूपतो भिन्ना अपि एकपर्य्यायत्वेन एकार्थप्रतीतेः पुनरुक्तार्थाः। एवं येन केनापि पूर्वोक्तार्थस्य पुनः प्रतीतौ दोषोऽयं दृश्यते; यथा दर्शितः विश्वनाथेन, –"सहसा विदधीत न क्रियामविवेकः परमापदां पदम्। वृणते हि विमृष्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः।। अत्र द्वितीयार्द्धव्यतिरेकेण द्वितीयपादस्यैवार्थ इति पुनरुक्तता।" इति। तथा शब्दतोऽर्थतो वा इत्यनेनोक्तस्य शब्दगतस्य अपि उदाहरणं दर्शितं प्रकाशकृता कथितपदतायां यथा, –"अधिकरतलतल्पं कल्पितस्वापलीला, परिमिलननिमीलतण्डिमा गण्डपाली। सुतनु! कथय कस्य व्यञ्जयत्यञ्जमैव, स्मरनरपतिलीलायौवराज्याभिषेकम्?"।। अत्र उभयत्र विलासरूपार्थस्यैकलीलापदेनैवोक्तौ तातपर्य्यग्राहकाभावात् लीलापदम् एकार्थम्। शब्दार्थविभागेन एकार्थस्य यत् द्वैविध्यमभिहितं, तस्यायमभिप्रायः,–वाक्यार्थदोषप्रकरणोक्तस्यैकार्थस्य वस्तुतो वाक्यार्थदोषत्वेऽपि शब्दार्थगतत्वेन भेदद्वयकल्पनमकिञ्चित्करमेव, स च भेदः यत्र पर्य्यायान्तरशब्देनार्थस्य पोनरुक्त्यं, तत्रार्थमात्रगतः ; यत्र एकस्यैवैकार्थशब्दस्य तात्पर्य्याभावेऽपि पुनः प्रयोगस्तत्र शब्दगत इत्येवंरूपो बोध्यः। नव्यास्तु शब्दगतस्य कथितपदत्वम् अर्थगतस्य पुनरुक्तत्वमिति संज्ञाद्वयमाहुः)।।१३६।।

प्रभा

अर्थगतमेकार्थमुदाहरति–**उत्कामिति।** तस्या बालाया अलकानां इव त्विड् येषां ते तदलकत्विषः। स्तनयित्नवः गर्जनशीलाः। तडित्वन्तः विद्युद्युक्ताः। गम्भीरा अम्भोधरा उत्कां उत्कण्ठिताम्

बालां उन्मनयन्ति सोत्सुकां कुर्वन्ति। अत्र गम्भीराः स्तनयित्नव इति तथा उत्कां उन्मनयन्ति इति शब्दा एकार्था एव इति पौनरुक्त्यम्। पर्यायान्तरानुपादाने प्रकारान्तरेण पूर्वोक्तार्थस्य पुनः प्रतीतावप्यस्य सद्भावो ज्ञेयः। यथा–

सहसा विदधीत न क्रिया–
मविवेकः परमापदां पदम्।
वृणते हि विमृश्यकारिणं
गुणलुब्धाः स्वयमेव संपदः।।

इति। अत्रोत्तरार्धेन व्यतिरेकेण द्वितीयपादार्थोभिहित इति पौनरुक्त्यम्। यत्रावयवार्थापेक्षया संज्ञाशब्दानामुपादानं न तत्रायं दोषः। यथा–

सा त्रियामा तदार्तस्य चन्द्रमण्डलमण्डिता।
राज्ञो विलपमानस्य न व्यभासत शर्वरी।।

अत्र त्रियामाशर्वरीशब्दयोरेकार्थत्वेपि त्रियामाशब्दोवयवार्थ–मादाय शर्वरीविशेषणत्वेन प्रयुक्तः। अतो नात्र एकार्थतादोषः। तथैवौक्तोदाहरणे तडित्वन्त इति शब्दस्य न पौनरुक्त्यमिति बोध्यम्। मूले अर्थतः पौनरुक्त्यं दर्शितम्। शब्दतः पौनरुक्त्यं तु प्रकाशे दर्शितम्। यथा–

अधिकतरलतल्पं कल्पितस्वापलीला
परिमिलननिमीलत्पाण्डिमा गण्डपाली।
सुतनु कथय कस्य व्यञ्जयत्यञ्जसैव
स्मरनरपतिलीला यौवराज्याभिषेकम्।। (पृ० ३४२)

इति। अत्र लीलाशब्दः पुनरुक्तः।।१३६।।

विवृति

एतदुदाहरति-

अत्र उत्कामुन्मनयन्तीति पौनरुक्त्यात्म(म्।अ) विशेषोक्तत्वात्। तथा पुष्टौ(अम्भो)धरा इत्यनेनैवं कालत्वस्योक्तत्वात् तदलकत्विष इत्यनेनापि (विव) क्षणत्वमु(मयु)क्तम्। तथा अम्भोधराः तटित्वन्तः स्तनयित्नव इत्यविशेषेण मेघा(घ)नाम(मा)भिधानात्पौनरुक्त्यम्।।

तदुदाहरति-**उत्कामिति।** उत्काम् उन्मनयन्तीति शब्दभेदेऽपि एकार्थत्वादर्थपुनरुक्तम्; 'उत्क उन्मनाः' इति एकार्थत्वेन निपातनात्। गम्भीराः स्तनयित्नवः इति शब्दपुनरुक्तम्। शब्दार्थयोरुभयोः एकत्वे शब्दपुनरुक्तिः, न शब्दमात्रपुनरुक्तौ, तदानीं यमकस्य पुनरुक्तदोषप्रसङ्गात्।।१३६।।

अनुकम्पाद्यतिशयो यदि कश्चिद् विवक्ष्यते।
न दोषः पुनरुक्तोऽपि प्रत्युतेयमलंकृतिः॥१३७॥

रत्नश्री

अनुकम्पा अनुक्रोश आदिर्यस्य विस्मयहर्षादेस्तस्य तद्रूपो वा अतिशयो विशेषः अनुकम्पाद्यतिशयः, [115b] नानुकम्पादिमात्रम्। कश्चिद् अन्यतमो यदि विवक्ष्यते प्रका[शयितुमि]ष्यते तदा पुनरुक्तोऽपि वाक्येऽर्थतः शब्दतोऽपि वा न दोषः। एकार्थलक्षणेऽभिहिते विकारो नास्ति। गुणोऽपि न तादृशः कश्चिदिति चेदाह–प्रत्युतेति विशेषविवक्षायां निपातसमुदाय एको वा निपातः। यदाह–इयं पुनरुक्तिरलंकृतिः काव्यशोभाकरत्वाज्जायते तादृशि विषये इति॥

तदुदाहरति–

हृदयङ्गमा

अस्य प्रतिप्रसवमाह, अनुकम्पेति। –यदि कश्चित् अनुकम्पाद्यतिशयः अनुकम्पादीनाम् अतिशयः, प्रकृतस्येति शेषः, (आदिपदेन विहितानुवादादीनां परिग्रहः, यदुक्तं "गुण" इत्यधिकृत्य दर्पणकारेण, –"कथितञ्च पदं पुनः। विहितस्यानुवाद्यत्वे विषादे विस्मये क्रुधि॥ दैन्येऽथ लाटानुप्रासेऽनुकम्पायां प्रसादने। अर्थान्तरसङ्क्रमितवाच्ये हर्षेऽवधारणे॥" इति) विवक्ष्यते वक्तुमिष्यते, तदा पुनरुक्तोऽपि न दोषः,

प्रत्युत इयं पुनरुक्तिरित्यर्थः, अलङ्क्रिया अलङ्कारः, काव्यशोभाधायकत्वात् इति भावः। एवञ्च रसाक्षिप्तचेतसो वक्तुरुक्तौ च एकार्थं न दुष्यति; तदुक्तं कण्ठाभरणे, –"अविशेषेण पूर्वोक्तं यदि भूयोऽपि कीर्त्त्यते। तदेकार्थं रसाक्षिप्तचेतसां, तन्न दुष्यति।।" उदाहरणं यथा, –"असारं संसार परिमुषितरत्नं त्रिभुवनं, निरालोकं लोकं मरणशरणं बान्धवजनम्। अदर्पं कन्दर्पं जननयननिर्माणमफलं, जगज्जीर्णारण्यं कथमसि विधातुं व्यवसितः?"।। अत्र असारं संसारमित्युक्तवा परिमुषितरत्नं त्रिभुवनं निरालोकं लोकं जगज्जीर्णारण्यमिति यदुक्तं तस्य विशेषानभिधायकत्वेऽपि रसाक्षिप्तेन वक्त्रा अभिहितत्वात् गुणत्वम्; तथा उन्मत्ताद्युक्तावपि पौनरुक्त्यं गुण एवेति ज्ञेयम्)।।१३७।।

प्रभा

अस्य प्रतिप्रसवमाह–**अनुकम्पेति।** यदि कश्चिद् अनुकम्पादीनां अतिशयः प्रकृतस्येति भावो विवक्ष्यते वक्तुमिष्यते तदा पुनरुक्तोपि अर्थो न दोषः दोषवान्। प्रत्युत इयं अलंक्रिया काव्यशोभाधायकत्वेन स अलंकारो भवति। तदुक्तं भामहेन–

कथमाक्षिप्तचित्तः सन्नुक्तमेवाभिधास्यते।
भयशोकाभ्यसूयासु हर्षविस्मययोरपि।

यथाह गच्छ गच्छेति पुनरुक्तं न तद्विदुः।। (४.१३) इति।

धनुर्ज्या-कर्णावतंस-श्रवणकुण्डल-शिरः शेखर-मुक्ताहार-

पुष्प- माला-करि-कलभ इत्यादौ। विशेषार्थविवक्षया न पौनरुक्त्यदोष इति तु वामनादयो मन्यन्ते।।१३७।।

विवृति

अस्यापवादमाह–

अनुकम्पाद्यतिशयो यदि कश्चिद्विवक्ष्यते तदा पुनरुक्तोऽपि दोषाऽ(षो ना)स्ति। प्रत्युतत(तेय)मलंक्रिया पुनरुक्तिः।।

पुनरुक्तस्य गुणत्वं लक्षयति–**अनुकम्पेति**।।१३७।।

हन्यते सा वरारोहा स्मरेणाकाण्डवैरिणा।
हन्यते चारुसर्वाङ्गी हन्यते मञ्जुभाषिणी॥१३८॥

रत्नश्री

सा काचिदिष्टा वरारोहा स्त्री मुख्या हन्यते पीड्यते। चारु सर्वमङ्गमस्या इति चारुसर्वाङ्गी। हन्यते मञ्जुभाषिणी मधुरालापिनी हन्यते स्मरेण कामेन अकाण्डवैरिणा निर्निमित्तशत्रुणेति। ईदृशं पुनरुक्तमपि काव्यभूषणमवस्थाविशेषयोगात्। आह च–

विस्मये च विषादे च कोपे दैन्ये च वारणे।
प्रसादे चैव हर्षे च पदमेकं द्विरुच्यते॥

इति॥

हृदयङ्गमा

अनुकम्पायामुदाहरति, हन्यते इति। –सा वरारोहा उत्तमाङ्गना, अकाण्डवैरिणा अकारणरिपुणा, स्मरणे कामेन, हन्यते, सा चारुसर्वाङ्गी हन्यते, सा मञ्जुभाषिणौ मधुरवादिनौ, हन्यते। (अत्र हन्यते इति क्रियावाचकं पदं पुनः पुनरुक्तमपि प्रस्तुताया नायिकाया अनुकम्पनीयत्वादिप्रकटनात् वैचित्र्यमेव जनयतीति न दोषावहम्। एवमन्यत्रापि उदाहरणानि मृग्याणि)॥१३८॥

प्रभा

अनुकम्पायां पौनरुक्त्ये निर्दोषत्वमुदाहरति–**हन्यत इति।** सा वरारोहा सुन्दरी। अकाण्डवैरिणा निष्कारणरिपुणा। स्मरेण हन्यते पीड्यते। चारूणि मनोहराणि सर्वाणि अङ्गानि यस्याः सा

चारुसर्वाङ्गी हन्यते। मञ्जुभाषिणी मधुरवचना हन्यते। अत्र हन्यते इतिपदस्य पौनरुक्त्यं नायिकायाः प्रस्तुताया अनुकम्पनीयत्वं सविशेषं द्योतयन् कमपि चमत्कारमावहन् काव्यमुपस्कुरुते इति नात्र एकार्थत्वदोषः। एवं विधेयानुवादादावपि। यथा–उदेति सविता ताम्रस्ताम्र एवास्तमेति च। इत्यत्र नायं दोष इति अर्वाचीनाः।।१३८।।

विवृति

तदुदाहरति–

हन्यते मार्यते सा (द)यिता। किंभूता। वरारोहा सुन्दराङ्गी। स्मरेण अकाण्डवैरिणा मन्मथेनानिमित्तवैरिणा। 'हन्यते चारुसर्वाङ्गी हन्यते मञ्जुभाषिणी' इत्यत्र हन्यते(:)त्रिरुक्तिर्वरारोहा चारुसर्वाङ्गीति च पुनरुक्तिरदोषः। अनुकम्पया कारुणिकजनस्य पुनः पुनस्तदभिधानस्य दृष्टत्वात्।।

तदुदाहरति–**हन्यत इति**। हन्यते सा वरारोहा इत्यादीनां वाक्यानामेकार्थानां अनुकम्पावशेन आवृत्तेः गुणत्वम्।।१३८।।

निर्णयार्थं प्रयुक्तानि संशयं जनयन्ति चेत्।
वचांसि दोष एवासौ ससंशय इति स्मृतः॥१३९॥

रत्नश्री

वचांसि शब्दाः प्रयुक्तानि प्रकाशितानि। किमर्थम्? निर्णयार्थम्। निर्णयो निश्चयः, प्रकरणात् काव्यार्थविषयः संशयविपर्यासविरोधी प्रत्ययः। अर्थः प्रजोजनम्, साध्यत्वाद् यस्मिन् प्रयोगे इति क्रियाविशेषणम्। तच्च स्वभावतो नपुंसकम् द्वितीयैकवचनान्तं च स्मर्यते। न तु संशयार्थम्, तदानीं दोषात्। यद् वक्ष्यति-ईदृशं संशयाय [३.१४१] इत्यादि। संशयनिश्चयविपर्ययमर्थद्वयावगाहि ज्ञानं यदि जनयन्ति, असौ तादृशः संशय इति ससंशयो नाम दोष एव काव्ये। न गुणोऽपि तत्र विषये। अन्यत्र तु भवेत्। स्मृतो विज्ञायते॥

हृदयङ्गमा

ससंशयं निरूपयति, निर्णयार्थमिति। -निर्णयार्थं निश्चयार्थं, श्रोतुः प्रवृत्तिनिवृत्त्योरेकतरनिर्द्धारणार्थमिति यावत्, प्रयुक्तानि विन्यस्तानि, वचांसि चेत् यदि, संशयं विषयद्वयात्मकज्ञानं, जनयन्ति उत्पादयन्ति, तदा असौ एव दोषः ससंशयः संसशयाख्यदोषेण लिप्त इत्यर्थः, इति स्मृतः। (भोजस्तु, -"सन्दिग्धार्थं संसशयम्" इति लक्षणमाह। अस्य च लक्षणस्य सङ्क्षिप्तत्वेऽपि बोद्धव्यस्य प्रवृत्तिनिवृत्त्यन्यतरनिर्णयार्थं प्रयुक्तं वाक्यं सन्दिग्घार्थं सन्देहजनकञ्चेदित्यर्थः करणीयाः, सन्देहार्थमेव सन्दिग्धवाक्यप्रयोगे तु अस्य गुणत्वमिति स्वयमेव वक्ष्यमाणत्वात्)॥१३९॥

प्रभा

ससंशयं लक्षयति–**निर्णयार्थमिति।** निर्णयार्थं निश्चयार्थं प्रयुक्तानि वचांसि चेद् यदि संशयं जनयन्ति संदेहमुत्पादयन्ति तर्ह्यसावेव दोषः ससंशय एतत्संज्ञकः स्मृतः। एतेन संशयार्थं प्रयुक्तस्य वाक्यस्य संशयजनकत्वे न दोषः। एतच्चाग्रे स्फुटीभविष्यति। अयं च दोषः शब्दगतोर्थगतश्च बोद्धव्यः। यत्र संशयेन निश्चितान्वयबोधानुपपत्त्या निश्चितार्थानुपपत्तिस्तत्र शाब्दः। यत्र तु अर्थबोधानन्तरं वक्त्राद्यनिश्चयस्तत्रार्थगतः। यथा काव्यप्रकाशे–

मात्सर्यमुत्सार्य विचार्य कार्यमार्याः समर्यादमुदाहरन्तु।
सेव्या नितम्बाः किमु भूधराणामुत स्मरस्मेरविलासिनीनाम्।।

(पृ० २९१) अत्र प्रकरणाद्यभावे संदेह इति।।१३९।।

विवृति

(स)संशयलक्षणमाह–

निर्णयार्थमित्यादि। यदि निर्णयार्थं प्रयुक्तानि वचांसि संशयं जनयन्ति तदाऽसौ दोष एव (स)संशय इति।।

ससंशयं लक्षयति–**निर्णयार्थमिति**।।१३९।।

मनोरथप्रियालोकरसलोलेक्षणे सखि।
आराद्वृत्तिरसौ माता न क्षमा द्रष्टुमीदृशम्॥१४०॥

रत्नश्री

मनोरथस्य हृदयाभिलाषस्य प्रियो दयितः कश्चित्। तदेकालम्बनत्वात् तस्य आलोकनमालोकः। तत्र रसः। तेन लोले चपले ईक्षणे नेत्रे यस्या इति मनोरथप्रियालोकरसलोलेक्षणे सखीति सम्बोधनम्। यद् वा मनोरथप्रिय इष्टः। आलोकः प्रकाशो बाह्यः। तद्वदरसलोलेक्षणत्वं न संवृत्तम् [?] आत्मानमन्तस्तिष्ठन्तं नेच्छसि। किं तु यथेष्टं बहिरालोके भ्रमितुं वाच्छसीति अभिप्रायेण [116a] एवमामन्त्र्यते। अत एव अत्रापि संशयः, कतमोऽर्थोऽत्राभिप्रेत इत्यनिश्चयात्। यदि नामैवम्, ततः किमित्याह- आरादिति। ईदृशमेवंविधं तव स्वातन्त्र्यं मनोरथप्रियालोकरसलोलत्वम्। असौ तव माता आराद् वृत्तिरस्या इत्याराद्वृत्तिः। द्रष्टुं न क्षमा। अत्राप्याराच्छब्दस्य दूरान्तिकवृत्तित्वात्, असावित्यस्य च परोक्षापरोक्षयोर्वृत्तेः संशय्यते। किमसौ माता दूरवृत्तिरीदृशं द्रष्टुं न क्षमा न शन्कोति परोक्षत्वात्, किं वा असौ इयं माता आराद्वृत्तिरासन्नवर्तिनी ईदृशं द्रष्टुं न क्षमा न सहते। ईदृशं दृष्ट्वा सुतरां कुप्यतीति [अ]निश्चयः कश्चित्। तदीदृशं [स] संशयं द्रष्टव्यमिति॥

अत्राप्यपवादमाह—

हृदयङ्गमा

संसशयमुदाहरति, मनोरथेति।—मनोरथप्रियालोकरसलोलेक्षणे!

मनोरथप्रियः वाञ्छितवल्लभः, तस्य आलोकः दर्शनं, तस्मिन् यः रसः अनुरागः, तेन लोले चञ्चले, ईक्षणे नयने यस्याः तत्सम्बुद्धौ, हे जारदर्शनव्यापृतनयने! सखि! असौ माता, तवेति शेषः, आराद्वृत्तिः दूरवर्त्तिनीत्यर्थः, अतः ईदृशं तव सानुरागाङ्गनाजनयोग्यं व्यवहारं, द्रष्टुं न क्षमा व्यवहिततया विलोकयितुं न शक्ता, ततो निःशङ्कमवलोकय इति भावः; अथवा, –आराद्वृत्तिः समीपवर्त्तिनी, अतस्तव ईदृशं कुलाङ्गनानुचितं चारित्र्यखण्डनरूपं व्यवहारमित्यर्थः, द्रष्टुं न क्षमा न सहिष्णुः, अतो नयनचापलं मा कार्षीरिति भावः। ("आराद्दूरसमीपयोः" इत्यमरः। अत्र सख्याः कर्त्तव्यनिर्णयार्थं दूरसमीपोभयार्थकस्य आरात्–शब्दस्य उल्लेखद्वारा प्रयुक्तेन वाक्येन माता मे दूरवर्त्तिनी, अतः ममेदृशं कर्म्म द्रष्टुं न शक्ष्यति तत् निःशङ्कं प्रवर्त्ते इति, किं वा माता में समीपस्था, अतः ईदृशं निन्दितं कर्म्म द्रष्टुं न शक्ष्यति तत् अस्मात् निवर्त्ते इति नायिकायाः प्रवृत्तिनिवृत्त्योः एकतरनिश्चयाभावात् सन्देहपर्य्यवसायित्वेन ससंशयदोषः। अस्य च उभयार्थकशब्दप्रयोगनिबन्धनत्वात् शब्दगतत्वम्। अयञ्च दोषः अर्थगतोऽपि सम्भवति, स च अर्थबोधानन्तरं वक्त्राद्यनिश्चयेन ज्ञातव्यः, उदाहरणं यथा, –"मात्सर्य्यमुत्सार्य्य विचार्य्य कार्य्यमार्य्याः समर्य्यादमुदाहरन्तु। सेव्या नितम्बाः किमु भूधराणामुत स्मरस्मेरविलासिनीनाम्?"।। इति। अत्र प्रकरणाद्यभावात् वक्ता शमप्रधानः श्रृङ्गारप्रधानो वा इति निश्चयाभावात् संशयः। जारं साभिलाषमवलोकयन्तीं मातुस्तदाचरणपरिज्ञानशङ्कया च भीतां नायिकां प्रति सख्या उक्तिः)।।१४०।।

प्रभा

शब्दगतं संशयमुदाहरति-**मनोरथेति**। जारं प्रति सानुरागं पश्यन्तीं नायिकां प्रति तन्मातुस्तदाचरणपरिज्ञानशङ्कया सख्या उक्तिरियम्। मनोरथप्रियः वाञ्छितप्रेयान् तस्य आलोकने यो रसः प्रेमावेशस्तेन लोले तरले ईक्षणे यस्याः सा तत्संबुद्धिः। सखि असौ तव माता आराद्वृत्तिः समीपवर्तिनी। अत ईदृशं तव दुराचारं द्रष्टुं सा न क्षमा न सहिष्यते। तन्निवर्तस्वेति भावः। अथवा आराद् दूरवर्तिनी सा तव ईदृशं सतृष्णजारप्रेक्षणम् द्रष्टुं न क्षभा न समर्था अतः पर्याप्तं विहर। अत्र प्रथमार्थे त्वं विहरणान्निवर्तस्व द्वितीये च यथेच्छं प्रवर्तस्व इत्युभयोर्विरूद्धयोरर्थयोरेकतरस्य वक्तुरभिप्रेतस्यानिश्चयात् संशयः। अयं आराद् इति नानार्थशब्दोपनिबद्ध इति शब्दगतः।।१४०।।

विवृति

तदुदाहरति-

मनोरथश्चासौ प्रियालोकश्च तस्य(यो र-)सस्तेनालोले (ई)क्षणे यस्याः तस्या आमन्त्रणं हे सखि मनोरथप्रियालोक(रस) लोलेक्षेण येनेयमवस्था कृता तमवलोक्य(क)येत्युक्ते(क्ता) से (मे) माता मम हृदयं(य)सन्तापस्याराद्वर्ति(-नी) दूरवर्तिनी न क्षमा द्रष्टुम्(अव)लोकयितुमसमर्थेति। तत्रैतानि पदान्यमुमर्थमभिधातुमिष्टानि कयाचिदनुरक्तया। हे सखि मनोरथप्रियालोकरसलोले(क्षणे) मया माता जननी अभिहिता भूयोऽपि। यथा येन वल्लभेन ममेदृशी सञ्जनितकार्श्या अवस्था कृता त(तं) त्वमानया (य) माननीय(मत्स मीपम्?) सा च मार्ता वपि (मयि) न

स्निह्यतीति मत्सम्पात(न्ताप)स्य दूरवर्ती(र्तिनी) सती न ममी(मे)दृशं वल्लभं द्रष्टुं वरंत (अवेक्षितुं) (अथ वा अवगन्तुं) क्षमेति। न चायमर्थो(र्थ ए)भिः पदैरभिव्यज्यते। आराद्वृत्तिरित्युच्यते। (न ज्ञायते समीपात् उत दू)रात्। तथा ईदृशमित्युच्यते न ज्ञायते कीदृशं किमिति वा की(ई)दृशं तं वल्लभं सुभगमुत ईदृशं मां विरहपीडितं उतेदृशं मदवस्थान्तरम्। तदा(था) कस्य दूरवर्तिनी किं मन्मनस्सन्तापस्य उताङ्गम(उत ग्राम)नगरादेरिति संशयः। तदुक्तं भामहेन–

श्रुतेः समान्यधर्माणां विशेषस्यानुदाहृतेः।

अप्रतिष्ठं यदेकत्र तज्ज्ञानं संशयं विदुः।। इति।।

तदुदाहरति–**मनोरथेति**। कयाचित् अभिमतं पश्यन्त्या नायिकया पृष्टा सखी नायिकां प्रत्याह–आराद्वृतिः समीपवर्तिनी माता ईदृशं प्रकृतं ते व्यापारे न किं द्रष्टुं क्षमा, पश्यत्येव इत्येको वाक्यार्थः। आराद्वृत्तिः दूरवर्तिनी माता ईदृशं सूक्ष्मं व्यापारं द्रष्टुं न शन्कोति इत्यन्यो वाक्यार्थः। इदं वाक्यम् उभयोरर्थयोः संशयं जनयतीति संसंशयम्।।१४०।।

ईदृशं संशयायैव यदि जातु प्रयज्यते।
स्यादलङ्कार एवासौ न दोषस्तत्र तद्यथा॥१४१॥

रत्नश्री

ईदृशमेवंविधं ससंशयं वचनं यन्निश्चयार्थ[निगूहनेन] संशयायैव काव्यार्थसन्दे[होत्पादना]र्थमेव, तथेष्टत्वात्। जातु कदाचित्, न सर्वथा। तादृशे प्रस्तावे यदि प्रयुज्यते तदा असौ संशयः अदोषो जातः अलङ्कारो गुण एव स्यात् काव्यस्य। न दोषः स्यात्। तत्र तादृशि संशये विषये तस्यैव तत्र विधेयत्वात्। यथेत्युदाहरति॥

हृदयङ्गमा

अस्य कदाचित् गुणत्वमाह, ईदृशमिति। –यदि वा तु यद्यपि, ईदृशं ससंशयं वाक्यं, संशयाय संशयप्रतिपादनाय एव, प्रयुज्यते व्यवह्रियते, तदा असौ संशयः, अलङ्कार एव स्यात्, तत्र तादृशस्थले, न दोषः, तथा च यत्र संशय एव विवक्षितः तत्र असौ गुण एव, अविवक्षितस्तु दोष एवेति भावः। तत् तस्य उदाहरणं, यथेति वक्ष्यमाणसूचनार्थम्। ("वा तु" इत्यत्र "जातु" इति पाठो दृश्यते)॥१४१॥

प्रभा

अस्य कुत्रचिद्गुणत्वं दर्शयति–**ईदृशमिति।** यदि जातु यदि नाम कदापि ईदृशं संदेहयुक्तं वाक्यं संशयायैव संशयमुद्दिश्यैव प्रयुज्यते। उपयुज्यते तदा असौ संशयालंकार एव स्यात्। तत्र दोषो

न। तथा च संशयो विवक्षितश्चेत् तदासौ गुणो यदा त्वविवक्षितस्तदा दोषः।।१४१।।

विवृति

अस्यापवादमाह–

ईदृश[शं]संशयायैव यदि जातु प्रयुज्यते तदाव(स्याद)लङ्कार एवासौ तदा दोषो न भवति। निर्णयार्थं प्रयुक्तानि यदि संशयं जनयन्ति तदा दोष इत्यर्थः।।

संसशयस्य गुणत्वं लक्षयति–ईदृशमिति।।१४१।।

पश्याम्यनङ्गजातङ्कलङ्घितां तामनिन्दिताम्।
कालेनैव कठोरेण ग्रस्तां किं नस्त्वदाशया॥१४२॥

रत्नश्री

तां काञ्चिदिष्टाम् अनिन्दितां स्त्रियम्। अनङ्गात् कामात् जातः अनङ्गजः स च सा वा आतङ्कः पीडा। अङ्गात् शरीरात् जातः बाह्यभूतसंभूतत्वात् अनङ्गजः स च सा वा आतङ्क सन्तापश्चेति द्वैधम्। मदनेन लङ्घितामभिभूतां सतीं कालेन मृत्युनैव कठोरेण अस्थानप्रहारित्वात्। कालेनैव कठोरेण ग्रीष्मेण कालावर्षिकाग्रस्तां मृणालिकामिव कवलिताम्, पश्यामि अवैमि। नात्र सन्देहः इत्यपरं द्वैधम्। ततश्च त्वयि आशया अभिलाषेण नोऽस्माकं किं प्रयोजनम्? न किञ्चित्। यदि सा अस्ति तदर्थं त्वामभिलषामि किमिदानीं त्वयेति। किं नस्तदाशयेति पाठे–तत्र किमिदानीं नः अस्माकं तस्यामाशया प्रत्याशया? गता दूरमस्माकमसाविति व्याख्येयम्॥

तद् विवृणोति–

हृदयङ्गमा

पश्यामीति।–अनिन्दितां सर्वाङ्गसुन्दरीमित्यर्थः, तां तव कान्तामित्यर्थः, अनङ्गजेन कामकृतेन, आतङ्केन रोगेण, कामपीड़या इत्यर्थः, लङ्घिताम् आक्रान्ताम्, अत एव कठोरेण निर्दयेन, कालेन मृत्युना, ग्रस्तामेव कवलितामेव, पश्यामि, त्वदाशया तव प्रत्याशया, नः अस्माकं, किम्? किं फलम्? त्वामनासादयन्ती इदानीं कामपीड़या सा म्रियते, अतः तव

प्रत्याशया प्रयोजनं नास्तीत्यर्थः। अथवा, –अङ्गजेन आतङ्केन शारीरिकपीड़या, न लङ्घितेति अनङ्गजातङ्कलङ्घिता तां, कठोरेण तीव्रेण, कालेन ग्रीष्मेणेत्यर्थः, ग्रस्तां पश्यामि, त्वदाशया नः किम्? तस्याः शरीरिकी पीड़ा काऽपि नास्ति, केवलं त्वदप्राप्तिनिमित्तचिन्तादिभिरपगतनिद्रा ग्रीष्मकालजनितसन्तापेन सा नितरां पीड्यते इति पूर्वोक्तार्थ एवास्य श्लोकस्य प्रतिपाद्यः किं परार्थः इत्येष संशयः। (स च दूत्या विवक्षित एव। प्रोषितं नायकं प्रति दूत्या उक्तिरियम्)।।१४२।।

प्रभा

संशयगुणमुदाहरति–**पश्यामीति**। अनिन्दितां तां त्वत्प्रेयसीम्। अनङ्गः मदनः तस्मात् संजातेन आतङ्केन व्याधिना लङ्घितां आक्रान्ताम्। कठोरेण कालेन मृत्युना ग्रस्तां पश्यामि। किं नस्तदाशया तत्संबन्धिजीवनाशया किं प्रयोजनम्। साचिरादेव नामशेषा भविष्यति इत्यर्थः। इत्येकोर्थः। किंवा अङ्गजः मदनः तस्य आतङ्कः संतापः स न भवति इति अनङ्गजातङ्कः। मदनसंतापभिन्नग्रीष्मकालसंतापेन आक्रान्तां अत एव कठोरेण कालेन संतापजनकग्रीष्मादिना ग्रस्तां अभिभूतां पश्यामि। अतस्तदाशया नः किमिति पूर्ववत्। अत्र नायकमाकुलीकर्तुं सखीवृत्तान्तं नायकाय निवेदयन्ती दासी बुद्धिपुरः सरमेव एवं ससंशयं प्राह इति गुण एवासौ न दोषः। अत्र किं नस्त्वदाशया इति पाठं स्वीकृत्य बहुभिस्तव नायकस्य आशया इति व्याख्यातं परं तन्न रुचिरमित्युपेक्षितम्।।१४२।।

कामार्ता घर्मतप्ता वेत्यनिश्चयकरं वचः।
युवानमाकुलीकर्तुमिति दूत्याह नर्मणा॥१४३॥

रत्नश्री

उक्तेन प्रकारेण कामेन आर्ता घर्मेण तप्ता क्षपिता वा [116b] इत्येवमनिश्चयकरं संशयजनकं वा वाक्यं दूती काचित् आह ब्रवीति। नर्मणा परिहासेन हेतुना इत्युक्तेन विधिना। किमसौ मद्वियोगात् कामार्ता घर्मतप्ता वा केवलमित्यनिश्चयलाभात् युवानं कञ्चित् कामेन आकुलीकर्तुं विधुरयितुम्। ततश्च संशय एवात्राभिधेयत्वादलङ्कारः॥

हृदयङ्गमा

अत्र च अस्य गुणत्वमुपपादयति, कामार्त्तेति। –दूती युवानम् आकुलीकर्त्तुं नायिकासमीपगमनाय उत्सुकं कर्त्तुं, नर्मणा भङ्ग्या; कामार्त्ता घर्मतप्ता ग्रीष्मार्त्ता वा, इति अनिश्चयकरं सन्देहसङ्कुलम्, इति पूर्वोक्तरूपं, वचः आह, कामपीड़िता ग्रीष्मपीड़िता वा इति निर्णेतुमशक्यतया युवाऽयम् आकुलीभूय तत्समीपं यास्यतीति मनसिकृत्य दूती तादृशं सन्दिग्धं वचनं प्रोवाच इत्यस्य गुणत्वमिति भावः॥१४३॥

प्रभा

उक्तोदाहरणे संशयस्य प्रस्तुतत्वं दर्शयति-**कामार्तेति**। युवानं नायकम् आकुलीकर्तुं संशयेन नायिकासमीपगमनायोत्सुकं कर्तुं दूती वचनकौशलेन कामार्ता घर्मतप्ता वा इति अनिश्चयकरं संशयोत्पादकं वच आह। मदनव्यथां वा ग्रीष्मव्यथां वा ज्ञात्वा

व्याकुलीभूयायं द्रुतं गच्छतु इत्यभिप्रेत्य एवं दूती जगादेति ज्ञेयम्।।१४३।।

विवृति

तदुदाहरति–

पश्यामि अनङ्गजातङ्कलङ्घितां तामनिन्दिताम् अनङ्गः कामः तस्माज्जातः अनङ्गजः स चासावातङ्कश्च तेन लङ्घितां पीडितां सखीं कालेनैव कठोरेण सा[?] मृत्युनैव क्रूरेण ग्रस्तां ताम्राघ्रातां(तामनवद्याम्) अतः किं नस्त(स्त्व)दाशया तथा अङ्गजः कामः स एवातङ्कः तेन लङ्घिता तत्प्रतिषेधो–ऽनङ्गजातङ्कलङ्घितां तां कालेनैव कठोरेण ग्रष्मिसमयेनैवोग्रेण ग्रस्तां किं नस्तदाशया।।

एतत् स्वंय व्याचष्टे किमसौ कामार्ता उत धर्मतप्ता इत्यनिश्चयकरं वचः उभयार्थावलम्बि युवानमाकुलीकर्तुमिति दूत्याह नर्मणा।।

तदुदाहरति–**पश्यामीति**। अनिन्दितां ताम् अनङ्गजातङ्कलङ्घिताम्– अङ्गजः कामः, तज्जनितसन्तापक्रमणरहितां–केवलं कठोरेण ग्रीष्मकालेन ग्रस्तां पश्यामि जानामि; किं नस्त्वदाशया–तव तस्यां किमभिलाषेणद्य इत्येको वाक्यार्थः। अनङ्गः कामः, तज्जनितेन जातङ्केन सन्तापेन लङ्घितां आक्रान्तां, कठोरेण क्रूरेण, कालेन मृत्युना, दशमीमवस्थां प्रापितामुत्पश्यामि; इत्यन्यो वाक्यार्थः। अनयोरर्थयोः बुद्धिपूर्वं प्रयुक्तत्वात् द्वयोरर्थयोः विवक्षितत्वेन ससंशयस्य गुणत्वम्।।१४२–१४३।।

उद्देशानुगुणोऽर्थानामनुदेशो न चेत् कृतः।
अपक्रमाभिधानं तं दोषमाचक्षते बुधाः॥१४४॥

रत्नश्री

अर्थानां यथोद्दिष्टानां केषाञ्चिदुद्देशः प्रथमोपक्षेपः तस्यानुगुणस्तत्र क्रमानुसारित्वात् अनुदेशः[1] प्रत्याम्नायश्चेत् न कृतः स्यात् प्रमादात्, तादृशं विशेषमन्तरेणेति भावः। अपक्रम इति अभिधानं संज्ञा यस्येत्यपक्रमाभिघानम्। अपक्रमं नाम दोषं तं यथोक्तमाचक्षते कथयन्ति कवयः। यथेत्युदाहरति॥

हृदयङ्गमा

अपक्रमं निरूपयति, उद्देशेति। –अर्थानां वक्तव्यविषयाणाम्, उद्देशानुगुणः उद्देशः आदावुपन्यासः इत्यर्थः, तस्य अनुगुणः अनुकूलः, अन्वययोग्य इत्यर्थः, अनु पश्चात्, उद्देशः उपन्यासः, क्रमानुसारेण विन्यास इत्यर्थः चेत् यदि, न कृतः, तदा बुधाः तम् अपक्रमः अभिधानं नाम यस्य तथोक्तं, क्रमलङ्घनात् अपक्रमाख्यं, दोषम् आचक्षते कथयन्ति। (तथा च, कार्य्यकारणभूतानामर्थानां यथाक्रममुपन्यास एव गुणः, तल्लङ्घनन्तु दोष एवेति भावः। अयञ्च दोषः शब्दार्थदोषयोरक्रमत्वदुष्क्रमत्वयोरन्यैरुक्तयोरन्तर्भवति, किन्तु तयोर्नात्यन्तपरिहार्य्यत्वम्; यदुक्तं विश्वनाथेन, –"द्वयं गतं सम्प्रति शोचनीयतां, समागमप्रार्थनया पिनाकिनः। कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी॥ अत्र त्वमित्यनन्तरमेव चकारो युक्तः" इति। तथा "देहि मे वाजिनं राजन्! गजेन्द्रं वा मदालसम्। अत्र गजेन्द्रस्य प्रथमयाचनमुचितम्" इति। द्वयमित्यादौ परामृष्यमाणवाक्यानन्तरं प्रयोक्तव्यस्य

चकारस्यान्यत्र प्रयुक्ततया क्रमो लङ्घितोऽपि व्यवहितस्यापि योजनया अन्वयनिर्बाधात् नातिदोषं भजते। देहि मे इत्यादौ च प्रधानस्य प्रथमप्रार्थनमुचितं, तद्दाने दातुरसामर्थ्ये ततो न्यूनं याचनीयमिति क्रमः, इह तु तल्लङ्घनात् अपक्रमत्वं, किन्तु अन्वयनिर्बाधत्वेन नात्यन्तपरिहार्य्यत्वम् इत्युभयत्रापि अन्वयस्य बाधाभावान्नात्यन्तपरिहार्य्यतेति विभाव्यम्। अस्य तु क्रमिकाणां क्रमिकैरेवान्वय इति नियमलङ्घनादन्वयबोधबाधकत्वेनात्यन्तपरिहार्य्यत्वमिति विशेषः)।।१४४।।

प्रभा

क्रमप्राप्तमपक्रमं लक्षयति–**उद्देशेति।** अर्थानां उद्देशानुगुणः उद्देशः प्रथमोपन्यासः तदनुगुणः तदनुकूलः। अनूद्देशः पश्चात् संबधिनां पदानां उपन्यासो न कृतश्चेत् तं दोषं अपक्रमाभिधानं अपक्रमसंज्ञकम् बुधा आचक्षते कथयन्ति। क्रमालंकारविपक्षीभूतोयं दोष इति ज्ञेयम्। तथा च यथाक्रमोपन्यासे क्रमालंकारोनुपन्यासे च दोषः क्रमिकाणां क्रमेणैवान्वयः सुलभतया बुद्ध्यारूढो भवति। विपर्यये तु वाक्यार्थबोधमान्थर्यमित्यस्य सदोषत्वम्।।१४४।।

विवृति

अपक्रमलक्षणमाह–

उद्देशनिर्देशयोः यदि यथासंख्यं न कृतं; तथा हि; न्याय्यमेतत् यथोद्देशः तथैव निर्देशः। तदतिलङ्घनमपक्रममुच्यते।।

अपक्रमं लक्षयति–**उद्देशेति**।।१४४।।

स्थितिनिर्माणसंहारहेतवो जगतामजाः।
शम्भुनारायणाम्भोजयोनयः पालयन्तु वः॥१४५॥

रत्नश्री

जगतां लोकानां स्थितिः प्रबन्धानुवृत्तिः। निर्माणमुत्पादः। संहारो नाशस्तेषां हेतवः, तत्कर्तृत्वात् न जाता अकृतका इत्यजाः नित्याः। के ते? शम्भुश्च शङ्करः, नारायणश्च विष्णुः। अम्भोजयोनिश्च ब्रह्मा। शम्भुनारायणाम्भोजयोनयः। वो युष्मान् पालयन्तु रक्षन्तु। अत्र जगतां स्थितिहेतुर्नारायणः, निर्माणहेतुरम्भोजयोनिः संहारहेतुः शम्भुरित्यागमात् न यथोद्देशमनुदेशः कृत इत्यपक्रमनामायं काव्यदोष इति॥

अत्राप्यपवादमभिधत्ते–

हृदयङ्गमा

अपक्रमं दर्शयति, स्थितीति। –जगतां स्थितिः पालनं, निर्माणं सृष्टिः, संहारः ध्वंसः, तेषां हेतवः कारणानि, कर्त्तारः इत्यर्थः, अमी एते, शम्भूनारायणाम्भोजयोनयः शिवविष्णु ब्रह्माणः, वः युष्मान्, पालयन्तु रक्षन्तु। (अत्र प्रथमोद्दिष्टानां स्थितिनिर्माणसंहाराणां यथाक्रममन्वये कर्त्तव्ये नारायणाम्भोजयोनिशम्भव इति वक्तुमुचितं, परन्तु तद्विपरीतमुक्तमिति शाब्दबोधविघटकत्वात् अपक्रमता)॥१४५॥

प्रभा

अपक्रममुदाहति-**स्थितीति**। जगतां स्थितिः पालनं निर्माणं

उत्पत्तिः संहारो विनाशः एतेषां हेतवः कारणानि। शंभुनारायणाम्भोजयोनयः अम्भोजयोनिः ब्रह्मा। ते वः पालयन्तु इत्यन्वयः। अत्रोद्देशानुरोधेन नारायणाम्भोजयोनिशंभव इति अनूद्देशो युक्तः। तस्य अतिक्रमाद् अपक्रमदोषोयम्। नतु 'अल्पाच्तरम्' इत्यनेन शंभुशब्दस्य पूर्वनिपातः इति वाच्यम्। विष्णुर्ब्रह्ममहेशास्ते सततं पालयन्तु वः इति रचनाया औचित्यात् न तादृशी रचना निर्दोषेति दिक्॥१४५॥

विवृति

तदुदाहरति–

जगतां स्थितिनिर्माणसंहाराणां हेतवः इत्युद्देशस्यानुगुणो निर्देशः एवं कर्तव्यो युक्तः स्यात्। नारायणाम्भोजयोनिशम्भव इति। प्र(व्य)त्ययश्चात्र। ततोपक्रममेवंविधं न प्रयोक्तव्यम्॥

तदुदाहरति–**स्थितीति।** उद्देशक्रमस्य नारायणाम्भोजयोनिशम्भवः इत्यनूद्देशे कर्तव्ये, शम्भुनारायणाम्भोजयोनयः इत्युक्तम्; एतदपक्रमम्॥१४५॥

यत्नः सम्बन्धविज्ञानहेतुः कोऽपि कृतो यदि।
क्रमलङ्घनमप्याहुर्न दोषं सूरयो यथा॥१४६॥

रत्नश्री

यत्नेन प्रतियत्नेन यथावस्थानातिक्रमेणान्यथा सम्बन्धयोजनमनुदेशः तस्य विज्ञानमवगमः। तस्य हेतुः कारणं कोऽपि कश्चित् तादृशः येन तत्र सम्बन्धो विज्ञायते। न यथोद्देशम्। यदि कृतः स्याद् यत्नः। सम्बन्धनिर्ज्ञानहेतुरित्यपि पठ्यते। तत्र सम्बन्धस्यायथोद्देशमनुदेशस्य निर्ज्ञाने हेतुः कारणभूतो यदि यत्नः कोऽपि कृतः स्यादिति व्याख्येयम्। तदा क्रमस्य यथोद्देशमनुदेशस्य लङ्घनमतिक्रममपि न केवलमलङ्घनम्। न दोषमाहुः स्मरन्ति सूरयः कवयः। यथेत्युदाहरति॥

हृदयङ्गमा

अस्यादोषत्वमपि क्वचिदित्याह, यत्न इति। –सम्बन्धस्य अन्वयस्य, विज्ञानं विशेषेणावबोध एव, हेतुर्यस्य तादृशः, यत्नः विशिष्टसम्बन्धबोधायैव तादृशक्रमलङ्घनप्रयास इत्यर्थः, यद्यपि कृतः, कविनेति शेषः, तदा सूरयः विद्वांसः, क्रमलङ्घनमपि दूषणं दोषावहं, नैव आहुः॥१४६॥

प्रभा

क्वचिदयं न दोषो भवति इति दर्शयति-**यत्न इति**। संबन्धः अन्वय संबन्धः तस्य विज्ञानहेतुः विशेषावबोधहेतुः। एतादृशः कोपि यत्नो यदि कृतोक्रमेणानुद्दिष्टानां अपेक्षितपदे संबन्धावगमाय

कविना यत्नो विहितश्चेद् इत्यर्थः। तादृशं क्रमलङ्घनं सूरयो विद्वांसो दूषणं दोषावहं न प्राहुः।।१४६।।

विवृति

अस्यापवादमाह–

सम्बन्धिनिर्णयहेतुः यदि कंश्चित् प्रयत्नतः (त्नः) कृतः स्यात् तदा क्रमातिक्रमोऽपि न दोष इति सूरयो मन्यन्ते।।

अपक्रमस्य क्वचित् गुणत्वं लक्षयति–**यत्न इति**।।१४६।।

बन्धुत्यागस्तनुत्यागो देशत्याग इति त्रिषु।
आद्यन्तावायतक्लेशौ मध्यमः क्षणिकज्वरः॥१४७॥

रत्नश्री

बन्धूनां त्यागो विरहो बन्धुत्यागः। तनोः शरीरस्य त्यागो मरणम्। देशस्य आत्मीयस्य त्यागो देशत्याग इति त्रिषु एतेषु बन्धुत्यागादिषु दुःखेषु। आदिश्चान्तश्च इत्याद्यन्तौ [117a] बन्धुत्यागदेशत्यागौ आयतौ दीर्घौ च तौ क्लेशौ संबाधौ। आयतो क्लेशो दुःखमनयोरित्यायतक्लेशौ यावज्जीवमनुबन्धात्। मध्यमस्तनुत्यागः क्षणिकः क्षणमात्रभावी चासो ज्वरस्तापश्चेति क्षणिकज्वरः शरीराभावे नानुबन्धात्। अत्रायतक्लेशत्वं बन्धुत्यागदेशत्यागयोः। एवं न तनुत्यागस्य। क्षणिकज्वरत्वं च तनुत्यागस्यैव नेतरयोरिति यत्नसम्बन्धः। सम्बन्धनिर्ज्ञातहेतुरीदृशो द्रष्टव्यः। यदि पुनः त्रयाणामप्येकरूपत्वं तदा क्रमलङ्घनं दोष एव स्यात्, विशेषस्य तादृशस्याभावादिति॥

हृदयङ्गमा

अपक्रमस्यादोषत्व मुदाहरति, बन्धुत्याग इति।–बन्धुत्यागः स्वजनपरिहारः, तनुत्यागः देहाभावः, देशत्यागः विदेशावस्थितिः, इति त्रिषु विषयेषु मध्ये आद्यन्तौ बन्धुत्यागदेशत्यागौ, आयताः दीर्घाः, क्लेशाः ययोः तौ, मध्यमस्तनुत्यागस्तु, क्षणिकज्वरः क्षणमात्रसन्तापकर इत्यर्थः, वरं तनुत्यागः श्रेयान् न च पुनः

बन्धुत्यागः देशत्यागो वा इति भावः। (अत्र यथाक्रममुद्दिष्टेषु बन्धुत्यागादिषु आयतक्लेशावित्यनेन आदिपदगृहीतस्य बन्धुत्यागस्यान्वयित्वे तदुत्तरोद्दिष्टस्य तनु त्यागस्यान्वयायोगात् तमुल्लङ्घ्य तदन्तस्य देशत्यागस्यान्वयित्वमिति क्रमलङ्घनं सम्बन्धविज्ञानहेतुत्वात् युज्यते एव इति न दोषाय, प्रत्युत तनुत्यागात् बन्धुत्यागदेशत्यागयोः गरीयस्त्वेन वक्तुरभिमतत्वात् गुण एव इत्युवधेयम्)।।१४७।।

प्रभा

निर्दुष्टमपक्रममुदाहरति-**बन्धुत्याग इति।** बन्धुत्यागादित्रिषु पदार्थेषु। आद्यन्तौ बन्धुत्यागदेशत्यागौ। आयतक्लेशौ दीर्घक्लेशविधायकौ। मध्यमः तनुत्यागः। क्षणिकज्वरः अल्पकालसंतापकः। तनुत्यागः श्रेयान् न बन्धुदेशत्यागौ इत्यर्थः। अत्र आद्यन्तौ इत्यनेन च मध्यम इत्यनेन च अन्वयस्य स्पष्टावबोधनाद् अक्रमिकयोरपि तयोर्न दुष्टता। यदि अत्र-द्वावेवात्यायतक्लेशौ तृतीयः क्षणिकज्वरः इति पाठः कल्पितस्तर्हि तदपक्रमदुष्टं भवेत्। परं कविना तदन्वयक्लेशपरिहारायैव आद्यन्तौ इति मध्यम इति च निर्दिष्टमतो नात्र दोषः। अत्र प्रेमचन्द्रादिर्निरूपितं क्लिष्टमिव भाति।।१४७।।

विवृति

तदुदाहरति—

बन्धुत्यागः, मरणं, देशत्यागो जन्मदेशादन्यदेशगमनम्; आद्यन्तौ बन्धुत्यागदेशत्यागावायतक्लेशौ दीर्घदुःखौ। मध्यमो मरणं

क्षणिकज्वरः क्षणदुःख इत्येवं सम्बन्धिनिर्णयहेतुर्यत्नः कृतः आद्यन्ताविति तथा मध्यम इति। (त)त एवंविधप्रयोगो न दोषः।।

तदुदाहरति--**बन्धुत्याग** इति। बन्धुत्यागतनुंत्यागदेशत्यागेषु उद्दिष्टेषु, द्वावायतक्लेशौ एकः क्षणिकज्वरः इत्युक्ते देहत्यागस्य सुसहत्वमिष्टं सिद्ध्यति। आद्यन्तौ मध्यमः इत्युक्तेः उद्देशक्रमलङ्घनं न दोषः।।१४७।।

शब्दहीनमनालक्ष्यलक्ष्यलक्षणपद्धतिः।
पदप्रयोगोऽशिष्टेष्टः शिष्टेष्टस्तु न दुष्यति॥१४८॥

रत्नश्री

पदस्य सुबन्तस्य तिङन्तस्य वा प्रयोगो व्यवहारः पदप्रयोगः, लक्ष्यते [यत्] तदिति लक्ष्यमुदाहरणम्। लक्षणं शब्दशासनम्, लक्ष्यते अनेन शब्दरूपमिति कृत्वा। तयोः ते एव वा पद्धतिः मार्गः, ततो व्यवहारप्रवृत्तेः। अनालक्ष्या अदृश्या, अभावात्। लक्ष्यलक्षणपद्धतिर्यस्मिन् स तादृश अशिष्टैरनाप्तैः स्वीकृतः। इत्यनूद्य शब्दहीनं तद्विज्ञेयमिति विधीयते। यः पुनरेवंभूतोऽपि पदप्रयोगः शिष्टैरिष्यते शास्त्रे काव्ये वा, क्वचित् प्रयुक्तत्वात्। स शिष्टैः शास्त्रकारैस्तत्प्रज्ञैर्वा इष्टस्तु आप्तप्रयुक्तः पुनः न दुष्यति, तेषां सर्वथेह प्रमाणत्वात्। अनन्तो हि शब्दराशिः। तत्र कश्चिच्छब्दः शब्दानुशासनाद् गृह्यते। कश्चिदाप्तप्रयोगात् तत्कल्पात्। शब्दानुशासनमपि आप्तोपदेश इति न कश्चिदनयोर्विशेषः। अत एवोक्तम्–शिष्टेष्टस्तु न दुष्यतीति॥

तदुदाहरति–

हृदयङ्गमा

शब्दहीनं निरूपयति, शब्दहीनमिति। –अनालक्ष्या अदृश्या, अपरिज्ञेया इति यावत्, तस्या अशास्त्रीयत्वादिति भावः, लक्ष्यस्य सजातीयोदाहरणान्तरस्य, तथा लक्षणस्य अनुशासनस्य, सूत्रकोषधातुपाठादिरूपनियामकस्येत्यर्थः, पद्धतिः नियमः यत्र तादृशः अगणितानुशासन इत्यर्थः, तथा अशिष्टानाम् अज्ञानाम्,

इष्टः अनवबोधविजृम्भित इत्यर्थः, पदानां पदयोः पदस्य वा प्रयोगः व्यवहारः, कृदभिहितभावत्वात् प्रयुज्यमानं पदमित्यर्थः, शब्दहीनं शब्देन अनुशासनशास्त्रेण हीनं, तदाख्यदोषवान् इत्यर्थः, सुधीभिरप्रयुक्ततया निष्पादकानुशासनाभावाच्च यस्य सजातीयोदाहरणान्तरं नास्ति तादृशपदप्रयोगः शिष्टाव्यवहृतपदप्रयोगश्च शब्दहीनाख्यदोषवानिति निष्कर्षः। (ततश्च यादृशपदस्यानुशासनं सजातीयप्रयोगान्तरञ्च न विद्येते तादृशं पदं तथा सत्यप्यनुशासने तत्तल्लिङ्गादिमत्त्वेन तत्तदर्थकत्वेन वा शिष्टैरप्रयुक्तञ्च पदं शब्दहीनाख्यदोषवदिति लक्षणम्)। किञ्च शिष्टानामुक्तौ अनुशासनविरुद्धत्वमपि न दोषायेत्याह, शिष्टेति। –शिष्टेष्टस्तु शिष्टैः साधुभिर्बहुभिः, इष्टः अभिमततया व्यवहृतस्तु, न दुष्यति न दोषाय भवति। [पदानां नित्यत्वात् तद्व्युत्पत्त्यर्थमेवानुशासनं पाणिन्यादिभिः कृतमिति शिष्टानामुक्तौ सूत्राणामभावे अनुशासनकारिण एव दण्डनीयाः, न तत्र दोष इति भावः। गोयीचन्द्रेणापि "नित्यानां पदानां प्रतिपत्त्यर्थं प्रकृतिप्रत्ययविभागपरिकल्पनं शास्त्रेण क्रियते" इत्युक्ततया अनुशासनस्य शिष्टव्यवहृतपदात् परत्वमेव प्रतिपादितम्। ततश्चानुशासनाभावेऽपि बहुभिः प्रयुक्तपदप्रयोगो नास्य दोषस्य विषयः, तथा सत्यप्यनुशासने तादृशः पदप्रयोगो यदि कैरपि न कृतः, तत्प्रयोगस्तु दोष एवेति बोध्यम्। शब्दशास्त्रविरुद्धपदप्रयोगे तु अन्यैरसाधुत्वमित्युक्तं, तथा च वामनः, –"शब्दस्मृतिविरुद्धमसाधु" (का० सू० वृ० २अधि० १अ० ५सू०) इति। अप्रयुक्तासमर्थदोषयोरप्यन्यैरुक्तयोरनेनैव सङ्ग्रहः कृतः इति दिक्]।।१४८।।

प्रभा

शब्दहीनं लक्षयति **शब्दहीनमिति।** लक्ष्यं शब्दः लक्षणं अनुशासनं तस्य पद्धतिः मार्गः। अनेन लक्षणेन इदं लक्ष्यं सिद्धं अस्य लक्ष्यस्य संपादकमिदमेव लक्षणम् इत्यादिक्रमः। अनालक्ष्या अदृश्या लक्ष्यलक्षणपद्धतिर्यत्र तादृशः। पदावाक्यादिप्रयोगः शब्दहीनः शब्दो हीनोपकृष्टोसाधुतया निकृष्टो यत्र इति अन्वर्थशब्दहीनाख्यदोषवान्। तदुक्तमाग्नेये-शब्दशास्त्रविरुद्धत्वम-साधुत्वं विदुर्बुधाः। इति। तथा आलक्ष्यलक्ष्यलक्षणपद्धतिरपि अशिष्टेष्टश्चेत् शिष्टानामनभिमतश्चेत्। सोपि प्रयोगः शब्दहीनदोषवान्। तथाहि-तथा मन्ये दैवतोस्य पिशाचो राक्षसोथ वा। इति। अत्र पुल्लिगे प्रयुक्तो दैवतशब्दः-पुंसि वा देवता स्त्रियाम्-इति कोशकारैरनुमतोपि शिष्टैर्नपुंसक एव प्रयुज्यते। अतोयं लक्षणानुगतोपि शिष्टेष्टो न। तथा-सुरस्त्रोतस्विनीं हन्त हन्ति संप्रति सादरम्। इत्यत्र गमनार्थे हन्धातुः प्रयुक्तः। स तु हन् हिंसागत्योरिति धातुपाठे गमनार्थे पठितोपि शिष्टास्तस्मिन्नर्थे न तं उपयुञ्जते। अयमपि प्रयोगः शब्दहीनो बोद्धव्यः। एवं द्विविधं शब्दहीनदोषं लक्षयित्वा तदपवादं दर्शयति-**शिष्टेष्टस्तु न दुष्यति** इति। अनालक्ष्यलक्ष्यलक्षणोपि शिष्टैरिष्टोङ्गीकृतश्चेत्। स न दुष्यति। यथा-

आक्षिपन्त्यरविन्दानि मुग्धे तव मुखच्छविम्।
कोशदण्डसमग्राणां किमेषां खलु दुष्करम्।। (२.३६१)

अत्र न लोकाव्ययनिष्ठाखलर्थतृणाम् (पा० सू० २/३/६९) इति सूत्रेण षष्ठीनिषेधेपि शिष्टैरेषां इति प्रयोगस्याङ्गीकरणान् न दुष्टता। संबन्धसामान्यविवक्षयोपपत्तिस्तु शिष्टाङ्गीकरणादेवेति बोद्धव्यम्।

एतेन अप्रयुक्तासमर्थदोषौ शब्दहीने एवातर्भूतौ ज्ञेयौ। शिष्टेष्टस्तु इत्यनेन तदपवादोपि संगृहीत इति बोद्धव्यम्।।१४८।।

विवृति

शब्दहीनलक्षणमाह–

अनालक्ष्या लक्ष्यलक्षणयोः पद्धतिः स्थितिः यस्य तल्लक्ष्यलक्षणवर्जितमित्यर्थः।।

शब्दहीनं लक्षयति–शब्देति। लक्षणोदाहरणेषु अदृष्टः शिष्टानामनभिमतश्च शब्दप्रयोगः शब्दहीनम्।।१४८।।

अवते भवते बाहुर्महीमर्णवशक्करीम्।
महाराजन्नजिज्ञासौ नास्तीत्यासां गिरां रसः॥१४९॥

रत्नश्री

अवतिरतङानः तङा प्रयुक्तः। बाहुभिरित्यपेक्षा भवत इति षष्ठीस्थाने चतुर्थी प्रयुक्ता। अर्णवशक्करी मेखला रत्नयोगादिना यस्या इत्यर्णवशक्करी नदृतः[1] इति कपा भवितव्यम्। महाराजन्नित्यत्रापि सख्यहोराज्ञां टच्[2] [117b] इति टचा भाव्यम्। तदिदं सर्वं शास्त्रशिष्टप्रयोगप्रतिकूलमिति शब्दहीनम्। नन्वनुप्रासादिः शब्दरसोऽत्र विद्यते काव्यगुणः। तन्नेदमेकान्तहेयमिति चेदाह–इत्येवं दुष्टानां शब्दानां न च रसोऽनुप्रासादिरपि जिज्ञासितावेव स्थितो ग्राह्यः। अश्रद्धाश्रयतया तस्या व्युपहतत्वात्। शुद्धायां हि भूमौ न्यस्तः पुष्पप्रकरः शोभते। यः पुनरपूतायां भुवि निक्षिप्यते कुसुमनिकरः स निष्फल एव। तथा शुद्धायां शब्दपद्धतौ रसः अनुप्रासादिः शोभते नान्यथा। यत्र पुनरयं रसो दर्शितः, तद् रसप्रयोगेऽपि शब्दहीनत्वात् हेयमिति ख्यापयितुम्। महाराजन् न जिज्ञासा नास्तीत्यासां गिरां रसः इत्यपि पाठः। तत्रासां गिरां रसो नास्तीति ईदृशी जिज्ञासा न विद्यते, हेयत्वादीदृशस्य रसस्येति व्याख्येयम्। शेषं समानमिति॥

क्वचिदशब्दहीनेऽपि शब्दहीनभ्रान्तिरिति व्युत्पादयन्नाह–

हृदयङ्गमा

शब्दहीनमुदाहरति, अवते इति। –हे महाराजन्! भवते भवतः, बाहुः भुजः, अर्णवः सागरः, शक्करी मेखला यस्याः तां

ससागरामित्यर्थः, (''शक्करी छन्दसो भेदे नदीमेखलयोरपि'' इति मेदिनी) महीम् अवते पालयति, अजिज्ञासा संशयाभावात् अत्र जिज्ञासा न विद्यते, सत्यमेवैतदित्यर्थ, इत्यासां प्रागुक्तानामीदृशीनां, गिरां वाचां, रसः माधुर्य्यानुगुणः आस्वादः, नास्ति, प्रोक्तपदानामसाधुत्वात् अन्वयबोधप्रातिकूल्येन श्रृङ्गाररसानुप्राणितराजविषयकरतिभावस्यानुद्गमादिति भावः। (अत्र अवते इति परस्मैपदिनः अवधातोरात्मनेपदं, भवते इति षष्ठीस्थाने चतुर्थी, महाराजन्निति कर्मधारयसमासे टच्-प्रत्ययाभावः, अर्णवशक्करीमित्यत्र बहुव्रीहिसमासे क-प्रत्ययाभावश्च सर्वमेतत् अनुशासनविरुद्धम् अशिष्टैरुपन्यस्तम्। अन्यच्च शक्करीशब्दः मेखलार्थे कैरपि न व्यवहृतः इत्यस्य अप्रयुक्तत्वात् प्रयुक्तमिदं पदं श्रोतृबुद्धिं व्याकुलयत् अन्वयबोधव्याघातकं भवति)।।१४९।।

प्रभा

शब्दहीनमुदाहरति-**अवत इति**। हे महाराजन् भवते। बाहुः तव भुजः। अर्णवाः शक्करी मेखला यस्यास्तां सार्णवामित्यर्थः। शक्करी मेखलानद्योः इति विश्वः। महीं अवते रक्षति। न जिज्ञासा एतन् मया प्रत्यक्षीकृतत्वात् तद्विषये जिज्ञासा नास्ति। इत्यासां एवंप्रकाराणां गिरां वाचां रसः चेतः संतोषावहः धर्मो नास्ति। अपप्रयोगेण चेतसो निर्वेदत्वात् सदर्थमपि वाक्यं नीरसं भवति। अत्र अपप्रयोगाः। अवते इत्यत्र आत्मनेपदम्। भवते इत्यत्र षष्ठीस्थाने चतुर्थी। अर्णवशक्करीम् इत्यत्र नद्यृतश्च (पा० सू० ५/४/१५३) इत्यनेन भाव्यमानस्य कपोभावः। महाराजन् इत्यत्र राजाहःसखिभ्यष्टच् (पा० सू० ५/४/९१) इति टजभावश्च।।१४९।।

विवृति

तदुदाहरति–

समुद्रमेखलामिलां तव बाहुरवते। हे महा(राज)न् जिज्ञासा ज्ञातुमिच्छा न चास्ति अवत्युत नावतीति संशयाभावात्। इत्यासां (गिरां रसो नास्ति) एवंविधं न काव्ये प्रयोक्तव्यम्।।

तदुदाहरति–**अवत इति।** महाराजन् भवते बाहुरर्णवशक्करीं समुद्ररशनां महीमवते? न जिज्ञासा न ज्ञातुमिच्छा, संशयास्पदं न भवतीति यावत्। इत्यासां गिरां रसः, साधुत्वमिति यावत्, नास्ति। अत्र अवते इति परस्मैपदिनः आत्मनेपदं, भवते इति षष्ठ्यर्थे विवक्षिते चतुर्थी, अर्णवशक्करीमिति, नद्यृतश्च' इति कपि कर्तव्ये तदकरणं, महाराजन्निति समासान्तटजकरणं च, शब्दहीनोदाहरणानि।।१४९।।

दक्षिणाद्रेरुपसरन् मारुतश्चूतपादपान्।
कुरुते ललिताधूतप्रवालाङ्कुरशोभिनः॥१५०॥

रत्नश्री

दक्षिणाद्रेर्मलयपर्वतादुपसरन आगच्छन मारुतः चूतपादपान् सहकारतरून् ललितं सलीलमाधूतैराकम्पितैः प्रवालैरङ्कुरैः पल्लवोद्गमैः शोभन्ते इति ललिताधूतप्रवालाङ्कुरशोभिनः। स तत् कुरुते विधत्ते। अत्र किल दक्षिणाद्रेरुपसरणे भावात् पञ्चमी न युज्यते, अपायलक्षणत्वात् तस्याः। उपसरणापेक्षया त्वाधारेण व्याप्येन वा दक्षिणानिलेन भाव्यम्। ततश्च सप्तमी द्वितीया वा युज्यते। नैवं कृतम्। अतः शब्दहीनमेवंविधमिति कुधियो मन्यन्ते। न चैतदेवम्। उपसरणं हि तत आगमनमिति विश्लेषयोगाद् दक्षिणाद्रिमामृश्योपसर[त्ययमि]ति ल्यब्लोपलक्षणा पञ्चम्येव युज्यते॥

तदेतन्मनसि [118a] कृत्याह—

प्रभा

शिष्टेष्टस्तु न दुष्यति इति प्रतिप्रसूतं अदुष्टं शब्दहीनमुदाहरति—**दक्षिणाद्रेरिति**। दक्षिणाद्रेः उपसरन् मलयपर्वतं गच्छन्। मारुतः वायुः। चूतपादपान् आम्रान् ललितं मन्दं यथा तथा आधूताः कम्पिता ये प्रवालाङ्कुरास्तैः शोभिनः शोभावतः कुरुते॥१५०॥

इत्यादिशास्त्रमाहात्म्यदर्शनालसचेतसाम्।
अपभाषणवद् भाति न च सौभाग्यमुज्झति॥१५१॥

रत्नश्री

इत्येवंविधं लक्ष्यम्। अपभाषणवत् शब्द[हीन]मिवाभाति प्रतिभासते। केषाम्? शास्त्रं शब्दलक्षणादिकम्। तस्य माहात्म्यं प्रभावः। एवविधलक्ष्यसंग्राहकत्वम्। तस्य दर्शनमभ्यासः तत्रालसं मन्दं चेतो येषामिति [शास्त्रमाहात्म्यदर्शनालसचेत]साम् शास्त्रमाहात्म्यदर्शनेन नेदृशी भ्रान्तिरुपजायते, तस्याज्ञ[त्वा]पनोदित्वात्। यथोक्तम्–

शास्त्रं मोहनिवर्तनम्

[प्रमाणवार्त्तिके १.७]

इति। न चेदृशं सौभाग्यं साधुतामुज्भति त्यजति। सुभगेनेवेदृशं सदृशः। यथोक्तं प्रागस्माभिरिति॥

हृदयङ्गमा

अदूषितं शब्दहीनं दर्शयति, दक्षिणाद्रेरित्यादि। दक्षिणाद्रेः मलयपर्वतस्य, उपसरन् समीपं वान्, मलयाचलं गच्छन् इत्यर्थः, मारुतः वायुः, चूतपादपान् तत्रत्यान् आम्रतरून्, ललितं सुन्दरं यथा तथा, मृदुलतया इत्यर्थः, आधूताः कम्पिताः, ये प्रबालाङ्कुराः नवपल्लवप्ररोहाः, अभिनवोद्गतपल्ल्वा इत्यर्थः, तैः शोभिनः शोभाशालिनः, कुरुते। इत्यादि पूर्वोक्तरूपं वाक्यं, शास्त्रस्य अनुशासनस्य, यत् महात्मां निगूढार्थ इत्यर्थः, तस्य दर्शने अलसं

विमुखं, चेतो येषां तथाभूतानाम, आलस्यवशात् व्याकरणादिशास्त्रालोचनापराङ्मुखानां विदुषाम् इत्यर्थः, अपभाषणवत् अपशब्दवत्, भाति प्रतीयते, न तु अपशब्दरूपेण इत्यर्थः। [अयं भावः, –कर्मणि द्वितीयेति अनुशासनबलेन उपसरणक्रियायाः कर्म्मपदस्य दक्षिणाद्रेरित्यत्र द्वितीया भवितुमर्हत्येव, परं तदकरणेऽपि नात्र दोषः, सर्वत्र सम्बन्धविवक्षया षष्ठीविधानस्य अदुष्टत्वेन शिष्टानुमोदितत्वात्। उक्तञ्च दीक्षितेन, –"कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव" इति। किञ्च शिष्टैरुक्तेषु प्रयोगेषु अनुशासनाभावेऽपि न दोषः ; यथा–"लज्जालोलं बलन्ती" "चेतः परं बलति शैलवनस्थलीषु" इत्यादौ बलेर्धातोरात्मनेपदित्वात् परस्मैपदित्वमनुशासनविरुद्धमपि न दुष्टम्; अत एव वामनेन तत्सिद्धये क्वचिदनुदात्तेत्त्वनिबन्धनस्यात्मनेपदस्यानित्यत्वं ज्ञापकेन समर्थितम्; यथा, –"बलेरात्मनेपदमनित्यं ज्ञापकात्" (का० सू० वृ० ५अधि० २अ० ३सू०) इति] द्वितीयाया अभावेऽपि श्रोतॄणां न वैरस्योदय इत्याह, न चेति। सौभाग्यञ्च लालित्यञ्च, शिष्टसम्मतत्वात् प्रयोगसौष्ठवञ्चेत्यर्थः, न उज्झति न त्यजति, तथा च ईदृशस्थले श्रोतृविरागे दोष एवेति भावः। (वायुना कम्पितस्य मलयपर्वतीयचूततरोर्वर्णनमिदम्। दक्षिणाद्रेरुपसर्पन्नित्यस्य दक्षिणाद्रेः मलयाचलात् उपसर्पन् आगच्छन्नित्यर्थकत्वे न कश्चित् पर्य्यनुयोग इति बोध्यम्)॥१५०॥१५१॥

प्रभा

उदाहरणं विशदयति-**इत्यादीति**। इत्यादि दक्षिणाद्रेरुपसरन् इत्यादिपदं शास्त्रमाहात्म्यं शास्त्रे व्याकरणशास्त्रे साधुशब्दप्रयोगे

फलत्वेन कथितं यन्महात्म्यम्-

यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद्व्यवहारकाले।
सोनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः॥

इत्यादिभिः (व्या. म. भा. १ कीलहॉर्न भाग १ पृष्ठ २ रेखा १९–२०) प्रपञ्चितं माहात्म्यमित्यर्थः। तस्य दर्शने अलसं मन्दाभियोगं चेतो येषां तेषाम्। पूर्वोक्तं वचोपभाषणवद् भाति परं सौभाग्यं न उज्झति। शिष्टैर्व्यवहृतत्वात् सौष्ठवं न जहाति। अत्र दक्षिणाद्रेरुपसरणक्रियायाः कर्मत्वात् कर्मणि द्वितीया (पा० सू० २/३/२) इत्यनेन तत्र द्वितीयया भाव्यम्। षष्ठी तु दृश्यते। परं सा न दुष्टा। ईदृशस्थले शिष्टैः संबन्धसामान्यंविवक्षया षष्ठ्या अङ्गीकरणात्। अपरे तु दक्षिणाद्रेरिति पञ्चम्यन्तमेव मन्वते। दक्षिणाद्रेः उपसरन् आगच्छन् इति तेषामभिप्रायः। तदा नायं दोषः। परं तु उपसरन् इत्यत्र सर्तेर्धावादेशविधानादुपधावन् इति भाव्यम्। परं शिष्टाः शीघ्रगमने तमादेशं मन्यन्ते। अत्र ललिताधूतत्वेन मन्दगमनार्थे सृधातुरिति नोपसरन्निति वैरस्यं जनयति। तथात्र प्रवालाङ्कुरशोभोत्पादनं परार्थमेव इति कुरुते इत्यत्र परस्मैपदेन भाव्यम्। परं स नियमश्चेतनविषयः। अत्र वायुस्तु अचेतन इति न आत्मनेपदप्रयोगे दोष इत्याहुः॥१५१॥

विवृति

प्रसिद्धलक्ष्यानुसारेण लक्षणस्य शिष्टैरिष्टत्वात् शिष्टं यत्तत्र दुष्यती–त्यस्यापवादमाह–

एतत्स्वयं व्याचष्टे–

दक्षिणाद्रेरपसरन् मलयपर्वतादपगच्छन् मारुतः चूतपादपान् सहकारतरून् कुरुते विदधाति। ललिताधूतप्रबालाङ्कुरशोभिनः ललितं यथा भवत्येवमाधूता ये प्रवालाङ्कुराः तैः शोभन्ते इत्येवंशीलास्तानिति विधेयम्।।

इत्यादिशास्त्रमाहात्म्यदर्शनालसां (लसचेतसां) अपभाषणवदनभियुक्तानां व्याकरणविशेषलक्षणपरिज्ञानशून्यानामपशब्दवत् प्रतिभासते। न च तत्त्वतो विमृश्यमाण(न)वक(मप)भाषणम्। अतो न सौभाग्यं सुन्दरत्वमुज्झति त्यजति। तथा हि अपसरन्निति किल स(र्तेः) द्वा(धा)वादेशः प्राप्नोति। कुरुते इत्यत्र चात्मनेपदं न स्यात्। कर्त्रभिप्रायस्य क्रियाफलस्याभावात्। न चैतदपभाषणम्। सर्तेः जपे (शैघ्र्ये) वा(धा)वादेशो नाव(प)गमे। स्वरितञितः कर्त्रभिप्राये क्रियाफल इति भवत्यात्मनेपदम्। कर्त्रभिप्रायस्य क्रियाफलस्य विवक्षितत्वादिति।।

अदृष्टलक्ष्यलक्षणमार्गस्यापि पदप्रयोगस्य शिष्टेष्टत्वेन गुणत्वं दर्शयति–**दक्षिणाद्रेरिति।** सर्तिधातोः शतृप्रत्यये धावादेशस्य विहितत्वात् उपधावन्निति वक्तव्ये, शीघ्रगमनार्थे सर्तेः धावादेशोनन मन्दगमने इति शिष्टेष्टत्वात्, उपसरन्निति साधुः। कुरुते इत्यात्मनेपदस्य कर्त्रभिप्रायक्रियाफलविहितत्वेऽपि, तस्य चेतनविषयत्वात्, अत्र कुसुमगन्धादिलाभविवक्षया वा, आत्मनेपदं न दुष्यति। एतव्द्याचष्टे–**इत्यादिति।** लक्षणमात्राभिज्ञानाम् अपशब्दवत् भाति; बहुलक्ष्यवेदिनां शिष्टानाम् अपशब्दत्वेन नाभिमतम्।१५०-१५१।।

श्लोकेषु नियतस्थानं पदच्छेदं यतिं विदुः।
तदपेतं यतिभ्रष्टं श्रवणोद्वेजनं यथा॥१५२॥

रत्नश्री

श्लोकेषु पद्येषु विषये पदस्य सुपतिङन्तस्य छेदो विरामः छन्दःशास्त्रप्रसिद्धः पदच्छेदः। नियतं तद्धि व्यवस्थानं चतुर्थवर्णादिलक्षणं यस्मिन्निति नियतस्थानम्। तन्नियतस्थानं पदच्छेदम्। अनुवादोऽयम्। यतिं विदुः स्मरन्ति तद्विद इति विधिः। तस्या यतेरपेतमपगतं तदपेतं यतिभ्रष्टम्। श्रवणं कर्णमुद्वेजयतीति श्रवणोद्वेजनम्। अतश्च हेयम्। श्रुतिसुभगं हि लक्षणानुगतं काव्यमुपादीयते। यथेति [यतिभ्रष्टम] उदाहरति॥

हृदयङ्गमा

यतिं तद्भ्रंशञ्च निरूपयति, श्लोकेष्विति। —श्लोकेषु पद्येषु, न तु गद्येषु इति भावः, नियतं छन्दः शास्त्रज्ञैः निरूपितं, स्थानं यस्य तादृशं, पदस्य सुप्तिङन्तरूपस्य, छेदं विरतिं यतिं विदुः जानन्ति, बुधा इति शेषः, पदान्ते जिह्वेष्टविश्रामस्थानं यतिरिति निष्कर्षः ; (उक्तञ्च, —"यतिर्जिह्वेष्टविश्रामस्थानं कविभिरुच्यते") तदपेतं तस्याः विच्युतम्, अत एव श्रवणयोः श्रोत्रयोः, उद्वेजनम् असुखजनकम् इत्यर्थः, यतिभ्रष्टं यतिभ्रष्टाख्यदोषवदित्यर्थः, पदमिति शेषः, यत्र विरामे श्रुतिकटुरेव भवति श्लोकः, तत्र दोष इति भावः। [अत एवोक्तं वामनेन, —"विरसविरामं यतिभ्रष्टम्" (का० सू० वृ० २अधि० २अ० ३सू०) इति]॥१५२॥

प्रभा

यतिनिरूपणपूर्वकं यतिदोषमाह–**श्लोकेष्विति।** श्लोकेषु नियतं छन्दः-शास्त्रविधायकैर्निश्चितं स्थानं यस्य सः तम्। पदच्छेदं पदस्य सुप्तिङन्तरूपस्य छेदः विरामस्तं **यतिमाहुः।** तदुक्तं छन्दोमञ्जर्याम्–यतिर्जिह्वेष्टविश्रामस्थानं कविभिरुच्यते।इति। तदपेतं तद्यतिशून्यं पदस्य मध्ये एव जिह्वाविश्रामयुतं इत्यर्थः। तद् यतिभ्रष्टदोषवद् ज्ञेयम्। दोषत्वे कारणं दर्शयति–श्रवणोद्वेजनम् इति। तदाह वामनः–विरसविरामं यतिभ्रष्टम्। (२/२/३) इति।।१५२।।

विवृति

यतिभ्रष्टलक्षणमाह–

तदपेतं यतिरहितं .... यतिभ्रष्टमुच्यते। तच्च श्रवणोद्वेजनं कर्णकटुकम्। यथेत्युदाहरति।।

यतिभ्रष्टं लक्षयति–**श्लोकेष्विति**।।१५२।।

स्त्रीणां सङ्गी *तविधिमयमा *दित्यवंश्यो नरेन्द्रः
पश्यत्यक्लि *ष्टरसमिह शि *ष्टैरमेत्यादि दुष्टम्।
कार्याकार्या *ण्ययमविकला *न्यागमेनैव पश्यन्।
वश्यामुर्वी *वहति नृप इ *त्यस्ति चैवं प्रयोगः।।१५३।।

रत्नश्री

शिष्टैरमा सह। संगीतविधि प्रेक्षणकम्। अल्किष्टा यथागमं प्रयुक्ता रसाः शृङ्गारवीरादयोऽस्मिन्निति अल्किष्टरसं स्त्रीणां सम्बन्धिनम्, तत्प्रयुक्तत्वात्। अयं विवक्षितः कश्चिदादित्यवंश्यः सूर्यान्वयसम्भूतः। नरेन्द्रः पश्यतीह प्रस्तावे। इह वाचोयुक्तौ [वा]। अत्र मन्दाक्रान्तायां समुद्रर्तुलोकैः [4/6/7] यतिविधानम्। तद्व्यतिक्रमात् इत्यादि ईदृशं दुष्टं हेयम्।। अत्रापवादमाह–कार्येत्यादि। कार्याणि त्रिवर्गानुबन्धीनि कर्माणि स्वस्वकार्याणि। तद्विपरीतानि [अकार्याणि] आगमेनैव उत्पत्यादिना तत्प्रतिपादकेन पश्यन् यथार्हमनुतिष्ठन्। वश्यां विधेयामुर्वीमवति रक्षति नृप इति, एवंविधप्रयोगः शिष्टानामस्ति। न च नास्त्येव। तस्मादीदृशः साधुरेव।।

ननु नियतस्थानपदच्छेदो यतिरिति हेतुपदैकदेशच्छेदः। तत् कथं न यतिभ्रष्टमित्यत आह–

हृदयङ्गमा

स्त्रीणामिति। –अयम् आदित्यवंश्यः सूर्य्यवंशीयः, नरेन्द्रः राजा, शिष्टैः सज्जनैः, अमा सह, अक्लिष्टः मनोज्ञः, रसः स्वादः, माधुर्य्यमित्यर्थः, यस्य तादृशं, स्त्रीणां सङ्गीतविधिं सम्यक्

गीतविधानं, नाट्यगीतवाद्यत्रयमित्यर्थः, इह अत्र सभायां, पश्यति, इत्यादि एवमादिकं पद्यं, दुष्टं यतिभ्रष्टत्वादनादरणीयमित्यर्थः। [तथा हि सप्तदशाक्षरे मन्दाक्रान्तावृत्ते अस्मिन् आदितश्चतुर्थे ततः षष्ठे ततः सप्तमे यतिर्निवेशनीया; तथा चोक्तं, –"मन्दाक्रान्ताम्बुधिरसनगैर्मोभनौ तौ गयुग्मम्" इति। अत्र तु चतुर्थादिवर्णानां पदान्तर्गतत्वात् यतिभ्रष्टता। तथा च "स्त्रीणां सङ्गी" इति चतुर्थवर्णे, तथा "मयमा" इति दशमवर्णे च विरत्यभावेन वैरस्यात् यतिभ्रष्टत्वं, तञ्च सङ्गीत इति प्रतिपदिकांशगतमिति वामनोक्तं नामभागभेदोदाहरणमिदमित्यपि बोध्यम्। वामनस्तु धातुनामभागत्वेनास्य द्वैविध्यमाह; यथा, –"तद्धातुनामभागभेदे स्वरसन्ध्यकृते प्रायेण" (का० सू० वृ० २अधि० २अ० ४सू०) इति। धातुभागभेदे मन्दाक्रान्तायां, यथा, –"एतासां राजति सुमनसां दाम कण्ठावलम्बि" इति। अत्र 'एतासां रा' इत्यत्र राजधातोरंशे प्राप्तस्य विरामस्याभावात् वैरस्यमिति धातुभागभेदत्वम्। लक्षणेऽस्मिन् पदभागभेद इति लाघवं विहाय धातुनामग्रहणेन धातुनामभागव्यतिरिक्ते प्रकृतिप्रत्ययमध्यविरामे यतिभ्रंशो न भवेदिति सूच्यते; तेन "शोभां पुष्यत्ययमभिनवः सुन्दरीणां प्रबाधः" इत्यादौ "शोभां पुष्य" इत्यत्र विरामो न वैरस्यमावहति, धातुभागस्य पुष इत्यन्तत्वात्। कण्ठाभरणे तु 'शोभाम्' इत्यादि प्रथमपादः ; "किञ्चिद्भावालसमसरलप्रेक्षितं कामिनीनाम्" इति द्वितीयः पादः, "कार्य्याकार्य्याण्ययम्" इत्याद्यपरार्द्धमित्येवमुदाहृतम्]। अस्य च क्वचिददोषत्वमाह, कार्य्येति। –अयं नृपः आगमेनैव नीतिशास्त्रेणैव, न तु स्वेच्छाचारितयेति भावः, कार्य्याकार्य्याणि कर्त्तव्याकर्त्तव्याणि, अविकलानि अव्याहतानि, पश्यन् वश्यां

वशतामापन्नाम्, उर्वीं पृथिवीं, वहति पालयति इत्यर्थः, इति एवं प्रयोगश्च अस्ति अदुष्टत्वेन वर्त्तते इत्यर्थः, ('कार्य्याकार्य्याणि' इत्यत्र कार्य्या इत्यस्य प्रातिपदिकभागान्ततया नामभागभेदगतस्य तस्याप्राप्तेरिति भावः। तदुक्तं कण्ठाभरणेऽपि, –"स्वरसन्ध्यकृते प्रायो धातुभेदे तदिष्यते। नामभेदे च शेषेषु न दोष इति सूरयः।।" इति। किञ्च 'ण्य' इत्यादिस्थले स्वरसन्धिश्रयणे पदमध्ये 'र्य्या' इत्यादौ यतिभ्रंशस्य अदोषत्वमवगन्तव्यम्; यदुक्तं, –"क्वचिच्छन्दस्यास्ते यतिरभिहिता पूर्वकृतिभिः पदान्ते सा शोभां श्रयति पदमध्ये त्यजति च। पुनस्तत्रैवासौ स्वरविहितसन्धिः श्रयति तां, यथा कृष्णः पुष्णात्यतुलमहिमा मां करुणया।।" इति। स्त्रीणां सङ्गीतप्रभृतिषु तु एतल्लक्षणाभावात् दोष एव इति)।।१५३।।

प्रभा

यतिभ्रष्टमपवादसहितमुदाहरति–**स्त्रीणामिति।** अयं आदित्यवंश्यः सूर्यवंशोद्भवः। नरेन्द्रः शिष्टैः अमा सह। स्त्रीणां विलासिनीनाम्। अक्लिष्टाः विपुला रसा यत्र तादृशम्। संगीतस्य नृत्यवाद्यगीतस्य। विधिं विधानं पश्यति। इत्यादिपद्यविधानं दुष्टम् यतिभङ्गात्। तथाहि इदं मन्दाक्रान्तावृत्तम्। तत्र च मन्दाक्रान्ताम्भौ न्तौत्गौग्समुद्रर्तुस्वराः। इति पिङ्गलेन चतुर्थेक्षरे ततः षष्ठे ततः सप्तमे च यतिरुपदिष्टा। चतुर्थाक्षरे ततः षष्ठेक्षरे च पठनानुकूलतया यतिः शास्त्रोपदिष्टा। सा चात्र चतुर्थदशमाक्षरयोर्न कृता। तेन च श्रवणोद्वेजनं भवति इति यतिभ्रष्टमेतत्। क्वचित् संधिविकारेण श्लिष्टपदमध्ये यतिश्चेत् सा न श्रवणोद्वेजनी भवति इति न तत्र दोष इति दर्शयति–कार्याणीति। अयं नृपो विकलानि संपूर्णानि कार्याकार्याणि आगमेनैव शास्त्रेणैव पश्यन् वश्यां

स्वायत्तां अनुरक्तां च उर्वीं वहति धारयति इत्येवं एतादृशः प्रयोगोस्ति। यतिभ्रष्टदोषशून्यत्वेनाभिमत इति भावः॥१५३॥

विवृति

शिष्टैः सह अयमादित्यवंशः सूर्यवंश्यो, नरेन्द्रः स्त्रीणां सङ्गीतविधिं गीतनृत्यवाद्यविधिं अक्लिष्टरसमविनष्टश्रृङ्गारादिरसविशेषं पश्यतीत्यत्र मन्दाक्रान्तच्छन्दसी(सि)॥ 'मन्दाक्रान्ता मभनततगा गुः समुद्रर्तुलोकैः' इति चतुष्षट्सप्तमस्थानविराम उक्तः। स च भज्यते। तत एवंविधं यतिभ्रष्टं वर्जनीयम्॥

यतिभ्रष्टं अभ्युपगतं आह–

तदुदाहरति–**स्त्रीणामिति।** प्रथमपादे'सङ्गी' इति चतुर्थाक्षरे पदच्छेदे कर्तव्ये न कृतः ; 'अयमा' इति दशमे अक्षरे पदच्छेदो न कृतः। एवं द्वितीयपादेऽपि चतुर्षु दशसु चाक्षरेषु पदच्छेदो न कृतः। 'मन्दाक्रान्ता जलधिषडगैम्भौं नतौ ताद्गुरू चेत्' इति चतुर्थदशमयोः अक्षरयोः विहितयतेः अकरणात् यतिभ्रष्टत्वम्। पदच्छेदाभावस्य क्वचित् अदोषत्वं दर्शयति–**कार्याकार्याणीति।** 'स्वरसन्ध्यकृते प्रायो धातुभेदे तदिष्यते। नामभेदे च शेषेषु न दोष इति सूरयः॥' इति, कार्याकार्या इति, अविकला इति, नृप [इ]इत्यत्र च, यण्सन्धिकृतत्वात् गुणत्वम्॥१५३॥

लुप्ते पदान्ते शिष्टस्य पदत्वं निश्चितं यथा।
तथा सन्धिविकारान्तं पदमेवेति वर्ण्यते॥१५४॥

रत्नश्री

पदस्यान्ते यथासम्भवं विभक्त्यादिरूपे लुप्ते सति शिष्टस्य व्यवस्थितस्य भागस्य पदत्वं निश्चितम्। [118b] पठत्यादेः शब्दविद्यायाम्। तथा तद्वत्। सन्धिः संहिता। [तत्र] यणादेः विकारोऽन्यथात्वमन्तोऽवसानं यस्य तत्सम्बन्धि[वि]कारान्तमतद्गुणसंविज्ञानात् सन्धिविकारमपहृत्य शिष्टं प्रकृतिरूपं पदमेवेति वर्ण्यते स्मर्यते शिष्टैः। ततः कार्याकार्येत्यादौ चतुर्थादिना वर्णेण पदच्छेदो यतिर्न विरुध्यत इति॥

ईदृशमपि यदि श्रवणानुद्वेजनं तदा ग्राह्यमन्यथा हेयमिति पुनर्विशेषं दर्शयन्नाह–

हृदयङ्गमा

उभयत्रापि पदमध्ये विश्रान्तिरूपस्य उक्तविधयतिभ्रंशस्य एकत्र सदोषत्वम् अन्यत्र अदोषत्वञ्च प्रतिपादयति, लुप्ते इति।–पदस्य सुबन्त तिङन्तरूपस्य, अन्ते शेषवर्णे, लुप्ते मधु पठ इत्यादौ विभक्तिलोपे जाते इत्यर्थः, (अत्र पदान्ते इत्येकवचनमविवक्षितं राजा इत्यत्र द्वयोरपि लोपे अवशिष्टस्य राजभागस्य पदत्वस्वीकारात्) शिष्टस्य अवशिष्टस्य प्रकृतिभागरूपस्य पदांशस्य, यथा पदत्वं निश्चितं सिद्धान्तितं, निःसन्धिग्धं शिष्टैः पदत्वेन स्वीकृतमित्यर्थः, तथा सन्धिः स्वरद्वयसम्मेलनं, तत्कृतो विकारः दीर्घ-य-व-

प्रभृतिवर्णान्तरोत्पत्तिरूपः, तादृशविकारयुक्तव्यञ्जनमिति यावत्, अन्ते यस्य तत्, पदमध्यमपीति शेषः, पदमेव पदान्त एव, इति वर्ण्यते कविभिरुच्यते। (ततश्च 'कार्य्याकार्य्याण्ययम्' इत्यादौ 'ण्य' इत्यादिस्थले स्वरसन्धिकृतयकारादिविकारयुक्तवर्णान्ते, 'र्य्या' इत्यादौ पदमध्येऽपि यतिर्न दोषावहा। तथा चतुर्थपादेऽपि पादस्य मध्यभागे निविष्टकेवलस्वरत्वात् यतिभ्रंशेऽपि स्वरसन्धिकृतत्वादविभिन्ननामधातुशरीरत्वाच्च न दोषत्वम्। एतदुक्तमेव प्राक्। एतद्वैपरीत्ये दोष एव, यथा स्त्रीणामित्यादि)।।१५४।।

प्रभा

पूर्वदर्शितसदोषनिर्दोषयतिभ्रंशमुपपादयति-**लुप्त इति।** पदान्ते पदान्तावयवस्य लोपे सति शिष्टस्य अवशिष्टभागस्य पदत्वं निश्चितम्। यथा-रम्या रामा मधुरवचना हृद्यवेशा जयन्ति। इत्यादिस्थले पदान्तावयवीभूतविसर्गस्य लोपे सति अवशिष्टस्य पदत्वं न व्याहतं भवति। न यतिभ्रंशश्च कल्प्यते। तथा तद्वत्। संधिः स्वरद्वयस्य वर्णद्वयस्य वा विशेषसंश्लेषस्तदर्थं ये विकारा आदेशागमलोपरूपास्ते अन्ते पुरोभागे यस्य तादृशं पदावयवं पदम्। एव इति। वर्ण्यते छन्दः शास्त्रज्ञैरङ्गीक्रियते। केचित्तु लुप्ते पदान्ते इत्यस्य विभक्त्यादिलोपे सति अवशिष्टं राजा वारि कुरु पच इत्यादिकं पदं शास्त्रकारैर्निश्चितमस्ति। तथा संधिविकारे परतः पूर्वं अवशिष्टं पदं मन्वते इत्याहुः। तादृशपदे च यतिः स्याच्चेन्न तत्र यतिभ्रंशदोषः। तथा च कार्याकार्येत्यादौ संधिविकारान्तत्वान्न पदत्वहानिर्न च यतिभ्रंशो दोषः। स्त्रीणां संगीतेत्यादौ न तथाविधपदत्वम्। अतो यतिभ्रंशदोषस्य अवकाशोस्ति।।१५४।।

विवृति

स्वयमस्य समर्थनमाह–

यथा दधीत्यत्र स्वमोर्नपुंसकादिति प्रथमैकवचने लुप्ते शिष्टस्य प्रतिरूपस्य (प्रातिपदिकस्य) सुप्तिङन्तं पदमिति पदत्वं निश्चितम्। एवं कार्याकार्याणीत्यत्र चा(आ)गमो (मे)नैवत्येत्र च इको यणचीति यणादेशे कृते यकारस्य 'नटभार्यावव्द्यञ्जनानि भवन्ति' इति परेण सम्बन्धे पूर्वसन्धिविकारान्तं पदमिति ससुद्रर्तुलोके(क)परिमाणमस्तीति न कर्णकटुकमाभातीति एवंविधमिष्टं शिष्टैरिति न दोषः।।

गुणत्वमुपपादयति–लुप्त इति। राजन् इति नकारान्तस्य प्रातिपदिकस्य सुबन्तत्वेन पदत्वे सति नकारलोपेऽपि पदत्वं यथा भवति, तथा सन्धिविकारस्य यणः प्राक् आकारपर्यवसानस्य इकारपर्यवसानस्य च पदत्वम्।।१५४।।

तथापि कटु कर्णानां कवयो न प्रयुञ्यते।
ध्वजिनी तस्य राज्ञः के तूदस्तजलदेत्यदः॥१५५॥

रत्नश्री

यद्यपि स[न्धिवि]कारान्तं पदं स्मृतम्, तथापि एवमपि कर्णानां कटु श्रवणोद्वेजनं न प्रयुञ्जते कवयो रसज्ञाः। तादृशं वर्जनीयमित्यर्थः। कतरत् तदित्युदाहरतितस्य राज्ञः कस्यचित्। ध्वजिनी सेना केतुभिर्ध्वजैरुच्छ्रितैः उदस्ता उत्क्षिप्ता जलदा यथा इति केतूदस्तजलदा इत्यदः ईदृशं कर्णकटु वर्ज्यमत्र। यद्यपि तुशब्दे अकोऽकि दीर्घण परेणापाकृते के इत्य[त्र] पदत्वं स्यात्, तथापि श्रवणोद्वेजनमीदृशमिति न प्रयोक्तव्यम्। अत्र च श्रुतिरेव कवीनां प्रमाणमिति॥

हृदयङ्गमा

स्वरसन्धावपि क्वचिद्दोषं दर्शयति, तथाऽपीति। –तथाऽपि स्वरसन्धिना पदमध्यस्य पदान्तत्वस्वीकारेऽपि, कवयः कर्णानां कटु श्रोत्रासुखकरं, तस्य राज्ञः ध्वजिनी सेना, केतुभिः ध्वजैः, उदस्ता उत्क्षिप्ताः, अत्युन्नतत्वादिति भावः, जलदा मेघा यया तादृशी, इत्यदः एवमिदं पद्यं, न प्रयुञ्जते न व्यवहरन्ति। (प्रकृते च केतूदस्तेत्यत्र "तू" इति स्वरसन्धिना कृतदीर्घपदान्तमपि 'के' इत्यक्षरं यतिस्थानपातितया श्रोतृवैरस्यं जनयतीति स्वरसन्धावपि श्रुतिकटुर्यतिभ्रंश एवेति भावः)॥१५५॥

प्रभा

स्वरंसधिकृतप्रतिप्रसवं संकोचयति–**तथापीति**। तथापि

पूर्वदर्शितप्रकारेण संधिविकारे पूर्वावशिष्टस्य पदत्वस्वीकारेपि। तस्य राज्ञो ध्वजिनीं सेना केतुभिः रथध्वजैरुदस्ता उत्क्षिप्ता जलदा यथा तथाविधा। अत्युच्चकेतुभिर्जलदोत्क्षेपविधायिनी सेना वर्तते इति शेषः। इत्यदः एतादृशं संधिविकारान्तपदम्। कर्णानां कटु श्रवणवैरस्यावहम्। अतः कवय एतादृशयतिभ्रंशं न निर्दोषं मत्वा प्रयुञ्जते। ईदृशं यतिभ्रंशं दोषतया परिहरन्तीत्यर्थः। एवं च संधिविकारान्तं पदं श्रवणकटु भवति वा न वेति विचार्य तदनुरोधेन सदोषनिर्दोषत्वं ज्ञेयम्।।१५५।।

विवृति

सन्धिविकारान्तमपि श्रवणोद्वेजनं वर्जनीयमित्याह–

यद्यपि सन्धिविकारान्तं पदमेवेत्युक्तं तथाऽपि यत् कर्णकटुकं तन्न प्रयोक्तव्यम्।

तदुदाहरति–

केतुशब्दस्य उदस्तशब्देन सहाकः सवर्णे दीर्घ इति सन्धिविधाने सन्धिविकारान्तं पदमिति पदत्वे तुकारस्य परेण सम्बन्धे ध्वजिनी तस्य राज्ञः के इति केपर्यन्तस्य कर्णकटुकत्वान्न पदत्वमिष्यत इति वर्जनीयम्।।

स्वरसन्धिकृतत्वेऽपि क्वचित् श्रवणोद्वेगजनकत्वेन दोषत्वमित्याह– **तथाऽपीति।** तदुदाहरति–ध्वजिनीति। केतूदस्तेत्यत्र पादान्तयतेः स्वरसन्धिकृतत्वेऽपि श्रवणोद्वेजकत्वेन दोषत्वम्।।१५५।।

वर्णानां न्यूनताधिक्ये गुरुलघ्वयथास्थितिः।
यत्र तद्भिन्नवृत्तं स्यादेष दोषः सुनिन्दितः॥१५६॥

रत्नश्री

वर्णानां शास्त्रतः प्रतिनियतानां श्लोकभाविनां न्यूनता हीनत्वमाधिक्यमतिरेको वा। न्यूनताधिक्ये द्वे। गुरोः संयोगपरस्य दीर्घस्य लघोश्च ह्रस्वस्याक्षरस्यायथास्थितिः तद्विद्याव्यवस्थातिक्रमेण वृत्तेर्यत्र पद्ये स्यात् कविप्रमादात् तत् तादृशम्। भिन्नं च तद्वृत्तं चेति भिन्नवृत्तम्। भिन्नं वा वृत्तं यस्मिन् काव्ये इति भेदविवक्षया भिन्नवृत्तम्। एष भिन्नवृत्तलक्षणो दोषः सुनिन्दितः सुष्ठु गर्हितः कविभिः काव्यशरीरस्यैवंविधत्वे कुत एव तत्र विशेषवित्ता [कवेः] इति॥

[119a] चतुष्टयमध्ये तद् यथाक्रममुदाहरति—

हृदयङ्गमा

भिन्नवृत्तं निर्दिशति, वर्णानामिति। —यत्रेत्यूह्यम्, उत्तरत्र तत्रेति दर्शनात्; यत्र पद्ये वर्णानां वर्णस्य वर्णयोः वर्णानां वेत्यर्थः, न्यूनता अधिक्यं वा, तथा गुरूणां लघूनां वा वर्णानाम्, अयथास्थितिः अनियमेन विन्यासः, तत्र पद्ये, तत् भिन्नवृत्तं भिन्नं भग्नं, वृत्तं छन्दः, छन्दोभङ्ग इत्यर्थः, स्यात्, छन्दः शास्त्रलक्षणच्युततया यद्वृत्तं कृतं तत् वृत्तभङ्गदोषवदिति निष्कर्षः। [तदुक्तं वामनेन, —"स्वलक्षणच्युतवृत्तं भिन्नवृत्तम्" (का० सू० वृ० २अधि० २अ० २सू०) इति] एष वृत्तभङ्गाख्यः दोषः सुनिन्दितः कवयितुश्छन्दोऽनभिज्ञतया उपहासास्पदत्वज्ञापनादिति भावः। (प्रकाशकारादिभिश्च दोषाऽयं हतवृत्तसंज्ञया अभिहितः, तच्च

हतवृत्तं लक्षणानुसरणेऽपि अश्रव्यत्वरूपम् अप्राप्तगुरुभावान्तलघुरूपं, रसाननुगुणरूपञ्चेति त्रिविधं बोध्यम्। तत्रोदाहृतं यथा, –"अमृतममृतं कः सन्देहो मधुन्यपि नान्यथा, मधुरमधिकं चूततस्यापि प्रसन्नरसं फलम्। सकृदपि पुनर्मध्यस्थः सन् रसान्तरविज्जनो, वदतु यदिहान्यत् स्वादु स्यात् प्रियारदनच्छदात्।।" इति)।।१५६।।

प्रभा

भिन्नवृत्तं लक्षयति–**वर्णानामिति।** यत्र वृत्ते। वर्णानां वृत्तनियमिताक्षराणां मध्ये। निर्धारणे षष्ठी। न्यूनताधिक्ये वृत्तनियतसंख्यापेक्षया न्यूनाधिकत्वम्। तथा गुरुलघूनां नियतगुरुलघुक्रमस्य अयथास्थितिर्विपर्ययेणावस्थानम्। तत्र पद्ये। तत् तादृशं दुष्टम्। भिन्नवृत्तं स्याद् भिन्नवृत्तदोषो भवेत्। अथवा तद् वाक्यम्। भिन्नवृत्तं भिन्नवृत्तदोषवत् स्यात्। अयं दोषः सुनिन्दितः विशेषनिन्दितः। छन्दोनभिज्ञाने सर्वे उपहसन्ति। अतोयं दोषो विशेषतः परिहरणीयः।।१५६।।

विवृति

भिन्नवृत्तलक्षणमाह–

वर्णानामकारादीनां यत्(यत्र)च्छन्दोनिबन्धने वर्णसंख्या न्यूनाऽधिका वा तथा गुरूणां लघूनां च यत्र व्यवायः तत् भिन्नवृतमित्युच्यते। एष च दोषः सुनिश्चितः। अस्यापवादो व्यर्थादेरिव नास्तीत्यर्थः। सुनिन्दित इति च पाठान्तरम्।।

भिन्नवृत्तं लक्षयति–**वर्णानामिति**।।१५६।।

इन्दुपादाः *शिशिरा स्पृशन्तीत्यूनवर्णता।
सहकारस्य किस*ल*यान्यार्द्राणीत्यधिकाक्षरम्॥१५७॥

रत्नश्री

इन्दुपादाः शिशिराः स्पृशन्ति इत्यत्र प्रथमपाद ऊनवर्णता। ऊनो न्यूनो वर्णो यत्र तद्भाव ऊनवर्णतेति कृत्वा। अनुष्टुप्पादो ह्यष्टाक्षरः। अयं तु सप्ताक्षर इति वर्णहानिः। सहकारस्य किसलयान्यार्द्राणी[ति] अत्रापि पूर्वपादे अधिकमक्षर[म]स्मिन्निति अधिकाक्षरम्। अधिकाक्षरमिति भावप्रधानो निर्देशः। यद्वा अधिकाक्षरं पादं रूपं वृत्तमिति वा योज्यम्, अनुष्टुप्पादस्याष्टाक्षरस्य नवाक्षरीकरणादिति॥

हृदयङ्गमा

न्यूनताधिक्ये उदाहरति, इन्दुपादा इति। –शिशिराः शीतलाः, इन्दोश्चन्द्रस्य, पादाः किरणाः, ("पादा रश्म्यङ्घ्रितुर्य्यांशाः" इत्यमरः) स्पृशन्ति, इत्यत्न ऊनवर्णता प्रथमे पादे अष्टाक्षरे वक्तव्ये सप्ताक्षराणीति एको वर्णः न्यन इत्यर्थः, सहकारस्य आम्रस्य, किसलयानि पल्लवानि, आर्द्राणि, इति अत्नापि, अधिकाक्षरं तृतीये पादे अष्टाक्षरे वक्तव्ये नवाक्षराणीति एको वर्णोऽधिक इत्यर्थः॥१५७॥

प्रभा

तत्र न्यूनाधिकाक्षरं उदाहरति–**इन्दुपादा इति।** शिशिराः शीतलाः। इन्दुपादाः चन्द्रकिरणानि। स्पृशन्ति। अत्र ऊनवर्णता प्रथमचरणे सप्ताक्षरत्वात्। अनुष्टुभस्त्वष्टाक्षरनियमात्। सहकारस्य

आम्रस्य। किसलयानि पल्लवाः। आर्द्राणि स्निग्धानि। सन्तीति शेषः। इति अधिकाक्षरम्। नवाक्षरत्वादेको वर्णोऽधिकः।।१५७।।

विवृति

तत्र न्यूनाक्षरमुदाहरति–

इन्दुपादाः शिशिराः स्पृशन्ति (इति) न्यूनवर्णता। 'इन्दुपादाः शिशिराः' इत्यत्र पादे सप्तैवाक्षराणि। अष्टाक्षरं (रा) चानुष्टुबिति।

अधिकाक्षरमुदाहरति–

नवाक्षरः पादः।।

वर्णानां न्यूनाधिक्ये उदाहरति–इन्द्विति।।१५७।।

***का *मेन बाणा निशिता विमुक्ता**
मृगेक्षणाष्वित्ययथागुरुत्वम्।
म *द *नबाणा निशिताः पतन्ति
वामेक्षणास्वित्ययथालघुत्वम्॥१५८॥

रत्नश्री

अयथा शास्त्रविरुद्धो गुरुर्यस्मिन् तस्य भावः अयथागुरुत्वम्। उपेन्द्रवज्रायां प्रथमलघुविधानात् तदपेक्षयेति द्रष्टव्यम्। उपजात्यपेक्षया त्वदोष इति। मदनेत्यादि। अयथालघुत्वमिति पूर्व[वच्च] व्युत्पत्तिः। उपेन्द्रवज्रायां द्वितीयमक्षरं गुरु विहितमिति। इदं तु लघ्विति तद्विद्याविरोधादयथालघुत्वमिति॥

हृदयङ्गमा

गुरुलघ्ववयथास्थितिमुदाहरति, कामेनेति। —कामेन मृगेक्षणासु निशिता बाणा विमुक्ताः, इत्यत्र, अयथागुरुत्वं 'का' इति प्रथमपादस्थप्रथमवर्णस्य लघुत्वनियमेऽपि दीर्घकरणात् इति बोध्यम्। (तथा च, अत्र पूर्वार्द्धे उपेन्द्रवज्रा वृत्तम्, "उपेन्द्रवज्रा जतजास्ततो गौ" इति लक्षणात्, ततश्च जगणे प्रथमं निवेश्ये का इति गुरुवर्णो निवेशितः, जगणश्च "जो गुरुमध्यगतः" इत्युक्तत्वात् आद्यन्तौ लघू मध्यवर्णो गुरुरित्येवं वर्णत्रयात्मक इति; एवञ्च प्रथमवर्णस्य दीर्घत्वादिन्द्रवज्रालक्षणलक्षितः प्रथमपादः, द्वितीयपादस्तु उपेन्द्रवज्रालक्षणात्मक इति इन्द्रवज्रोपेन्द्रवज्रयोः सङ्करादुपजाति वृत्तमिदम्। तत्र यद्यपि प्रथममिन्द्रवज्रापादाङ्गीकारे प्रथमवर्णस्य दीर्घत्वमेव युज्यते, न च अयथागुरुत्वदोषोऽपि

सम्भवति, तथाऽपि उपजातिवृत्तानां प्रथमपादाक्षराणां लघुत्वनियमादयथागुरुत्वं सम्भवत्येव। उक्तञ्च यथा, –"उपजातिविकल्पानां सिद्धौ यद्यपि सङ्करः। तथाऽपि प्रथमं कुर्य्यात् पूर्वपादाक्षरं लघु।। गुर्वक्षरेण संरुद्धं ग्रन्थियुक्तमिवाग्रतः। करोति प्रथमं स्थूलं किञ्चित् कर्णकदर्थनाम्।।" इति। अत एव "अस्त्युत्तरस्याम्" इत्यादिमहाकविप्रयोगोऽपि दोषोदाहरणे दर्शितः इति बोध्यम्)। तथा, स्मरस्य निशिता बाणा वामेक्षणासु पतन्ति, इत्यत्र, अयथालघुत्वम्। (तथा च, उत्तरार्द्धे इन्द्रवज्रा वृत्तं "स्यादिन्द्रवज्रा ततजास्ततो गौ" इति लक्षणात्, ततश्च तगणे प्रथमं निवेश्ये "स्म" इति लघुवर्णो निवेशितः, तगणश्च "अन्तलघुस्त" इत्युक्तत्वात् प्रथमद्वितीयौ गुरु अन्त्यश्च लघुरित्येवं वर्णत्रयात्मक इति बोध्यम्। अत्र आदाविन्द्रवज्रा पश्चादुपेन्द्रवज्रा इत्येवमुपजातिच्छन्द इदमिति स्वीकृते नायं दूषणावसरः। वस्तुतस्तु उपेन्द्रबज्राया इन्द्रवज्राया वा उदाहरणमिदमिति प्रकल्प्य वृत्तभङ्गत्वं दर्शितम्। दिङ्मात्रमिदं, शुद्धोदाहरणं यथा, –"यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः। तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः।।" इति। अत्र पञ्चमवर्णस्य लघोः स्थाने गुरोः करणात् वृत्तभङ्गः। यथा वा, –"अयि! पश्यसि सौधमाश्रितामविरलसुमनोमालभारिणीम्" इति। वैतालीययुग्मपादे "ताश्च समे स्युर्नो निरन्तराः" इति समपादे लघ्वक्षरषट्कस्य नैरन्तर्य्यं निषिद्धम्, अत्र तु "अविरलसुम" इति षड़पि लघ्वक्षराणि प्रयुक्तानि। केचित्तु–द्वितीयादिपादत्रयस्य लघ्वादित्वेन गुर्वादित्वेन वा साम्यमभिप्रेत्य दूषणद्वयप्रदर्शनमिदम्, अन्यथा अयथागुरुत्वोदाहरणे अयथालघुत्वम् अयथालघुत्वोदाहरणे च अयथागुरुत्वमपि सम्भवति, पादद्वयादौ द्वयोरपि गुरुलघ्वोः

सत्त्वादिति उक्तवा उपेन्द्रवज्रेन्द्रवज्रयोः सङ्करादुपजात्याख्यं छन्दोऽन्तरं ये न मन्यन्ते तेषां मते दूषणद्वयमिदमित्याहुः ; तथा "कामेन" इत्यत्र "स्वभुवा" "स्मरस्य" इत्यत्र "मदन" इति पाठं प्रकल्प्य पूर्वत्र तृतीयस्य गुरुत्वम् उत्तरत्र द्वितीयस्य लघुत्वमयथाप्रयुक्तमिति सङ्गमयन्ति च। किञ्च नवीनैर्यदुक्तम्—अप्राप्तगुरुभावान्तलघुत्वं, तस्यापि अयथालघुत्वं बोद्धव्यं, यथा, —"विकसितसहकारभारहारिपरिमल एष समागतो वसन्तः" इत्यादौ भारहारि इत्यत्र 'रि' इत्यस्य लघुवर्णस्य प्रथमपादान्तत्वात् गुरुत्वाभावः इति वृत्तभङ्गः, पादान्तलघोर्गुरुत्वन्तु द्वितीयचतुर्थपादविषयत्वेनाभिहितत्वात् इत्यपि सुधीभिः ध्येयम्)॥१५८॥

प्रभा

गुरुलघुक्रमभङ्गमुदाहरति—**कामेनेति**। कामेन मृगेक्षणासु निशाता बाणा विमुक्ता इत्यन्वयः। इति अयथागुरुत्वं छन्दःशास्त्रनियमविरुद्धं गुरुत्वम्। तथाहि अत्र प्रथमचतुर्थचरणौ इन्द्रवज्रालक्षणोपेतौ। द्वितीयतृतीयौ च उपेन्द्रवज्रालक्षणोपेतौ। अतश्च उपजातिवृत्तमेतत्। तत्रैवं सति प्रथमपादे सप्तमाक्षरं गुरु विद्यते तच्च लक्षणे न घटते। यतः स्यादिन्द्रवज्रा ततजास्ततो गौ इति इन्द्रवज्रालक्षणात्सप्तमाक्षरस्य लघुत्वमपेक्ष्यते। अयथालघुत्वं दर्शयति—**मदनेति**। मदनस्य बाणा निशिता वामेक्षणासु पतन्ति इति अयथालघुत्वम्। यत उपेन्द्रवज्रा जतजास्ततो गौ इति उपेन्द्रवज्रालक्षणप्राप्तः पादादौ जगणो द्वितीयाक्षरलघुत्वे न संभवतीत्यर्थः॥१५८॥

विवृति

गुरुलघु(ध्व)यथास्थितिमाह–

पञ्चमं लघु सर्वत्रानुष्टुप्छन्दसि अषष्ठं (द्विचतुर्थ)पादयोः षष्ठं गुरु चतुर्ष्वपि पादेषु भवत्यक्षरमिति नियमः। इह तु कामेन बाणा इत्यः(त्यत्र) पञ्चमं गुरु। निशिता इत्यषष्ठं लघु द्विचतुर्थयोरिति विशेषणात् प्रथमतृतीययोः सप्तमं गुरु भवति। अत्र च प्रथमपादे सप्तमाक्षरस्य लघुत्वादयथागुरुत्वम्। उक्तमयथागुरुत्वम्।।(?)

अयथालघुत्वमाह–

इत्ययथालघुत्वम्। इ(शि) स्थाने गुरुणा भवितव्यम्। पञ्चमेन च लघुना। सप्तम(मं)। (द्वि)चतुर्थयोः पादयोर्लघु प्रथमतृतीययोश्च गुरु भवतीति लघु प्रयुक्तमिति अयथालघुत्वं निश्चिच्छब्दो (इति छन्दो)दोषः।।

गुरुलघ्वयथास्थिती उदाहरति–**कामेनेति**। निशाता इत्यत्र शा इति गुरुः अस्थानस्थः ; 'इन्द्रवज्रा तौ जो गौ' इति तृतीयस्य गणस्य जगणत्वेन विहितत्वात्। मदन इत्यत्र द्वितीये गुरौ कर्तव्ये द इति लघुः अस्थानस्थः ; 'उपेन्द्रवज्रा जतौ जो गौ' इति उपेन्द्रवज्रायाः प्रथमगणस्य जगणत्वेन विहतत्वात्।।१५८।।

न संहितां विवक्षामीत्यसन्धानं पदेषु यत्।
तद्विसन्धीति निर्दिष्टं न प्रगृह्यादिहेतुकम्॥१५९॥

रत्नश्री

संहितां सन्धिमेकपदे भिन्नपदे वा प्राप्तामपि न विवक्षामि। असंहितैव मयात्र विवक्षितेति बुद्ध्या पदेषु यदसन्धानमसंहिता तत् तादृशं विगतः सन्धिरस्मादिति विसन्धीति निर्दिष्टमुक्तं काव्यदूषणम्। यत् पुनरसन्धानं प्रगृह्यमादिर्यस्य यलोपादेः स हेतुः कारणमस्येति प्रगृह्यादिहेतुकम्, न तद् विसन्धीति निर्दिष्टं तादृशमसन्धानं युक्तं शास्त्रीयत्वात्। अनेन च यत् प्रगृह्यादिहेतुकमपि विसन्धानं भामहेन वर्जितम्, तन्निरस्तम्। यदाह–

कान्ते इन्दुशिरोरत्ने आदधाने उदंशुनी।
पातां वः शम्भुशर्वाण्याविति प्राहुर्विसन्ध्यदः॥
[काव्यालङ्कारे 4.28]

इति। लक्षणानुगतं हीदृशं कथमप्रमाणयितुं शक्यते स्वस्थचेतसेति भावः॥

तदुदाहरति–

हृदयङ्गमा

विसन्धिकं निर्दिशति, नेति। –संहितां वर्णयोर्मिलिनरूपां सन्धिं, न विवक्षामि न वक्तुमिच्छामि, तद्विधायकसूत्रे सत्यपि न करोमीति भावः, (एतेन ''सन्धिस्तु पुरुषेच्छया'' इति ''सैवान्यत्र

विभाषित'' इत्यादिकमन्येषां मतं प्रत्युक्तम्)। इति इत्यभिप्रेत्य, पदेषु पदसंयोजकवर्णेषु, यत् असन्धानम् असंयोजनं, तत्तत्सूत्रेण सन्ध्यभाव इत्यर्थः, तत् विसन्धि विगतः सन्धिः सन्धिसूत्रेण परस्परमिलनं यत्र तत् तादृशं, विसन्ध्याख्यदोषवत् इत्यर्थः, वाक्यमिति शेषः, (पदमिदं वाक्यविशेषणम्, अन्यथा ल्कीवत्वानुपपत्तेरिति बोध्यम्) इति निर्दिष्टं कथितमित्यर्थः। वक्तुरिच्छाकृतसन्ध्यभावस्यैव दोषत्वमिति यदुक्तं तदेव स्पष्टयति, नेति। –प्रगृह्यं सन्धिनिषेधकानुशासनविशेषः, तदादिः, तत्प्रभृतिरेव, (आदिना अनुकरणादीनां परिग्रहः) हेतुः यत्र तत्, सन्धिसूत्रेण यत्र सन्धिर्निषिद्धः इत्यर्थः, न तत्र विसन्धि दोषो न भवति इत्यर्थः। [तत्र प्रगृह्यहेतुको यथा, –अमी ईशा इत्यादि। असिद्धिहेतुको यथा, –''तत उदित उदारहारिद्युतिः'' इत्यादि। अत्र ''लोपः शाकल्यस्य'' (८/३/१९ पा०) इति सूत्रेण विहितस्यापि लोपस्य ''आद्गुणः'' (६/१/८७ पा०) इत्यनेन प्राप्तं गुणं प्रति ''पूर्वत्रासिद्धम्'' (८/२/१ पा०) इत्यनेनासिद्धिविधानादसिद्धिहेतुकोऽयं विश्लेषः। प्रगृह्यादिहेतुकस्य सन्ध्यभावस्य सकृत् प्रयोगे एव दोषाभावः, असकृत् प्रयोगे तु बन्धशैथिल्यनिबन्धनश्रवणोद्वेजकत्वात् दोष एव। अत्र विश्वनाथः यथा, –''दलिते उत्पले एते अक्षिणी अमलाङ्गि! ते'' एवंविधसन्धिविश्लेषस्य असकृत् प्रयोग एव दोषः। अनुशासनमुल्लङ्घ्य वृत्तभङ्गभयात् सन्धिविश्लेषस्य तु सकृदपि। यथा, –''वासवाशामुखे भाति इन्दुश्चन्दनविन्दुवत्'' इति। तेन तु सन्धौ जुगुप्साव्यञ्जकाश्लीलत्वकष्टत्वयोः यद्दोषत्वमुक्तं, तत्तु शाब्दबोधाप्रतिकूलतयैव नास्याभिमतम्। तच्च दर्शितं यथा, –''चलण्डामरचेष्टितम्'' अत्र सन्धौ लण्डा इति पदस्य

जुगुप्साव्यञ्जकमश्लीलत्वम्। "उर्वसावत्र तर्वाली मर्वन्ते चार्ववस्थितिः" अत्र सन्धौ कष्टत्वम्]॥१५९॥

प्रभा

विसंधिकं लक्षयति—**न संहितामिति**। संहितां वर्णानामतिशयितसंनिधिम्। न विवक्षामि-

संहितैकपदे नित्या नित्या धातूपसर्गयोः।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते॥

इति वैयाकरणनियमानुसारेण वाक्ये संहिताया विवक्षाधीनत्वान्नाहं तस्य विवक्षां करोमि इति संकल्प्य पदेषु पदावयववर्णेषु यद् असंधानं तत्तन्नियमानुरोधेन आदेशादिकं विधायासंयोजनम्। तद् वाक्यम्। विसंधि विगतः संधिर्यस्माद् एतादृशं बोद्धव्यम्। अयं भावः। वाक्ये संहितायाः पुरुषाधीनत्वेन वैकल्पिकत्वं स्वीकार्यम्। तथा च वाक्ये संधिकार्याकरणं यद्यपि व्याकरणशास्त्रे न दुष्टतया परिगणितं तथापि साहित्यशास्त्रे विसंधिवाक्यस्य पद्ये विशेषतो वैरस्योत्पादकतया सदोषत्वं स्वीकार्यमेव। गद्ये तु न तादृशो नियमः। तत्र वक्तुर्यत्र विश्रान्तिरपेक्ष्यते तत्र सन्धेरविवक्षा एव युक्ता। यथा हे सखे एहि अनु गृहाणेमं जनम् इत्यादौ। पद्येपि विसंधेः कुत्रचिदनुमतिं दर्शयति—**न प्रगृह्यादिहेतुकम्** इति। प्लुतप्रगृह्या अचि (पा० सू० ६/१/१२५) इत्यनेन यत्र संध्यभावस्तत्पदयोर्विसंधि पद्येवस्थानं न दोषावहम्। अयं च दोषाभावः सकृत्प्रयोगे। असकृत्प्रयोगे तु दोषावह एव श्रवणोद्वेजकत्वात्। यथा—कमले इव लोचने इमे अनुबन्धाति विलासपद्धतिः। इति। साहित्यशास्त्रेपि श्लोकार्धान्ते संहिताविरामः

सर्वसंमतः। विसंधिपदेन अर्वाचीना अश्लीलत्वं कष्टत्वं चेति दोषद्वयं स्वीकुर्वन्ति। तदुदाहरणानि काव्यप्रकाशादावनुसंधेयानि।।१५९।।

विवृति

विसन्धिलक्षणमाह–

सन्धिर्वि(रवि)वक्षितो भवतीति पदयोः यदिस(दस)न्धानं तद्विसन्धीत्युच्यते। प्रगृह्यदिहेतुं तद(तुकं न) विसन्धि। तथा हि–

'ईदूदेद्विवचनं प्रगृह्यम्।'

'अदसो मात्।'

'निपात एकाजनाङ्'

अगी (ग्नी) इमौ यजस्वेति पूरू एतौ नृप त्मजौ।
पञ्चित(चेते) ओदनं कन्ये अमी उष्ट्रा भरक्षमाः।।

आ एवं किल त(त्)। न्ये (हे) देवदत्ता इहाप्र (व्र)ज इति प्लुतप्रगृह्याणां असन्धिः न विसन्धिता। 'प्लुतप्रगृह्या अची'ति सन्धिप्रतिषेधात् न विसन्धिर्नाम दोषः।।

विसन्धि लक्षयति–नेति। शब्दशास्त्रे विवक्षावशात् सन्धिरुक्त इति सन्धिं न विवक्षामीति पदेषु असन्धातं यत्, तत् विसन्धिदोषत्वेन निर्दिष्टम्।।१५९।।

मन्दानिलेन चरता *अङ्गनागण्डमण्डले।
लुप्तमुद्भेदि घर्माम्भो नभस्यस्मन्मनस्यपि॥१६०॥

हृदयङ्गमा

विसन्धिदोषमुदाहरति, मन्दानिलेनेति। –नभसिआकाशे, चलता प्रवहता, मन्दानिलेन अङ्गनायाः गण्डमण्डले कपोलदेशे, अस्मद्वपुषि अस्माकं शरीरेऽपि उद्भेदि उत्पन्नं, घर्माम्भः स्वेदजलं, लुप्तम् अपनीतम्। (अत्र चलता इत्याकारस्य अङ्गनेत्यकारेण सह दीर्घत्वविधायकसूत्रे सत्यपि केवलं वृत्तभङ्गभयेन सन्धिर्न कृत इति विसन्धिदोषः)॥१६०॥

प्रभा

विसंधिमुदाहरति–**मन्दानिलेनेति**। नभसि वियति। चलता मन्दानिलेन अङ्गनाया गण्डमण्डले कपोलतले उद्भेदि समुत्पन्नं घर्माम्भः स्वेदोदकम् लुप्तम्। तथा अस्मद्वपुषि अपि उद्भिन्नं घर्माम्भो लुप्तम्। अत्र प्रथमपादान्ताकारस्य द्वितीयपादाद्यकारेण संधिर्न कृतः। संधौ वर्णन्यूनतापत्तेः। अत एतद् विसंधिदोषग्रस्तम्॥१६०॥

विवृति

विसन्धिमुदाहरति–

मन्दानिलेन दक्षिणमारुतेन चरता वाता अङ्गनागण्डमण्डले न केवलमुद्भेदि धर्माम्भो लुप्तं तथा अस्मन्मनस्यपि या(आ)सु रात्रिषु धर्माम्भो ग्रीष्मजनितमम्भो लुप्तमेवेत्यत्र मन्दानिलेन चरता अङ्गनेति

अकः सवर्णदीर्घत्वे द्वयोरकारस्वरयोरेक्ष(क)तापत्तेः छन्दोभङ्गभयादसन्धानं विशि(श्लि)ष्टसन्धित्वाद्दोषः।।

तदुदाहरति–मेघानिलेनेति। नभोमासि अमुना मेघानिलेन अङ्गनागण्डलेखासमुद्भेदि धर्माम्भो लुप्तम्; मया सह एनां घटयता अस्मन्मनस्यपि धर्माम्भो लुप्तं, सन्तोषो लुप्तः इत्यर्थः।।१६०।।

आसु रात्रिंष्विति प्राज्ञैरज्ञातन्यङ्गमीदृशम्॥१६१॥

रत्नश्री

मन्दानिलेन नभसि। अस्माकं मनस्यपि चेतसि च [119a] मनोहरतया चरता अङ्गनागण्डमण्डले उद्भेदि उद्गतं घर्माम्भ: स्वेदजलं लुप्तम् आसु रात्रिष्विति। अर्थसंगतिरियम्। उदाहरणं तु विसन्धे:- अनिलेन चरता अङ्गनागण्डमण्डले इत्येतत्। अत्र हि चरता अङ्गनेत्यत्र अकोऽकि दीर्घ: [इत्यनेन प्राप्तोऽपि] सन्धि: न कृत इति विसन्ध्येतद् द्रष्टव्यम्। द्वयोरन्तादिविषयं तु असन्धानमिष्टम्, [महाजन प्र]सिद्धेरिति दर्शयति लुप्तमुद्भेदि घर्माम्भो नभस्यस्मन्मनस्यपि आसु रात्रिष्विति।

ईदृशमर्धान्तादिगोचरमसन्धानम् अज्ञातं न्यङ्गमस्मिन्निति अज्ञातन्यङ्गमविदितदोषम अदुष्टं ज्ञातं प्राज्ञै: शिष्टैरिति यावत्।

सरसिजमनुविद्धं शैवलेनापि रम्यं

मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।

इयमधिकमनोज्ञा वल्कलेनापि तन्वी

किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥

[अभिज्ञानशाकुन्तले १.१७]

तस्मादीदृशमसन्धानं प्रयुज्यते शि[ष्टैरि]ष्टत्वात्। प्रथमद्वितीययो: तृतीयचतुर्थयोश्च पादयोस्तु अन्तादिविषयमन्यत्र चापि [पादस्भ्यन्तरे] सन्धानमिष्टमिति प्रतिपत्तव्यम्॥

हृदयङ्गमा

प्रगृह्यादिहेतुकं सन्ध्यभावं दर्शयति, मानेर्ष्ये इति। –इह हिमऋतौ हेमन्ते, आसु वर्त्तमानासु, रात्रिसु हेमन्तनिशासु इत्यर्थः, प्रिये प्रणयिनि, स्त्रीणां मानेर्ष्ये मानः प्रणयकोपः, ईर्ष्या नायिकान्तरासङ्गजनितः कोपविशेषश्च ते, शीर्य्येते शीर्णे भवतः, नश्यत इत्यर्थः, इति अत्र स्थले, ईदृशं व्यस्तं सन्ध्यभावः, प्राज्ञैः सूत्रकृद्भिः पण्डितैः, आम्रातं कथितम्। [तथा च, मानेर्ष्ये इह इत्यत्र "ईदूदेद्द्विवचनं प्रगृह्यम्" (१/१/११ पा०) इति सूत्रेण द्विवचननिष्पन्नस्य एकारस्य सन्धिर्निषिद्धः, तथा हिमऋतौ इत्यत्र "ऋत्यकः" (६/१/११८ पा०) इति सूत्रेण ऋकारे परे अकारस्य विकल्पेन सन्धिर्निषिद्धः इति बोध्यम्]।।१६१।।

प्रभा

प्रगृह्यादिना अनुमतं संधिविश्लेषं दर्शयति–**मानेर्ष्ये इहेति।** हे प्रिये इह हिमऋतौ अस्मिन् हेमन्ते आसु रात्रिषु अतीवशीतलदीर्घासु रजनीषु स्त्रीणां मानेर्ष्ये मानः प्रणयकोप ईर्ष्या नायकापराधजनितकोपस्तौ उभावपि शीर्येते क्षयं गच्छतः। मानेर्ष्ये परित्यज्य नार्यः प्रियतममालिङ्गन्तीत्यर्थः। ईदृशं व्यस्तं विसंधि। प्राज्ञैः साहित्यकोविदैराम्नातम् विहितम्। मानेर्ष्ये इह इत्यत्र ईदूदेद्द्विवचनं प्रगृह्यम् (पा० सू० १/१/११) इत्यनेन प्रगृह्यसंज्ञायां प्लुतप्रगृह्या अचि नित्यम् (पा० सू० ६/१/१२५) इति प्रकृतिभावः। तथा हिमऋतौ इत्यत्रापि ऋत्यकः (पा० सू० ६/१/१२८) इति प्रगृह्यसंज्ञा।।१६१।।

देशोऽद्रिवनराष्ट्रादिः कालो रात्रिंदिवर्तवः।
नृत्यगीतप्रभृतयः कलाः कामार्थसंश्रयाः॥१६२॥

रत्नश्री

अद्रिः मलयपर्वतादिः। वनं कालिङ्गादि। राष्ट्रं दक्षिणापथादिकम्। आदिशब्देन नदीधन्वादिपरिग्रहः। स तादृशो देशो विज्ञायते। रात्रिर्दिवा च रात्रिंदिवम्। ऋतवश्च प्रावृडादयः षडिति रात्रिंदिवर्तवः कालविशेषत्वात् कालः सामान्येन विज्ञायते। नृत्यं ताण्डवं लास्यं च। नानारसभावाभिनयाङ्गहारादिरूपं गीतं ज्ञेयम्। तच्च

गान्धर्वं त्रिविधं विद्यात् स्वरतालपदात्मकम्।

[नाट्यशास्त्रे २८.११]

इति त्रिधा,

तस्य योनिर्भवेत् कण्ठो वीणा वंशस्तथैव च॥

[तत्रैव २८.१०]

इति त्रियोनिकम् विस्तरतया तच्छास्त्र एवाधिकृतम्। तादर्थ्यात् तत्प्रतिपादकं शास्त्रं नृत्तं गीतं प्रभृति प्रमुखं यासां वाद्यादिविद्यानां ता नृत्तगीतप्रभृतयः कलाविद्याः। कामो विशिष्टो विषयोपभोगः। अर्थश्च विचित्रोपकरणरूपः। संश्रयः अधिष्ठानम्, तद्भावभावित्वाद् यासां [कलानां]मिति कामार्थयोः संश्रयाः। साक्षात् पारम्पर्येण तु धर्मोऽप्यासामाश्रयः स्यात्, तन्मूलत्वादर्थकामयोः॥

हृदयङ्गमा

अथ देशादीनां विरोधं निरूपयिष्यन् तेषां लक्षणानि प्रथमं निर्दिशति, देश इति। –अद्रिः पर्वतः, वनं, राष्ट्रं राज्यम्, इत्येवमादिर्देशः, (आदिपदेन समुद्रादीनां ग्रहणम्) रात्रिर्दिवा ऋतवश्च कालः, (बहुवचनात् मासवत्सरादीनां ग्रहणम्) कामार्थसंश्रयाः कामश्च अभिलाषश्च, अर्थश्च तौ संश्रयौ जनकत्वेनाश्रयभूतौ इत्यर्थः, येषां तथोक्ताः, कामसाधकाः अर्थसाधकाश्च, नृत्यगीतप्रभृतयः (प्रभृतिशब्देन वादित्रादिपरिग्रहः) कलाः तन्त्रोक्ताः चतुःषटिप्रकाराः शिल्पविद्याविशेषाः; (ताश्च अस्मत्पितामहपादकृतवाचस्पत्याभिधाने कलाशब्दे दर्शिताः यथा, –"गीतादिविद्याभेदे, सा च चतुः–षष्टिविधा शैवतन्त्रोक्ता यथा–गीतं वाद्यं नृत्यं नाट्यम् आलेख्यं विशाषकच्छेद्यं तण्डुलकुसुमबलिविकाराः पुष्पास्तरणं दशनवसनाङ्गरागाः मणिभूमिकाकर्म्म शयनरचनम् उदकवाद्यम् उदकघातः चित्रायोगाः माल्यग्रथनविकल्पाः केशशेखरापीड़योजनं नेपथ्ययोगाः कर्णपत्रभङ्गाः गन्धयुक्तिः भूषणयोजनम् इन्द्रजालं कौचुमारयोगाः हस्तलाघवं चित्रशाकापूपभक्ष्यविकारक्रिया पानकरसरागासवयोजनं सूचीवापकर्म्म वीणाडमरुकसूत्रक्रीड़ा प्रहेलिका प्रतिमा दुर्वचकयोगाः पुस्तकवाचनं नाटिकाख्यायिकादर्शनं काव्यसमस्यापूरणं पट्टिकावेत्रबाणविकल्पाः तर्कूकर्माणि तक्षणं वास्तुविद्या रूप्यरत्नपरीक्षा धातुवादः मणिरागज्ञानम् आकरज्ञानं वृक्षायुर्वेदयोगाः मेषकुक्कुटलावकयुद्धविधिः शुकसारिकाप्रलापनम् उत्सादनं केशमार्जनकौशलम् अक्षरमुष्टिकाकथनं म्लेच्छितकविकल्पाः देशभाषाज्ञानं

पुष्पशकटिकानिमित्तज्ञानं यन्त्रमातृका धारणमातृका सम्पाट्यं मानसी काव्यक्रिया क्रियाविकल्पाः छलितकयोगाः अभिधानकोषच्छन्दोज्ञानं वस्त्रगोपनानि द्यूतविशेषः आकर्षणक्रीड़ा बालकक्रीड़नकानि वैनायिकीनां विद्यानां ज्ञानं वैजयिकीनां विद्यानां ज्ञानं वैतालिकीनां विद्यानां ज्ञानम् इति भाग० ९४५ अ० २८ श्लोके टीकायां श्रीधरस्वामिलिखिताः'')।।१६२।।

प्रभा

देशकालकलालोकन्यायागमविरोधि च। इति (३.१२६) पूर्वमुद्दिष्टानां पदार्थानां निरूपणपुरः सरं तद्विरोधं दर्शयति–**देशोद्रिवनेति**। अद्रिवनराष्ट्रादिः देशः। आदिशब्देन समुद्रपत्तनग्रामादीनां संग्रहः। रात्रिंदिवर्तवो बहुवचनेन माससंवत्सरादिसंग्रहः। कामार्थयोः संश्रया आश्रयभूताः। कलाभिः कामार्थलाभा भवन्ति अतस्तदाश्रया इति भावः। कलाः चतुः षष्टिसंख्याका नृत्यगीतप्रभृतयः।।१६२।।

विवृति

अधिव्यधिपरीताय अथ(द्य)श्वो वा विनाशिने इत्यादिकमपि विशिष्टमुदाहरणमूह्यम्। इति एवंप्रकारमन्यदपि प्राज्ञैर्विद्वद्भिराज्ञातं (न्य)ङ्गं न्यूनं दोषजातमिति।।

पादान्ते सन्धेरकरणं न दोषाय इति केचित्; तदुदाहरति–**आधिव्याधीति**।।

क्वचित् विसन्धिकप्यापि गुणत्वं दर्शितम्–न प्रगृह्यादीति;तत् उदाहरति मानेर्ष्ये इति।।१६१-१६२।।

चराचराणां भूतानां प्रवृत्तिर्लोकसंज्ञिता।
हेतुविद्यात्मको न्यायः सस्मृतिः श्रुतिरागमः॥१६३॥

रत्नश्री

चराचराणां स्थावरजङ्गमानां भूतानां प्रवृत्तिः यथास्थिति लोक इति संज्ञिता समाख्या[ता] लोकसंज्ञिता [120a] लोके विज्ञायते। हेतुविद्या तर्कशास्त्रम् आत्मा यस्य स हेतुविद्यात्मको न्यायोऽत्र गृह्यते। श्रुतिः वेदः सह स्मृत्या मन्वादिप्रणीतया वर्तते इति सस्मृतिरागमो वेदितव्यः॥

हृदयङ्गमा

चराचराणामिति। –चराचराणां जङ्गमस्थावराणां, भूतानां प्राणिनां क्षित्यादीनाञ्च, प्रवृत्तिः वार्त्ता, लोकसंज्ञिता लोकशब्दप्रतिपाद्या इत्यर्थः। (लोक इति संज्ञा जाता अस्या इति अस्य जातार्थे इतच्-प्रत्ययः) हेतुविद्यात्मकः हेतुः कारणं, तद्घटिता विद्या ज्ञानं, हेतुविद्या युक्तिमूलकशास्त्रं, दर्शनशास्त्रमित्यर्थः, तानि च तर्कादीनि बौद्धशास्त्राणि च इति ज्ञातव्यं, तदात्मकः तन्मयः, न्यायः युक्तिमूलकदर्शनशास्त्रमेव न्यायपदवाच्यमिति निष्कर्षः, तथा सस्मृतिः स्मृतिः वेदार्थस्मरणजन्यम् ऋषिवाक्यं, मन्वादिसंहिता इति यावत्, तत्सहिता श्रुतिर्वेदः, आगमः आगमशब्दवाच्य इत्यर्थः॥१६३॥

प्रभा

चराचराणामिति। चराचराणां स्थावरजंगमानाम्। भूतानां प्रवृत्तिः व्यवहारः। लोकसंज्ञिता लोक इति संज्ञया व्यवहृतास्तीति

भावः। हेतुः इष्टार्थसाधने पुरस्कृता युक्तिः। विद्या विदन्ति अनया इति विद्या शास्त्रं हेतुमूलिका विद्या हेतुविद्या दर्शनशास्त्रमिति भावः। तत्र आगमं विना केवलं हेतुपुरस्कारेणैव पदार्थानां निरूपितत्वात्। तदात्मकः तद्रूपः। न्यायः बुद्धार्हतादीनां प्रबन्धा इत्यर्थः। स्मृतिसहिता श्रुतिः। आगमः शैवाद्यागमः।।१६३।।

तेषु तेष्वयथारूढं यदि किञ्चित् प्रवर्तते।
कवेः प्रमादाद् देशादिविरोधोत्येतदुच्यते॥१६४॥

रत्नश्री

तेषु तेषु यथोक्तेषु देशादिष्वागमपर्यन्तेषु अयथारूढं तत्तद्विधिप्रतिषेधातिक्रमाद् वैपरी[त्येन] यदि किञ्चिदर्थरूपं प्रवर्तते प्रयोगेषु कवेः प्रयोक्तुः प्रमादाद् विस्मरणहेतोः यथारूढं यदि किञ्चिन्न वर्तत इत्यपि पाठः। अर्थस्तु स एव। तदेवं तद्यथा आरूढं प्रवृत्तं देशविरोधीति उच्यते। आदिशब्देन कलादिपरिग्रहः। देशादिभिर्विरोधो बाधा अस्तीति कृत्वा, देशादयोऽन्यथा व्यवस्थिताः, अन्यथा च कल्प्यन्त इति तादृशी तैर्बाध्यते॥

हृदयङ्गमा

देशादिविरोधलक्षणमाह, तेष्विति। –तेषु तेषु उक्तेषु देशादिषु, अयथारूढम् अप्रसिद्धं, किञ्चित् यदि कवेः कवयितुः, प्रमादात् अनवधानात्, प्रवर्त्तते उपन्यस्तो भवति, कीकटेषु कुङ्कुमो जायते काश्मीरेषु गुवाकनारिकेलवनं भाति इत्येवंरूपेण वर्णितो भवतीत्यर्थः, तदा एतत् ईदृशं वचनं, देशादिविरोधि तदाख्यदोषवदित्यर्थः, इति उच्यते, देशविरोधि कालविरोधि इत्यादिसंज्ञया अभिधीयते। (देश-काल लोकविरोधस्तु ख्यातविरुद्धतासंज्ञया कलान्यायागमविरोधश्च विद्याविरुद्धतासंज्ञया नवीनैरभिहित इति बोद्धव्यम्। सस्मृतिश्रुतिरित्यत्र श्रुतिपदेन कामकृषिगजतुरगखड्गादिलक्षणशास्त्राणां ग्रहणमागम्यते इति दिक्)॥१६४॥

प्रभा

तेष्विति। तेषु देशकालादिषु। अयथारूढं प्रसिद्धिविरुद्धम् वस्तुस्थितिशून्यमित्यर्थः। यदि किमपि कवेः प्रमादात् अनवधानात् प्रवर्तते कविभिर्वर्ण्यते तदा एवंप्रकारकं वाक्यमेतद् देशविरोधि कालविरोधि इति उच्यते। तदुक्तं वामनेन-देशकालस्वभाव-विरुद्धार्थानि लोकविरुद्धानि (२.२.२३, २४) कलाचतुर्वर्गशास्त्र-विरुद्धार्थानि विद्याविरुद्धानि इति।।१६४।।

कर्पूरपादपामर्शसुरभिर्मलयानिलः।
कलिङ्गवनसम्भूता मृगप्राया मतङ्गजाः॥१६५॥

रत्नश्री

कर्पूरपादपानामामर्शे[न संस]र्गेण सुरभिः सुगन्धिर्मलयानिलः। [इद]मद्रिलक्षणदेशविरुद्धमुदाह्यतम्, मलयपर्वते कर्पूरसम्भूतेरयथारूढत्वात्। कलिङ्गो नाम वनमरण्यं तत्र तस्माद् वा संभूता मतङ्गजा हस्तिनः मृगप्राया मृगलक्षणा हस्तिजातिः प्राया भूयसी ये[षु] तया वा प्रायाः समधिका मृगप्रायाः। एतद् वनरूपदेशव्याहतम्। कलिङ्गवनजन्मनां हस्तिनां भद्रजाति प्रायत्वात्॥

हृदयङ्गमा

देशविरोधमुदाहरति, कर्पूरेति। –मलयानिलः मलयाचलप्रवाहितः वायुः, कर्परपादपानां कर्परवृक्षाणाम्, आमर्शेन सम्पर्केण, सुरभिः, सुगन्धिः, तथा कलिङ्गवनसम्भूताः कलिङ्गदेशीयारण्यसमुत्पन्नाः, मजङ्गजा हस्तिनः, मृगप्रायाः मृगवत् अतिक्षुद्रा इत्यर्थः। (अत्र मलयाद्रौ कर्पूरपादापानां नोत्पत्तिः, चीनादिदेशे एव तदुत्पत्तिरिति प्रसिद्धाभावात् अद्रिरूप देशविरोधः; तथा कलिङ्गवने मृगसदृशाः क्षुद्रतरा मतङ्गजाः न सम्भवन्ति इत्यप्रसिद्धवर्णनात् वनरूपदेशविरोधश्च विज्ञेयः)॥१६५॥

प्रभा

देशविरोधमुदाहरति–**कर्पूरेति।** कर्पूरपादपानां आमर्शः संसर्गस्तेन सुरभिर्मलयानिलः मलयपर्वतसंबन्धी वायुः। कर्पूरपादपा न मलयपर्वते वर्तन्ते स कृष्णागुरूत्पत्तिस्थानतया प्रसिद्धः।

कर्पूरपादपास्तु चीनदेशे। इति मलयाद्रिरूपदेशविरोधोदाहरणम्। कलिङ्गवनसंभूताः कलिङ्गोत्पन्ना इत्यर्थः मतङ्गजा मृगप्रायाः अतिह्रस्वाकाराः मतङ्गजाः कलिङ्गवने न संभवन्ति। तेषामुत्पत्तिस्थानं सिंहलद्वीपादि। इति कलिङ्गवनरूपदेशविरोधः॥१६५॥

विवृति

'देशकालकलालोकन्यायागमविरोधि च' इत्युक्तम्। तत्र देशादीनां षण्णामागमा(न्ता)नां लक्षणमाह–

देशो हि(द्रि)वनकाष्ठादिः। वनं सारदारुकरियोति यदुक्तं तत्र पर्वदविनियोगदव्यहस्ति....जनपदमिति (?) रुपं(राष्ट्रं)जनपदो ग्रामस्थादीयादिः(?) आदिशब्देन कन्या(?) कथ्यते। कालः पुनः नक्तदिवर्तवः नक्तं च दिवा च नक्तन्दिवं तच्च ऋतवश्चेति द्वन्द्वः। नक्तं रात्रिर्दिवा दिवसः ऋतवः शरद्धेमन्तशिशिरवसन्तग्रीष्मवर्षाः षट्। नृत्तगीतप्रभृतयः तथा (कलाः)। नृत्तं लास्यादि गीतं षड्जादि प्रभृतिशब्दोऽप्यादिवचनः। तेन गणितपत्रचित्रपत्रच्छेदादयः। कामोऽर्थश्च संश्रयो, यासाम्। अथ वा कामार्थयोः संश्रया आधारभूत(ा) का(क)लाः॥

चराचराणां चेतनाचेतनानां प्राणिनां पृथिव्यादीनां च प्रवृत्तिस्थितिरूपं(?) लोकसंज्ञिता लोकशब्देनोच्यते। हेतुविद्यात्मको न्याय(:) हेतुविद्या मानप्रतिपादकः। तत्र यादिः (तर्कशास्त्रादिः) तदात्मको न्याय उच्यते। तत्र हि पञ्चावयवस्य हेतोः तथा त्रिरूपस्यैकरूपस्य च व्युत्पादनात्। प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः।

पक्षधर्मस्तदंशेन व्याप्तो हेतुस्तथैव सः।

पक्षधर्मव्यतिरेकः(?) त्रिरूपाणि च त्रीण्येव लिङ्गानि कार्य (र्यं) त्व (स्व) भावा (वो) ऽनुपलम्भश्चेति [?] वचनात्। तथा सन्ध्य (साध्यां) भावसम्बन्ध(ा)भावनियमनिर्णयैकलक्षणो हेतुः।

यदुक्तम्–

अथा(र्था)नुपपत्त्येकलक्षणो हेतुरिष्यते, इति लक्षणम्। उपलक्षणं चैतत् हेतुविद्यात्मको न्याय इति। तेन समस्तसं(सां)ख्यादिसमनिय (समय?) तत्त्वप्रतिपादकविद्यात्मक इति ग्राह्यम्। स श्रुतिस्मृतिरागमः। श्रुतिः(ऋचः) सामानि यंजूषि अथर्ववेदोतिहासवेदौ च स्मृतयो मानवादयः अष्टादशधर्मशास्त्रसंहिताः सह श्रुतिस्मृतिभ्यां वर्तत इति[स]श्रुतिस्मृतिरागम उच्यते। त्रयो (तत्र?) प्रोक्तो धर्मः।।

तेषु तेष्वयथारूढमप्रसिद्धं देशादिषु यदि किञ्चित् कविप्रमादात् देशाद्यपरिज्ञानात् प्रवर्तते तदा तद्देशादिविरोध्युच्यते। तच्च यत्नतः परिहर्तव्यम्।।

देशादिविरोधं लक्षयति–देश इति पद्यत्रयेण।।१६३-१६५।।

चोलाः कालागरुश्यामाः कावेरीतीरभूमयः।
इति देशविरोधिन्या वाचः प्रस्थानमीदृशम्॥१६६॥

रत्नश्री

कावेरी नाम नदी। तस्यास्तीरे तद्रूपा वा भूमयः। चोलाश्चोलजनपदरूपाः कालैः कृष्णैरगरुभिः श्यामा नीला। इदं राष्ट्ररूपं देशविरुद्धम्। चोलराष्ट्रस्वभावानां कावेरीतीरभूमीनां कालागरुशून्यत्वात्।

देशविरोधं निगमयति। देशोऽद्रिवनादि[ना] यथोक्तेन विरोधो बाधा यस्यामिति देशविरोधिन्या [वाचः] वाक्यस्य ईदृशमेवंविधं प्रस्थानं स्वरूपं वेदितव्यमिति॥

कालविरोधमुदाहरन्नाह–

पद्मिनी नक्तमुन्निद्रा स्फुटत्यह्नि कुमुद्वती।

[102b]नक्तं रात्रौ उन्निद्रा विकसिता पद्मिनी, रात्रिरूपकालविरुद्धमेतत्। पद्मिन्या नक्तं प्रबोधासम्भवात्। कुमुद्वती कुमुदिनि स्फुटति विकसति अह्नि दिने। एतद् दिवसरूपसमयविरुद्धम्, दिवा कुमुद्वतीविकासाभावात्॥

हृदयङ्गमा

अद्रिवनरूपयोर्देशयोरुदाहरणं दर्शयित्वा राष्ट्ररूपदेशविरोधमुदाहरति, चोला इति।–चोलाः कर्णाटान्तर्गतदेशभेदाः, कालागुरुभिः कृष्णवर्णागुरुभिः, श्यामाः कृष्णवर्णाः, कावेर्य्याः कावेरीनद्याः, तीरभूमयः येषु तथोक्ताः। (अत्र कावेरीतीरे

कालागुरवो न जायन्ते इति राष्ट्ररूपदेशविरोधः) देशविरोधिन्याः वाचः इति ईदृशम् उक्तरूपं, प्रस्थानं प्रकृष्टं स्थानं, दृष्टान्तस्थलमित्यर्थः। (अत्र ''चोलाः कालागुरुश्यामाः केरलाः कुङ्कुमारुणाः। नमेरुवनसंच्छन्नाः कावेरीतीरभूमयः।।'' इति पाठान्तरं पुस्तकान्तरेषु दृश्यते। उदाहरणान्तरं यथा, –''सौवीरेष्वस्ति नगरी मथुरानाम विश्रुता। अक्षोटनालिकेराढ्या यस्याः पर्य्यन्तभूमयः।।'' इति)।।१६६।।

प्रभा

राष्ट्ररूपदेशविरोधं दर्शयति–**चोला इति**। चोलाः द्रविडदेश-निकटवर्तिनः प्रदेशाः। कालागुरुः कृष्णागुरुः तेन श्यामाः असिताः कावेरीतीरभूमयो येषां तादृशाः। कावेरीतीरेषु न कृष्णागुरुचन्दना जायन्ते इति राष्ट्ररूपदेशविरोध इति प्रेमचन्द्रशर्माणः। वयं तु न चौलेषु कावेरी प्रवहति इत्यपि देश विरोध इति मन्यामहे। देशविरोधमुपसंहरति–**इतीति**। इति एवम्। देशविरोधिन्या वाचः प्रस्थानं स्थितिः। ईदृशं अस्ति। तत् कविना परिहार्यमिति भावः।।१६६।।

मधुरुत्फुल्लनिचुलो निदाघो मेघदुर्दिनः॥१६७॥

हृदयङ्गमा

"कालो रात्रिन्दिवर्त्तवः" इत्युक्तलक्षणस्य रात्रिदिवसषडतुरूपस्य कालस्य यथाक्रमं विरोधं दर्शयति, पद्मिनीति। –पद्मिनी नक्तं रात्रौ, उन्निद्रा विकसिता। (दिवस एव पद्मिन्या विकासस्य प्रसिद्धेः रात्राविति निर्देशात् अत्र रात्रिरूपकालविरोधः)। कुमुद्वती अह्नि दिवा, स्फुटति विकसति। (रात्रावेव कुमुदिन्या विकासस्य प्रसिद्धेः अह्नि इत्युक्तेः अत्र दिवारूपकालविरोधः) मधुः वसन्तः, उत्फुल्लाः विकसत्पुष्पाः, निचुलाः इज्जलवृक्षा यत्र तथोक्तः। (निचुलानां प्रावृष्येव विकासस्य प्रसिद्धेः मधुरिति वर्णनात् अत्र वसन्तर्त्तुरूपकालविरोधः)। निदाघः ग्रीष्मः, मेघेन मेघावरणेन, दुर्दिनं दुःखजनकदिनं यत्र तथोक्तः। (वर्षास्वेव दुर्दिनत्वप्रसिद्धेः निदाघ इति कथनात् अत्र निदाघर्त्तुरूपकालविरोधः। यद्यपि निदाघेऽपि कदाचित् दुर्दिनत्वं सम्भवति, वर्णितञ्च अकालदुर्दिनं मृच्छकटिकादौ, तथाऽप्यत्र विरोधप्रतिपादनात् ऋतुविशेषे प्रसिद्धस्य वस्तुनः ऋत्वन्तरे वर्णनमेव दोष इति निदाघो मेघदुर्दिन इत्यनेन सूच्यते। केचित्तु "निदाघो हिमजाड्याकृत्" इति पाठान्तरमङ्गीकृत्य समाधानं कुर्वन्ति। "निदाघी मेघनिःस्वनः" इति च पाठान्तरम्)॥१६७॥

प्रभा

कालविरोधं दर्शयति-**पद्मिनीति**। नक्तं रात्रौ। पद्मिनी उन्निद्रा प्रफुल्ला। अह्नि दिवा। कुमुद्वती स्फुटति विकसति। मधुः वसन्तः। उत्फुल्लः प्रफुल्लः निचुलः वेतसविशेषो यत्र तादृशः। निदाघः

उष्णकालः। मेघेन दुर्दिनानि अभ्राच्छादितदिनानि यस्मिन् एतादृशः।।१६७।।

विवृति

तत्र देशविरोधमुदाहरति–

न खलु मलयदेशे सन्ति कर्पूरतरवः कथं कर्पूरपादपामर्शी मलयमारुतः। कटाह (?) द्वे(द्वी)पे हि कर्पूरतरुमाः (रवः)। न खलु कलिङ्गवनसम्भूता मृगप्रायाः करिणो भवन्ति। भद्रप्रायाः तत्र गजाः। तदुक्तम्–कलिङ्गाङ्गगज(ाः) श्रेष्ठाः'। तथा न चोलदेशे कालागरुतरवः (किंतु)नेपालदेशे। तत् कथं चोलानां निवासश्चोलाः कालागरुभिः श्यामाः कावेर्याः तीरभूमयः कथं (येषु ते)। अपरे पुनः 'बालकालागरुश्यामाः कावेरीतीरभूमयः' इति पठन्ति। तत्र बालकालागरुभिः कृष्णकालागरुभिः श्यामा इति व्याख्येयम्। इतीत्यादिना देशविरोध उपसंहृतः।।

देशविरोधमुदाहरति–**कर्पूरेति** द्वयेन। कर्पूरपादपाः द्वीपान्तरे मलये न जायन्ते। मृगो नाम अङ्गप्रत्यङ्गदीर्घोः, उच्चाः गजाः; ते कलिङ्गवने न सम्भवन्ति। कालागरवश्च द्वीपान्तरे भवन्ति, न चोलेषु।।१६६-१६७।।

श्रव्यहंसगिरो वर्षाः शरदामत्तबर्हिणी।
हेमन्तो निर्मलादित्यः शिशिरः श्लाघ्यचन्दनः॥१६८॥

रत्नश्री

मधुर्वसन्त उत्फुल्लः कुसुमितो निचुलो वञ्जुलोऽस्मिन्निति उत्फुल्लनिचुलः। निदाघो ग्रीष्मः मेघैर्दुर्दिनो मलिनः। श्रव्या मधुरा हंसानां गिरः शब्दा यासु इति श्रव्यहंसगिरो वर्षाः प्रावृट्। आमत्ता बर्हिण्यो मयूर्यो यस्यामिति आमत्तबर्हिणी शरत्। निर्मल आदित्यो यस्मिन्निति निर्मलादित्यो हेमन्तः। शिशिरः श्लाघ्यं सेव्यं चन्दनम् अस्मिन्निति श्लाघ्यचन्दनः। सर्वमेतद् ऋतुषट्कलक्षणं कालविरुद्धं मध्वादिषु ऋतुषु उत्फुल्लनिचुलादीनामसम्भवात्॥

कालविरोधमुपसंहरति–

हृदयङ्गमा

श्रव्येति। –वर्षाः श्रव्याः श्रुतिसुखकरत्वात् मधुरा इत्यर्थः, हंसानां गिरः यासु ताः (अत्र शरत्स्वेव हंसानां मधुरनादस्य प्रसिद्धेः वर्षाः इति कालविरोधः) शरदः मत्ताः हृष्टाः, वर्हिणः मयूराः यासु ताः। (अत्र वर्षास्वेव मयूराणां मत्ततायाः प्रसिद्धेः शरद इति वर्णनात् शरदृतुरूपकालविरोधः)। हेमन्तः निर्मलः हिमावरणाभावात् प्रदीप्तः, आदित्यो यत्र तथाभूतः। (अत्र हेमन्ते आदित्यस्य हिमावृतत्वात् निर्मलत्वम् अप्रसिद्धम् इति, हेमन्तर्त्तुरूपकालविरोधः); तथा शिशिरः शीतर्त्तुः, श्लाघ्यम् आदरणीयं, चन्दनं चन्दनानुलेप इत्यर्थः, यस्मिन् सः। (अत्र चन्दनस्य शैत्यात् शिशिरे तस्य श्लाघ्यत्वम् अप्रसिद्धम् इति

शिशिरर्त्तुरूपकालविरोधः। एवञ्च ऋतूनां षणामेव विरोधाः दर्शिताः। उदाहरणान्तरं यथा, –''कदम्बकुसुमस्मेरं मधौ वनमशोभत'' इति)।।१६८।।

प्रभा

श्रव्येति। वर्षाः प्रावृट्। श्रव्याः हंसानां गिरो यासु एतादृश्यः। शरदः मत्ता बर्हिणो यासु ताः। हेमन्तः निर्मलादित्यः हिमाच्छादनविरहेण सुप्रकाशः आदित्यो यस्मिन् एतादृशः। शिशिरः श्लाध्यः सेवनाय प्रशस्यश्चन्दनो यत्र एतादृशः। अत्र पद्मिन्या दिवा एव विकास इति रात्रिविकासवर्णनं रात्रि- रूपकालविरुद्धम्। कुमुद्वत्या रात्रौ एव विकास इति दिवाविकासवर्णनं दिवसरूपकालविरुद्धम्। निचुलमञ्जर्या विकासः प्रावृषि तन्मधौ वर्णनं मधुऋतुरूपकालविरुद्धम्। निदाघे मेघस्य असंभवाद् वर्षास्वेव तेषां विद्यमानत्वाद् इदं निदाघरूपऋतुकालविरुद्धम्। हंसगिरः श्रव्यत्वं शरत्सु एव न तु वर्षासु। तासु तेषां नष्टमदत्वात्। अत एतद् वर्षाऋतुकालविरुद्धम्। मयूराणां मत्तता वर्षासु एव न तु शरदि इति पूर्ववत् शरदृतुकालविरोधः। हेमन्ते सूर्यमण्डलं हिमावृतं इति तदभाववर्णनं हेमन्तऋतुकालविरुद्धम्। शिशिरे शीतताया वैपुल्यात् चन्दनचर्चावर्णनं विरुद्धम् इति शिशिरऋतुकालविरुद्धम्। एवमत्र श्लोकद्वयेन कालविरोधा दर्शिता इति ज्ञेयम्।।१६८।।

इति कालविरोधस्य दर्शिता गतिरीदृशी।
मार्गः कलाविरोधस्य मनागुद्दिश्यते यथा॥१६९॥

रत्नश्री

कालेन रात्र्यादिना यथोक्तेन विरोधस्य व्याघातस्य भारतीविषयस्य ईदृशी गतिः प्रस्थानं दर्शिता। कलया नृत्यगीतादिविद्यया विरोधस्य वचनगोचरस्य मार्गः प्रस्थानं मनाक् किञ्चिद् उद्दिश्यते उदाह्रियते यथेति दर्शयति॥

हृदयङ्गमा

कालविरोधमुपसंहृत्य कलाविरोधं दर्शयितुमाह, इतीति। –इति ईदृशी उक्तप्रकारा, कालविरोधस्य गतिः ज्ञानं, ज्ञानार्थमुदाहरणमित्यर्थः, दर्शिता, इदानीं कलाविरोधस्य मार्गः पन्थाः, ज्ञानोपाय इत्यर्थः, मनाक् अल्पं यथा तथा, उद्दिश्यते प्रदर्श्यते। यथेति उदाहरणार्थम्॥१६९॥

प्रभा

कालविरोधमुपसंहरन् कलाविरोधं प्रस्तौति-**इतीति**। इति कालविरोधस्य गतिः पद्धतिरीदृशी एवं दर्शिता। इति शब्दः समाप्तिसूचकः। कलाविरोधस्य मार्गो मनाक् स्वल्पम् उद्दिश्यते दर्श्यते। चतुःषष्टिकलानां विरोधदर्शने ग्रन्थविस्तारः स्यादतः स्वरूपावगमाय मनाग् उदाह्रियते इति भावः॥१६९॥

विवृति

कालविरोधमाह–

न पद्मिनी नक्तं विकसति। किन्तु अह्नि। विना(नापि) कुमुद्वती दिने स्फुटति किं तु रात्रौ। तथा न वसन्ते कदम्बद्रुमाः पुष्यन्ति किं तु वर्षासु। तथा न ग्रीष्मे मेघैः साव्यकारिणी (सान्धकाराणि) दिनानि, किं तु वर्षासु। तथा न वर्षासु हंसाः तां रक्ता(श्राव्य-अथ वा संरक्त)ध्वनयः किं तु शरदि। तथा शरदि न माद्यन्ति मयूराः किं तु वर्षासु। तथा न हेमन्ते दिनकरो दीप्यते। तथा (दा) हि मन्दद्युतिरादित्यः। तथा न शिशिरे श्लाध्यते चन्दनम्। अतिशीते शांतस्पर्शस्यानिष्टत्वात्। तथा (दा) हि कुङ्कुममभिलक्ष्य(ष्य)न्ति विलासिनः। तस्योष्णत्वात्।।

कालविरोधमुदाहरति–**पद्मिनीति** श्लोकद्वयेन।।१६८-१६९।।

वीरश्रृङ्गारयोर्भावौ स्थायिनौ क्रोधविस्मयौ।
पूर्णसप्तस्वरः सोऽयं भिन्नमार्गः प्रवर्तते॥१७०॥

रत्नश्री

वीरश्च श्रृङ्गारश्च [तयोर्वीर]श्रृङ्गारयो रसयोः प्रभवौ भावौ मनोवस्थाविशेषलक्षणौ क्रोधश्च विस्मयश्च क्रोधविस्मयौ स्थायिनौ यावद्रसमवस्थानात्। न तु व्यभिचारिभाववदस्थायिनौ। पूर्णाः समग्राः सप्त ऋषभमध्यमगान्धारषड्जधैवतपञ्चम-निषादाख्याः स्वरा यस्मिन्निति पूर्णसप्तस्वराः। [ते सन्ति] यस्मिन्निति पूर्णसप्तस्वरः सोऽयं भिन्नमार्गो गान्धर्वप्रकारः कश्चित् प्रवर्तते। एतत् कलाविरुद्धम्। क्रोधविस्मययोः स्थायिनोर्भावयोः श्रृङ्गारवीरयोरयोनित्वेन कलायां व्यवस्थानात्। रौद्राद्भुतयोरेव हि क्रोधविस्मयौ स्थायिनौ भावौ तत्र व्यवस्थाप्येते। वीरश्रृङ्गारयोस्तु उत्साहरती एव स्थायिनौ भावौ। अन्यतरस्वरहीनस्यैव च भिन्नमार्गतया व्यवस्थानादिति।।

कलाविरोधमतिदिशन्नाह–

हृदयङ्गमा

कलासु तौर्य्यत्रिकस्यैव समधिकप्रीतिप्रदत्वेन प्रधानतया आदौ तद्विरोधमेव प्रदर्शयति, वीरेति। –वीरश्रृङ्गारयोः तदाख्ययोः रसयोः, क्रोधविस्मयौ स्थायिनौ भावौ, विरुद्धाविति शेषः, तथा हि वीरे उत्साहः, श्रृङ्गारे रतिः स्थायिभावत्वेन कथ्यते, क्रोधः रौद्ररसस्य विस्मयः अद्भुतरसस्य स्थायित्वेन निर्दिष्टौ, तदेवं स्थिते

वीरश्रृङ्गाररसयोः व्यभिचारिरूपयोः क्रोधविस्मययोः स्थायित्वेन निर्देशः विरुद्धः, स च दोष एव इति भावः। (स्थायिभावश्च दर्पणकारेणोक्तः, यथा,–"अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः। आस्वादाङ्कुरकन्दोऽसौ भावः स्थायीति सम्मतः।।" इति। "रसावस्थः परं भावः स्थायितां प्रतिपद्यते" इति च। क्रोधविस्मयौ च तेनैवोक्तौ यथा, –"प्रतिकूलेषु तैक्ष्ण्यस्यावबोधः क्रोध इष्यते।" तथा–"विविधेषु पदार्थेषु लोकसीमातिवर्त्तिषु। विस्फारश्चेतसो यस्तु स विस्मय उदाहृतः।।" इति। रसविवेकस्य भरतादिभिः नाट्यशास्त्रे एव कृतत्वात्, "अष्टौ नाट्ये रसाः स्मृताः" इति प्रकाशकारोक्तेश्च नाट्यरूपकलाविरोधोऽयम्)। गीतरूपकलाया अपि नाट्याङ्गत्वेन तथात्वात्तद्विरोधमाह, पूर्णेति। –पूर्णाः साकल्येन प्रयुक्ताः, सप्त सप्तसङ्ख्यका एव, स्वराः निषादादयः यत्र तथोक्तः, ("निषादर्षभगान्धारषडजमध्यमधैवताः। पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः।।" इत्यमरः) सोऽयं भिन्नमार्गः भिन्नः तत्तत्कालनिषिद्धस्वरासम्बलितः, मार्गः प्रयोगपन्थाः यस्य तादृशः सन्, प्रवर्त्तते प्रचलति, सङ्गीतशास्त्रे हि सप्तस्वराणामेकस्मिन् काले प्रयोगस्य निन्दितत्वेन तत्प्रयोगो न विधेय इति भावः। (अत्र साकल्येन प्रयुक्तसप्तस्वरत्वम् अमिश्रस्वरप्रयोगस्य विरुद्धमिति कलाविरोधदोष एवेति फलितार्थः। कालविशेषे स्वरविशेषप्रयोगस्य निषिद्धत्वम् उक्तं भरतेन यथा, –"प्रभाते सुरतो निन्द्यः ऋषभः पञ्चमोऽपि च। जनयेत् प्रधनं ह्युक्षा पञ्चत्वं पञ्चमोऽपि च।। पञ्चमस्य विशेषोऽयं कथितः पूर्वसूरिभिः। प्रगे प्रगीतो जनयेद्दर्शनस्य विपर्य्ययम्।।" इति)।।१७०।।

प्रभा

कलासु नाट्यस्य प्राधान्यात् तद्गतरसविरोधं दर्शयति–**वीरेति।** वीरश्रृङ्गारयोः वीररसश्रृङ्गाररसयोः। स्थायिनौ चित्तवृत्तिविशेषवासनारूपौ। स्थायिभावसामान्यलक्षणं तु–

विरुद्धा अविरुद्धा वा यं तिरोधातुमक्षमाः।
आनन्दाङ्कुरकन्दोसौ भावः स्थायीति संज्ञितः।।

(सा.द. ३/१७४)

इति। तथा च रसस्य अप्रादुर्भावतिरोभावं स्थिरतया वर्तमानश्चित्तवृत्तिविशेषवासनारूपो भावः स्थायिपदवाच्यः। स च रतिहासादिस्वरूपेण नाट्ये अष्टविधः परिगृहीतोस्ति। श्रृङ्गारहास्यकरुणरौद्रवीरभयानकबीभत्साद्भुतसंज्ञकानां अष्टानां रसानां रतिहासशोकक्रोधोत्साहभयजुगुप्साविस्मयाख्या यथाक्रमं स्थायिभावाः भरतादिभिर्निश्चिताः। एतन्नियमविरोधेन वर्णनं स्याच्चेत् तर्हि तत् कलाविरुद्धम्। अत्र तु वीरश्रृङ्गारयोः क्रोधविस्मयौ स्थायिनौ उक्तौ। भरतादिनाट्यशास्त्रकारमतेन तु तयोः स्थायिनौ उत्साहरत्याख्यौ। क्रोधविस्मयौ तु रौद्राद्भुतयोरिति। तथा चात्र नाट्यकलाविरुद्धत्वेन वर्णितत्वात् कलाविरोधोयम्। गीतरूपायां कलायां विरोधं दर्शयति–**पूर्णसप्तस्वर इति।** पूर्णाः साकल्येन प्रयुक्ताः सप्तस्वरा निषादर्षभगान्धारषड्जमध्यमधैवताः पञ्चमश्च इति संगीतशास्त्रप्रसिद्धा यत्र सः। एतादृशः सोयं भिन्नमार्गः भिन्नः तत्तत्कालनिषिद्धस्वरान्तरासंकीर्णो मार्गस्तत्तत्काल–विहितस्वरविशेषप्रयोगः प्रवर्तते। तथा च असंकीर्णस्वरप्रयोगस्य पूर्णसप्तस्वरत्वं विरुद्धम्। अतो नाट्यशास्त्रस्थगीतकलानियमविरुद्धत्वात् कलाविरुद्धमेतत्।।१७०।।

इत्थं कलाचतुःषष्टौ विरोधः साधु नीयताम्।
तस्याः कलापरिच्छेदे रूपसाविर्भविष्यति॥१७१॥

रत्नश्री

इत्थमनेन प्रकारेण कलानां कलारूपाणां चतुःषष्टौ द्विविधायामपि विरोधः तद्व्यवस्थातिक्रम[(121a)रूपो वि]षयः साधु सम्यक् नीयताम् अनुगम्यताम्। क्व पुनरियं कलाचतुःषष्टिः परिज्ञायते, यतस्तद्विरोधगतिरनाकुला स्यादित्याह–तस्या इत्यादि। तस्याः कलाचतुःषष्ट्या रूपम् स्वभावोऽर्थतः [शब्दतश्चा]विर्भविष्यति। यथावदवगम्यते। कलापरिच्छेदे चतुर्थकलापरिच्छेदोऽस्य दण्डिनोऽस्ति स त्विह न प्रवर्तते। यद् वा कलानां परिच्छेदेऽभ्यासे सति तस्याः कलाचतुःषष्टे रूपमाविर्भविष्यति। तस्मात् कलाभ्यासः करणीयः, यतस्तद्विरोधः सर्वो यथावदवगम्यते इति॥

लोकविरोधमुदाहरन्नाह–

हृदयङ्गमा

कलाविरोधमुपसंहरति, इत्थमिति। –इत्थम् अनेन प्रकारेण, कलानां चतुःषष्टिः तस्याः विरोधः, साधु सम्यक् यथा तथा, नीयतां ज्ञायतामित्यर्थः, यथा नाट्यगीतरूपयोः कलयोर्विरोधः प्रदर्शितः तथा अन्यासामपि कलानां विरोधः तत्तदुदाहरणेषु दृश्यतामिति निष्कर्षः। ननु चतुःषष्टिविधास्तावत् कला उक्ताः, तज्ज्ञानमन्तरेण कथं तद्विरोधो ज्ञातव्य इत्याह, तस्या इति। –कलापरिच्छेदे तदाख्यग्रन्थे, तस्याः कलायाः, रूपं स्वरूपं, नाम

इत्यर्थः, आविर्भविष्यति प्रकटिष्यति, अनन्तरं कलापरिच्छेदं नाम ग्रन्थं करिष्यामि तत्रैव तासां विशेषो द्रष्टव्य इति भावः।।१७१।।

प्रभा

कलाविरोधमुपसंहरति–**इत्थमिति**। इत्थं अनेनैव प्रकारेण कलाचतुः- षष्टिविरोधः चतुः षष्टिकलासु विरोधः शास्त्रविरुद्धवर्णनम्। साधु सम्यङ् नीयताम् स्वयम् ऊह्यताम्। कास्ताः चतुः षष्टिकला इति चेत् तस्याश्चतुः षष्टिप्रकारायाः कलायाः कलापरिच्छेदे एतन्नामकग्रन्थविशेषे रूपं आविर्भविष्यति स्पष्टं भविष्यति। स ग्रन्थः कलारूपावगमायैव प्रवृत्तः। अतस्तदध्ययने सर्वासां चतुःषष्टिकलानां स्वरूपावगमः साकल्येन भवेदित्यर्थः। अनेनायं कलापरिच्छेदो दण्डिविरचित इति कैश्चिदूह्यते।।१७१।।

विवृति

इतीत्यादिना कालविरोधमुपसंहृत्य कलाविरोधमाह–

न हि वीरश्रृङ्गारयोः स्थायिनौ भावौ क्रोधविस्मयौ। क्रोधो रौद्रस्य स्वायीभावः न वीरस्य रसस्य। तस्य हि उत्साहः स्थायीभावः। तथा न विस्मयः श्रृङ्गारस्य किं त्वद्भुतस्य। श्रृङ्गारस्य हि प्री(र)तिः स्थायीभावः। पूर्णाः सप्तस्वराः यस्यासौ पूर्णसप्तस्वरः भिन्नमार्गः प्रवर्तते। भिन्नमार्गश्चेत् कथं पूर्णसप्तस्वर इति।।

इत्थं कलाचतुःषष्टौ अनेन प्रकारेण कलाचतुःषष्टौ, शास्त्रेण पाञ्चाल्यां वीरो (?) नृत्तगीतवाद्यादीनां श्रुवं गीथ (विरोधः?) त्रुवं

[साधुः?] शो(नी)यतामभ्यूह्यतामिति। तस्याः कलानां चतु... (ष्षष्टेः) कला(ः) परिच्छिद्यन्ते यत्र स कलापरिच्छेदो ग्रन्थस्तत्र रूपं स्वरूपमाविर्भविष्यतीति तत एव कलास्वरूपमवधारणीयमित्यर्थः।।

कलाविरोधमुदाहरति—मार्ग इति सार्धद्वयेन। वीरस्य स्थायिभावः उत्साहः ; श्रृङ्गारस्य स्थायी रतिः ; क्रोधविस्मयौ वीरश्रृङ्गारयोः स्थायिनौ इति भरतलक्षणविरुद्धम्। भिन्नमार्गो नाम पञ्चषस्वरनिष्पन्नः। तस्य निषादादिसप्तस्वरपूर्णत्वं गीतलक्षणविरुद्धम्। कलापरिच्छेदे—चतुः षष्टिकलासंग्रहात्मकः काव्यादर्शस्य कश्चिदन्योऽपि परिच्छेदोऽस्तीत्याहुः ; तत्र कलाचतुः षष्टिः द्रष्टव्या।।१७०-१७१।।

आधूतकेशरो हस्ती तीक्ष्णशृङ्गस्तुरङ्गमः।
गुरुसारोऽयमेरण्डो निःसारः खदिरद्रुमः॥१७२॥

रत्नश्री

सुगमम्। हस्त्यादेः तुरङ्गमादेरिव केशराद्यसम्भवादीदृशं लोकविरोधि वचनमिति उक्तरूपोऽयं विरोधः॥

इति लौकिक एवायं विरोधः सर्वगर्हितः।

लौकिको लोकविदित एव अत एव सर्वैः शिष्टै[रन्यै]श्च गर्हितो निन्दितः। नैवेदृशं कश्चित् स्वस्थ[ः] प्रयुङ्क्ते। केवलं लोकविरुद्धो भवन्नेवं भवेदिति इत्थं सम्भवमात्रेण दर्शितः॥

हृदयङ्गमा

लोकविरुद्धतां दर्शयति, आधूतेति। –अयं हस्ती आधूताः कम्पिताः, केशरा जटाः यस्य तथोक्तः, तुरङ्गमः अश्वः, तीक्ष्णे सूक्ष्माग्रे, शृङ्गे यस्य तादृशः, एरण्डः तदाख्यवृक्षः, गुरुः महान्, सारः स्थिरांशो यस्य तथाभूतः, खदिरद्रुमः निः नास्ति सारो यस्य तादृक्। (हस्तिनः सकेशरत्वं तुरङ्गमस्य तीक्ष्णशृङ्गत्वम् एरण्डस्य सारवत्त्वं तथा खदिरतरोः निःसारत्वं लोकविरुद्धम्। अत्र पूर्वार्द्धे चरभूतयोरुत्तरार्द्धे अचरभूतयोः प्रवृत्तिरित्यवगन्तव्यम्)॥१७२॥

प्रभा

लोकविरोधमुदाहरति–**आधूतेति**। आधूताः केसराः ग्रीवासटा येन तादृशो हस्ती। तथा तीक्ष्णं शृङ्गं यस्य स तुरंगमः। तथा गुरुः महान् सारः सामर्थ्यं यस्य एतादृश एरण्डः। खदिरद्रुमश्च अयं

निःसारः। इत्यत्र लोकविरोधः प्रसिद्धः स्पष्ट एव। तत्र पूर्वार्धे जङ्गमवस्तुविषयक उत्तरार्धे स्थावरविषयक इति भेदः।।१७२।।

विवृति

लोकविरोधमाह–

आधूतानि केसराणि यस्यासावाधूतकेसरो हस्ती। न हस्तिनो लोके केसराणीति विदितम्। किं तु केसरी सिंह इति प्रसिद्धिः। तथा न तीक्ष्णश्रृङ्गस्तुरङ्गः किं तु गवादिः। तथा एरण्डो (न) गुरुसारो (ऽपि तु) निःसारः स्वदिरसार(द्रुम)श्च चन्दनसार इति (न निस्सारः)। तत्रैव सारस्य प्रसिद्धेः।

इति लौकिक एवायं लोकप्रसिद्ध एवांय विरोधः। आधूतकेसरो हस्तीत्यादिः सर्वगर्हितः सर्वजननिन्दितः।।

लोकविरोधं दर्शयति–आधूतेति सार्धेन। केसरो नाम सिंहसटा; स गजस्य न विद्यते। सर्वत्राप्यत्र लोकविरोधः स्पष्टः।।१७२।।

विरोधो हेतुविद्यासु न्यायाख्यासु निदर्श्यते॥१७३॥

रत्नश्री

हेतुविद्यासु आन्वीक्षिकीषु न्याय [इत्य]ाख्या[युक्ता]सु इति न्यायाख्यासु उद्देशे न्यायशब्दोपादानात्। एवमनुसृतो विरो[धो] निर्दिश्यते॥

हृदयङ्गमा

लोकविरोधमुपसंहृत्य न्यायविरोधं प्रपञ्चयितुमाह, इतीति। –इति उक्तरूपः, लौकिकः लोकप्रसिद्ध एव, अयं विरोधः सर्वैः विद्वद्भिः, गर्हितः निन्दितः, तथा च देशादिविरोधापेक्षया लोकविरुद्धोपन्यासः प्रयोक्तुर्नितरां हास्यायेति भावः। सम्प्रति न्यायाख्यासु न्यायनाम्नीषु, हेतुविद्यासु युक्तिमूलकशास्त्रेषु, विरोधः निदर्श्यते उदाह्रियते॥१७३॥

प्रभा

लौकिकविरोधमुपसंहरन् हेतुविद्याविरोधं प्रस्तौति-**इतीति**। इति एवं उक्तः। लौकिकः एव विरोधः सर्वथा गर्हितः सर्वगर्हितोस्ति। अयं वर्णयितुरवैदग्ध्यं नितान्तं दर्शयति इति तत्परिहारे कविना सावहितेन भाव्यम्। न्यायाख्यासु पूर्वमुद्दिष्टासु न्यायसंज्ञकासु हेतुविद्यासु बुद्धादिदर्शनेषु विरोधो निदर्श्यते उदाहरणेन स्पष्टीक्रियते॥१७३॥

सत्यमेवाह सुगतः संस्कारानविनश्वरान्।
तथा हि सा चकोराक्षी स्थितैवाद्यापि मे हृदि॥१७४॥

रत्नश्री

सुगतस्तथागतः संस्कारान् सम्भवहेतुप्रत्ययैः क्रियन्त इति पदार्थानविनश्वरान् नित्यानक्षणिकान् सत्यमाहाब्रवीत्। सत्यमिति वचनविशेषणम्। कथं सत्यमिति? तदेव समर्थ्यते। तथाहि समर्थने। सा काचिदिष्टा चकोराक्षी स्त्री मे मम हृदि मनसि अद्यापि चिर[कालादा]रभ्य स्थिता इति। यदि तु संस्कारा नश्वराः, कथमेवं घटते? तदेतत् न्यायविरुद्धम्। संस्काराणां सर्वेषां सौगते न्यायशास्त्रे प्रतिक्षणं विशरारु [त]या व्यवस्थापनादिति॥

हृदयङ्गमा

सौगतदर्शनरूपन्यायविरोधं दर्शयति, सत्यमिति। –सुगतः बुद्धः, संस्कारान् स्मृतिहेतुकभावनाख्यात्मवृत्तिगुणभेदान्, पूर्वानुभवजन्यज्ञानविशेषान् इत्यर्थः, अविनश्वरान् चिरस्थायिनः, सत्यमेव यथार्थमेव, आह, तथा हि तमेवार्थं जानीहि, सा पूर्वानुभूता, चकोराक्षी अद्यापि मे हृदि मनसि, स्थितैव स्मरणविषयीभवतीत्यर्थः, स्मृतिं प्रति संस्कारस्य हेतुत्वात् तस्य चाविनश्वरत्वेन सार्वकालिकत्वात् इति भावः। (पदार्थमात्रस्य क्षणभङ्गुरत्वमिति वादिनान्तु तेषां सौगतानां मते भावमात्रस्यैव क्षणस्थायित्वात् संस्कारस्यापि क्षणिकत्वमेव अतस्तस्याविनश्वरत्वकीर्त्तनं सौगतमतविरुद्धमिति हेतुविद्याविरोधः)॥१७४॥

प्रभा

सौगतदर्शनरूपन्यायविरोधमाह-**सत्यमेवेति**। सुगतः गौतमः। संस्कारान् वस्तुनः प्रत्यक्षे सति अन्तः करणे समुत्पद्यमानान् भावनाख्यान् धर्मान् अविनश्वरान् नाशप्रतियोगिताशून्यान् नित्यान् यदाह तत् साधु। उक्तार्थं स्वानुभवेन द्रढयति। सा पूर्वमुपभुक्ता चकोराक्षी अद्यापि बहुतरकालापगमेपि मे हृदि स्थितैव सततस्मरणप्रवाहेण विषयीभवतीत्यर्थः। स्मृतिर्हि संस्कारजन्या। तथा च संस्कारस्य अनश्वरत्वात् स्मृतिरपि अनश्वरा इति युक्तमेव तस्या हृदि स्थितिः। सौगतानां हि सर्वं क्षणिकम् इति राद्धान्तः। तथा च वासनानामपि तेषां मते क्षणिकत्वम्। तद्विरुद्धत्वात् सौगतन्यायविरुद्धमेतत्।।१७४।।

कापिलैरसदुद्भूतिः स्थान एवोपवर्ण्यते।
असतामेव दृश्यन्ते यस्मादस्माभिरुद्भवाः॥१७५॥

रत्नश्री

कापिलैः सांख्यैरसतां शक्तिरूपेणाप्यविद्यमानानां उद्भूतिरुत्पादः स्थान एव सत्यमेव। स्थान इत्येकारान्तो निपातो युक्तार्थसूचकः। उपवर्ण्यते विवृतः। यस्माद् असतामेवार्थानाम् उद्भवा जन्मान्यस्माभिर्दृश्यन्ते। एतदपि हेतुविद्याव्याहतम्। सांख्यमते सतामेव भावानां कथञ्चिदाविर्भावस्य व्यवस्थापनात्॥

न्यायविरोधं निगमयति–

हृदयङ्गमा

साङ्ख्यदर्शनरूपन्यायविरोधं दर्शयति, कापिलैरिति। –कापिलैः कपिलमतानुसारिभिः साङ्ख्यविद्भिः, असदुद्भूतिः असताम् अनित्यानां दुष्टानाञ्च, उद्भूतिः उद्भवः, स्थान एव युक्तमेव, उपवर्ण्यते कीर्त्यते, यस्मात् अस्माभिः असतामेव सद्भिन्नानामेव, दुष्टानामेव इत्यर्थः, उद्भवाः प्रादुर्भावाः, दृश्यन्ते, प्रायेण दुर्जना एव जायन्ते न तु साधव इति भावः। (अयं भावः, –कपिलानुसारिणः सतः सदेव जायते न तु असदिति मन्यन्ते, ततश्चासदुत्पत्तिर्न तन्मतसिद्धा, एवं स्थितेऽपि असच्छब्दस्य श्लिष्टत्वेन वाक्यार्थयोर्हेतुहेतुमद्भावात् तस्या युक्तत्ववर्णनमिति साङ्ख्यमतविरुद्धमेव; तथा चोक्तम्; –"असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्। शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्य्यम्॥" इति)॥१७५॥

प्रभा

सांख्यदर्शनरूपन्यायविरोधमुदाहरति-कापिलैरिति। कापिलैः सांख्यैः। असदुद्भूतिः असतः शून्याद् उद्भूतिः प्रपञ्चोद्भवः। तथा असतां दुराचारिणां उद्भूतिः उत्पत्तिरुपवर्ण्यते कथ्यते। तत् स्थाने एव युक्तमेव। यस्मात् यतः। अस्माभिरसतामेव दुर्जनानामेव। उद्भवाः उत्पत्तयो दृश्यन्ते जगति अवलोक्यन्ते। अत्र असच्छब्दस्य श्लिष्टत्वेन पूर्वापरवाक्यार्थयोर्हेतु- हेतुमद्भावः। तत्र सांख्यानां सतः सदेव जायते इति राद्धान्तः। बौद्धस्तु असतः सज्जायते इति मन्यते। अतः सांख्यसिद्धान्तविरुद्धत्वादयं सांख्यदर्शनरूपन्यायविरोधः॥१७५॥

गतिर्न्यायविरोधस्य सैषा सर्वत्र दृश्यताम्।
अथागमविरोधस्य प्रस्थानं दर्शयिष्यते॥१७६॥

रत्नश्री

[121b] न्यायविरोधस्य हेतुविद्याव्याहतेः काव्ये यस्य यस्य गतिः सैषा यथोक्तप्रकारा सर्वत्र अन्यत्रापि यथासम्भवं दृश्यतामवगम्यताम्। अथानन्तरमागमेन धर्मशास्त्रसहितेन वेदेन विरोधस्य बाधाया भारतीभूमेः प्रस्थानं नीतिः दर्शयिष्यते उदाह्रियते॥

हृदयङ्गमा

न्यायविरोधमुपसंहरति, गतीति। –न्यायविरोधस्य सा एषा एवंप्रदर्शितसौगतकापिलोक्तप्रकारा, गतिः ज्ञानं, दृष्टान्त इत्यर्थः, सर्वत्र वैशेषिकादिष्वपि, दृश्यते ज्ञायते। ("दृश्यते" इत्यत्र "दर्शिता" इति पाठान्तरम्)। आगमविरोधमुदाहर्त्तुमाह, अथेति। –अथ इदानीम्, आगमविरोधस्य श्रुतिस्मृतिविरोधस्य, प्रस्थानं गतिः, उपदिश्यते॥१७६॥

प्रभा

न्यायविरोधमुपसंहरति–**गतिरिति**। न्यायविरोधस्य सैषा गतिः सौगतसांख्ययोः प्रदर्शिता रीतिः। सर्वत्र वैशेषिकादिषु अपि दृश्यते साहित्योदधेः सूक्ष्मेक्षिकया आलोचने कृते उपलभ्यते। सैषान्यत्रापि दृश्यते इति पाठस्तु समीचीनः स्यात्। आगमः सस्मृतिः श्रुतिस्तस्य विरोधस्य। प्रस्थानं पद्धतिः। उपदिश्यते॥१७६॥

विवृति

न्यायविरोधमाह–

न्यायविरोधस्योदाहरणान्तरं दर्शयति–

सुगतो बुद्धो ब्रवीत्यवितथमेव संस्काराः रूपादिविषयवासनाश्चितधर्माः (अ)विनश्वराः अनित्याः (नित्याः)। तदेवार्थान्तरन्यासेन द्रढयति। तथा हि सा चकोराक्षी कान्ता स्थितैव अद्यापि तदोपलब्धाऽपि हृदि मन्मनसीत्यत्र न्यायविरोधः। यथा-(तः) न खलु सुगतः संस्कारानविनश्वरानाम(ह)। सर्वभावानां क्षणावस्थायित्वाभ्युपगमात्। सर्वे भावाः क्षणिकाः सत्त्वादित्येक-(स्य)क्रमयौगपद्याभ्यामर्थक्रियाद्यनुपपत्ति(त्ते)रित्याद्य(नु) मानेन तथा॥

कापिलैः कपिलमुनितनयैः (नयज्ञैः?) सदुद्भूतिरसतः पदार्थस्याविद्यमानस्योद्भूतिरुत्पत्तिः स्थान एवोपवर्ण्यते युक्तैवाभिधीयते। तदेव अर्थान्तरन्यासेन (द्रढयति)। असतामेवाशिष्टानां दुर्जनानामेव, (न) सतां सज्जनानां दृश्यन्ते यस्माद्धेतोरस्माभिरुद्भव(ा): अभ्या(भ्यु)दया धर्नर्धयद (धनधान्यादय)। तथा असतामेवाविद्यमानानामेव कारणे कार्याणामुद्भवाः उत्पत्तयो दृश्यन्त इति न्यायविरोधः। (न) खलु सांख्यैरसत्करणे कार्यमुत्पद्यत इत्युपगम्यते। 'असदकरणादुपादानग्रहणा'दि(त्यादिना सत्कार्यवादस्याभ्युपगतत्वात्॥

एवमनेन क्रमेण नी(ग)तिः न्यायविरोधस्य सुगतादिसमयविरोधस्य। सैषा सर्वत्र समयान्तरेऽपि दृश्यताम्॥

अथागमविरोधस्य प्रस्थानमुपदिश्यते॥

अथ न्यायविरोधानन्तरं आगमविरोधस्य प्रस्थानं प्रक्रमो दर्शयिष्यते। मयेत्यध्याहार्यम्॥१७३-१७६॥

अनाहिताग्नयोऽप्येते जातपुत्रा वितन्वते।
विप्रा वैश्वानरीमिष्टिमक्लिष्टाचारभूषणाः॥१७७॥

रत्नश्री

आहितो वैदिकेन विधिना परिगृहीतोऽग्निः परिणयकालभावी यैरिति आहिताग्नयः। न तथा अनाहिताग्नयो ये [ते] अपि। अपिशब्दो योगं सूचयति। एते विप्राः। जाताः पुत्रा एषामिति जातपुत्राः। विश्वानरो देवता अस्यामिति वैश्वानरीमिष्टिमिज्याम्। आग्नेय[यज्ञं] वितन्वते कुर्वन्ति। अक्लिष्टः परिशुद्धः आचारश्चारित्रं शास्त्रविहितं भूषणमलङ्कारो येषामित्यक्लिष्टाचारभूषणाः। इदमागमविरुद्धम्। ये हि [साग्निका] उत्पन्नतनयाश्च [त एव] वैश्वानरं यागमनुतिष्ठन्तीति श्रुतेः। कथमन्यथा अक्लिष्टाचारा इति॥

हृदयङ्गमा

श्रुतिविरोधं दर्शयति, अनाहितेति। –एते अक्लिष्टाचारभूषणाः अक्षणसर्वाचारसमन्विताः, जातपुत्रा विप्राः अनाहिताग्नयः अकृताग्न्याधानाः अपि, वैश्वानरीं विश्वानरसम्बन्धिनीं, (विश्वानरस्तु भूतसमूहात्मकः विराट् पुरुषः, तथा च, –"विश्वानरमुपास्ते विद्यदादित्यवायाकाशोदकपृथिव्यात्मकैः षड्भिरुपेतम्" इति श्रुतेः) इष्टिं यागं, वितन्वते कुर्वन्ति। (अत्र च श्रुतौ कृताग्न्याधानादेरेव वैश्वानरेष्ट्यधिकारप्रतिपादनात् अनाहिताग्नीनां तद्वर्णनं श्रुतिविरुद्धम्)॥१७७॥

प्रभा

तत्र श्रुतिविरोधमुदाहरति–**अनाहितेति।** अनाहिताग्नयो–कृताग्न्याधाना अपि। तथा जातपुत्रा: पुत्रिण:। अक्लिष्टाचार: सदाचारो भूषणं येषामेतादृशा:। विप्रा: वैश्वानरीं विश्वानरो भूतसमष्ट्यात्मको विराट्पुरुषस्तत्संबन्धिनीम्। इष्टिं यागं वितन्वते आचरन्ति। अत्र कृताग्न्याधानानामेव वैश्वानरयागाधिकारादनाहिताग्नीनां तद्वर्णनं श्रुतिविरुद्धमिति प्रेमचन्द्रा:। परे तु अजातपुत्रा इति पदच्छेदं कृत्वा वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते। (जैमिनिन्यायमाला ४-३-३९) इति पूत्रोत्पत्त्यनन्तरं वैश्वानरीष्टेरधिकारादपुत्रकेण तद्विधानं श्रुतिविरुद्धमिति मन्वते।।१७७।।

असावनुपनीतोऽपि वेदानधिजगे गुरोः।
स्वभावशुद्धः स्फटिको न संस्कारमपेक्षते॥१७८॥

रत्नश्री

असौ विवक्षितः कश्चित्। अनुपनीतोऽप्रयुक्तवैदिकसंस्कारविशेषोऽपि गुरोः सकाशाद् वेदा[न्] सामादीन् अधिजगेऽधीतवान्। तथाहि, स्वभावेन प्रकृत्यैव न संस्कारतः। शुद्धो निर्मलः स्फटिको मणिः संस्कारमुत्कर्षाधानं नापेक्षते। इदमपि आगमव्याहतम्। उपनीतो वेदानधीयीतेति श्रुतेः। कथमन्यथा शुद्धिरिति॥

हृदयङ्गमा

स्मृतिविरोधरूपमागमविरोधं दर्शयति, असाविति। —असौ जनः, अनुपनीतः अकृतोपनयनसंस्कारः अपि, गुरोः सकाशात् वेदान् अधिजगे अधीतवान्; तथा हि स्वभावेन प्रकृत्या एव, शुद्धः निर्मलः, स्फटिकः तदाख्यमणिविशेषः, संस्कारं शुद्धिं, न अपेक्षते। (अत्र अनुपनीतस्य वेदाध्ययनं स्मृतिविरुद्धम्; उक्तञ्च मनुना, —"नाभिव्याहारयेत् ब्रह्म स्वधानियमनादृते। शूद्रेण हि समस्तावत् यावत् वेदे न जायते॥" इति। अन्ये तु "धर्म्मार्थकामशास्त्रादिविरोधः कोऽपि यो भवेत्। तमागमविरोधाख्यं दोषमाचक्षते बुधाः॥" इत्यागमविरोधस्य लक्षणमभिधाय त्रिविधं भेदमङ्गीकुर्वन्ति। तत्र धर्मशास्त्रविरोधस्योदाहरणमिदमेव पद्यमाहुः। अर्थशास्त्रविरोधो यथा, —"कामोपभोगसाकल्यफलो राज्ञां महीजयः। अहङ्कारेण जीयन्ते द्विषन्तः किं नयश्रिया?"॥ इति। अत्र महीजयस्य फलत्वेन

कामोपभोगानामर्थशास्त्रकारैरननुमतत्वात् शत्रुविजये च अहङ्कारस्याहेतुत्वादर्थशास्त्रविरोधः। कामशास्त्रविरोधो यथा, –"तवोत्तरोष्ठे विम्बोष्ठि! दशनाङ्को विराजते। पूर्णः सप्तस्वरः सोऽयं भिन्नग्रामः प्रवर्त्तते।।" इति। अत्र उत्तरोष्ठे दशनाङ्कस्य कामशास्त्रकारैरननुज्ञातत्वात् कामशास्त्रविरोधः इति)।।१७८।।

प्रभा

स्मृतिविरोधं दर्शयति–**असाविति**। असौ कुमारः अनुपनीतोपि उपनयनसंस्कारशून्योपि। वेदान् अधिजगे अधीतवान्। उक्तार्थं दृष्टान्तेन द्रढयति। स्वभावशुद्धः प्रकृतिनिर्मलः स्फटिकः संस्कारं शुद्धिसंस्कारं न अपेक्षते। अत्रानुपनीतस्य वेदाध्ययनं स्मृतिविरुद्धम्। तथाच मनुः-

नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते।
शूद्रेण हि समस्तावद्यावद्वेदे न जायते।। (अ. २-१७२)

इति।।१७८।।

विवृति

तथा हि–

द्वितीयमागम(विरोध)स्य (स्योदाहरणमाह)–

अनाहिताग्नयोऽप्येते अकृताग्निपरिग्रहा विप्राः अजातपुत्राः अत्र (अकृत)विवाहाः अनुत्पन्नपुत्राः वैश्वानरोऽग्निस्तस्येयं वैश्वानरी तामिष्टिमग्निष्टोमादिकां वितन्वते। अक्लिष्टः अनिन्दितः आचारो भूषणमलंक्रिया येषां ते तथाविधा इत्यागमविरोधः, यतो

ब्राह्मण(णेन) कृतोपनयनेन वेदोऽध्येतव्यः। ततः कृतसमावर्तनेन वेदमधीत्य स्नाया दिति वेदाध्ययनानन्तरं दारकर्म; ततोऽग्निपरिग्रहः सभार्यस्य; ततोऽग्निष्टोमादियजने (नं) न अनाहिताग्नेरिति।।

असावनुपनीतोऽप्यकृतमौञ्जीबन्धसंस्कारविधिरपि (वेदान्) गुरोरध्यापकात् अधिजगे अधीतवान्। निर्वृत्तोपनयनस्य त्रय्यध्ययनेऽधिकारो नान्यथेत्यागमविरोधः।।

आगमविरोधं लक्षयति—अथेति सार्धद्वयेन। अग्न्याधानात् प्राक् इष्टेः करणस्य अयोग्यत्वात् अनाहिताग्नयेऽपि वैश्वानरेष्टिं कुर्वत इति धर्मशास्त्रविरोधः। उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः—इति उपनीतस्य वेदाध्ययनविधानात् अनुपनीतोऽपि वेदान् अधिजगे इति धर्मशास्त्रविरुद्धम्।।१७७-१७८।।

विरोधः सकलोऽप्येष कदाचित् कविकौशलात्।
उत्क्रम्य दोषगणनां गुणवीथीं विगाहते॥१७९॥

रत्नश्री

सकलोऽप्येष विरोधो देशादिकृतः.........एव कश्चिद् दोषरूपेण गणनां संख्यानं दोषात्मतामुत्क्रम्य परित्यज्य गुणानां वीथीं पदवीं गुणस्वभावतां विगाहते स्वीकरोति कदाचित्। न सर्वदा। कुतः? कवेः प्रयो[गस्य] कौशलात् तादृग्विषयपरिग्रहलक्षणात् नैपुणात् कारणात्। न तु यथा तथा वेति॥

हृदयङ्गमा

प्रागुक्तदेशादिविरोधाख्यदोषस्य कदाचित् गुणत्वमाह, विरोध इति। —एष उक्तरूपः, सकलः समग्रः अपि, देशाद्यागमपर्य्यन्तविषयोऽपीत्यर्थः, विरोधः कवेः कौशलात् वर्णनाचातुर्य्येण, विरुद्धवर्णनस्यापि वैचित्र्यप्रतिपादनेन इत्यर्थः, कदाचित् दोषगणनां दोषान्तर्भूतताम्, उत्क्रम्य विहाय, गुणवीथीं गुणमार्गं, विगाहते गुणत्वेन गणनीयो भवतीत्यर्थः॥१७९॥

प्रभा

एतावदुक्तविरोधः क्वचिद्गुणो भवतीत्याह—**विरोध इति।** सकलः देशकालकलालोकन्यायागमात्मकः। एष विरोधः कदाचित् कविकौशलात् कविप्रतिभामाहात्म्येन। विरुद्धार्थस्यापि वर्णनेन वैचित्र्योद्भावनाद् दोषगणनां दोषेषु गणनां संख्यानम् उत्क्रम्य

परित्यज्य। गुणवीथीं गुणस्य सरणीं विगाहते गुणत्वं भजते इत्यर्थः।।१७९।।

विवृति

कविकौशलमुदाहरति–

विरोधः सकलोऽपि कविकौशलात् दोषगणनामुत्क्रम्य गुणवीथीं विगाहेयत् (से)।।

देशादिविरोधानां षण्णां कदाचित् कविकौशलात् गुणत्वं भवतीत्याह–**विरोध इति**।।१७९।।

तस्य राज्ञः प्रभावेण तदुद्यानानि जज्ञिरे।
आर्द्रांशुकप्रवालानामास्पदं सुरशाखिनाम्।।१८०।।

रत्नश्री

तस्याभिमतस्य राज्ञः कस्यचित् प्रभावेण पुण्यानुभावात् अतिमानुषात् तस्यो[122a]द्यानानि। आर्द्राणि स्निग्धानि अंशुकानि वस्त्राण्येव प्रवालानि किसलयानि येषामित्यार्द्रांशुकप्रवालानां सुरशाखिनां कल्पवृक्षाणामास्पदं सद्म। आस्पदार्थस्य एकार्थ्येन विवक्षितत्वात् उद्यानादिबहुत्वसमानाधिकरण्येऽपि एकवचनम्। जज्ञिरे जातानि। पुण्यप्रभावस्याचिन्त्यत्वात् मनुष्यलोकेऽपि सुरशाखिनः सम्भवः। एवमुक्तमाचार्यशूरेण–

पुण्यानुभावादथ तस्य तस्मि-

न्नपङ्कजं पङ्कजमुद्बभूव।

अवज्ञयेवावजहास मारं

यच्छुक्लया केशरदन्तपंक्त्या।।

[जातकमालायाम् ४.१९]

इति तत्र देशाविरोधः।।

हृदयङ्गमा

तत्र देशविरोधस्य गुणत्वं दर्शयति, तस्येति। –तस्य राज्ञः, प्रभावेण महिम्ना, तदुद्यानानि तस्य राज्ञः उद्यानानि, आर्द्राणि

नवानि इत्यर्थः, अंशुकानि वस्त्राणि एव, प्रबालानि किशलयानि येषां तादृशानां, सुरशाखिना देवतरूणां, कल्पवृक्षाणामित्यर्थः, आस्पदं स्थानं, जज्ञिरे लेभिरे इत्यर्थः। (अत्र मानवोद्यानेषु सुरशाखिसम्भवो देशविरुद्धतया वर्णितोऽपि वर्णनीयस्य राज्ञः प्रभावातिशयं तथा ऐश्वर्य्यातिशयवर्णनरूपोदात्तालङ्कारप्रतिपादनात् कवेः कौशलञ्च द्योतयतीति चमत्कारव्यञ्जनात् गुणवत्त्वमापद्यते इति फलितार्थः)।।१८०।।

प्रभा

देशविरोधस्य गुणत्वं प्रकटयति–**तस्येति।** तस्य कस्यापि वर्णनीयस्य राज्ञः प्रभावेण तदुद्यानानि तानि प्रसिद्धानि उद्यानानि। आर्द्रांशुकान्येव जलक्लिन्नसूक्ष्मवस्त्राण्येव प्रवालाः पल्लवा येषां तादृशानाम् सुरशाखिनां कल्पवृक्षाणाम् आस्पदं स्थानं जज्ञिरे जातानि। अत्रोद्देशानुरोधेन बहुवचनम्। तदुद्याने विलासिन्यो जलक्रीडाविश्रान्ता जलार्द्राणि स्वांशुकानि जलशोषणार्थं कल्पशाखिशाखायां विस्तारयामासुरिति भावः। अत्र स्वर्द्रुमानां भूलोकोद्यानेष्ववस्थितिर्वर्णिता। इति देशविरोधः। परं तादृशेन वर्णनकौशलेन प्रस्तुतस्य नृपस्य विभूतिमाहात्म्यं सविशेषं बुद्ध्यारूढं भवति। तेन च उदात्तालंकारस्य सिद्धिः। इति नात्रायं देशविरोधो दोषाय।।१८०।।

विवृति

आर्द्रंशुकान्येव प्रवालानि किसलयानि येषां ते आर्द्रशुकप्रवालाः तेषां सुरशाखिनां नन्दनोद्यानद्रुमाणां नमेरुसन्तानपारिजातकादीनामास्पदमिति देशविरोधोऽयम्। यतो न

स्वर्गद्रुमा मनुष्यभूमौ सम्भवन्तीति। स दि (ए)षः देशविरोधो गुणगणनां कविकौशलद्विगाहते। तस्य प्रभावेणेति कविकौशलम्। तस्य राज्ञो हरेरुद्यानक्रीडायाममरैरादी(नी)य स्वर्गद्रुमाः परितोषाय स्थाप्यन्ते यतोऽतो न देशविरोधः। यदि पुनस्तस्य राज्ञः प्रभावेणेति कविकौशलं न स्यात् तथा भवप्येव देशविरोध इति।।

देशविरोधस्य गुणत्वं दर्शयति। सुरशाखिनां नन्दन एव स्थायिनां राजप्रभावात् भूमौ कथनं न विरुद्धम्; कृष्णेन हि द्वारवतीमानीतः कल्पतरुरिति श्रूयते।।१८०।।

राज्ञां विनाशपिशुनश्चचार खरमारुतः।
धुन्वन् कदम्बरजसा सह सप्तच्छदोद्गमान्॥१८१॥

रत्नश्री

खरो रूक्षो मारुतः कदम्बरजसा कदम्बपुष्परेणुना सह सप्तच्छदोद्गमान् सप्तपर्णकुसुमानि धुन्वन् विकिरन् राज्ञां विनाशस्य पिशुनः पञ्चतां सूचयन् चचार प्रववौ। यद्यपि एकदा कदम्बसप्तपर्णकुसुमासम्भवः कदम्बकुसुमस्य प्रावृषेण्यत्वात् सप्तच्छदपुष्पस्य च शारदत्वात्, तथापि राजविनाशनिमित्तमीदृशमौत्पातिकं सम्भवतीति न कालविरोधः॥

हृदयङ्गमा

कालविरोधस्य कदाचित् गुणत्वमुदाहरति, राज्ञामिति। –राज्ञां प्रतिपक्षनृपाणां, विनाशपिशुनः विनाशसूचकः, ("पिशुनौ खलसूचकौ" इत्यमरः) खरमारुतः प्रचण्डवायुः सप्तच्छदोदगमान् सप्तपर्णपुष्पाणि, धन्वन् कम्पयन्, कदम्बरजसा नोपपरागेण सह, चचार ववौ। (अत्र राज्ञामित्यनेन प्रतिपक्षोक्त्या वर्णनीयस्य राज्ञः युद्धयात्रायाः प्रतीतिः, मा च युद्धयात्रा सप्तच्छदोद्गमश्च शरत्सु एव भवति, कदम्बपुष्पाणि तु तदा न जायन्ते वर्षास्वेव तेषां प्रादुर्भावात्; ततश्च तद्रजसा सह सप्तच्छदोद्गमस्यैककालत्वप्रतिपादनात् कालविरोधः। "अकाले फलपुष्पाणि देशविद्रवकारणम्" इति विष्णुधर्मोत्तरीयवचनेन अकालेऽपि फलपुष्पोद्गमस्य सम्भावनं, तथा खरमारुतवत् तस्याशुभसूचकत्वञ्च प्रतीयते, तेन

प्रतिपक्षीयनरपतीनां नियतविनाशसूचनात् विजिगीषोः उत्कर्षातिशयव्यञ्जकतया गुण एव, कविकौशलञ्चात्र तादृशव्यङ्ग्यप्रतिपादनमेव इत्यवधेयम्)।।१८१।।

प्रभा

कालविरोधस्य गुणत्वं दर्शयति-**राज्ञामिति।** राज्ञां प्रतिपक्षीभूतनृपाणाम्। विनाशपिशुनो भाविविनाशसूचकः खरमारुतः प्रतीपश्चण्डो वातः कदम्बरजसा कदम्बकुसुमरेणुभिः सह सप्तच्छदोद्गमान् सप्तच्छदपुष्पाणि धुन्वन् आकम्पयन् चचार ववौ। विजिगीषोर्यात्रासमयोद्धूतस्य वायोर्वर्णनमिदम्। स च वायुः शत्रोः प्रतिकूलः संमुखत्वात्। प्रस्तुतस्य राज्ञस्तु अनुकूलः पृष्ठानुगामित्वाद् इति ऊह्यम्। यत्र यात्राकालः शरदृतुस्तत्र सप्तच्छदोद्गम उपपन्नस्तस्मिन् समये एव तस्य कुसुमोद्गमात्। परं कदम्बरजसा सूचितस्तन्मुकुलोद्गमस्तु विरुद्धस्तेषां वर्षास्वेवोद्गमः प्रसिद्धः। इति कालविरोधः। स च खरमारुतवल्लोकविनाशसूचकः। तदुक्तं विष्णुधर्मोत्तरे यथा-अकाले फलपुष्पाणि देशविद्रवकारणम्। इति। तथा च प्रतिपक्षस्य अवश्यंभाविविनाशसूचनेन प्रस्तुतस्योत्कर्षातिशयद्योतनादयं कालविरोधो गुण एव। एतादृशव्यङ्ग्यप्रतिपादनेन कवेः कौशलं स्फुटं भवति।।१८१।।

विवृति

इति कालविरोधो यतः कदम्बर[ज]सा सह सम्भवो वर्षासु कदम्बरजो[?] न शरदि [दी] ति। तदेतत् कविकौशलान्न दुष्यति। एतत् कविकौशलं राज्ञां विनाशे पिशुनः खरमारुतश्चण्ड

उत्पातवातः शारदयात्राप्रस्थाने क्षत्रियमरणसूचकस्तस्य कारा[आका]लिकतरुपुष्पसम्बन्धाद्वा[त्] तद्धूम[न]नं सह (सम्भ)वत्येवेति न दोषः।।

कालविरोधस्य गुणत्वं दर्शयति–**राज्ञामिति।** वर्षर्तुलक्षणेन कदम्बरजसा सह शरल्लक्षणसप्तच्छदकुसुमसम्मेलनस्य उत्पातरूपेण उक्तत्वात् कालविरोधो न दोषाय।।१८१।।

दोलातिप्रेरणत्रस्तवधूजनमुखोद्गतम्।
कामिनां लयवैषम्याद् गेयं रागमवर्धयत्॥१८२॥

रत्नश्री

दोला प्रेङ्खा तस्या अतिप्रेरणादतिकम्पनाद्। [अन]तिमात्रतत्प्रेरणतो हि न भवेदपि लयवैषम्यम्। तस्मात् त्रस्तस्य भीतवधूजनस्य स्त्रीणां मुखादुद्भवं गेयं गीतं कामिनां रागमवर्धयत् उद्दीपितवत्। कुतः? लयस्य क्रियामानकाललक्षणस्य द्रुतमध्यादिप्रभेदस्य तत्कालपरिदृष्टस्य वैषम्यादयथाकालं प्रवृत्तेः। एतच्च विरुद्धम्। कथं हि लयविषममलक्षणदुष्टं गेयं रञ्जकं भवति? तथापि ईदृशं स्थूलं गीतं शीत्कारायमाणं कामिनां सुतरां रञ्जकम्। कि मव हि तेषामरञ्जकमिति न कालविरोधः॥

हृदयङ्गमा

कलाविरोधस्य क्वचित् गुणत्वमुदाहरति, दोलेति।—दोलायाः यानविशेषस्य, अभिप्रेरणेन सवेगचालनेन, त्रस्ता भीताः, ये बधूजनाः तेषां मुखेभ्यः उद्गतम् उच्चरितं, लयस्य गीतवाद्यपादादिन्यामानां क्रियाकालयोः साम्यस्य, वैषम्यं वेपरीत्यं यत्र तादृशम, अपीति शेषः, गेयं गीतं, भयचकितत्वात् लयासङ्गतमपि गानमित्यर्थः, कामिनां रागम् अनुरागम्, अवर्द्धयत्। (गानस्य लयशुद्धिरेव रागवर्द्धनीति कलानियमः, अत्र च तद्वैपरीत्यमिति कलाविरोधः, बधूजनान् प्रति कामिनामत्यनुरागव्यञ्जकतया गुण एव इति)॥१८२॥

प्रभा

कलाविरोधस्य गुणत्वमुदाहरति–**दोलेति**। दोलायाः प्रेङ्खाया अभिप्रेरणं इतस्ततः संचरणं तेन त्रस्तो यो वधूजनस्तसय मुखादुद्गतं तेनोद्गीतम्। यद् गेयं दोलागीतम्। तत् लयस्य गीतादिसाम्यस्य। वैषम्यं भिन्नकालत्वेन विषमता यत्र एतादृशमपि। कामिनां तत्र संगतानां विलासिनाम्। रागं अनुरागम् अवर्धयत्। लयशुद्धमेव गानं रसिकानां रागवर्धकं भवतीति संगीतशास्त्रस्थितिः। प्रकृते तु तद्विरुद्धमिति कलाविरोधः। स च विलासिनीषु कामिनां सविशेषरागानुसूचकत्वाद्गुण एव।।१८२।।

विवृति

लयवैषम्यं चेद्गीतस्य तदा न रागहेतुत्वम्। अविषमलयं रागहेतुः विषमलयं तु वैरस्यायेति कलाविरोधः। डोलाभिप्रेरणत्रस्त–वधूजनमुखोद्गतमिति कविकौशलान्न कलाविरोधः। तदुक्तं कामिना स्खलितमप्युपकारि।।

ढोलेति। गीतस्य लयवैषम्यं न रागवर्धनम्; दोलातिप्रेरणकम्पवशेन गीतलयवैषम्यं कामिनो मनोहरत्वेन रागवर्धनमभूत्। इति कलाविरोधस्य गुणत्वम्।।१८२।।

ऐन्दवादर्चिषः कामी शिशिरं हव्यवाहनम्।
अबलाविरहक्लेशविक्लवो गणयत्ययम्॥१८३॥

रत्नश्री

ऐन्दवादिन्दोः सम्बन्धिनोऽर्चिषो रश्मेरप्यधिकशिशिरं शीतं हव्यवाहमग्निं गणयति। [कः ?] अधैर्योऽयं विवक्षितः कश्चित् कामी। [कथम् ?] अबलायाः प्रियाया विरहो दुःखं स एव वा क्लेशः। तेन विक्लवो विप्लुतः सन्। विरहविकारविप्लुतस्य हि तथा प्रतिभास इति न लोकविरोधः॥

हृदयङ्गमा

लोकविरोधस्यापि गुणत्वमुदाहरति, ऐन्दवादिति। –अयं कामो कामपरतन्त्रः, अबलाया विरहेण यः क्लेशः, तेन विह्वलः व्याकुलः सन्, ऐन्दवात् चन्द्रसम्बन्धिनः, अर्चिषः किरणात्, किरणमपेक्ष्येत्यर्थः, (ल्यब्लोपे पञ्चमी) हव्यवाहनम् अग्निं, शिशिरं शीतलं, गणयति मन्यते। (अत्र हव्यवाहनस्य शिशिरत्वं लोकविरुद्धं, तच्च विरहिणां चन्द्रकिरणस्यात्युद्दीपकत्वव्यञ्जनात् गुण एव)॥१८३॥

प्रभा

लोकविरोधस्य गुणत्वं दर्शयति–**ऐन्दवादिति**। अयं अबलाया विरहस्य क्लेशेन विह्वलो व्याकुलः कामी मदनातुरः। ऐन्दवाद् इन्दुसंबन्धिनोर्चिषो मयूखात्। हव्यवाहनं कृशानुम्। शिशिरं शीतलम्। गणयति मन्यते। अत्र ऐन्दवादर्चिषः हव्यवाहनः शिशिर

इति लोकविरोधः। विरहिणां चन्द्रकिरणस्य उद्दीपकत्वेन संतापकत्वात् तादृशवर्णनं गुण एव इति लोकविरोधस्यात्र गुणत्वम्।।१८३।।

विवृति

इति लोकविरोधः। न खलु च[चा]न्द्रमसां [सं] धाम्नः सखी त्रि[धाम उष्णामिति] लोके विदितमिदं तत्[त्र] कामीति तथा अबलाविरहक्लेशविह्वल इति यत् कविकौशलं ततो न लोकविरोधदोषः। तदुक्तं दुःखिते मनसि सर्वमसह्यम्'। हव्यवाह....रपि (हव्यवाहनादपि) चन्द्रपादा विरहिणामसह्य(ह्याः)। मन्मथपीडितानां रम्येषु द्वेषादिति।।

ऐन्दवादिति। चन्द्रकिरणानां दहनशीलत्वं प्रियाविरहक्लिष्टेन बुद्ध्यते। इति लोकविरुद्धस्यापि गुणत्वम्–दावप्रेम्णा सरसाबिसिनीपत्रमात्रोत्तरीयस्ताम्यन्मूर्तिः श्रयति बहुशो मृत्यवे चन्द्रपादान्–इतिवत।।१८३।।

प्रमेयोऽप्यप्रमेयोऽसि सकलोऽप्यसि निष्कलः।
एकस्त्वमप्यनेकोऽसि नमस्ते विश्वमूर्तये॥१८४॥

रत्नश्री

प्रमेयः परिच्छेद्योऽपि व्यक्तक्षित्यादिमूर्त्यपेक्षया अप्रमेयोऽसि अव्यक्तः परमरूपतः। प्रमेयोऽपि वा [122b] अनुमानप्रमाणगम्यत्वादप्रमेयोऽसि [इन्द्रिया]विषयत्वात्। सकलः सावयवोऽपि [आ]रब्धक्षित्यादिमूर्तत्वात्, निष्कलो निरवयवः असि परमात्मरूपतः। एकोऽपि त्वं शाश्वतब्रह्मरूपेण, अनेकोऽसि परिणामवैचित्राद् इत्येवं विश्वमूर्तये सर्वमयाय [ते] तुभ्यं नमः। इतीदृशं न न्यायविरुद्धम्, एवंविधत्वाद् ब्रह्मणः परमस्येति॥

हृदयङ्गमा

न्यायविरोधस्य गुणत्वमुदाहरति, प्रमेय इति। —भगवत्स्तुतिरियम्। प्रमेयः प्रमाणजन्यज्ञानविषयोऽपि, अप्रमेयः अज्ञेयः असि, सफलः फलं कार्य्यं, विश्वरूपमित्यर्थः, तत्सहितः अपि, निष्फलः फलरहितः, कार्य्येषु निर्लिप्त इत्यर्थः, असि, त्वम् एकोऽद्वितीयोऽपि, अनेकः बहुरूपः, असि, अतः विश्वमूर्त्तये जगत्स्वरूपाय, ते तुभ्यं, नमः इत्यन्वयः। (प्रमेयत्वाप्रमेयत्वादिकं परस्परविरुद्धं नैकाधारवर्त्तीति नैयायिकी युक्तिः, सा चात्र विरुद्धतया भासमानाऽपि परमात्मनोऽचिन्त्यत्वं व्यञ्जयन्तो गुणत्वमेवारोहति)॥१८४॥

प्रभा

न्यायविरोधस्य गुणत्वं दर्शयति—**प्रमेय इति**। प्रमेयः

श्रुतिप्रमाणवेद्यः। अप्रमेयः अनन्तगुणशक्तित्वादपरिच्छेद्यस्वरूपः। सफलः व्यष्टिरूपेण सांशः। निष्कलः समष्टिरूपेण निरंशः। एकः अद्वितीयः। अनेकः इन्द्रो मायाभिः पुरुरूप ईयते इत्यादिश्रुतिभिः प्रपञ्चात्मकेन विश्वरूप इत्यर्थः। एतादृशे विश्वमूर्तये सर्वव्यापकत्वेन विश्वाकाराय ते तुभ्यं नमः। अत्र विरुद्धधर्माणां प्रतिपाद्यमानं समानाधिकरण्यं न कुत्रापि दर्शने दृष्टम् इति न्यायविरोधः। स च परमेश्वरस्य लोकातीतमाहात्म्यमुद्भावयतीति प्रकृते गुणः॥१८४॥

विवृति

इति न्यायविरोधः। न खलु प्रमेयाप्रमेययोः सकलनिष्कलयोः एकानेकयोः युगपदेकत्र धर्मिणि समावेपस[वेशः] उपपत्तिमनिति। स एष विश्वमूर्तये न इति विश्वमूर्तिवचनात् कविकौशलान्न दुष्यति। यतो विश्वमूर्तिरसावतो न न्यायविरोधः॥

न्यायविरुद्धस्य गुणत्वं दर्शयति– **प्रमेय** इति। प्रमेयस्य अप्रमेयत्वम्, सावयवस्य निरवयवत्वम्, एकस्य अनेकत्वं च, युक्तिविरुद्धमपि ईश्वरस्वभावस्य तथाविधत्वात् गुणीभवति॥१८४॥

पञ्चानां पाण्डुपुत्राणां पत्नी पञ्चालकन्यका।
सतीनामग्रणीश्चासीद् दैवो हि विधिरीदृशः॥१८५॥

रत्नश्री

पञ्चानां यु[धि]ष्ठिरादीनां पाण्डोः पुत्राणां पत्नी पञ्चालकन्यका द्रौपदी बभूव। हन्त न तर्हि दृष्टपञ्चपुरुषा सा कुलस्त्री स्यादिति चेदाह-सतीनां पतिव्रतानां मध्ये अग्रणीः प्रधानभूता चासीत्। कथमेवम्? दैवो देवसम्बन्धी हि विधिः प्रभाव ईदृशः एवंभूतो यदेवंविधमपि घटते। किमत्र क्रियताम्? को हि दैवं विधानमप्रमाणयितुं शन्कोति। हिशब्देनेदमेव प्रसिद्धं द्योत्यते। ततश्च नागमविरोधः।

काव्यलक्षणं यथाप्रतिज्ञातं निगमन्नयाह–

हृदयङ्गमा

आगमविरोधस्य गुणत्वमुदाहरति, पञ्चानामिति।–पाञ्चालपुत्रिका द्रौपदी, पञ्चानां पाण्डुपुत्राणां युधिष्ठिरभीमार्जुननकुलसहदेवानां, पत्नी भार्य्या, अथच सतीनां साध्वीनाम्, अग्रणीः श्रेष्ठा च, आसीत्, हि यतः, दैवः देवसम्बन्धौ, विधिः विधानम्, ईदृशः एवंविधः, आगमानधीनः इत्यर्थः, तेषां तस्याश्च देवांशतया शास्त्रोक्तत्वादिति भावः। (एकस्या बहुपतित्वं सतीत्वञ्च आगमविरुद्धं, तच्चात्र दैवविधेः शास्त्रानधीनतया वैचित्र्यमावहद्गुण एवेति। केचित्तु धर्म्मविरुद्धे उदाहरणमिदं मन्यन्ते)॥१८५॥

प्रभा

आगमविरोधस्य गुणत्वं दर्शयति–**पञ्चानामिति।** पञ्चानां पाण्डुपुत्राणां पाञ्चालपुत्रिका द्रौपदी पत्नी अभूत्। पुनश्च सतीनां साध्वीनाम् अग्रणीः श्रेष्ठा आसीत्। दैवः देवतासंबन्धी विधिः व्यवहारः। ईदृशः स्वतन्त्रः नागमपरतन्त्र इति भावः। अत्र युधिष्ठिरादीनां धर्माद्यंशतया द्रौपद्याश्च पृथिव्यधिष्ठातृरूपतया देवत्वान्नागमपरतन्त्रता इति भावः। अत्र–यथैकस्मै यूपाय बह्व्यो रशना नैकस्यै रशनायै बहवो यूपास्तथैकस्मै पत्ये बह्व्यो जाया नैकस्यै जायायै बहवः सहपतयः–इति श्रुत्या एकस्या बहुपतित्वनिषेधादागमविरोधः। स च द्रौपद्या देवतात्वेन आगमानपेक्षतां व्यञ्जयंस्तस्या माहात्म्यमुद्भावयति इति गुणः॥१८५॥

विवृति

पञ्चानां पाण्डुपुत्राणां युधिष्ठिरादीनामेकैव द्रौपदी पत्नी। तथाऽपि यज्ञाप्रतापि [पतिव्रतेति] आ [गमविरोधः] दैवो विधिरीदृश इति कविकौशलान्न दुष्यति नियतिरीदृशी गुर्वाज्ञा वा इति दैवौ विधिः। यदुक्तमाज्ञागुरूणामविलङ्घनीयेति। एवमनुश्रूयते–

पुरा किल अर्जुनेन राधे [लक्ष्य]वेधात् परिणीता द्रौपदी मा [दीआ]नीय पृथायै प्रादर्शि, हे अम्ब मया लब्धेति। ततः किल कुन्त्याऽभिहित्तमेषा भिक्षा पञ्चभिरपि भुज्यतामिति॥

आगमविरुद्धस्य गुणत्वं दर्शयति–**पच्चानामिति।** यन्नैकांरशनां द्वयो र्यूपयोः परिव्ययति तस्मान्नैका द्वौ पती विन्दते' इति अस्या बहुभर्तृत्वं आगमविरुद्धम्; पञ्चेन्द्रोपाख्यानेन जन्मान्तरप्रदानेन द्रौपद्याः पञ्चभर्तृत्वमपि पातिव्रत्यमिति आगमविरोधस्य गुणत्वम्।।१८५।।

शब्दार्थालंक्रियाश्चित्रमार्गाः सुकरदुष्कराः।
गुणा दोषाश्च काव्यानामिति संक्षिप्य दर्शिताः॥१८६॥

रत्नश्री

काव्यानां शब्दश्चार्थश्च शब्दार्थौ शरीरम्। तयोश्चालंक्रिया शब्दालङ्कारा अर्थालङ्काराश्च। चित्रा नानाप्रकारा सुकराः दुष्कराश्च मार्गा यमकादिरूपाः, चित्रा गुणाः समुदायार्थसम्पत्त्यादयः। दोषाश्च तद्विपक्षाः साधारणा असाधारणाश्च श्लेषविपर्ययादयः। उक्तेन विधिना [एतत् सर्वं] संक्षिप्य समासतो दर्शिताः प्रतिपादिताः॥

दर्शिता नाम। किमतः इति सर्वारम्भस्य तन्निष्ठत्वात् प्रयोजनदर्शनद्वारेण समापयन्नाह–

हृदयङ्गमा

प्राक्प्रतिज्ञातगुणालङ्कारादिनिरूपणानन्तरं ग्रन्थमिममुपसंहरति, शब्देति। –इह अस्मिन् काव्यादर्शाख्ये ग्रन्थे, काव्यानां शब्दार्थालङ्क्रियाः शब्दार्थोभयनिष्ठाः स्वभावाख्यानादयः अलङ्काराः, तेषां शब्दार्थाभ्यां शोभाजनकत्वादुभयनिष्ठत्वमित्यभिप्रायः, तथा सुकरा दुष्कराश्च चित्रमार्गाः चित्रालङ्काराणां मार्गा नियमाः, शब्दमात्रनिष्ठा यमकादय इत्यर्थः, तथा गुणाः श्लेषादयः, दोषाश्च अपार्थत्वादयः, (चकारात् काव्यलक्षण तन्मार्गादीनां ग्रहणम्) सङ्क्षिप्य दर्शिताः सङ्क्षेपेण निरूपिताः, बहुभेदतया च साकल्येन गुणादीनां भेदस्यादर्शितत्वादिति भावः॥१८६॥

प्रभा

एतावत्पर्यन्तं निरूपितान् पदार्थान् संकीर्त्य ग्रन्थमिममुपसंहरति-**शब्दार्थेति।** काव्यानां शब्दार्थालंक्रियाः शब्दालंकारा दीपकावृत्तिक्रमश्लेषाश्चत्वारोर्थालंकाराश्च स्वभाव-ख्यानादयः। तथा सुकराः दुष्कराः चित्रमार्गाः। तत्र केचित् सुकराः पादादियमकादयः। केचिद् दुष्कराश्च महायमकस्वरस्थानवर्ण-नियमादयः। तथा गुणाः श्लेषप्रसादादयः। दोषाः अपार्थव्यर्थादयः। चकारेण काव्यलक्षणं तद्भेदौ च वैदर्भगौडरूपौ। एते संक्षिप्य दर्शिता विस्तारभिया संक्षेपेणैवोक्ताः। अत्र यावन्तः पदार्था निरूपितास्तेषां परिगणनं कृतं न तु तत् पूर्वक्रमानुरोधेनेति ज्ञेयम्।।१८६।।

विवृति

प्रबन्धार्थमुपसंहरति-शब्देति। प्रथमद्वितीयपरिच्छेदोक्ताः शब्दार्थालंक्रियाः ; तृतीयपरिच्छेदोक्ताः यमकादिविषयसुकरदुष्कर-मार्गाः ; अथ अपार्थादयो दोषाः, तद्गुणीकरणेन उक्ता गुणाश्च; सर्वेऽपि सङ्क्षिप्य दर्शिताः।।१८६।।

व्युत्पन्नबुद्धिरमुना विधिदर्शितेन
मार्गेण दोषगुणयोर्वशवर्तिनीभिः।
वाग्भिः कृताभिसरणो मदिरेक्षणाभि–
र्धन्यो युवेव रमते लभते च कीर्तिम्॥१८७॥

रत्नश्री

अमुना अनेन मार्गेण काव्यलक्षणविधिना यथावद् दर्शितेन प्रकाशितेन हेतुना, दोषश्च हेयो भागः, गुणश्चोपादेयः। यथोक्तयोस्तयोः कार्यसम्बन्धिनोः व्युत्पन्ना विवेकिनी हानोपादानसमर्था बुद्धि[र्यस्य तादृशः] काव्यदोषगुणज्ञः पुमान्। अत एव वशवर्तिनी[भिरा]यत्ताभिर्वाग्भिः काव्यरूपाभिरनवद्याभिः कृतमभिसरणं स्वरसत एवोपसर्पणमस्मिन्निति वाक्कृताभिसरणः अभिसृतो रमते प्रीतिमनुत्तरामनुभवति। कीर्तिं च सत्पुरुषतनुमनश्वरों गुणमयो भुव[नातिशा]यिनीमतिमनोहरां लभते प्राप्नोति। उपलक्षणं चैतत्। चतुर्वर्गसिद्धिमपि चाधिगच्छति। यथोक्तं प्रथमे परिच्छेदे [१.३]। कथमिव? वशवर्तिनीभिर्मदिरेक्षणाभिः कृताभिसरणो धन्यः [123a].........सुभगो युवा तरुण इ[व]। यथायं रमते प्रीत्युत्सवं निर्विशति, लभते च कीर्तिं सुभग इति ख्यातिं तथा [व्युत्पन्न]बुद्धिरयमित्युपनेयम्॥

इति गदितुमवस्थां का[म]पि श्लाघ्यरूपा–
मुपचितगुणता[यां] मत्सरं न श्रियै वः।
कनकमयमिवेदं दीप्त[भास्वत्स]वण
श्रवणसुभगमी[ड्यं] दण्डिनः काव्यलक्ष्म॥

कृशतरगुणपूर्णं कालमालोकयद्भि-
र्गुरुरिव गुणलेशोऽप्यद्य संभावनीयः।
जगति विगतमेघे क्षारवारिप्रबन्धे
लंव इव सलिलस्य स्वादरो दृश्यमानः।।

गुणलवमपि सन्तो गृह्णते तेन तेषा-
मतिविपुलगुणत्वं तन्न चित्रीयते नः।
गुरुमपि गुणराशिं दुर्जना विद्विषन्तः
कथमपि गुणभावं तन्वते चित्रमेतत्।।

चिरंतनो वा कविर[द्य] वा स्फुटं
गुणोत्तरं वाक्यमुपास्यते बुधैः।
तरोः पुराणस्य नवस्य वा फलं
निरस्तशङ्कं मधुरं निषेव्यते।।

भवति सुगममेव ग्राम्यमप्यर्थजातं
परिणतपदबन्धैः स्पृश्यमानं कवीनाम्।
अविकलरसबन्धैस्तद्विदा बध्यमानं
विमलकनकसंख्यां याति यत्किञ्चिदेव।।

श्रवणममृतपूर्णं स्वान्तमानन्दरूढं
नयनमपरिशून्यं हर्षजैरश्रुलेशैः।

वपुरधिगतरोमोद्भेदमास्वाद्य न[:] स्या-
दिदमिति किल काव्यं पठ्यते श्रूयते च।।

विशेषविज्ञानवितानबुद्धयो
भवन्ति सूक्तिश्रवणस्य भाजनम्।
प्रभावितः काव्यरसो मनस्विनां
तनोति लज्जां पशुषु प्रकाशितः।।

प्रसन्नशास्त्रेषु सुभाषितप्रिये-
षु शान्तगर्वेषु विशेषवेदिषु।
व्रजन्ति वाचः सरसा महोत्सवं
गृहीतविद्याश्चतुरा इव स्त्रियः।।

दोषेष्वेव निवेशयन्ति हृदयं सर्वं खलास्ते कथं
कल्पन्ते गुणवैरिणो गुणवतां ज्ञात्वा गुणानां रसम्।
दोषा[नेव हि] तत्र केवलममी पश्यन्ति [नित्यं सतां]
त्यक्त्वा सद्गुणराशिमूर्जितमहो चित्रा खलानां गतिः।।

मिथ्यादूषणसाहसेन महतां तादृग्विशेषच्युता
लिप्सन्ते किल दुर्जनाः समतया संभावनां तादृशीम्।
नायं हेतुरवाप्तये गुणभुवः कीर्तेः सतां संसदि
व्यामोहादपि वा गुणेषु पतनं तेषां यदेतद्बहु।।

वचनमिदमिदं च वस्तु नैतत्
समुचितमत्र निषेव्यमन्यदेव।
प्रहतमिदमपूर्वमीक्ष्यमित्थं
कथमपि सिद्धिमुपैति वाक्प्रबन्धः।।
फलमुपचितमिदं श्रमस्य तस्य
प्रशमनमश्रुलवः सरोमहर्षः।
प्रमदभवनविजृम्भितो बुधाना-
मिदमपि [मत्स]रमा[123b]नयन्ति केचित्।।
तदधिकमथ तादृशं विधातुं
चतुरमतिः परदूषणे क्रमेत।
वितथा बुधविदग्धता विधातः
प्रवदति यत् तदिदं तु कर्णशूलम्।।
खलजनपरिनिन्दया गुणानां
न च विहतिः प्रकृतिस्तु तस्य सैषा।
भवति तु भणितिस्ततः स्फुटेयं
न खलु खला गुणवर्जितं द्विषन्ति।।
शिशिरयन्ति य एव म[न]स्विनः
शशभृतः किरणा इव सद्गुणाः।

यदि दहन्ति त एव खलानलं
क्व भवतामथवा खलवल्लभः।।
दुःखासिका किमियमेति खलं प्रकाश-
कान्तैर्गुणैर्गुणवतां क इवास्य नाशः।
प्रीतिं परां सुजनवत् किमयं न भुङ्क्ते
प्रीत्यर्थ एव सकलः पुरुषप्रयासः।।
तारयन्ति परमित्यतिशीतै-
रभ्युपैति सुजनान् परतापी।
स्वैर्गुणैरिदमनुक्तमुदात्तै-
रन्तरं सदसतोरतिदूरम्।।
वाक्यमक्षतगुणं परात्मनो
नाद्रियेत सुजनस्य सूरिभिः।
सर्वथा स्वपरघाति वाग्विषं
दुर्जनस्य परिगृह्यते कथम्।।
निन्दितं स्तुतमथापि यत्कृतं
न प्रमाणमुपकल्प्यते क्वचित्।
तादृशं च लपितं यदीहते
धिग् विडम्बनमनात्मवेदनम्।।

ईर्ष्ययाधिगुणेषु दीप्तया
स्पर्धया च सदृशेषु दह्यते।
निर्निमित्तमधमेष्ववज्ञया
केन सोऽयमनुरज्यतां खलः।।
शिष्यते यदि रुपा प्रदीप्यते
न स्वयं च गुणवर्त्म गाहते।
दुर्जनः कथमयं चिकित्स्यता-
मूर्जनान्न परमस्य भेषजम्।।
दोषमेव गुणतो विगाहते
तत्र चान्यमनुशास्ति दुर्मतिः।
ज्ञातवानपि कथंचिदन्यतः
पक्षभङ्गभयतो न मुञ्चति।।
इत्यलीकबुधमानदूषितं
दूरतस्तमपवादवर्त्मनः।
कालदष्टमिव वर्जयन्त्यमी
साधु शासनविदोऽपि साधवः।।
भक्तिमानधिगुणाद् गुणामृतं
सेवते तदवरेषु वर्षति।

तद्विवृद्धिपदवीं समं समैः
संकथां दिशति दक्षिणो जनः।।
नामतोऽपि सुजनः सुखावहः
किं पुनर्गुणमयेन कर्मणा।
त्रासयत्युभयथापि सर्पवद्
दुर्जनस्त्वयमकाण्डरोषणः।।
अद्भुतप्रति[भया] विशारदाः
शारदेन्दुविशदा विपश्चितः।
कस्य नाम न हरन्ति मानसं
दुर्जनः किल न तेषु तुष्यति।।
नान्तमेति सुजनः सुचेष्टिताद्
दुर्जनोऽपि चरितादसद्गुणात्।
किंचिदे[व स्थित]मन्तरं तयो-
रागतं प्रकरणात्कथंचन।।
सर्वथा भुवनपावनात्मने
सज्जनाय गुणराशये नमः।
सद्गुणप्रणिहिता दुरात्मना-
मस्तु बुद्धिरवधूय दुष्टताम्।।

सर्वाभ्युन्नतराष्ट्रकूटतिलकस्याशान्तगीत[स्तुते]-
रुद्दामद्विषदन्तकस्य गुणिनां धाम्नो गुणानामपि।
लक्ष्मीजुष्टपदाम्बुजस्य जयिनः सामन्तचूडामणेः
श्रीम[त्तु]ङ्गनराधिपस्य सुधियः सानाथ्यमेवंविधम्।।

कीर्तयो विदुषां तुङ्गमहीधरसमाश्रयात्।
प्रभवन्ति महानद्यो यथ लोकार्थवृत्तयः।।

यशः कीर्तिरिति ख्यातः श्रीमानन्त्यभ(?)सूरतः।
कल्याणमित्रमत्राभूद् भिक्षुः सिन्धुविभूषणः।।

अन्यस्त्वाह–

आसारगुरुका वाणी वादिनामद्य दुर्भगा।
तद्विपर्या[स]विन्यासा रत्नश्रीज्ञानभारती।।

इति दण्डिकाव्यलक्षणटीकायां रत्नश्रीनाम्नि दुष्करपरिच्छेदस्तृतीयः।।

।। समाप्ता चेयं टीका रत्नश्रीः ।।

।। कृतिरियमाचार्यरत्नश्रीज्ञानस्य सिंहलजन्मनः ।।

।। श्रीराज्यपालस्य राज्ञस्त्रयोविशसंवत्सरे विरचितेयं टीका ।।

हृदयङ्गमा

सङ्क्षेपदर्शितेऽप्यस्मिन् कथं फलसिद्धिर्भवतीत्युपपादयन् ग्रन्थं

समापयति, व्युत्पन्नेति। –व्युत्पन्ना संस्कृता, बुद्धिर्यस्य तथोक्तः विशुद्धमतिरित्यर्थः, धन्यः सुकृतो, जनः इति शेषः, अमुना एतद्ग्रन्थोक्तेन, विधिदर्शितेन विधयो लक्षणानि, तैर्दर्शितेन निर्दिष्टेन, दोषगुणयोः अपकर्षोत्कर्षधर्म्मयोः प्रोक्तलक्षणयोरिति यावत्, मार्गेण पथा, रीत्या इत्यर्थः, (गुणपदमत्रालङ्काराणामुपलक्षक, तेषामपि काव्यशोभाजनकत्वेनोत्कर्षाधायकत्वादिति बाध्यम्) कृतम् अभिसरणम अनुगमनं येन तादृशः सन्, काव्यनिर्मितौ तदवगतौ वा कृतयत्नः सन् इत्यर्थः, वशवर्त्तिनीभिः पुनः पुनरालोचनया सम्यगायत्ताभिः, वाग्भिः काव्यस्वरूपाभिरित्यर्थः, मदिरेक्षणाभिः मदघूर्णितनयनाभिः, वशवर्त्तिनीभिः प्रेमाधीनाभिः, कान्ताभिः, विधिदर्शितेन विद्युतप्रकाशादिरूपदैवप्रकाशितेन, दोषगुणयोर्मार्गेण अनेन पथा गमने महान् दोषः, अनेन पथा च तदभावरूपः गुणः, इत्येवं विविच्य निरूपितेन पथेत्यर्थः, कृताभिसरणः कृताभिसारः, युवा इव, रमते प्रीतिमनुभवति, कीर्त्तिञ्च लभते, (यथा कश्चित् युवकः दैवानुकूलतया परिज्ञातेन सुपथा वराङ्गनाभिसाराय गत्वा तदङ्गनाप्रेमास्पदीभूतः प्रीतः कीर्त्तिमांश्च भवति, तथा देशकालादिविषयपरिशीलनकुशलमतिः सुकृतौ मत्प्रदर्शितसङ्क्षिप्तगुणालङ्कारदोषादिलक्षणघटकवाक्यार्थपरिज्ञानेन काव्यमवगन्तुं कर्त्तुं वा प्रवृत्तः सन् सफलतया प्रीतः लब्धकीर्त्तिश्च भवतीति भावः)। वसन्ततिलकं वृत्तम्।।१८७।।

इति श्रीमज्जीवानन्दविद्यासागरभट्टाचार्य्यविरचिता काव्यादर्शविवृतिः।

प्रभा

अन्ते फलसंकीर्तनपूर्वं ग्रन्थमुपसंहरति-**व्युत्पन्नेति**। अमुना पूर्वोक्तेनानेन। विधिदर्शितेन विधिः भरतादिमुनीनामादेशस्तदनुरोधेन दर्शितेन निरूपितेन। एतेन स्वनिरूपितेन दोषगुणयोर्हेयोपादेय'-धर्मयोर्मार्गेण व्यवस्थितिप्रकारेण विवेचनपद्धत्या वा व्युत्पन्नबुद्धिः काव्यतत्त्वविदिति भावः। अत एव वशवर्तिनीभिस्तदधीनाभिर्वाग्भिः कृताभिसरणः स्वयंकृताभिगमनः। अत एव धन्यो मदिरेक्षणाभिः कृताभिसरणो युवा यथा तथा रमते तद्विलासे रमते। कीर्तिं च लभते जगति विश्रुतकीर्तिश्च भवति॥१८७॥

विचिन्त्य साहित्यविदां निबन्धान्
विलोक्य तत्तत्सुकविप्रबन्धान्।
आचार्यदण्डिग्रथितस्य काव्या-
दर्शस्य वृत्तिर्विहिता प्रभाख्या॥१॥

गृह्णान्ति मोदाद्गुणलेशबिन्दून्
नयन्ति शोषं परदोषसिन्धून्।
पश्यन्तु ते मत्कृतिमादरेण
धन्या जनिस्तेन न चापरेण॥२॥

विद्वत्त्वदर्पान्न कृतिर्ममैषा
तथोपहासाय न वा परेषाम्।
साहित्यशास्त्रेषु दृढानुरागात्
चापल्यमेतद्विदुषां पुरस्तात्॥३॥

स्वर्गे सुधास्वादनलोलुपास्ते
सुराः प्रनृत्यन्तु सुराङ्गनाभिः।
वयं तु काव्यामृतपानतृप्ता
विदग्धगोष्ठ्यां विहराम मोदात्।।४।।

शाब्दाम्भोनिधिमन्थने विमलधीर्येषां परो मन्दरो
ख्याता ये च विराजनाम्नि नगरे श्रीबालकृष्णाभिधाः।
गौरीवद्गृहमङ्गला समभवल्लक्ष्मीश्च यद्गेहिनी
ताभ्यां लब्धजनिर्व्यधाच्छिशुहितां वृत्तिं च रङ्गाभिधः।।५।।

श्रीमुकुन्दपदाम्भोजे द्वयमर्पितमस्तु मे।
काव्यादर्शस्य टीकेयं प्रेमार्द्रं हृदयं तथा।।६।।

इति श्रीवैराजक्षेत्रवासिभी रड्डीकुलावतंसैर्बालकृष्णाचार्यतनुजै रङ्गाचार्यसूरिभिर्विरचितायां काव्यादर्शव्याख्यायां प्रभाख्यायां तृतीयः परिच्छेदः।।

।।समाप्तश्चायं ग्रन्थः।।

विवृति

व्युत्पन्नबुद्धिरित्यादिना प्रकृतमुपसंहरति–

इत्याचार्यदण्डिनः कृतौ काव्यादर्शे दोषविभागो नाम चतुर्थः परिच्छेदः।

निगदेनैव व्याख्यातम्।।

इति वादिजङ्घालविरचितायां दण्डिकाव्यालङ्कारटीकायां यमकप्रहेलिका काव्यदोषविभावना।।

प्रबन्धस्य प्रयोजनं कथयति–**व्युत्पन्नेति**। एतत्प्रबन्धपरिशीलनफलं कवित्वम्। ततः स्वर्गवासित्वफला कीर्तिः।।१८७।

इत्याचार्यदण्डिनः कृतौ काव्यादर्शे सुकरदुष्करो नाम
तृतीयः परिच्छेदः।।

इति तरुणवाचस्पतिविरचितायां काव्यादर्शटीकायां तृतीयः परिच्छेदः।

साहित्यं साहित्यं येनेह प्राप्तमाप्ततस्तेन।
काव्यादर्शव्यख्या विनिर्मिता साधु तरुणवाक्पतिना।।

इति तरुणवाचस्पतिकृता काव्यादर्शव्याख्या सम्पूर्णा।।

श्लोकानुक्रमणी

अकस्मादेव ते चण्डि २ ७१
अक्रिया चन्द्रकार्याणाम २ ८४
अगागाङ्गाङ्गकाकाक- ३ ९१
अङ्गाङ्गिभावावस्थानम् २ ३५८
अङ्गल्यः पल्लवान्यासन् २ ६७
अङ्गल्यादौ दलादित्वम् २ ७०
अंशुकानि प्रवालानि २ २८८
अच्युतोऽप्यवृषच्छेदी २ ३२०
अजित्वा सार्णवामुर्वीम २ २८२
अतः प्रजानां व्युत्पत्तिम् १ ९
अत्यन्तबहवस्तेषाम् ३ ३
अत्यन्तमसदार्याणाम् २ २४८
अत्र धर्मैरभिन्नानाम् २ ११४४
अत्रोद्याने मया दृष्टा ३ ११२
अद्य या मम गोविन्द २ २७४
अधिकेन समीकृत्य २ ४८
अनङ्गः पञ्चभिः पौष्पैः २ १२१
अनङ्गलङ्घ्नालग्न- ३ ९०
अनञ्जितासिता दृष्टिः २ १९९
अनुकम्पाद्यतिशयः ३ १३७
अनुप्रासधिया गौडैः १ ४४
अनेकशब्दोपादानात् २ ११२
अनेनैव प्रकारेण २ ११५
अन्यथैव स्थिता वृत्तिः २ २१९
अन्यधर्मस्ततोऽन्यत्र १ ९३
अपकर्ताहमस्मीति २ २९१
अपह्नुतिरपह्नुत्य २ ३०२
अप्रस्तुतप्रशंसा स्यात् २ ३३८
अपाङ्गभागपातिन्या २ २२३
अपादः पदसन्तानः १ २३
अपार्थं व्यर्थमेकार्थम् ३ १२५
अपि त्वनियमोः दृष्टः २ २५
अपीतक्षीबकादम्बम् २ १९८
अभावसाधनायालम् २ २३७
अभिन्नवेलौ गम्भीरौ २ १८१
अभ्रूविलासमस्पृष्ट- २ १८९
अमृतस्यन्दिकिरणः २ ३०५
अमृतात्मनि पद्मानाम् २ १५९

अनन्वयससन्देहौ २ ३५६

अनभ्यासेन विद्यानाम् २ २४५

अनयोरनवद्याङ्ग् १ ८७

अनल्पविटपाभोगः २ २०८

अनाहिताग्नयोऽप्येते ३ १७७

अनिष्ठुराक्षरप्रायम् १ ६९

अरण्यं कैश्चिदाक्रान्तम् ३ ७

अरत्नालोकसंहार्यम् २ १९५

अर्थमिष्टमनाख्याय २ २९३

अर्थव्यक्तिरनेयत्वम् १ ७३

अर्थान्तरप्रवृत्तेन २ ३४६

अर्थावृत्तिः पदावृत्तिः २ ११६

अर्थिनां कृपणा दृष्टिः १ ७७

अर्थो न सम्भृतः कश्चित् २ १५७

अर्धाभ्यासः समुद्रः स्यात् ३ ५३

अलङ्कारान्तराणाम् २ २१८

अलङ्कृतमसंक्षिप्तम् १ १८

अलिनीलालकलतम् ३ ८९

अल्पं निर्मितमाकाशम् १ ९१

अवते भवते बाहुः ३ १४९

अम्भोरुहमिवाताम्रम् २ १५

अयमर्थान्तराक्षेपः २ १६४

अयमान्दोलितः प्रौढ– २ २३५

अयमालोहितच्छायः २ ८९

अयं परवशाक्षेपः २ १५०

अयं मम दहत्यङ्गम् २ १७५

अहो विशालं भूपाल २ २१७

आक्रोशत्यवजानाति २ ६२

आक्षिपन्त्यरविन्दानि २ ३५९

आदिराजयशोबिम्बम् १ ५

आदौ राजेत्यधीराक्षि ३ ११६

आधूतकेसरो हस्तो ३ १७२

आनन्दाश्रु प्रवृत्तं मे २ २६५

आभीरादिगिरः काव्ये १ ३६

आम्नायानामाहान्त्यावाक् ३ ८४

आरुह्याक्रीडशैलस्य ३ २४

आर्यादिवत् प्रवेशः किम् १ २७

आविर्भवति नारीणाम् २ २५४

आवृत्तिः प्रातिलोम्येन ३ ७३

आवृत्तिमेवसङ्घात– १ ६१

अवध्यैरिन्दुपादानाम् २ २४३
अवलेपपदेनात्र २ ११०
अवलेपमनङ्गस्य २ १०९
अविकृत्य मुखाङ्गानि २ ७४
अविशेषेण पूर्वोक्तम् ३ १३५
अत्र्यपेतव्यपेतात्मा ३ १
असावनादराक्षेपः २ १४०
असावनुपनीतोऽपि ३ १७८
असावनुक्रोशाक्षेपः २ १५६
असावनुशयाक्षेपः २ १५८
असावुदयमारूढः २ ३०९
अस्तमस्तकपर्यस्त- १ ८२
अस्ति काचिदवस्था सा ३ १३३
अस्त्यनेको गिरां मार्गः १ ४०
अस्त्यभिन्नक्रियः कश्चित् २ ३१२
इति मार्गद्वयं भिन्नम् १ १०१
इति मुक्तः परो युद्धे २ २९२
इमि मुख्येन्दुराक्षिप्तः २ १६०
इति लक्ष्म्याः प्रयोगेषु २ २४४
इति लौकिक एवायम् ३ १७३
आशयस्य विभुतेर्वा २ २९८
आशीर्नामाभिलषिते २ ३५५
आसु रात्रिष्विति प्राज्ञैः ३ १६१
आहुरर्घभ्रमं नाम ३ ८०
आहुः समागतां नाम ३ ९८
इक्षुक्षीरगुडादीनाम् १ १०२
इति कारुण्यमुद्रिक्तम् २ २८५
इति कालविरोधस्य ३ १६९
इति चन्द्रत्वमेवेन्दोः २ ३०६
[इति तत्कालसम्भूतम्] पृः ११२
इति त्यागस्य वाक्येऽस्मिन् १ ७८
इति दुष्करमार्गोऽपि ३ ९६
इति पद्येऽपि पौरस्त्याः १ ८३
इति पादादियमकम् ३ १९
इति प्रौढाङ्गनाबद्ध- २ २०५
इत्यारुह्य परां कोटिम् २ २८१
इत्याशीर्वचनाक्षेपः २ १४२
इत्याह युक्तं विदुरः २ २७५
इत्युत्साहः प्रकृष्टात्मा २ २८३
इत्युदाहृतयो दत्ताः २ ३५३

इति वैदर्भमार्गस्य १ ४२
इति व्यपेतयमक- ३ ३३
इति श्लेषानुविद्धानाम् २ ३४५
इति सम्भाव्यमेवैतत् १ ८८
इति साक्षात्कृते देवे २ २७७
इतिहासकथोद्भूतम् १ १५
इति हृद्यमहृद्यं तु १ ९७
इति हेतुविकल्पस्य २ २५८
इतीदं नादृतं गौडैः १ ५४
इत्थं कलाचतुःषष्टौ ३ १७१
इत्यनङ्गजयायोग- २ १२२
इत्यनालोच्य वैषम्यम् १ ५०
इत्यनुज्ञामुखेनैवम् २ १३६
इत्यनुद्भिन्नरूपत्वात् २ २६२
इत्यनुप्रासमिच्छन्ति ५ ५८
इत्यनुर्जित एवार्थः १ ७१
इत्यनेकप्रकारोऽयम् २ २३८
इत्यपूर्वसमासोक्तिः २ २११
इत्ययं संशयाक्षेपः २ १६२
इत्यादिदीपकत्वेऽपि २ १०८
इत्येकव्यतिरेकोऽयम् २ १८०
इत्येतद्समस्ताख्यम् २ ६८
इत्येवमादयो भेदाः २ १६९
इत्येवमादिराक्षेपः २ १६६
इत्येवमादेः सौभाग्यम् २ ५४
इत्येवमादिस्थानेयम् २ २६६
इत्येवं परुषाक्षेपः २ १४४
इदं मघोनः कुलिशम् २ २८९
इदमत्युक्तिरित्युक्तम् १ ९२
इदमन्धं तमः कृत्स्नम् १ ४
इदमम्लानमालायाः २ २८७
इदमस्वस्थचित्तानाम् ३ १३०
इदमार्द्रस्मितज्योत्स्नम् २ ७८
इन्दुपादाः शिशिराः ३ १५७
इन्दुबिम्बादिवोत्कीर्णम् २ ४१
इववद्वायथाशब्दाः २ ५७
इष्टं साधर्म्यवैधर्म्य- २ ८८
इह शिष्टानुशिष्टानाम् १ ३
ईदृशं वर्ज्यते सद्भिः २ ५६
ईदृशं संशयायैव ३ १४१

इत्यादिदीपकान्युक्ता- २ १०२
इत्यादिपादयमक- ३ ३७
इत्यादि बन्धपारुष्यम् १ ६०
इत्यादि शास्त्रमाहात्म्य- ३ १५१
उत्प्रवालान्यरण्यानि २ २४०
उत्प्रेक्षाभेद एवासौ २ ३५७
उत्सङ्गे शयनं सख्याः १ ९९
उदयन्नेव सविता २ ३४७
उदात्तापह्नुतिश्लिष्ट- २ ६
उदितैरन्यपुष्टानाम् ३ ३१
उद्दिष्टानां पदार्थानाम् २ २७१
उद्देशानुगुणोऽर्थानाम् ३ १४४
उद्धृतां राजकादुर्वी ३ २५
उद्यानामारुतोद्धूताः २ ३३६
उद्यानसहकाराणाम् २ २४९
उपमानोपमेयत्वम् २ २२६
उपमापह्नुतिः पूर्वम् २ ३०७
उपमारूपकाक्षेप- २ ३११
उपमैव तिरोभूत- २ ६६
उपोढरागाप्यबला ३ ५२
उत्कण्ठयति मेघानाम् २ ११८
उत्कर्षवान् गुणः कश्चित् १ ७६
उत्कामुन्मनयन्त्येते ३ १३६
उत्पादयति लोकस्य २ १७२
कथादिः सर्वभाषाभिः १ ३८
कदा नौ सङ्गमो भावी २ २५९
कन्याहरणसंग्राम- १ २९
कन्ये कामयमानं माम् १ ६३
कमलेः समकेशं ते ३ २९
करेण ते रणेष्यन्त- ३ २६
करोऽतिताम्रो रामाणाम् ३ २१
करोति सहकारस्य ३ ११
कर्णस्य भूषणमिदम् २ २२२
कर्ता यद्युपमानं स्यात् २ २२८
कर्पूरपादपामर्श- ३ १६५
कलं कमुक्तं तनुमध्य- ३ ५९
कलक्कणितगर्भेण २ १०
कलापिनां चारुतया ३ ५६
कल्पदेशीयदेश्यादि- २ ६०
कविभावकृतं चिह्नम् १ ३०

उभयत्र पुमान् कश्चित् २ २०९
उभयव्यतिरेकोऽयम् २ १८२
एकचक्रो रथो यन्ता २ ३२६
एकद्वित्रिचतुष्पाद- ३ २
एकवाक्ये प्रबन्धे वा ३ १३१
एकाकारं चतुष्पादम् ३ ७०
एकाङ्गरूपकं चैतत् २ ७६
एताः षोडश निर्दिष्टाः ३ १०६
एष राजा यदा लक्ष्मीम् १ ५३
ऐन्दवादर्चिषः कामी ३ १८३
ओजः समासभूयस्त्वम् १ ८०
कण्ठे कालः करस्थेन २ १२
कथं त्वदुपलम्भाशा ३ १२
किं तु बीजं विकल्पानाम् २ २
किमयं शरदम्भोदः २ १६१
किं पद्ममन्तर्भ्रान्तालि २ २६
कुतः कुवलयं कर्णे १ १२३
कुब्जामासेवमानस्य ३ १०९
कुमुदानि निमीलन्ति १ ९४
कुमुदान्यपि तापाय २ १७७
कान्तं सर्वजगत्कान्तम् १ ८५
कान्त्या चन्द्रमसं धाम्ना २ ५०
कापिलैरसदुद्भूतिः ३ १७५
कामार्ता घमतप्ता वा ३ १४३
कामेण बाणा निशाताः ३ १५८
कामं कन्दर्प चाण्डालः १ ६४
कामं सर्वोऽप्यलङ्कारः १ ६२
कार्याक्षेपः स कार्यस्य २ १३४
कालकालगलकाल- ३ ५०
कालं कालमनालक्ष्य ३ ३५
काव्यशोभाकरान् धर्मान् २ १
काश्चिन्मार्गविभागार्थम् २ ३
किञ्चिदारभमाणस्य २ २९६
गुणादोषानशास्त्रज्ञः १ ८
गुरुगर्भभरक्लान्ताः १ ९८
गुरोः शासनमत्येतुम् २ २९९
गृहाणि नाम तान्येव १ ८६
गौर्गौः कामदुधा सम्यक् १ ६
चक्षुषी तव रज्येते २ १३१
चतुर्मुखमुखाम्भोज- १ १

कूजितं राजहंसानाम् २ ३३२
कृष्णार्जुनानुरक्तापि २ ३३७
केन कः सह सम्भूय ३ १२२
केषाञ्चिदुपमाभ्रान्तिः २ २२५
कोकिलालापवाचालः १ ४८
कोकिललापसुभगः २ ३५२
क्रीडागोष्टीविनोदेषु ३ ९७
क्षणं दर्शनविघ्नाय २ १४९
क्षिणोतु कामं शीतांशुः २ १७६
क्षितिविजितिस्थिति- ३ ८५
खातयः कनि काले ते ३ १११
गच्छ गच्छसि चेत् कान्त २ १४१
गच्छेति वक्तुमिच्छामि २ १४७
गतिर्न्यायविरोधस्य ३ १७६
गतोऽस्तमर्को भातीन्दुः २ २४२
गतः कामकथोन्मादः २ २४६
गन्ता चेद्गच्छ तुर्णं ते २ १४५
गाम्भीर्यप्रमुखैरत्र २ ८६
गाम्भीर्येण समुद्रोऽसि २ ८६
गिरा स्खलन्त्या नम्रेण ३ ११४
चन्दनप्रणयोद्गन्धिः १ ४९
चन्दनारण्यमाधूय २ २३६
चन्दनोदकचन्द्रांशु- २ ४०
चन्दनं चन्द्रिका मन्दः २ ३०३
चन्द्रबिम्बादिव विषम् २ ३९
चन्द्रमाः पीयते देवैः २ ९०
चन्द्रातपस्य बाहुल्यम् २ २१४
चन्द्रारविन्दयोः कक्षाम् २ ३७
चन्द्रेण त्वन्मुखं तुल्यम् २ ३२
चन्द्रे शरन्निशोत्तंसे १ ५६
चन्द्रोऽयमम्बरोत्तंसः २ १९२
चपलो निर्दयश्चासौ २ २६९
चरन्ति चतुरम्भोधि- २ ९९
चराचराणां भूतानाम् ३ १६३
चारुचन्द्रमसं भीरु १ ५७
चित्रमाक्रान्तविश्वोऽपि २ १६३
चोलाः कालागुरुश्यामाः ३ १६६
छन्दोविचित्यां सकलः १ १२
जगदानन्दयत्येषः २ १७३
जयता त्वन्मुखेनास्मान् ३ १७

गुणजातिक्रियादीनाम् २ ३२१
गुणतः प्रागुपन्यस्य १ २१
जातिक्रियागुणद्रव्यवाचिना २ ९७
जातिक्रियागुणद्रव्यस्वभाव- २ १३
जितः प्रकृष्टकेशाख्यः ३ ११८
जित्वा विश्वं भवानत्र २ ११९
जीविताशाबलवती २ १३९
ज्ञेयः सोऽर्थान्तरन्यासः २ १६७
तत्कथाख्यायिकेत्येका १ २८
तत्पदव्यां पदं धत्ते २ ६४
तथापि कटु कर्णानाम् ३ १५५
तदल्पमपि नोपेक्ष्यम् १ ७
तदस्ततन्द्रैरनिशम् १ १०५
तदिदं वाङ्मयं भूयः १ ३२
तदुपश्लेषणार्थोऽयम् २ २३१
तदेतत्काव्यसर्वस्वम् १ १००
तदेतद्वाङ्मयं भूयः १ ३२
तद्गुरूणां लघूनां च १ ८१
तनुमध्यं पृथुश्रोणि २ ३३४
तव तन्वङ्गि मिथ्यैव २ १२७
जलं जलधरोद्गीर्णम् २ १०५
जहि शत्रुकुलं कृत्स्नम् ३ १३२
त्वदपाङ्गाह्वयं जैत्रम् २ २५३
त्वदर्पितदृशस्तस्याः २ २६१
त्वदाननमधीराक्षम् २ ४४
त्वदाननमिवोन्निद्रम् २ १७
त्वन्मुखं कमलेनैव २ १९
त्वन्मुखं कमलं चेति २ १८८
त्वन्मुखं पुण्डरीकं च २ १९१
त्वया कर्णोत्पलं कर्णे २ १०६
त्वय्येव त्वन्मुखं दृष्टम् २ २२
त्वं समुद्रश्च दुर्वारौ २ १८३
दक्षिणाद्रेरुपसरन् ३ १५०
दण्डे चुम्बति पद्मिन्या ३ ११०
दशत्यसौ परभृतः २ २९४
दिवो जागर्ति रक्षायै २ ४९
दीप्तमित्यपरैर्भूम्ना १ ७२
दुष्करं जीवितोपायम् २ १५२
दूरकार्यस्तत्सहजः २ २५१
दूरे प्रियतमः सोऽयम् २ १३३

तव प्रिया सञ्चरिता-	३	४१
तवाननविमाम्भोजम्	२	१८
तस्य चानुकरोतीति	२	६५
तस्य मुष्णति सौभाग्यम्	२	६३
तस्य राज्ञः प्रभावेण	३	१८०
तापसेनापि रामेण	२	३४२
ताम्राङ्गुलिदलश्रेणि	२	६९
तुण्डैराताम्रकुटिलैः	२	९
तेऽमी प्रयोगमार्गेषु	२	२५२
तेषु तेष्वयथारूढम्	३	१६४
तैः शरीरं च काव्यानाम्	१	१०
धर्म्याक्षेपोऽयमाक्षिप्तः	२	१३०
धैर्यलावण्यगाम्भीर्य-	२	१७९
ध्रुवं ते चोरिता तन्वि	२	२७२
न कठोरं न वा तीक्ष्णम्	२	३२२
नगरार्णवशैलर्तु-	१	१६
न चिरं मम तापाय	२	१३५
न जातु शक्तिरिन्दोस्ते	२	३४
न देवकन्यका नापि	२	३२३
न पद्मं मुखमेवेदम्	२	३६
देवधिष्ण्यमिवाराध्यम्	१	९०
देवानां नन्दनो देवः	३	९३
देशकालकलालोक-	३	१२६
देशोऽद्रिवनराष्ट्रादिः	३	१६२
दोलातिप्रेरणत्रस्त-	३	१८२
दोषाकरेण संबध्नन्	२	३१०
दोषानपरिसंख्येयान्	३	१०७
दोषाभासो गुणः कोऽपि	२	२७०
धनं च बहु लभ्यं ते	२	१३७
धराधराकारधरा	३	७२
धर्माक्षेपोऽयमाक्षिप्तम्	२	१२८
नानावस्थंपदार्थानाम्	२	८
नायकेनैव वाच्यान्या	१	२४
नासिक्यमध्या परितः	१	११४
ना स्थेयः सत्त्वया वर्ज्यः	३	५४
निगृह्य केशेष्वाकृष्टा	२	२८०
निगृह्य नेत्रे कर्षन्ति	३	१३
नियमाक्षेपरूपोक्तिः	२	३१३
निर्णयार्थं प्रयुक्तानि	३	१३९
निर्णेतुं शक्यमस्तीति	२	२१६

न पद्मस्येन्दुनिग्राह्य- २ २७
न पर्यन्तो विकल्पानाम् २ ९६
न प्रपञ्चभयाद्भेदाः ३ ३८
न बद्धा भ्रुकुटिर्नापि २ ३२४
न मन्दयावर्जित- ३ ५७
न मया गोरसाभिज्ञम् ३ १०८
न मीलयन्ति पद्मानि २ ८३
नयनानन्दजनने ३ ८८
नयानयालोचनया ३ ४६
न रथा न च मातङ्गाः २ ३२५
नरा जिता माननया ३ ५५
न लिङ्गवचने भिन्ने २ ५१
नलिन्या इव तन्वङ्ग्याः २ ४५
न विद्यते यद्यपि १ १०४
न श्रद्दधे वाचम् ३ ६५
न संहितां विवक्षामि ३ १५९
न स्तूयसे नरेन्द्र त्वम् २ १६५
न स्पृशत्यायुधम् ३ १२१
नाघ्रातं न कृतं कर्णे २ १५५
द्वादिनोऽमदना धीः स्वा ३ ७५
निर्वर्त्ये च विकार्ये च २ २३८
निवृत्तव्यालसंसर्गः २ २१०
निष्ठ्यूतोद्गीर्णवान्तादि १ ९५
निसर्गादिपदैरत्र २ २०२
निस्त्रिंशत्वमसावेव २ ३१७
नूनं नुन्नानि नानेन ३ ९५
नृत्यन्ति निचुलोत्सङ्गे २ १०३
नेदृशं बहु मन्यन्ते १ ७५
नैकोऽपि त्वादृशोऽद्यापि २ ४७
नैतन्मुखमिदं पद्मम् २ ९४
नैसर्गिकी च प्रतिभा १ १०३
न्यूनमप्यत्र यैः कैश्चित् १ २०
पञ्चानां पाण्डुपुत्राणाम् ३ १८५
पदसन्धानवृत्त्या वा १ ६६
पद्मसंमीलनादत्र २ २६०
पद्मं तावत् तवान्वेति २ २०
पद्मं बहुरजश्चन्द्रः २ ३०
पद्मानामेव दण्डेषु २ ३१८
पद्मान्यर्कांशुनिष्ठ्यूताः १ ९६
पद्मिनी नक्तमुन्निद्रा ३ १६७

गद्यं गद्यं च मिश्रं च १ ११
पन्थाः स एष विवृतः २ ३६५
पयोधरतटोत्सङ्ग- १ ८४
पयोमुचः परीतापम् २ १७१
पादाभिलाषो मे ३ १३४
परम्पराया बलवा ३ ६४
परं प्रहत्य विश्रान्तः १ ६७
परस्परोपकारित्वम् २ ३६२
परागतरुराजीव ३ २७
पवनो दक्षिणः पर्णम् २ ९८
पश्चात् पर्यस्य किरणान् २ २५५
पश्याम्यनङ्गजातङ्क- ३ १४२
पाणिपद्मानि भूपानाम् २ २५७
पातु वो भगवान् विष्णुः ३ २८
पायं पायं तवारीणाम् २ २८६
पिबन्मधु यथाकामम् २ १०४
पुंसः पुराणादाच्छिद्य २ ३४३
पूर्वत्र शब्दवत् साम्यम् २ १९४
पूर्वत्राशयमाहात्म्यम् २ ३०१
पूर्वशास्त्राणि संहृत्य १ २
प्रमेयोऽप्यप्रमेयोऽसि ३ १८४
प्रवृत्तैव प्रयामीति २ १५३
प्रसादवत् प्रसिद्धार्थम् १ ४५
प्रसिद्धहेतुव्यावृत्त्या २ १९७
प्राक् प्रीतिर्दर्शिता सेयम् २ २८९
प्रागभावादिरूपस्य २ २५०
प्रावृषेण्यैर्जलधरैः २ ३३३
प्रत्युत्पादनयोग्यस्य २ २३५
प्रेयः प्रियतराख्यानम् २ २७३
बध्नन्नङ्गेषु रोमाञ्चम् २ ११
बन्धुत्यागस्तनुत्यागः ३ १४७
बिभर्ति भूमेर्बलयम् ३ ६१
ब्रह्मणोऽप्युद्भवः पद्मः २ ३१
भगवन्तौ जगन्नेत्रे २ १७०
भगिनी भगवत्यादि १ ६८
भवादृशा नाथ न ३ ४२
भवानिव महीपालः २ ५३
भाविकत्वमिति प्राहुः २ ३६१
भुजङ्गभोगसंसक्ता २ ३४४
मञ्जरीकृत्य घर्माम्बु २ ७२

पूर्वस्मिन् भेदमात्रोक्तिः २ १९०
पूष्णयातप इवाह्नीव २ ४२
प्रतिज्ञाहेतुदृष्टान्त- ३ १२७
प्रतिपक्षप्रतिद्वन्द्वि- २ ५८
प्रतिबिम्बप्रतिच्छन्द- २ ५९
प्रतिषेधोक्तिराक्षेपः २ १२०
प्रतीयमानसौक्ष्म्यादि- २ १९३
प्रत्याचक्षानया हेतून् २ १३८
प्रभावतो नामन ३ ६३
मधुरेणदृशां मानम् ३ २०
मध्यन्दिनार्कसन्तप्तः २ २२०
मनोभव तवानीकम् ३ ८१
मनोरथप्रियालोक- ३ १४०
मन्दानिलेन चरता ३ १६०
मन्दो गन्धवहः क्षारः २ १०४
मन्ये शङ्के ध्रुवं प्रायः २ २३२
मया मयालम्ब्वकला- ३ ४८
मय्येवास्या मुखश्रीः २ २३
मल्लिकामालभारिण्यः २ २१३
महाराष्ट्राश्रयां भाषाम् १ ३४
मण्डलीकृत्य बर्हाणि १ ७०
मतान्धुनानारमताम् ३ ४९
मदनो मदिराक्षीणाम् ३ ७९
मदपाटलगण्डेन २ ७५
मदरक्तकपोलेन २ ८०
मधुपानकलात् कण्ठात् २ १७४
मधुरं मधुरम्भोज- ३ ८
मधुरं रसवद् वाचि १ ५१
मधुरा रागवर्धिन्यः २ ३१५
मेघनादेन हंसानाम् ३ ५
यच्च सन्ध्यङ्गवृत्त्यङ्ग- २ ३६४
यत्नः सम्बन्धविज्ञान- ३ १४६
यत्नाक्षेपः स यत्नस्य २ १४८
यथा कथञ्चित् सादृश्यम् २ १४
यथेन्दुरिव ते वक्त्रम् २ २३०
यदपीतादिजन्म स्यात् २ २००
यदि किञ्चित् भवेत् पद्मम् २ २४
यदि निन्दन्निव स्तौति २ ३४१
यदि लेपनमेवेष्टम् २ २२७
यदि सत्यैव यात्रा ते २ १४३

महीभृद्भूरिकटकः ३ ३१९
मही महावराहेण १ ७४
मानमस्या निराकर्तुम् २ २९७
मानयोग्यां करोमीति २ २४१
मानिनी मा निनीषुस्ते ३ १६
मानेन मानेन सखि ३ ४
[मानेर्ष्ये इह शीर्येते] पृः २६७
मिश्राणि नाटकादीनि १ ३१
मुक्तकं कुलकं कोशः १ १३
मुखचन्द्रस्य चन्द्रत्वम् २ ९१
मुखपङ्कजरङ्गेऽस्मिन् २ ९३
मुखादित्वं निवर्त्यैव २ ९५
मुखेन्दुरपि ते चण्डि २ ९२
[मुग्धा कान्तस्य यात्रोक्ति-] पृः ११२
मुदा रमणमन्वीत ३ ३०
मृगेक्षणाङ्कंते वक्त्रम् २ ३५
मृणालबाहु रम्भोरु २ ३३५
मृतेति प्रेत्य संगन्तुम् २ २७८
राजहंसोपभोगार्हम् २ ८७
राजितैराजितैक्ष्ण्येन ३ १०
यमः कुवेरो वरुणः २ ३२९
यया कयापि श्रुत्या यत् १ ५२
यशश्च ते दिक्षु रजश्च ३ ६०
यस्याः कुसुमशय्यापि २ २८४
यः स्वरस्थानवर्णानाम् ३ ८३
याति चन्द्रांशुभिः स्पृष्टा २ ३४८
यानमानयमारावि ३ ७६
यामताश कृतायासा ३ ७४
याम यामत्रयाधीना ३ ३६
युवैव गुणवान् राजा २ २६७
योगमालात्मकं नाम ३ १०४
यो लिम्पत्यमुना तुल्यम् २ २२९
रत्नभित्तिषु संक्रान्तैः २ ३००
रमणी रमणीया मे ३ १८
रवेण भौमो ध्वजवर्ति- ३ ४७
रागमादर्शयन्नेषः २ ३१६
राजकन्यानुरक्तं माम् २ २६४
राजन्वत्यः प्रजा जाताः ३ ६
वारणो वा रणोद्दामः ३ ९
विकसन्ति कदम्बानि २ ११७

राजीवमिव ते वक्त्रम् २ १६
राज्ञां विनाशपिशुन: ३ १८१
राज्ञां हस्तारविन्दानि २ २५६
रूढमूल: फलभरै: २ २०७
रूपणादङ्गिनोऽङ्गानाम् २ ७९
रे रे रोरुरुरूरोरु- ३ ९२
रोषाक्षेपोऽयमुद्रिक्त: २ १५४
लास्यच्छलितशम्यादि १ ३९
लिम्पतीव तमोऽङ्गानि २ २२४
लीलास्मितेन शुचिना ३ ४३
लुप्ते पदान्ते शिष्टस्य ३ १५४
लेशो लेशेन निर्भिन्नम् २ २६३
लोकातीत इवात्यर्थम् १ ८९
वक्त्रं चापरवक्त्रं च १ २६
वक्त्रं निसर्गसुरभि २ २०१
वनान्यमूनि न गृहा- २ २४७
वंशवीर्यश्रुतादीनि १ २२
वर्णानां न्यूनताधिक्ये ३ १५६
वर्णानामेकरूपत्वम् ३ ७८
विजितात्मभवद्वेषि ३ १२०
विनायकेन भवता ३ ६८, ६९
विप्रलम्भैर्विवाहैश्च १ १७
विरुद्धानां पदार्थानाम् २ ३३१
विरोध: सकलोऽप्येष: ३ १७९
विवक्षया विशेषस्य २ २१२
विवक्षितगुणोत्कृष्टै: २ ३२८
विशदा विशदामत्त- ३ १४
विशेषणसमग्रस्य २ ८२
विशेष्यमात्रभिन्नापि २ २०६
विश्वव्यापी विशेषस्थ: २ १६८
विषमं विषमन्वेति ३ १५
विष्णुना विक्रमस्थेन २ १०१
विरश्रृङ्गारयोर्भावौ ३ १७०
वीर्योत्कर्षस्तुतिर्निन्दा २ २६८
व्यक्तिरुक्तिक्रमवशात् २ ३६३
व्युत्क्रान्तातिव्यवहित ३ ९९
व्युत्पन्नबुद्धिरमुना ३ १८७
व्युत्पन्नमिति गौडीयै: १ ४६

वर्णावृत्तिरनुप्रासः १ ५५
वर्धते सह पान्थानाम् २ ३५१
वल्गितभ्रुगलद्घर्म- २ ७३
वस्तु किञ्चिदभिप्रेत्य २ २०३
वस्तु किञ्चिदुपन्यस्य २ ४६
वहन्नपि महीं कृत्स्नाम् २ १८६
वाक्यार्थेनैव वाक्यार्थः २ ४३
वाच्यस्याग्राम्यतायोनिः २ २९०
शस्त्रप्रहारं ददता २ ३५४
शिशिरांशुप्रतिद्वन्द्वि २ २८
शुक्लः श्वेतार्चिषो वृद्ध्यै २ १०७
शैशिर्यमभ्युपेत्यैव २ ३०४
श्यामलाः प्रावृषेण्याभिः २ १००
श्रव्यहंसगिरो वर्षाः ३ १६८
श्रीदीप्ती ह्रीकीर्ती ३ ८६
श्रीमानमानमरवर्त्म- ३ ४४
श्लाघ्यैर्विशेषणैर्युक्तम् १ ७९
श्लिष्टमस्पृष्टशैथिल्यम् १ ४३
श्लिष्टमिष्टमनेकार्थम् २ ३०८
श्लेषः प्रसादः समता १ ४१
शतपत्रं शरश्चन्द्रः २ ३३
शब्दहीनमनालक्ष्य- ३ १४८
शब्दार्थालंक्रियाश्चित्र- ३ १८६
शब्देऽपि ग्राम्यतास्त्येव १ ६५
शब्दोपात्ते प्रतीते वा २ १७८
शब्दोपादानसादृश्य- २ १८७
शयनीये परावृत्त्य ३ ११९
शशीत्युत्प्रेक्ष्य तन्वङ्गि २ २५
सामानरूपा गौणार्था ३ १००
समानशब्दोपन्यस्त- ३ १०३
समासश्च बहुव्रीहिः २ ६१
समासातिशयोत्प्रेक्षा २ ५
समुच्चयोपमाप्यस्ति २ २१
समुदायार्थशून्यं यत् ३ १२८
समुद्रः पीयते देवैः ३ १२९
संस्कृतं नाम दैवी वाक् १ ३३
संस्कृतं सर्गबन्धादिः १ ३७
सरूपशब्दवाच्यत्वात् २ २९
सर्गबन्धो महाकाव्यम् १ १४
सर्वत्र भिन्नवृत्तान्तैः १ १९

श्लोकेषु नियतस्थानम् ३ २५२
स एष कारणाक्षेपः ३ १३२
स एष कारणाक्षेपः २ १३२
स एष श्लेषरूपत्वात् २ १८४
सकलापोल्लसनया ३ २२
सकृद्द्विस्त्रिश्च योऽभ्यसः ३ ६७
सङ्ख्याता नाम संख्यानम् ३ १०१
सङ्गतानि मृगाक्षीणाम् २ ३३०
सङ्गमय्य सखीं यूना २ २९५
सत्यं व्रवीमि न त्वं माम् २ १२३
सत्यमेवाह सुगतः ३ १७४
सन्दष्टयमकस्थानम् ३ ५१
सन्नाहितोमानम ३ ६६
सभासु राजन्नसुराहतैः ३ ४०
सभा सुराणामवला ३ ५८
समं बन्धैश्चविषमम् १ ४७
समानया समानया ३ ७१
सुराजितह्रियो यूनाम् ३ ३२
सुराः सुरालये स्वैरम् ३ ११३
सर्वपद्मप्रभासार– २ ३८
स वर्तमानाक्षेपोऽयम् २ २४
सह दीर्घा मम श्वासैः २ ३५०
सहया सगजा सेना २ १२३
सहिष्ये विरहं नाथ २ १५१
सहोक्तिः परिवृत्त्याशीः २ ७
सहोक्तिः सहभावस्य २ ३४९
साचिव्याक्षेप एवैष २ १४६
सा दिनामयमायामा ३ ७७
सा नामान्तरितामिश्र– ३ १२४
सा नामान्तरिता यस्याः ३ १०२
सा भवेदुमयच्छन्ना ३ १०५
सामायामा मायामासा ३ ८२, ८७
सारयन्तमुरसा रमयन्ती ३ ४५
सालं सालम्बकलिका ३ ३४
मुखं जीवन्ति हरिणाः २ ३३९
सुन्दरी सा न वेत्येषः २ १२९
स्मरः खरः खलः कान्तः १ ५९
स्मरानलो मानविवर्धितो यः ३ ६२

सूरिः सुरासुरासारि ३ ९४
सेयमप्रस्तुतैवात्र २ ३४०
सैषा हेतुविशेषोक्तिः २ ३२७
सोमः सूर्यो मरुद्भूमिः २ २७६
सोऽयं भविष्यदाक्षेपः २ १२६
सौरसेनी च गौडी च १ ३५
स्तनयोर्जघनस्यापि २ २१५
स्त्रीणां संगीतविधि- ३ १५३
स्त्रीव गच्छति षण्ढोऽयम् २ ५२
स्थितिनिर्माणसंहार- ३ १४५
स्थितिमानपि धीरोऽपि २ १८५
स्थिरायते यतेन्द्रियः ३ ३९
स्नातुं पातुं बिसान्यत्तुम् २ २२१
स्मितपुष्पोज्ज्वलं लोल- २ ७७
स्वजातिव्यतिरेकोऽयम् २ १९६
स्वभावमधुराः स्निग्धाः २ ३१४
स्वभावाख्यानमुपमा २ ४
स्वयमेव गलन्मान- ३ २३
हन्यते सा वरारोहा ३ १३८
हंसीव धवलश्चन्द्रः २ ५५
हरत्याभोगमाशानाम् २ १११
हरिपादः शिरोलग्न- २ ८१
हतद्रव्यं नरं त्यक्त्वा ३ ११७
हृद्यगन्धवहास्तुङ्गाः २ ११३
हेतुर्निर्वर्तनीयस्य २ २३९
हेतुश्च सूक्ष्मलेशौ च २ २३३

Acc. ३११६१ / 31161

पुस्तकालय

ALL MAHAPURANAS

Text with Shloka Index & Introduction

Title	Pages	Vols / Year	Price
Agni Mahapurana	664 pp		450.00
Bhagavata Mahapurana-	2304 pp	4vols	Set 1500.00
Bhavishya Mahapurana	1400 pp	3vols	Set 1200.00
Brahma Mahapurana	728 pp		450.00
Devi Bhagavata Mahapurana	1154 pp		800.00
Ganesha Purana	832 pp	1993	450.00
Garuda Mahapurana	668 pp		400.00
Harivansha Purana मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी सहित	1802 pp	2vols	set 900.00
Kurma Mahapuran	298 pp		300.00
Linga Mahapurana	774 pp		400.00
Markandeya Mahapurana मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी सहित	828 pp		450.00
Narada Mahapurana	932 pp		600.00
Padma Mahapurana	2381pp	4vols	set 1600.00
Shiva Mahapurana	1504 pp	2vols	set 900.00
Shiva Mahapurana (Small Type)	412 pp		400.00
Skanda Mahapurana	5600 pp	8 vols	set 4000.00
Skanda Mahapurana (small type)	1452 pp	3vols	set 1500.00
Vamana Mahapurana	472 pp		400.00
Vayu Mahapurana	540 pp		400.00
Vishnudharmottara Mahapurana	1246 pp		900.00
Vishnu Mahapurana-with two commentaries	680 pp		500.00
विष्णुमहापुराण मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी सहित —डा० श्रद्धा शुक्ला		2 vols	Press
Maha Bhagavat Devipurana			Press
Ekamara Purana	490 pp		150.00
Kalki Purana	316pp		120.00
Kuber Purana (Text With Study)			Press
Narasimha Purana	380 pp		100.00
Saura Purana	290 pp		100.00
Srimadbhargavopapuranam —Brijesh Kumar Shukla	pp 348		Rs. 124.00
Vasuki Purana	260 pp		100.00
Ashtadasha Purana Darpana Contents of 18 Puranas	432 pp		180.00

PURANAS WITH TEXT, TRANS & NOTES IN ENGLISH VERSWISE

Title	Pages	Vols	Price
Vishnu Purana—*H.H. Wilson*	1065 pp	2 vols	Set 500.00
Matsya Purana—*N.S. Singh*	1252 pp	2 vols	500.00
Narasimha Purana —*Dr.S.Jena*	750 pp		400.00
Kalika Purana *Prof. Biswanarayan Shastri*	1770 pp	3vols	set 900.00

NAG PUBLISHERS
11/A (UA) Jawahar Nagar, Delhi - 110007 (INDIA)